शंका—सर्वगुणोपसंहार का आश्रय करते हैं तो **'सत्यकामत्वादि'** गुणों का भी उपसंहार करना होगा।

समा०—नहीं करना होगा, क्योंकि वे 'सत्यकामत्वादि' गुण, 'कारण लक्षण' हैं, वे 'निर्गुण ब्रह्म के लक्षक नहीं हैं, अतः ब्रह्मा नुसन्धान करने में उनका उपयोग नहीं है। इसलिये निर्गुण प्रकरण में पठित 'आनन्दादि गुणों का ही **सर्वगुणोपसंहार न्याय** से 'उपसंहार करके 'ब्रह्म का अनुसन्धान करना चाहिये, क्योंकि वे ही 'ब्रह्म के लक्षक हैं। एवं च 'सत्य ज्ञान आदि में ही ब्रह्म की **स्वरूप लक्षणता** सम्भव होती है।

शंका—ब्रह्म के 'स्वरूप लक्षण का संभव रहने पर भी पूर्वोक्त जो उसका 'तटस्थ लक्षण (जगदुत्पत्ति-स्थिति-लय-कारणत्व) बताया है, वह 'युक्तियुक्त न होने से उस 'तटस्थ-लक्षण का होना सम्भव नहीं है। क्योंकि **सिद्धान्ती** ने 'ब्रह्म को 'जगत् का **'उपादान कारण** तथा **'निमित्त कारण** भी माना है। किन्तु ब्रह्म में **उपादान कारणता** का होना **संभव ही नहीं** है। क्योंकि **'उपादान कारण** के **तीन प्रकार** हैं—**(१) आरम्भक, (२) परिणामी,** और **(३) विवर्ताधिष्ठान**। इन 'तीन भेदों में से ब्रह्म को किस प्रकार का **'उपादान कारण** माना जाय? **सिद्धान्ती** तो ब्रह्म को **एकमेव—अद्वितीय रूप** मानता है। उस कारण वह 'ब्रह्म, **जगत्** का 'आरम्भक तो बन नहीं सकता। क्योंकि 'परस्पर संयुक्त अनेक द्रव्यों में ही **'आरम्भकता** रहती है।

जैसे **नैयायिकों** के मत में संयुक्त हुए अनेक परमाणुओं में **ही 'जगत्** की 'आरम्भकता मानी जाती है। अतः ब्रह्म में **'आरम्भक उपादानता** तो बन नहीं सकती।

उसी तरह दूसरी **परिणामी उपादानता** भी उसमें नहीं बन सककी, क्योंकि **'साक्षी चेताः केवलो निर्गुणश्च, 'निष्कलं निष्क्रियं शान्तं, 'अविकार्योऽय मुच्यते**—इत्यादि श्रुति-स्मृतिवाक्यों ने 'ब्रह्म को 'निर्गुण, निष्क्रिय और **निरवयव** बताया है। इसलिये **'ब्रह्म में 'परिणामीउपादानता का** भी होना संभव **नहीं है।** गुण और 'क्रिया विशिष्टि दुग्ध **आदि पदार्थ** ही **'दधि के रूप में परिणत** हुआ **करते हैं।**

स च द्विविधः—वाच्यार्थो लक्ष्यार्थश्चेति। मायोपहितं चैतन्यं तत्पदस्य वाच्यार्थः[1]। मायाविनिर्मुक्तं चैतन्यं तत्पदस्य लक्ष्यार्थः[2] ॥६॥

●

ननु सृष्टिस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षणमित्युक्तं, तदनुपपन्नमसम्भवात्। तथाहि—न तावदुपादानकारणत्वं ब्रह्मणः, विकल्पासहत्वात्। तथाहि—किमारम्भकत्वेनोपादानत्वं विवक्षितम्, उत परिणामित्वेन आहोस्विद्विवर्त्ताधिष्ठानत्वेन। नाद्यः, अद्वितीयत्वेन ब्रह्मणोऽनारम्भकत्वात्। न द्वितीयः, केवलो निर्गुणश्च, निष्कलं निष्क्रियं शान्तम् अविकार्य्योऽयमुच्यते इत्यादि श्रुतिस्मृतिभिर्गुणक्रियाशून्यत्वनिरवयवत्वप्रतिपादनेन ब्रह्मणः परिणामित्वायोगात्। न तृतीयः, घटस्सन् पटस्सन्निति सत्यत्वेनानुभूयमानस्य प्रपञ्चस्य ब्रह्मविवर्त्ततया मिथ्यात्वकल्पनायां मानाभवात्। तस्माद् ब्रह्मण उपादानकारणत्वं दुर्निरूप्यम् ॥

नापि जगत्कर्तृत्वेन कारणत्वं ब्रह्मणः। कर्तृत्वं नामोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। तच्च ब्रह्मणो न सम्भवति, ज्ञानचिकीर्षाकृतीनां नित्यत्वे सर्वदा जगदुत्पत्तिप्रसङ्गात्। ततश्च प्रलयप्रतिपादकशास्त्रविरोधः। तेषामनित्यत्वे कार्य्यतया ब्रह्माश्रयत्वायोगाद् ब्रह्मणोऽपरिणामित्वस्योक्तत्वादनादिभावस्यानित्यत्वायोगात् ॥ अतएव नोभयात्मकं ब्रह्मणस्तटस्थलक्षणमित्यसङ्गतम् ॥५॥

कथं तर्हि जगदुत्पत्तिः? शृणु, सत्त्वरजस्तमोगुणात्मिकात्प्रधानान्महदादिक्रमेण जगदुत्पद्यते। तस्य परिणामित्वाज्जगज्जन्मादिकारणत्वं सम्भवति, पुरुषस्त्वसङ्गो निर्विकारी ॥

एवमाशङ्कमानः साङ्ख्यादीन्निराकर्तुं तत्पदार्थं विभजते **स चेति**। द्वैविध्यमाह—**वाच्यर्थः इति**। शक्त्या गम्यमानो

●

उसी तरह तीसरी '**विवर्ताधिष्ठानत्वरूप उपादानता** भी 'ब्रह्म में संभव नहीं है। क्योंकि '**घटः सन्**, '**घटःसन्** इत्याकारण 'घट-घटादि प्रपञ्च का **सत्यरूप** ही लोगों के **अनुभव** में आता है। ऐसे '**सत्यप्रपञ्च**—को 'ब्रह्म का **विवर्त** मानकर उसे **मिथ्या** मानने में कोई **प्रमाण नहीं** हैं, और 'प्रपञ्च को **मिथ्या** माने बिना 'ब्रह्म में **विवर्ताधिष्ठानता** का होना **संभव** नहीं है।

अतः तीनों प्रकार की उपादानता में से किसी भी प्रकार की उपादानता 'ब्रह्म में संभव नहीं हो रही है।

किञ्च—'ब्रह्म में **सृष्टि** (जगत्) की '**कर्तृता** का होना भी संभव नहीं है। क्योंकि ''**कार्य** की 'उत्पत्ति **के** अनुकूल '**ज्ञान, इच्छा,** और **प्रयत्न**—ये तीनों जिसमें रहते हैं, वही '**कर्ता** कहलाता है।

शका—ब्रह्म में 'ज्ञान-इच्छा और प्रयत्न—ये तीनों नित्य हैं, अथवा अनित्य है? यदि उन्हें 'नित्य कहो तो सर्वदा (सभी समय) **सृष्टि** (जगत्) की 'उत्पत्ति होनी चाहिये किसी भी समय (काल में) **सृष्टि** (जगत्) का **प्रलय** नहीं होना चाहिये। ऐसा होने पर 'प्रलय प्रतिपादक शास्त्रवचन' के साथ **विरोध** होगा। यदि उसके 'ज्ञानादिकों' **को** **अनित्य** कहो तो **सृष्टि** (जगत्) के समान उन 'ज्ञान-इच्छादिकों' को भी **कार्य** कहना होगा। तब वे 'ज्ञान आदि, 'ब्रह्म' के **आश्रित नहीं** हो सकेंगे। अतएव 'ब्रह्म' **को अपरिणामी** कहा गया है। इस प्रकार '**ब्रह्म**' में **उपदानता** तथा '**कर्तृता**' का होना संभव नहीं हो रहा है। इस उसमें **अभिन्ननिमित्तोपादनकारणता** का होना भी संभव नहीं हो रहा है। अतः **जगदुत्पत्ति-स्थित-लयकारणत्व** रूप **तटस्थलक्षण** भी संगत नहीं है ॥ ५ ॥

(सां०) पूर्व प०—**कारण** के बिना **कार्य** की उत्पत्ति नहीं हुआ करती—ऐसा नियम होने से 'सृष्टि (जगत्) रूप कार्य' का भी कोई 'कारण तो अवश्य मानना ही होगा, जो '**ब्रह्म' से भिन्न** हो। अतः ब्रह्म से भिन्न कारण तो (सत्त्व-रजस् और तमस्) त्रिगुणात्मक **प्रधान** (प्रकृति) ही हो सकता है। उस **प्रधान** (प्रकृति) से ही 'महत्तत्त्वा' दि के क्रम से यह **सृष्टि** **(जगत्)** उत्पन्न होती है। वह **प्रधान** (प्रकृति) **परिणामी** होने से 'सृष्टि' (जगत्) **की** उत्पत्ति आदि का कारण हो सकता है।

किञ्च—आत्मा (पुरुष) तो **असंग** है और **निर्विकार** है। उसकारण 'पुरुष' 'सृष्टि का कारण' मानना कथमपि **संभव नहीं है।**

---

१. तत्पदवाच्यार्थं इत्यपि पाठः।

२. तत्पदलक्ष्यार्थं इत्यपि पाठः।

वाच्यार्थः। लक्षणया गम्यमानो **लक्ष्यार्थः**। **को तौ वाच्यलक्ष्याविरयाशङ्कायामाह—मायेत्यादि**। एतदुक्तम्भवति—यद्यपि शुद्धस्यापरिणामित्वे नोपादानत्वं तथापि मायोपहितस्य तत्त्वम्भवत्येव। तदपि विवर्त्ताधिष्ठानत्वेन। अतत्त्वतोऽन्यथाभावो विवर्त्तस्तदधिष्ठानत्वं मायोपहितस्य न विरुध्यते। न च घटः सन्निति सत्यत्वानुभवेन प्रपञ्चस्य ब्रह्मविवर्त्ततया मिथ्यात्वानुपपत्तिरिति वाच्यम्, अनुभवस्याधिष्ठानसत्यत्वविषयतया मिथ्यात्वे बाधकाभावात्। नहि प्रपञ्चस्य स्वतः सत्तासम्बन्धः सम्भवति "नेह नानास्ति किञ्चने त्यादिशास्त्रेण तस्य प्रतिषेधात्। नापि मिथ्यात्वे प्रमाणाभावः; वाचारम्भणश्रुतेरेव प्रमाणत्वात्। मिथ्यात्व-निरुक्तिरग्रे वक्ष्यते॥

किञ्च जगदुपादानत्वं ब्रह्मणोऽवश्यमभ्युपगन्तव्यम् "यत्प्रयन्त्यभिसंविशन्तीति तस्मिल्लयश्रवणात्। यस्य यत्र लयस्तत्तस्योपादानमिति व्याप्तेर्घटादेः कारणे मृदादौ दृष्टत्वात्। "बहुस्यां प्रजायेयेति ब्रह्मणो बहुभवनश्रवणाच्च। नह्यनुपा-दानस्य बहुभवनं सम्भवति।

अपि च प्रत्युत प्रधानस्यैव जगदुपादानत्वन्न भवति तस्याप्रमाणिकत्वात्। नहि क्वचिच्छ्रुतौ प्रधानस्य त्रिगुणात्मक-स्योपादानत्वमगम्यते। सर्वत्र श्रुतिषु "आत्मन आकाशः सम्भूत इत्यादिषु चेतनस्य ब्रह्मण एवोपादानत्वावगमात्॥

●

समा०—उपर्युक्त आशङ्का 'सांख्यवादियों'—(प्रकृतिवादियों) की है।

उसके निराकरण करने के लिये पूर्वोक्त तत् पदार्थ के विभाग का निरूपण किया जा रहा है—

वह भी दो प्रकार का है—वाच्यार्थ और लक्ष्यार्थ। माया से उपहित चेतन तत्-शब्द का वाच्य अर्थ है। माया से छूटा हुआ (=असम्बद्ध) चेतन तत्-शब्द का लक्ष्य अर्थ है।

वह (तत् पद का अर्थ) दो प्रकार का होता है (१) वाच्य अर्थ और (२) लक्ष्य अर्थ। जो अर्थ जिस पद की शक्ति (वृत्ति से ज्ञात होता है, वह (अर्थ) उस पद का वाच्य अर्थ कहलाता है। उसी तरह जो अर्थ, जिस पद की लक्षणावृत्ति से ज्ञात होता है, उस अर्थ को लक्ष्य अर्थ कहते हैं। शक्ति और लक्षणा के स्वरूप को द्वितोय परिच्छेद में बताया जाएगा। **माया से उपहित चैतन्य तो तत् पद का वाच्य अर्थ है, और माया से अनुपहित (रहित) शुद्ध चैतन्य को तत् पद का लक्ष्यार्थ कहते हैं।**

समाधानपरक उपर्युक्त ग्रन्थ का अभिप्राय यह है कि यद्यपि माया से रहित (अनुपहित) निर्विकार शुद्ध ब्रह्म में सृष्टि की उपादानकारणता का होना संभव नहीं है, तथापि मायोपहित ब्रह्म में उपादानकारणता का होना संभव हो सकता है। वह उपादानकारणता, आरम्भकतारूप अथवा परिणामितारूप न होकर विवर्ताधिष्ठानत्वरूप है। अधिष्ठानवस्तु के अवास्तविक अन्यथाभाव को विवर्त कहते हैं। कहा भी है—अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः। जैसे—रज्जु शुक्तिका आदि अधिष्ठान वस्तु का अवास्तविक, सर्प, रजतादि के रूप में अन्यथाभावा हुआ करता है, वैसे ब्रह्म का भी यह जगत् अवास्तविक अन्यथाभाव है। इस जगद्रूप विवर्तकी अधिष्ठानता, मायोपहित ब्रह्म में संभव होती है।।

किञ्च—पूर्वपक्षी ने जो यह कहा था कि घटः सन् पटः सन् इत्यादि अनुभव से सृष्टि (जगत्) की सत्यता ही सिद्ध होती है, उस कारण सृष्टि (जगत्) को ब्रह्म का विवर्त बताकर उसमें (सृष्टि में) मिथ्यात्व को संभावना नहीं की जा सकती।

किन्तु पूर्वपक्षी का उक्त कथन असंगत है। क्योंकि उन 'घट·पट आदि पदार्थों का अधिष्ठान जो चैतन्य है, उसकी सत्यता को ही उक्त अनुभव बता रहा है। अर्थात् उक्त अनुभव, चेतन्य की सत्यता को ही अपना विषय बना रहा है, न कि घट-पटादिकों की सत्यता को। इसलिये उक्त अनुभव, इस प्रपञ्च के मिथ्यात्व में बाधक नहीं हो रहा है। तथा 'नेह नानास्ति किञ्चन' यह श्रुति, ब्रह्मातिरिक्त सम्पूर्ण प्रपञ्च का निषेध कर रही है, उस कारण प्रपञ्च की स्वतः सत्ता का होना कथमपि संथव नहीं है।

किञ्च—पूर्वपक्षी ने जो कहा था कि सृष्टि का मिथ्यात्व सिद्ध करने में कोई प्रमाण नहीं है। वह भी असंगत है, क्योंकि, वाचारम्भणं विकारो नामधेयम्—यह श्रुति ही सृष्टि के मिथ्यात्व को बता रहो है।

किञ्च—ब्रह्म में जगत् की उपादानकारणता का स्वीकार अवश्य करना चाहिये। क्योंकि यत्प्रयन्त्यभि-संविशन्ति—यह श्रुति, ब्रह्म में ही सृष्टि के लय को बता रहो है। जिस कार्य का किस कारण में लय होता है, वह (कारण), उस कार्य का उपादानकारण कहलाता है। जैसे—घटादिकार्य का मृत्तिकाकि कारण में ही लय होता है, उस कारण वे

न चोदाहृतश्रुतिष्वात्मन एवोपादानत्वमवगम्यते न ब्रह्मण इति वाच्यम्। "तत् सृष्ट्वा तदेवानुप्राविशदिति जीवभावेन ब्रह्मणः प्रवेशश्रवणात्। ब्रह्मण एवात्मतयोपादानत्वोपपत्तेः ॥

किञ्च "तदैक्षत 'सोऽकामयत बहुस्यां प्रजायेयेति बहुभवनकर्त्तुः कारणस्य सर्वत्र कामयितृत्वेक्षितृत्वश्रवणाद् ब्रह्मण एवोपादानत्वं, न प्रधानस्येक्षितृत्वादेरसम्भवात् तस्य चेतनधर्म्मत्वात् मुख्ये सम्भवति गौणस्यान्यायत्वात्। तस्माद्-ब्रह्मणएवोपादानत्वं न प्रधानस्येति सिद्धम् ॥

एवं मायोपहितस्य जगत्कर्त्तृत्वमपि सम्भवति। तच्च पूर्व्वोक्तमेव। ज्ञानेच्छाकृतयो मायोपहितस्येश्वरस्य जन्या अनित्याश्चअपरिणामित्वेन शुद्धस्य तदाश्रयत्वाभावेऽपि मायोपहितस्य तदाश्रयत्वं सम्भवत्येव। तस्य सर्वविवर्त्ताधिष्ठानत्वान्नोक्त-दोषः। तस्मादुभयात्मकं सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणं सम्भवतीति सिद्धम् ॥६॥

●

मृत्तिकादि कारण ही घटादि कार्यों के उपादानकारण कहे जाते हैं। उसी तरह जगत् के लय का आधार ब्रह्म है, अतः ब्रह्म को ही सृष्टि (जगत्) का उपादानकारण मानना चाहिये।

किञ्च—बहुस्यां प्रजायेय—इस श्रुति ने ब्रह्म का ही बहुत होना बताया है, लोक व्यवहार में भी मृत्ति का—सुवर्ण आदि उपादान कारणों का ही घट-शराव आदि तथा कटक-कुण्डलादि के रूप में बहुत होना दृष्टिगोचर होता है, उस कारण भी ब्रह्म में सृष्टि (जगत्) की उपादान कारणता सिद्ध हो रही है।

किञ्च—सांख्याचार्य प्रधान को सृष्टि का उपादान कारण मानते हैं, किन्तु वह सम्भव नहीं है, क्योंकि प्रधान में जगत् की उपादानता को बताने वाला कोई प्रमाण नहीं है। अर्थात् किसी श्रुति ने प्रधान को जगदुपादान के रूप में नहीं बताया है।

प्रत्युत आत्मन आकाशः संभूतः—इत्यादि श्रुति वचन, चेतन ब्रह्म को ही जगत् का उपादान कह रहे हैं।

शंका—उपर्युक्त श्रुति तो जीवात्मा में जगत् की उपादानता को बता रही है, ब्रह्म में नहीं। तब ब्रह्म को जगत् का उपादान कैसे माना जा सकता है ?

समा०—तत्सृष्ट्वा तदेवानुप्राविशत् इत्यादि श्रुतियों ब्रह्म ही जीवात्मा बन कर सृष्टि (जगत्) में प्रविष्ट हुआ है—यह कहा है। इस से स्पष्ट हो रहा है कि यह जीवात्मा ब्रह्म से भिन्न नहीं है। अर्थात् वह ब्रह्म ही आत्मा (जीवात्मा) के रूप में विराजमान है। उस कारण इस ब्रह्म रूप आत्मा को आकाशादि जगत् का उत्पादक (उपादान कारण) कहा गया है। अतः ब्रह्म की जगदुपादनता स्पष्ट हो जाती है।

किञ्च—तदैक्षत सोऽकामयत बहुस्यां प्रजायेय—इस श्रुति ने बहुत रूप होनेवाले कारण निष्ठ ईक्षण की कर्तृता बताई है। इस कथन से भी ब्रह्म की ही उपादानता सिद्ध होती है, प्रधान की नहीं क्योंकि ईक्षण-कामना का कर्तृत्व (ईक्षण-कामना का करना), चेतन का ही धर्म है, अर्थात् चेतन ही ईक्षण-कामना आदि का कर्ता हो सकता है, कोई अन्य जड़ पदार्थ उनका कर्ता नहीं हो सकता। क्योंकि कर्तृत्व धर्म की स्थिति चेतन में ही हो सकती है, जड़ में नहीं।

सांख्य वादियों का प्रधान तो जड़ है। अतः उस में ईक्षण-कामना कर्तृत्व धर्म कैसे संभव हो सकेगा ? इस लिये ब्रह्म में ही जगदुपादानता को स्वीकार करना चाहिये, प्रधान में नहीं।

किञ्च—मायोपहित ब्रह्म में उपादानता की तरह जगत्कर्तृत्व का भी संभव हो सकता है, उसे पहले बता चुके हैं। मायोपहित ईश्वर के ज्ञान, इच्छा, प्रयत्न—ये तीनों जन्य और अनित्य होते हैं। जन्य और अनित्य रहने वाले ज्ञान, इच्छा, प्रयत्न की आश्रयता, यद्यपि निर्विकार शुद्ध ब्रह्म में संभव नहीं हो सकती, तथापि मायोपहित ब्रह्म में उक्त तीनों की आश्रयता संभव हो सकती है। उस कारण मायोपहित ब्रह्म में ही सर्व विवर्त रूप जगत् की अधिष्ठानता मानी जाती है, इसलिये—पूर्वोक्त किसो दोष की संभावना नहीं की जा सकती। अतः ब्रह्म का तटस्थ लक्षण अभिन्न निमित्तोपादन कारणत्व, (उभयात्मक सृष्टि स्थिति लय कारणत्व) जो कहा गया है, वह उचित ही है ॥६॥

अथ केयं माया ? शृणु । यथा शुक्त्यादौ रजतादि कल्पितम् तथा चेतनेऽचेतनं कल्पितम् ॥७॥

●

मायास्वरूपं पृच्छति—**अथेति । किम्** शब्दः प्रश्नार्थे । माया कीदृशीत्यर्थः । आक्षेपार्थे वा किंशब्दः—माया न सम्भवतीति, स्वरूपलक्षणप्रमाणानिरूपणात् । तथाहि किम्माया सत्या मिथ्या वा ? आद्ये ब्रह्मभिन्ना तदभिन्ना वा ?

नाद्यः अपसिद्धान्तप्रसङ्गात् । किञ्च ब्रह्मणोऽसङ्गत्वेन केनाप्यसम्बन्धात् मायोपहितत्वमनुपपन्नमेव । न तावद्ब्रह्मणो मायया संयोगः सम्भवति । संयोगस्याव्याप्यवृत्तित्वेन सावयवधर्म्मतया निरवयवत्वेन ब्रह्मणो मायया संयोगायोगात् । नापि समवायस्सम्भवति अनङ्गीकारात् । नापि तयोस्तादात्म्यं भिन्नयोस्तादात्म्यायोगात् । नापि तयोर्भेदाभेदौ विरुद्धत्वात् । तस्माद्ब्रह्मणो मायोपहितत्वमनुपपन्नम् ॥ न द्वितीयः जडाजडयोरभेदायोगात् ।

नाद्यद्वितीयः ईश्वरस्य मिथ्यात्वप्रसङ्गात् । नच तदिष्टं मोक्षशास्त्राप्रामाण्यप्रसङ्गात् । नहि मिथ्यावस्तुज्ञानेन मोक्षः सम्भवति । एवं मायास्वरूपं दुर्निरूप्यम् । अत एव तल्लक्षणमपि दुर्निरूप्यम् । सति धर्म्मिणि धर्म्माश्चिन्त्यन्त इति न्यायात्

●

यह माया क्या है ? सुनो । जैसे सीप आदि में चाँदी आदि कल्पित होता है वैसे चेतन में अचेतन कल्पित है ।

शङ्का—मायोपहित ब्रह्म, यदि सृष्टि का कारण है, तो माया, के स्वरूप, लक्षण, तथा प्रमाण तीनों को बताकर माया का अस्तित्व प्रथमतः सिद्ध करना होगा, किन्तु उसका अस्तित्व किसी तरह भी सिद्ध नहीं किया जा सकता ! अतः माया नाम की कोई वस्तु ही नहीं है । **तो फिर आप 'माया किसे कहते हैं ?**

तथाहि—माया के स्वरूप, लक्षण और प्रमाण के विचारार्थ 'माया सत्य है अथवा असत्य ?' यह विचारना होगा । उपर्युक्त प्रथम विकल्प में भी यह विचारना होगा कि वह ब्रह्म से भिन्न है या अभिन्न ?

यदि प्रथम (भिन्न) पक्ष का स्वीकार करते हैं तो 'एकमेवाऽद्वितीयं ब्रह्म'—इस श्रुति के साथ विरोध होगा, क्योंकि श्रुति, ब्रह्म को अद्वितीय बता रही है तब ब्रह्म की अद्वितीयरूपता, ब्रह्म के अतिरिक्त सत्य माया के विद्यमान रहने पर संभव नहीं होगी ।

किञ्च—'असङ्गो नहि सज्जते—यह श्रुति ब्रह्म को असंग बता रही है । तब असंग ब्रह्म का किसी के साथ सम्बन्ध होना संभव नहीं है, और सम्बन्ध हुए बिना वह माया से उपहित नहीं कहला सकेगा ।

किञ्च—माया का उसके साथ सम्बन्ध यदि मान भी लें तो वह कौन सा सम्बन्ध होगा ? क्या संयोग सम्बन्ध होगा ? या समवाय सम्बन्ध होगा ? या तादात्म्य सम्बन्ध होगा ? अथवा भेदाऽभेद सम्बन्ध होगा ?

उक्त विकल्पों में से प्रथम (संयोग) पक्ष तो संभव नहीं है, क्योंकि संयोग पदार्थ, अव्याप्यवृत्ति है, उस कारण वह (संयोग) सावयव द्रव्यों का ही धर्म माना जाता है ।

जेसे—पक्षी का वृक्ष के साथ जो संयोग है, वह सम्पूर्ण वृक्ष में व्याप्त नहीं रहता, किन्तु वृक्ष के किसी एक शाखा (भाग) के साथ ही रहता है । इसलिये उसे अव्याप्यवृत्ति कहा जाता है । इसलिये उसे (संयोग को), पक्षी तथा वृक्ष—इन दो सावयवद्रव्यों का ही धर्म माना जाता है ब्रह्म तो निरवयव द्रव्य है । इसलिये ब्रह्म का माया के साथ संयोग सम्बन्ध का होना संभव नहीं है ।

उसी तरह द्वितीय (समवाय) पक्ष भी संभव नहीं हो रहा है, क्योंकि वेदान्तियों (सिद्धान्तवादी) ने समवाय सम्बन्ध को स्वीकार नहीं किया है । अतः समवाय सम्बन्ध मानने पर सिद्धान्त भङ्ग होगा ।

किञ्च—गुण-गुणी, क्रिया-क्रियावान्, जाति-व्यक्ति, अवयव-अवयवी, विशेष-नित्यद्रव्य इनमें ही समवाय सम्बन्ध होता है । एवञ्च ब्रह्म और माया में गुण-गुणि भावादि है नहीं । उस कारण ब्रह्म का माया के साथ समवाय सम्बन्ध भी नहीं हो सकता ।

उसी तरह तृतीय (तादात्म्य) पक्ष भी संभव नहीं हो रहा है, क्योंकि भेद से रहित पदार्थों का ही तादात्म्य होता है । किन्तु ब्रह्म और माया दोनों का दोनों में परस्पर भेद है । अतः दोनों भेद सहित ही हैं, भेद रहित नहीं हैं । इसलिये दोनों का परस्पर तादात्म्य होना संभव नहीं है ।

"इदं सर्वं यदयमात्मा "आत्मैवेदं सर्वं "ब्रह्मवेदं सर्वं "पुरुष एवेदं विश्वं "सर्वं खल्विदं ब्रह्म "वासुदेवः सर्वमिति "नारायणः सर्वमिदं पुराण इत्यादिश्रुतिस्मृतिशतैः[1] अचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनात्। चेतनाचेतनयोरभेदायोगाच्च ॥८॥

●

धर्म्मिणो दुर्निरूपत्वे तद्धर्म्मलक्षणस्यापि सुतरां दुर्निरूपत्वात्। अत एव तत्र प्रमाणमपि दुर्निरूपं निर्विषयप्रमाणप्रवृत्तेरयोगात्॥ तस्मान्मायाया दुर्निरूपत्वात् उपहितस्य तत्पदवाच्यत्वमनुपपन्नमिति।

समाधत्ते **शृण्विति**। मायास्वरूपं निरूप्य[2] तदुपहितचैतन्यमीश्वरः स एव तत्पदवाच्यार्थः। तस्य जन्मादिकारणत्वं तटस्थलक्षणमिति वक्तुं तदुपोद्घातत्वेन परमात्मनि सदृष्टान्तमध्यासमान्यमाह—**यथेति**। प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः। अचेतनमज्ञानं तत्कार्य्यं कल्पितमध्यस्तमित्यर्थः ॥७॥

●

उसी तरह चतुर्थ (भेदाऽभेद) पक्ष भी ठीक नहीं है, क्योंकि भेद और अभेद—दोनों परस्पर विरुद्ध हैं, उस कारण वे एक अधिकरण में नहीं रहते। इस रीति से ब्रह्म का माया के साथ कोई भी सम्बन्ध नहीं बन सकता, तब ब्रह्म को माया से उपहित कैसे कह सकते हैं?

अब यदि माया ब्रह्म से भिन्न नहीं सिद्ध होती तो उसे यदि ब्रह्म से अभिन्न स्वीकार करना चाहें, तो वह भी ठीक नहीं है। क्योंकि ब्रह्म तो चेतन है, और माया जड़ है। जड़ और चेतन का अभेद कैसे हो सकता है?

किञ्च—उपर्युक्त पक्ष का अंगीकार कर नहीं सकते, क्योंकि माया के मिथ्या (असत्य) रहने पर उस माया से विशिष्ट हुए ब्रह्म में भी मिथ्यात्व प्राप्त होगा। यदि ब्रह्म को भी मिथ्या मान लिया जाय तो ब्रह्म के ज्ञान से मोक्षप्राप्ति का प्रतिपादन करने वाला मोक्षशास्त्र अप्रमाण कहलायेगा। क्योंकि मिथ्या वस्तु के ज्ञान से मोक्षप्राप्ति का होना संभव नहीं है।

इस प्रकार से माया का स्वरूप दुर्निरूपणीय है। क्योंकि धर्मी के विद्यमान रहने पर ही उसके धर्म का विचार होता रहता है। जब कि धर्मी ही दुर्निरूपणीय है, तब उसके असाधारण धर्म रूप लक्षण का निरूपण करना कथमपि संभव नहीं है। एवं माया का निरूपण ही न हो पाने से उसका प्रमाण भी दुर्निरूपणीय है। क्योंकि प्रमेय के अस्तित्व के बिना किसी भी प्रमाण की प्रवृत्ति नहीं हुआ करती।

एवञ्च माया के अस्तित्व में स्वरूप, लक्षण और प्रमाण—इन तीनों के न रहने से मायोपहित चैतन्य को तत् पद का वाच्यार्थ बताना कैसे संभव हो सकता है?

समा०—शृण्विति। उपर्युक्त आशङ्का के उपस्थित होने पर स्वरूप, लक्षण और प्रमाण—इन तीनों के सहित माया का निरूपण करने के लिये प्रथमतः उपोद्घात के रूप में दृष्टान्त सहित ब्रह्म में अध्यास सामान्य का निरूपण कर रहे हैं। प्रतिपाद्य अर्थ को बुद्धिगत करके उसकी सिद्धि के लिये प्रथमतः जो अन्य अर्थ (अर्थान्तर) का कथन किया जाता है, उसे 'उपोद्घात' कहते हैं। **जैसे—शुक्ति, रज्जु आदि विषयों पर रजत सर्प आदि की कल्पना की जाती है, उसी तरह चेतन ब्रह्म पर यह अचेतन (जड़) अज्ञान और उसका कार्य, जो सृष्टि, वह कल्पित (अध्यस्त) है।**

स्वरूप, लक्षण और प्रमाण के द्वारा माया का अस्तित्व निश्चित है, और उससे उपहित चैतन्य जो ईश्वर (ब्रह्म) है, वह 'तत्' पद का वाच्यार्थ है। उसी का जन्मादिकारणत्व रूप तटस्थ लक्षण भी बताया गया है। उसी का प्रतिपादन करने के लिये उपोद्घात की रचना की गई है ॥ ७ ॥

जो यह सब है वह आत्मा है, यह सब आत्मा ही है, यह सब ब्रह्म ही हैं, यह विश्व पुरुष ही है, यह सब निश्चित रूप से ब्रह्म ही है, वासुदेव सब कुछ हैं, यह सब पूर्व में भी नवीन रहने वाला नारायण है, इत्यादि सैकड़ों श्रुति-स्मृति वाक्यों द्वारा यह प्रतिपादित है कि चेतन से अतिरिक्त जड़ का स्वतन्त्र भाव (सत्ता) नहीं है तथा चेतन व अचेतन का अभेद होना युक्ति संगत नहीं, इसलिये (निश्चित है कि चेतन में जड़ कल्पित ही है) ॥८॥

१. स्मृतिवाक्यशतैः इत्यपि पाठः।

२. द्वादशेऽनुच्छेदे।

चेतने ब्रह्मण्यचेतनस्य कल्पितत्वे श्रुतार्थापत्तिं प्रमाणमाह—**इदं सर्वमित्यादिना।** इदं सर्वमित्यनेन प्रमाणोपस्थितं आकाशादिजडजातं प्रतिपाद्यते। आत्मशब्देनाद्वितीयः सर्वसाक्षी प्रत्यग्भूतः परमात्मा प्रतिपाद्यते। जडचेतनयोरैक्यायोगात्। आत्मसर्वशब्दयोस्सामानाधिकरण्यं बाधायां योऽयं चोरः स स्थाणुरिति वत्। तथा च यथा दृष्टान्तवाक्ये स्थाणुव्यतिरेकेण चोराभावः चोरस्थाणुशब्दयोरवगम्यते तथा दार्ष्टान्तिकेऽपि श्रुतिवाक्ये आत्मव्यतिरेकेण कृत्स्नजडाभावः आत्मसर्वशब्दयोः सामानाधिकरण्यादवगम्यते। स चाभावः स्वप्रतियोगिनः प्रपञ्चस्य ब्रह्मणि कल्पितत्वमन्तरेणानुपपन्नः सन् तस्य कल्पितत्वं कल्पयति। इयं श्रुतार्थापत्तिः। अनयाऽचेतनस्य चेतने कल्पितत्वमवगम्यत इति भावः। एवमयमर्थो वाक्यान्तरेष्वपि समानः। पूर्णत्वात्पुरुषः परमात्मनैतेन।

किञ्च 'नासंवृत्तमिति, श्रुत्यन्तरात् सर्वेषु भूतेषु वसति सर्वभूतानि चास्मिन् वसन्तीति वासुदेवः सर्वान्तर्यामी परमात्मा। तथाचोक्तम्—

●

शङ्का—चेतन में अचेतन कल्पित है, यह किस प्रमाण से ज्ञात हो रहा हैं ?

समा०—श्रुतार्थापत्ति प्रमाण से चेतन में अचेतन का कल्पित होना ज्ञात होता है। श्रवण किये हुए वाक्य के अर्थ की अनुपपत्ति होने पर जो अर्थान्तर की कल्पना की जाती है, उसे 'श्रुतार्थापत्ति कहते हैं। श्रुतार्थापत्ति के द्वारा चेतन में अचेतन की कल्पना (अध्यास) कैसे किया जाता है, उसे बता रहे हैं—**इदं सर्वं यदयमात्मा, आत्मैवेदं सर्वम्, ब्रह्मैवेदं सर्वम्, पुरुष एवेदं विश्वम्, सर्वं खल्विदं ब्रह्म, वासुदेवः सर्वम्, नारायणः सर्वमिदं पुराणः—इत्यादि अनेक श्रुतिस्मृतिवाक्यों में चेतन से भिन्न अचेतन का अभाव ही बताया गया है।** तथा उक्त श्रुतिवाक्यों में प्रयुक्त हुए 'इदं सर्वं पदों से प्रत्यक्ष दृश्यमान इस आकाशादि जड़ जगत् को बताया है, और आत्मा ब्रह्म, पुरुष, वासुदेव, नारायण इन शब्दों से अद्वितीय, सर्वसाक्षी, प्रत्यक्रूप परमात्मा को बताया है।

किञ्च—उपर्युक्त श्रुतिवचनों में प्रपञ्च का वाचक इदं सर्वम् पद है, तथा परमात्मा का वाचक आत्मा शब्द है। इन दोनों शब्दों (पदों) का सामानाधिकरण्य प्रतीत हो रहा है। किन्तु जड जगत् और चेतन आत्मा, दोदों का ऐक्य होना कभी भी संभव नहीं है। उस कारण **चेतन और अचेतन दोनों के अभेद प्रतिपादकत्व रूप मुख्य सामानाधिकरण्य का होना यहाँ संभव नहीं है।** किन्तु योऽयं चोरः स स्थाणुः—इस वाक्य में चोर और स्थाणु—इन दोनों शब्दों का जैसे बोध—सामानाधिकरण्य है, उसी तरह आत्मैवेदं सर्वम् इन्यादि श्रुति वाक्यों में आत्मा और सर्व—दोनों पदों का भी बोध सामानाधिकरण्य है।

अभिप्राय यह है कि दृष्टान्त में चोर—और स्थाणु—इन दोपों पदों के सामानाधिकरण्य से स्थाणु से भिन्न चोर का अभाव अवगत होता है। उसी तरह दार्ष्टान्तिक श्रुतिवाक्य में भी आत्मा और सर्व—इन दोनों पदों का सामानाधिकरण्य रहने आत्मा से भिन्न सम्पूर्ण जड़ जगत् का अभाव ही प्रतीत होगा। अर्थात् 'प्रपञ्चाभाववान् आत्मा'—इत्याकारक बोध उक्त श्रुतिवाक्य से होगा। एवंच जड़ प्रपञ्च की कारणता ब्रह्म में तभी संभव हो सकेगी, जब जड़ प्रपञ्च को ब्रह्म में कल्पित मानेंगे। प्रपञ्च को कल्पित माने बिना उस प्रपञ्च के अभाव का संभव नहीं है। एवं च श्रुत्युक्त जड़प्रपञ्च का अभाव, अपने प्रतियोगी जड़ प्रपञ्च की कल्पना किये बिना अनुपपन्न है। परन्तु लयप्रतिपारक श्रुतिवाक्यों के द्वारा प्रपंच का अभाव स्पष्टतया अवगत होने के कारण वह जड़ प्रपञ्च के कल्पित होने की कल्पना कराता है। **इस प्रकार की श्रुतार्थपत्ति से ही चेतन में अचेतन (जड़) के कल्पित होने की कल्पना की जाती है।** इसी रीति से अन्यान्य श्रुति-स्मृति के वचनों को लगाना चाहिये। क्योंकि यह तथ्य अन्यवाक्यों में भी 'पूर्णत्वात्—पुरुषः परमात्मना'—आदि वाक्य से एक सा ही (तुल्य सा ही) प्रतीत होता है।

किञ्च—'नासंवृत्तम्',—इस अन्यश्रुति से स्पष्टतया प्रतीत हो रहा है कि सम्पूर्ण भूतों में 'वह' वास करता है, और सम्पूर्ण भूत मात्र भी उसी में निवास करते हैं, अतः 'वासुदेव' ही सर्वान्तिर्यामी परमात्मा है।

कहा भी है यह सर्वत्र है और सब इसमें बसता है इसलिये विद्वान् इसे वासुदेव कहते हैं।

तथा—

'नर' से जो तत्त्व उत्पन्न हैं, उसे 'नार' कहते हैं, वे ही (नार ही) हैं 'अयन' (स्थान) जिसका उसे 'नारायण' कहा गया है।

"सर्वत्रासौ समस्तश्च वसत्यत्रेति वै यतः। ततश्च वासुदेवाख्यो विद्वद्भिः परिपद्यते ॥

इति ॥ नराज्जातं नारं तच्चायनं यस्य स नारायणः सर्वान्तर्यामीत्यर्थः। तदुक्तं महाभारते—

"नराज्जातानि तत्त्वानि नाराणीति ततो विदुः। तानि तस्यायनं पूर्वं तेन नारायणः स्मृतः ॥

इति। अस्यार्थः—प्रत्यगभिन्नात्परमात्मनो नरादुत्पन्नानि तत्त्वानि चतुर्विंशतिः। तानि भगवता दर्शितानि

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥

अथवा नारमुदकमयनमस्येति वा विग्रहः। तथाच मनुनोक्तम्

'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणस्मृतः ॥ इति ॥

ननु सर्वात्मशब्दयोः सामानाधिकरण्यान्नीलोत्पलादिवत्तादात्म्यमेवास्तु। नच नीलोत्पलयोर्गुणगुणिभावात्तादात्म्येऽपि प्रकृते तदभावाज्जडाजडयोर्विरुद्धस्वभावत्वाद्भिन्नाभिन्नलक्षणं तादात्म्यं कथमिति वाच्यम्। तर्हि मृद्घटयोरिव कार्य्यकारणभावसम्भवेन तयोस्तत्सम्भवात्। अथवा शाखिशाखयोरिव जडाजडयोरभेदो वास्तु इत्याशङ्क्याह—अचेतनेति[1]।

अयम्भावः—चेतनाचेतनयोर्विरुद्धस्वभावत्वान्न तादात्म्यम्। नच मृद्घटयोरिव कार्य्यकारणभावेन तत्सम्भवति अपरिणामित्वेन कार्य्यकारणभावस्य निरस्तत्वात्। विवर्त्तत्वेन तदुपगमेऽचेतनस्य कल्पितत्वमागतमेव। वृक्षशाखयोरवयवावयविभावसम्भवेन भेदाभेदे सत्यपि चेतनस्य ब्रह्मणो निरवयवत्वेन विभुत्वेन च चेतनाचेतनयोरवयवावयविभावायोगाद् अभेदो[2] न भवति, "एकमेवाद्वितीय"मिति श्रुत्या ब्रह्मणोऽद्वितीयत्वावगमाद् अनयोः पारमार्थिकोऽभेदो न सम्भवति। तस्मा"दात्मैवेदं सर्वमिति बाधायां सामानाधिकरण्येनात्मव्यतिरेकेण कृत्स्नजडप्रपञ्चाभावप्रतिपादनेनाचेतनं सर्वं चेतने कल्पितमिति ॥८॥

•

अथवा—नार का अर्थ है जल, वही है अयन स्थान जिसका, उसे नारायण कहते हैं। इसी तथ्य को मनु भी बताया है।

शंका—सर्व और आत्म शब्द दोनों का तादात्म्य नीलोत्पल को तरह ही मान लीजिये। नील और उत्पल में गुण-गुणिभाव के कारण तादात्म्य होने पर भी प्रकृत में वैसा न रहने से जड़ और अजड़ (चेतन) दोनों का विरुद्ध स्वभाव होने से उनका भिन्नाऽभिन्न लक्षण तादात्म्य (भेदाऽभेद रूप तादात्म्य) कैसे हो सकता है ?

समा०—उपर्युक्त आशंका उचित प्रतीत नहीं हो रहो है। क्योंकि मृत्तिका और घट में जैसे कार्य कारणभाव का संभव होता है, वैसे ही जड़ाऽजड़ में भी भेदाऽभेदरूप तादात्म्य का होना संभव है।

शंका—अथवा वृक्ष और शाखा की तरह जड और अजड का अभेद हो मान लीजिये।

समा०—ग्रंथकार स्वयं ही अचेतनस्य इत्यादि ग्रंथ से उक्त आशंका का समाधान कर रहे हैं।

चेतन और अचेतन परस्पर विरुद्ध स्वभाव के होने से उनका तादात्म्य कभी हो नहीं सकता। कार्य कारण भाव होने से मृद्-घट के समान तादात्म्य को यहाँ नहीं कह सकते, क्योंकि चेतन ब्रह्म अपरिणामी होने से चेतन-अचेतन दोनों में कार्य कारण भाव हो नहीं सकता। विवर्त के रूप में कार्य कारण भाव को मानने पर अचेतन का कल्पित रहना तो अर्थात् सिद्ध हो ही जाता है। वृक्ष और शाखा में अवयवावयविभाव संभव रहने से यद्यपि भेदाऽभेद का होना संभव है, तथापि चेतन ब्रह्म के निरवयव होने से तथा विभु होने से चेतन और अचेतन में अवयवावयविभाव हो नहीं सकता। अतः उनमें भेदाऽभेद का मानना भी संभव नहीं है।

दोनों में भेद भी नहीं कह सकते, क्योंकि 'एकमेवाऽद्वितीयम्'—इस श्रुति से ब्रह्म की अद्वितीयता अवगत हो रही है। इन दोनों में वास्तविक अभेद की भी संभावना नहीं कर सकते। अतः 'आत्मैवेदं सर्वम्'—से प्रतीयमान बाधा में सामानाधिकरण्य के द्वारा आत्म व्यतिरिक्त सम्पूर्ण जड प्रपञ्च के अभाव को बताया गया है। अतः सम्पूर्ण अचेतन (जड) 'चेतन' में कल्पित ही माना जाता है ॥ ८ ॥

---

१. चेतनेति। पाण्डुलिपिपत्रे पाठः।

२. 'अभेद' इत्यत्र भेद इति पाठेन भाव्यम्।

चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दानन्ताद्वयं[1] ब्रह्म अचेतनमज्ञानादिजडजातम् ॥९॥

●

किन्तच्चेतनं किन्तदचेतनमित्याकाङ्क्षायां चेतनाचेतनस्वरूपमाह—**चेतनमिति**। कार्य्यतादात्म्यं व्यावर्त्तयति—**नित्यमिति**। "आकाशवत्सर्वगतश्च नित्य" इत्यादि श्रुतेः परस्य नित्यत्वम्। अचेतनधर्म्मतादात्म्यं व्यावर्त्तयति—**शुद्धमिति**। "अस्नाविरं शुद्धमपापविद्ध"मित्यादि श्रुतेः परस्य शुद्धत्वं रागद्वेषादिराहित्यम्। कारणीभूताज्ञानतादात्म्यं वारयति—**बुद्धमिति**। ज्ञानैकरसं प्रज्ञानघनश्रुतेरित्यर्थः। अज्ञानकृतावरणादितादात्म्यं निरस्यति—**मुक्तमिति**। बन्धरहितम् "विमुक्तश्च विमुच्यत" इति श्रुतेरित्यर्थः। अनृतत्वं निराकरोति—**सत्यमिति**। कालत्रयाबाध्यं सत्यम् 'सत्यं ज्ञानमनन्तम्ब्रह्म' 'सदेव सौम्येदमग्र आसीदि'ति श्रुतेः। तस्य पुरुषार्थत्वमाह—**आनन्देति**। "आनन्दो ब्रह्मेति व्यजानात् "विज्ञानमानन्दं ब्रह्म इति श्रुतेः। तस्याऽखण्डैकरसतामाह—**अद्वयमिति**। न विद्यते द्वयं यस्य तदद्वयं पञ्चविधभेदशून्यमिति यावत्, ते च—जीवानां परस्परभेदाः, जीवेश्वरयोर्घटादीनाञ्च भेदः, ईश्वरस्य च जीवस्य च जडानाञ्च, एवं प्रतियोगिभेदेन भेदाः पञ्चविधाः, तच्छून्यं, तेषां कल्पितत्वात्।

●

शंका—चेतन में अचेतन को कल्पित बताया गया है, किन्तु चेतन कौन वस्तु है? और अचेतन कौन वस्तु है? यह बताना होगा।

समा०—नित्य, शुद्ध, बुद्ध मुक्त, सत्य, परमानन्द अद्वय जो ब्रह्म है, उसी को 'चेतन' कहते हैं। और अज्ञान से लेकर जितना भी जडवर्ग है, उसे 'अचेतन' कहते हैं।

उस ब्रह्म के नित्य आदि जो सात विशेषण प्रदर्शित किये गये हैं, उनका प्रयोजन और उनके अस्तित्व में प्रमाण दे रहे हैं।

वस्तुतः ब्रह्म में किसी भी अनात्म वस्तु का तादात्म्य नहीं है। तथापि भ्रम के कारण ब्रह्म में अनात्म वस्तु का जो तादात्म्य प्रतीत होता है, उस भ्रम सिद्ध तादात्म्य के निवारणार्थ 'नित्य' आदि विशेषण दिये गए हैं। जैसे—कार्यप्रपञ्च के तादात्म्य की निवृत्ति के लिये 'नित्य' विशेषण दिया है। ब्रह्म की नित्यता भी 'आकाशवत् सर्वगतश्च नित्यः' इस श्रुति प्रमाण से सिद्ध हो रही है। तथा कार्य प्रपञ्च के धर्मों के तादात्म्य की निवृत्ति के लिये 'शुद्ध' विशेषण दिया है। ब्रह्म की शुद्धता में 'अस्नाविरं शुद्धमपापविद्धम्' यह श्रुति प्रमाण है। उसमें राग-द्वेषादि विकारों की शून्यता का रहना ही 'शुद्धता' है। तथा कारणभूत अज्ञान के तादात्म्य की निवृत्ति के लिये 'बुद्ध' विशेषण दिया है उसमें सर्वदा एकरस ज्ञानरूपता का रहना ही 'बुद्धत्व' है। ब्रह्म के बुद्ध होने में 'प्रज्ञानघनः' श्रुति ही प्रमाण है। तथा अज्ञानकृत आवरण आदि के तादात्म्य की निवृत्ति के लिये 'मुक्त' विशेषण दिया है। 'बन्ध' से शून्य (रहित रहना हो 'मुक्तता' है। ब्रह्म को मुक्तता में विमुक्तश्च विमुच्यते' श्रुति हो प्रमाण है। ब्रह्म के मिथ्यात्व के निवृत्त्यर्थ 'सत्य' विशेषण दिया गया है तीनों कालों में जिसका बाध नहीं होता, उसे 'सत्य' कहते हैं। ब्रह्म की सत्यता 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सदेव सोम्येदमग्र आसीत्'—श्रुति प्रमाण से सिद्ध होती है। 'आनन्द' विशेषण से ब्रह्म की पुरुषार्थता का प्रतिपादन किया गया है। 'आनन्दो ब्रह्मेति व्यजानात्, विज्ञानमानन्दं ब्रह्म' इस श्रुति प्रमाण से ब्रह्म की आनन्दरूपता बताई गई है। 'अद्वय' विशेषण से ब्रह्म की अखण्ड-एकरसता को बताया गया है। 'अन्य' जहाँ विद्यमान नहीं है, उसे 'अद्वय' कहते हैं। अर्थात् भेदवादियों द्वारा कल्पना किये गये पाँच भेदों से रहित रहना ही 'अद्वयत्व है। वे पञ्च भेद इस प्रकार हैं—

(१) जीवों का परस्पर भेद

(२) जीव और ईश्वर दोनों का परस्पर भेद

(३) घट आदि जड़ पदार्थों के परस्पर भेद

(४) ईश्वर तथा जड़ जगत् का परस्पर भेद

(५) जीव तथा जड़ जगत् का परस्पर भेद

---

१. 'अनन्त' शब्दः सीरीज पुस्तके नास्ति। टीकायामपि तथा।

अज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं ज्ञाननिवर्त्यम् ॥१०॥

●

अथवा त्रिविधभेदशून्यमद्वयम्। विजातीयभेदः सजातीयभेदः स्वगतभेदश्चेति त्रिविधो भेदस्तद्रहितम्। "एकमेवाद्वितीयम्ब्रह्म इति श्रुतेः ॥९॥

ननु किमिदमज्ञानम्? न तावज्ज्ञानाभावः, प्रागभावस्य प्रतियोगिसमानकालत्वायोगात्। अज्ञानस्य प्रतियोगि-समानकालत्वेन न जानामीत्यनुभूयमानत्वात्। अतः प्रागभावो नाज्ञानम्। अत एव न ध्वंसः। नात्यन्ताभावोऽपि[1] प्रतियोगिव्यधि-करणत्वात् विशेषाभावस्य ज्ञानसामान्यविरोधित्वात्। अज्ञानन्तु[2] ज्ञानसामान्यविरोधि। अत एव[3] नान्योन्याभावोऽपि। तस्माज्ज्ञान-सामान्यविरोधिभावरूपमज्ञानमवश्यमङ्गीकर्त्तव्यम्॥

ननु किं लक्षणमज्ञानम्? न तावज्ज्ञाननिवर्त्यत्वम्। तस्य घटादावतिव्याप्तेः। प्रतियोगिप्रत्यक्षस्य ध्वंसं प्रति कारणत्वात्। नापि अनिर्वचनीयत्वम्। तेनैव तस्य निर्वचनात्। तस्माल्लक्षणाभावाद्भावरूपाज्ञानमनुपपन्नम्।

नापि तत्र प्रमाणं पश्यामः। न तावत्प्रत्यक्षं प्रमाणम्। तस्योभयवादिसम्मतप्रागभावविषयत्वात्। नाप्यनुमानं लिङ्गाभावात्॥ नच सर्गाद्यकालीनं कार्य्यं जडोपादानकार्य्यत्वात् घटवदित्यनुमानं प्रमाणमिति वाच्यम्। तस्यार्थान्तरत्वात्।

●

इस रीति से जीव-ईश्वर आदि प्रतियोगियों के भेद से वे भेद पांच प्रकार के होते हैं। वे सब भेद कल्पित हैं। उन पांचों भेदों का अभाव ब्रह्म में रहता है। अतः ब्रह्म अद्वय है।

अथवा (१) सजातीय भेद, (२) विजातीय भेद, और (३) स्वगत भेद—इन तीनों भेदों से जो रहित हो उसे 'अद्वय' कहते हैं। तथा ब्रह्म की अद्वयरूपता को 'एकमेवाऽद्वितीयम्' श्रुति ने भी बताया है॥९॥

तीन गुणों वाला, सत् और असद् रूप से निश्चित कर जिसे जान व कह नहीं सकते तथा जो ज्ञान से हटता है ऐसी भावरूप वस्तु अज्ञान है।

शंका—इसके पूर्व **अज्ञानादिजड़वर्ग अचेतन** है, ऐसे कहा था। किन्तु अज्ञान के स्वरूप, लक्षण तथा प्रमाण को नहीं बताया। अतः उसके स्वरूप, लक्षण और प्रमाण का निरूपण करना चाहिये, जिससे अज्ञान का स्वरूप क्या है? उसका लक्षण क्या है? तथा प्रमाण क्या है? यह शंका दूर हो सके।

समा०—अज्ञान त्रिगुणात्मक है अर्थात् सत्त्व, रजस् और तमस्—ये तीन गुण जिसके स्वरूप (आत्मा) हैं, ऐसा **त्रिगुणात्मक 'अज्ञान'** है। अज्ञान के कार्य (जगत्) में सुख-दुःख मोहात्मकता प्रत्यक्ष प्रतीत होती है। वे सुख आदि तीनों यथाक्रम सत्त्वादि तीन गुणों के ही परिणाम हैं। कारण के तुल्यस्वभाव वाला ही कार्य हुआ करता है इस नियम के अनुसार जगद्रूप कार्य में त्रिगुणात्मकता (त्रिगुणरूपता) को देखकर उसके कारणभूत अज्ञान में भी त्रिगुणात्मकता की कल्पना की जाती है। तथा 'अजामेकां लोहितशुक्लकृष्णाम्' यह श्रुति भी अज्ञान की त्रिगुणात्मकता को बता रही है। अतः इससे अज्ञान का स्वरूप स्पष्ट हो जाता है।

शङ्का—'ज्ञानस्य अभावः अज्ञानम्—ज्ञान के अभाव को ही अज्ञान यदि कहें तो क्या हानि है?

समा०—अभाव शब्द से क्या प्रागभाव या ध्वंस या अत्यन्ताभाव या अन्योन्याभाव इनमें से किस का ग्रहण होगा? इनमें से कोई भी पक्ष इष्ट साधक नहीं होगा। जैसे—'ज्ञानस्य प्रागभावः अज्ञानम् यदि कहें, तो यह नियम है कि

---

१. विशेषसामान्याभ्यामत्यन्ताभावो द्विविधस्तत्राज्ञानस्य ज्ञानविशेषाभावत्वमाशंक्याह—प्रतियोगिति। अज्ञानन्तु प्रतियोगि-समानाधिकरणमिति न तद् विशेषाभावः। अस्तु तर्हि ज्ञानसामान्याभावोऽज्ञानम्? तत्राह—ज्ञानसामान्येति। तथात्वे ज्ञानमात्रविरोधि तद्भवेद्, न च तथास्ति, तस्यैवाऽसिद्धिप्रसंगात्।

२. ज्ञानसामान्याऽविरोधीति युक्तं पठितुम्। एवमुत्तरत्र।

३. प्रतियोगिवैयधिकरण्यादित्यर्थः। प्रतियोग्यनधिकरणे पटादावपि भूतलस्थघटादिभेदस्तिष्ठति तथा ज्ञानानधिकरणे घटादावपि स्यादज्ञानमित्यनिष्टापत्तिः। तदुक्तं न्यायचन्द्रिकायाम् (पृ० ४३६)—'न हि तावदितरेतराभावस्याऽज्ञानता, तस्य विषयेपि भावाद्, ज्ञानानिवर्त्यत्वाच्च; अज्ञानस्य चात्मैकाश्रयत्वाद्, ज्ञाननिवर्त्यत्वाच्च' इति।

न"चाज्ञानेनावृतं ज्ञान"मित्याद्यागम एव तत्र प्रमाणमिति वाच्यम् । आगमनस्य भ्रान्तिज्ञानविषयत्वात् नाप्यर्थापत्तिस्तत्र प्रमाणम् । दृश्यमानकार्य्यस्यान्यथोपपत्तेः । तस्माल्लक्षणप्रमाणयोरभावाच्चेतनेऽज्ञानादि कल्पितमित्यनुपपन्नमिति ।

अत आह—**अज्ञानमिति ।** त्रयो गुणास्सत्त्वरजस्तमांस्यात्मानो यस्य तत्तथा । एतेन मिथ्याज्ञानतत्संस्काररूपाविद्येव जगद्धेतुरिति प्रत्युक्तम् । आगन्तुकत्वे तस्याः सोपादानत्वनियमेन ब्रह्मणोऽपरिणामित्वेन तत्त्वायोगात् । आगन्तुकत्वेऽपसिद्धान्त-प्रसङ्गात् । तस्माद्यत्किञ्चिदेतत् ॥

अज्ञानलक्षणमाह—**सदसद्भ्यामिति ।** भावप्रधानोऽयं निर्देशः । सत्त्वे बाधो न स्याद् असत्त्वे प्रत्यक्षविषयत्वं न स्यात्, प्रत्यक्षेण ब्रह्म न जानामीत्यनुभूयते । अतोऽसत्त्वेनानिर्वचनीयम् । ब्रह्मज्ञाने बाध्यमानत्वात्सत्त्वेनाप्यनिर्वचनीयम् ॥

एतदुक्तम्भवति—सदसद्विलक्षणमज्ञानमिति । असद्विलक्षणमित्युक्ते सत्यतिव्याप्तिः स्यात् । अत उक्तं—**सद्विलक्षणमिति ।** तावत्युक्तेऽसत्यतिव्याप्तिरत उक्तम**सद्विलक्षणमिति ।** अभ्युपेत्येदमुक्तम्, असतो निस्स्वरूपत्वेनातिव्याप्तिशङ्कानवकाशाद्—असन्नाम किञ्चिदस्ति चेदसत्त्वव्याघातः । नास्ति चेत् कुत्रातिव्याप्तिः ? कथन्तर्ह्याचार्य्योक्तिः 'सदसद्भ्यामनिर्वचनीयमि'ति ? शिष्यबुद्धि-व्युत्पादनमात्रे तात्पर्य्यादाचार्य्याणाम् 'अहृदयवाचामहृदयमेवोत्तरमि'ति न्यायेन वादिनिराकरणमात्रतात्पर्य्याद्वा असद्विलक्षणोक्तिः । कालत्रयाबाध्यत्वं सत्त्वं तद्भिन्नत्वमसत्त्वमिति फलितार्थः ॥

●

प्रागभाव अपने प्रतियोगी के काल में नहीं रहा करता, अर्थात् प्रागभाव और उसका प्रतियोगी, दोनों एक ही काल (समानकाल) में नहीं रहा करते । अज्ञान की स्थिति अपने प्रतियोगी के समान काल में भी होने से 'न जानामि' इत्याकारक अनुभव सभी को होता रहता है । इस लिये 'प्रागभाव' को 'अज्ञान' शब्द से नहीं कहा जा सकता । इसी तरह 'ज्ञानस्य ध्वंसः अज्ञानम् और 'ज्ञानस्य अत्यन्ताभावः अज्ञानम् भी नहीं कह सकते, क्योंकि प्रतियोगी के अधिकरण में न रहने से विशेषाभाव, तो ज्ञानसामान्य का अविरोधी होता है । किन्तु अज्ञान तो ज्ञानसामान्य का विरोधी होता है । अतएव उसे अन्योऽन्याभाव रूप भी नहीं कह सकते । इसलिये उसे ज्ञानसामान्य विरोधी और भावरूप ही मानना होगा ।

शङ्का—'अज्ञान' का लक्षण क्या हो सकता है ? यदि उसे ज्ञान के द्वारा निवृत्त होने योग्य कहें अर्थात् 'ज्ञान-निवर्त्यत्वम् अज्ञानम्' कहें, तो भी ठीक नहीं है, क्योंकि ज्ञाननिवर्त्यता तो घट आदि पदार्थों में भी हो सकती है । क्योंकि ध्वंस के प्रति प्रतियोगी का प्रत्यक्ष कारण होता है । अतः उक्त लक्षण की घटादिकों में अतिव्याप्ति हो जायगी ।

यदि 'अनिर्वचनीयत्वम् अज्ञानत्वम्'—अनिर्वचनीय होना ही अज्ञान है—कहें तो भी ठीक नहीं है, क्योंकि 'अनिर्वचनीयत्व' कहने से अज्ञान का निर्वचन हो जाता है । एवञ्च अज्ञान का किसी प्रकार से कोई लक्षण न बन पाने से उसे (अज्ञान को) भावरूप कहना उचित नहीं है । जिस प्रकार अज्ञान का कोई लक्षण नहीं बनाया जा सकता, उसीप्रकार उसके अस्तित्व में कोई प्रमाण भी नहीं है ।

अज्ञान के अस्तित्व में यदि प्रत्यक्षप्रमाण बतावें तो वह भी उचित प्रतीत नहीं हो रहा है, क्योंकि वह तो उभयवा-दिसम्मत प्रागभावविषयक होता है । तथा उसके अस्तित्व में अनुमान प्रमाण कहें, तो वह भी ठीक नहीं है, क्योंकि बिना लिङ्ग (हेतु) के अनुमान नहीं किया जाता ।

यदि 'कार्यत्वात्' को हेतु बनाकर यह अनुमान प्रयोग करें कि 'सर्गाद्यकालीनं कार्यं, जडोपादानं, कार्यत्वात् घटादिवत्'—तो वह भी ठीक नहीं होगा, क्योंकि वह अर्थान्तर का साधक हो जाता है ।

यदि 'अज्ञान' के अस्तित्व में 'अज्ञानेनावृत्तं ज्ञानम्' इस आगम को ही प्रमाण के रूप में कह तो वह भी ठीक नहीं होगा । क्योंकि यह आगम भ्रान्तिज्ञान विषयक है ।

अब अज्ञान का लक्षण कहते हैं—सत्य पदार्थ से तथा असत्य पदार्थ से जो विलक्षण हों, उसे अज्ञान कहते हैं अर्थात् **सत् रूप से (सत्य के रूप से) तथा असत् रूप से (असत्य के रूप से) जिसका निरूपण नहीं किया जा सकता उसे अज्ञान कहते हैं ।** यदि अज्ञान को सत्य कहते हैं तो 'सत्य (सत्) ब्रह्म' के समान 'अज्ञान' का भी नाश नहीं होना चाहिये, किन्तु ब्रह्मज्ञान होने पर तो अज्ञान का नाश हो जाता है । अतः अज्ञान को सत्य (सत्) भी नहीं कह सकते ।

नन्विदं लक्षणं कार्य्ये प्रपञ्चेऽप्यस्तीत्यतिव्याप्तिः ? नैष दोषः, अनादित्वे सतीति विशेषणात् । नन्वेवमपीश्वरादावतिव्याप्तिः तस्यानादित्वेन कल्पितत्वेन चोक्तलक्षणसद्भावात् । तदुक्तं श्रुत्या 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती'ति ।

"जीव ईशो विशुद्धाचिद्विभागस्तु[1] योर्द्वयोः । अविद्या तच्चि[2]तोर्योगः षडस्माकमनादयः" ॥ इति सांप्रदायिकवचनात् ।

'मायाभासेन जीवेशो करोतीति श्रुतन्ततः । कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितम्' ॥

इति विद्यारण्योक्तेश्च। अतिव्याप्तिर्वज्रलेपायितेत्यत आह—**ज्ञाननिवर्त्यमिति** । "यतो ज्ञानमज्ञानस्यैव निवर्त्तकमिति" पञ्चपादिकाचार्य्यैरुक्तत्वादज्ञानमेव ज्ञाननिवर्त्यम् । तथाचायमर्थः सम्पद्यते—सद्विलक्षणमनादिज्ञाननिवर्त्यमज्ञानमिति । अथवा अनाद्युपादानं ज्ञाननिवर्त्यमज्ञानम् । प्रागभावेऽतिव्याप्तिपरिहारायोपादानमिति । घटादावतिव्याप्तिनिवारणायानादीति । ब्रह्मण्यतिव्याप्तिवारणाय

●

यदि अज्ञान को असत्य (असत्) कहते हैं तो असत् वन्ध्या पुत्र के समान उसका (अज्ञान का) प्रत्यक्ष नहीं होना चाहिये, किन्तु 'अहं ब्रह्म न जानामि'—मैं ब्रह्म को नहीं जानता—इत्याकारक अज्ञान प्रत्यक्ष अनुभव तो सभी को हुआ करता है । अतः उसे (अज्ञान को) असत्य भी नहीं कह सकते । इसलिये अज्ञान को अनिर्वचनीय ही कहा जाता है । अज्ञान का लक्षण यदि 'असद्विलक्षणम्' इतना ही करें तो वन्ध्यापुत्रादि जो असत् पदार्थ हैं, उनसे विलक्षण सत् ब्रह्म में उक्त लक्षण की अतिव्याप्ति हो जाएगी, उसके निवारणार्थ लक्षण में 'सद्विलक्षण' पद कहा गया है । तब ब्रह्म में 'सत्' से विलक्षता न रहने से उसमें लक्षण की अति व्याप्ति नहीं होगी । अब यदि 'सद्विलक्षणम्-अज्ञानम्'—इतना ही लक्षण करें तो सत् ब्रह्म से विलक्षण जो वन्ध्यापुत्रादि असत् पदार्थ है, उनमें उक्त लक्षण की अतिव्याप्ति होगी । उसके निवारणार्थ लक्षण में 'असद् विलक्षण' कहा गया है । तब वन्ध्यापुत्रादि में असत् से विलक्षणता नहीं है । अतः उसमें अतिव्याप्ति नहीं हो सकेगी ।

वस्तुतः 'सद्विलक्षणम् अज्ञानम्' इतना मात्र ही कहना उचित है । 'असत्' पद के निवेश की कोई आवश्यकता नहीं है । क्योंकि असत् पदार्थ के 'असत्त्व' की सत्ता कहाँ है ? जो 'असत् पदार्थ' वस्तुतः है ही नहीं, तो किसमें अतिव्याप्ति होगी ? अतः अज्ञान के लक्षण में 'असद्विलक्षण' पद का निवेश शिष्यबुद्धिवैशद्यार्थ ही समझना चाहिये ।

शङ्का—जैसे अज्ञान सत् से विलक्षण है, वैसे यह कार्यप्रपञ्च भी सत् से विलक्षण है, अतः कार्यप्रपञ्च में अज्ञान लक्षण की अतिव्याप्ति हो रही है ।

समा०—उस अतिव्याप्ति के वारणार्थ लक्षण में 'अनादि' पद का निवेश करना होगा । अर्थात् 'सद्विलक्षणमनादि अज्ञानम्' यह अज्ञान लक्षण करेंगे । तब कार्यप्रपञ्च में अनादिता के न रहने से उसमें लक्षण की अतिव्याप्ति नहीं होगी ।

शङ्का—कार्यप्रपञ्च में अतिव्याप्ति के दूर करने पर भी 'जीव-ईश्वर' में लक्षण की अतिव्याप्ति हो रही है । क्योंकि जीव और ईश्वर कल्पित होने से सत् से विलक्षण भी हैं और अनादि भी हैं ।

जीव एवं ईश्वर के कल्पित होने की बात भगवती श्रुति तथा विद्यारण्यस्वामी ने कही है ।

इन दोनों से जीव एवं ईश्वर दोनों में कल्पितत्व ही सिद्ध हो रहा है । किञ्च—साम्प्रदायिक वचन से जीव एवं ईश्वर में अनादिता सिद्ध होती है । अतः जीव एवं ईश्वर में उक्त लक्षण की अतिव्याप्ति तो वज्रलेप के समान हो गई है ।

समा०—उस अतिव्याप्ति के निवारणार्थ लक्षण में 'ज्ञाननिवर्त्य' पद का निवेश करेंगे । श्रीपञ्चपादिकाकार ने 'यतो ज्ञानमज्ञानस्यैव निवर्तकम्' कहकर केवल **'अज्ञान' की ही ज्ञान के द्वारा निवृत्ति कही है,** उससे भिन्न किसी अन्य की निवृत्ति नहीं बताई है । जीव ईश्वरादिभाव की निवृत्ति भी उस अज्ञान की निवृत्ति से ही हो जाती है । अतः ज्ञान से जीव-ईश्वर की निवृत्ति न हो पाने से जीव ईश्वर में लक्षण की अतिव्यापि नहीं हो रही रही है । एवंच 'अज्ञान' का लक्षण 'सद्विलक्षणमनादि ज्ञाननिवर्त्यम्'—यह निष्पन्न हुआ ।

अथवा अज्ञान का एक अन्य लक्षण—'अनाद्युपादानं ज्ञाननिवर्त्यम् अज्ञानम्' भी कर सकते हैं । इस लक्षण में 'उपादान' पद का निवेश अनादि प्रागभाव में अतिव्याप्ति के निवारणार्थ किया है । तथा 'अनादि' पद का निवेश घटादि कार्यों

१. 'विशुद्धाचित्तस्याभेदः' इति पू० मु० पाठः ।
२. तद्धियोगः इति पाठान्तरम् ।

अहं ब्रह्म न जानामीत्यनुभावात्। (ते ध्यानयोगानुगता अपश्यन्)[1] "देवात्मशक्तिं स्वगुणैर्निगूढा"मित्यादि श्रुतेः। 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः। 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' ॥ इति स्मृतेश्च ॥११॥

●

ज्ञाननिवर्त्यमित्युक्तम्भवति। ज्ञानाभावोऽज्ञानमित्याशङ्कानिरासार्थमाह—**भावरूपमिति ॥१०॥**

अज्ञानसद्भावे प्रत्यक्षादिप्रमाणान्युपन्यस्यति—**अहमित्यादिना।** देवश्चासावात्मा च देवात्मा तस्य शक्तिम्। **स्वगुणैः** सत्त्वादिभिर्**निगूढाम्।** ब्रह्मध्यानपरायणः ब्रह्मविदः **अपश्यन्निति** योजना। **तेनावृतत्वेन मुह्यन्ति** संसरन्ति। शास्त्राचार्य्यप्रसादजनितज्ञानेन येषा**मज्ञानं** निवृत्तं तेषामहं ब्रह्मास्मीति ज्ञानम्परम् ब्रह्म प्रकाशयतीत्युत्तरेणान्वयः। ज्ञानाभावस्य ब्रह्मस्वरूपावरकत्वायोगादनिच्छतापि तार्किकबलीवर्दनानया स्मृत्या भावरूपमज्ञानमेष्टव्यम् ॥

एतेन सत्त्वरजस्तमोगुणात्मकमचेतनं स्वतन्त्रम्पारमार्थिकपरिणामि नित्यम् प्रधानमिति साङ्ख्यमतं प्रत्युक्तम्। "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः"। इति भगवद्वचनविरोधात् ॥

●

के उपादानकारणभूत मृत्तिकादिकों में अतिव्याप्ति के निवारणार्थ किया है उसी तरह 'ज्ञाननिवर्त्य' पद का निवेश, अनादि तथा विवर्तोपादानरूप ब्रह्म में अतिव्याप्ति के निवारणार्थ किया गया है। लक्षण निर्दिष्ट अज्ञान में परिणामोपादनता का ग्रहण करना चाहिये।

कतिपय वादी 'ज्ञानाभावः अज्ञानम्' कहते हुए ज्ञान के अभाव को ही अज्ञान समझते हैं। **उनके खण्डनार्थं** सिद्धान्तियों ने उस **'अज्ञान' को 'भावरूप' माना है, 'अभावरूप' नहीं ॥१०॥**

अब अज्ञान के अस्तित्व में प्रमाण उपस्थित कर रहे हैं—**मैं ब्रह्म को नहीं जानता हूँ—इत्याकारक अज्ञानविषयक प्रत्यक्षानुभव सभी को हुआ करता है।** उस कारण अज्ञान के अस्तित्व में एक प्रमाण तो 'प्रत्यक्ष' ही है और दूसरा प्रमाण, श्रुति-स्मृति के वचनों का है। श्रुति कह रही है—जगत् के कारण का। विचार करते हुए कुछ लोगों ने काल को, तो कुछ लोगों ने स्वभाव आदि को कारण बताया किन्तु काल-स्वभाव आदि कारणों में अनेक प्रकार के दोषों को देखकर जगत् के कारण का निश्चय करने के लिये **ब्रह्मचिन्तन में निमग्न रहने वाले ब्रह्मवेत्ता पुरुषों ने देवात्मशक्ति को ही जगत्-कारण के रूप में निश्चित किया, जो अज्ञान रूप शक्ति, अपने सत्त्वादिक गुणों से निगूढ है। श्रीमद् भगवद् गीता रूप स्मृति भी कह रही है कि—जिन जीवों का ज्ञान अज्ञान से आवृत हुआ है, वे जीव उस अज्ञानकृत आवरण के कारण संसार को ही प्राप्त होते हैं, और जिन जीवों का अज्ञान गुरु अथवा शास्त्र के अनुग्रह से प्राप्त हुए ज्ञान से निवृत्त हुआ है, उन पुरुषों के हृदय में 'अहं ब्रह्माऽस्मि' यह ज्ञान (प्रत्यक्षात्मक अनुभव), अभिन्न ब्रह्म को प्रकाशित करता है। इस प्रकार से यह गीतास्मृति भी उस अज्ञान के अस्तित्व मे प्रमाण है।**

अथवा उपर्युक्त गीता स्मृति के वचन ने अज्ञान को 'ब्रह्म स्वरूप का आवरक कहा है। आवरकत्व तो भाव पदार्थ में ही हो सकता है, अर्थात् भाव पदार्थ ही किसी का आवरक हो सकता है, अभाव पदार्थ तो आवरक बन ही नहीं सकता। अतः अज्ञान को ज्ञाना भावरूप मानने वाले नैयायिकों को भी स्मृति विरोध को देखते हुए अज्ञान को भावरूप ही स्वीकार कर लेना चाहिये। एवञ्च गीता का वचन अज्ञान की भावरूपता में भी प्रमाण है। उक्त गीता वचन में ज्ञान से अज्ञान का नष्ट होना बताया गया है। एवञ्च सांख्यदार्शनिकों ने जो कहा है कि 'त्रिगुणात्मक, अचेतन, स्वतंत्र, पारमार्थिक परिणामी, नित्य प्रधान (प्रकृति) ही अज्ञान है', इस कथन का खण्डन हो जाता है।

किञ्च—लोग व्यवहार में देखा जाता है कि अचेतन (जड़) रथादिकों की प्रवृत्ति, चेतन के अधीन हुआ करती है, उसकी स्वतन्त्र प्रवृत्ति नहीं होती। इससे भी स्पष्ट होता है कि प्रधान को अचेतन मानकर पुनः उसे स्वतन्त्र भी कहना अत्यन्त विरुद्ध है। किञ्च—लोकव्यवहार में यह भी दिखाई देता है कि परिणामी क्षीर आदि सावयव रहने से अनित्य ही हुआ करते हैं। उस कारण प्रधान को परिणामी मानकर पुनः उसे नित्य भी कहना अन्यन्त विरुद्ध है। प्रधान के नित्यत्व की कल्पना करने में कोई प्रमाण नहीं है। क्योंकि अदृष्ट, कल्पना दृष्टपूर्वक ही हुआ करती है। अतः साख्यदार्शनिकों का प्रकृतिवाद का सिद्धान्त उचित प्रतीत नहीं हो रहा है।

१. सीरीज पुस्तके नास्ति।

नच बुद्धिधर्म्माज्ञानविषयतया भगवद्वचनमन्यथासिद्धमिति वाच्यम्। बुद्धिधर्म्माज्ञानस्य मिथ्याज्ञानरूपत्वेन चैतन्या-वरकत्वायोगाद् "अज्ञानेनावृतं ज्ञान" मित्यावरकत्वस्मरणात्। अचेतनस्य रथादेश्चेतनाधिष्ठितस्यैव प्रवृत्तिदर्शनेन प्रधानस्य स्वातन्त्र्यायोगात्। परिणामिनः सावयवतया क्षीरादेरनित्यत्वदर्शनेन प्रधानस्य नित्यत्वकल्पनायां मानाभावाद्दृष्टपूर्वकत्वाद-दृष्टकल्पनायाः॥ एतेन मिथ्याज्ञानम्[1] एवाज्ञानमिति प्रत्युक्तम्। तस्मात्सर्वोपादानमनाद्यनिर्वचनीयं भावरूपमज्ञानमेष्टव्यम्॥

एवञ्च सत्यद्वैतश्रुतिर्न विरुध्यते। साङ्ख्यादिस्मृतेरेव श्रुतिविरुद्धत्वेनाप्रमाणत्वात्। चकारोऽनुक्तानुमानप्रमाण-समुच्चयार्थः। **तथाहि**—विवादगोचरापन्नं प्रमाणज्ञानं स्वसमानविषयस्वसमानाधिकरणानादिविरोधिनिवर्त्तकं प्रमाणज्ञानत्वात् शुक्तिज्ञानवत्। नच प्रागभावेनार्थान्तरत्वं, प्रागभावस्याप्रमाणिकत्वात् अस्तु वा प्रागभावस्तथापि तस्य समानाश्रयत्वेऽपि समानविषयत्वासम्भवेन तन्निवारणात्। अज्ञानस्यैव समानविषयत्वात्[2]। नचानुमित्यादेरज्ञाननिवर्त्तकत्वानङ्गीकारेणानुमानस्य तत्र व्यभिचार इति वाच्यम्। असत्त्वापादकमौढ्याज्ञाननिवृत्तेरेवानुमित्यादिनाभ्युपगमेन तदसम्भवात्। अथवा पक्षहेत्वोरपरोक्षत्वं विशेषणं देयम्। नचैवं दृष्टान्ते साध्यवैकल्यं, शुक्तिज्ञानेन तन्निवृत्तेरनुभवसिद्धत्वात्॥

●

अज्ञान, जो बुद्धि का धर्म है, उसका विषय होने से 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' यह भगवद्वचन अन्यथासिद्ध है, अर्थात् अन्य प्रकार से भी इसकी संगति लगाई जा सकती है। बुद्धि का धर्मरूप अज्ञान तो मिथ्याज्ञानरूप होने से वह चैतन्य को आवृत्त नहीं कर सकता, क्योंकि अज्ञानेनाऽऽवृतं ज्ञानम् इस वचन से उसे ज्ञान का ही 'आवरक' बताया गया है, चैतन्य का नहीं। इस विवेचन से 'मिथ्याज्ञानमेव अज्ञानम्'—मिथ्याज्ञान को ही अज्ञान कहनेवालों के मत का खण्डन हो गया। अतः अज्ञान को सर्वोपादानभूत, अनादि, अनिर्वचनीय-भावरूप ही स्वीकार कर लेना चाहिये।

एवञ्च भावरूप अज्ञान के स्वीकार कर ले से अद्वैतप्रतिपादक श्रुति के साथ कोई विरोध भी नहीं होता है, प्रत्युत सांख्यस्मृति ही श्रुतिविरुद्ध हो जाने से अप्रमाण हो जाती है। 'इति स्मृतेश्च'—इस ग्रन्थ में उक्त 'च' कार से अनुवत्त 'अनुमान प्रमाण' का भी सनुच्चय कर लिया गया है।

अनुमान इस प्रकार है—जिसका विचार चल रहा है वह प्रमाणज्ञान जिसे विषय करता है वह जिस अधिकरण में रहता है, उसे ही विषय करने वाली और उसी अधिकरण में रहने वाली किसी अनादि तथा प्रमाणज्ञानविरोधी वस्तु को निवृत्त करता है, क्योंकि वह प्रमाणज्ञान है, जैसे सींप का ज्ञान। वह वस्तु प्रागभाव हो—एवं च भावरूप अज्ञान सिद्ध न हो यह भी नहीं कह सकते क्योंकि प्रागभाव नामक वस्तु होती है इसमें कोई प्रमाण नहीं। यदि होवे तो भी वह किसी को विषय करता नहीं अतः उक्त वस्तु नहीं हो सकता। अज्ञान ही प्रमाणविषयविषयक हो सकता है। यह नहीं कह सकते कि अनुमानादि प्रमाणज्ञान होने पर भी अज्ञाननिवर्तक नहीं अतः उक्त अनुमान में प्रयुक्त हेतु साध्य से निश्चित संबंध वाला नहीं; क्योंकि अनुमानादि को असत्वापादक—'नहीं है' इत्याकारक व्यवहार हेतु अज्ञान का निवर्तक माना ही जाता है। अथवा विचार्यमाण एवं हेतुभूत दोनों प्रमाणज्ञान अपरोक्षात्मक ही विवक्षित हैं, तब अनुमानादि का विचार ही करना व्यर्थ है। दृष्टान्त में भी सींप के अपरोक्ष ज्ञान से तद्विषक अज्ञाननिवृत्त होता है यह अनुभवसिद्ध है ही। अतः इस दृष्टांत से अनुमान स्पष्ट हो जाता है।

शङ्का—अज्ञान को यदि शुक्त्यवच्छिन्न चैतन्य का आवश्यक कहते हैं, तो बताइये कि वह मूलाज्ञान है, अथवा है? अर्थात् उस अज्ञान को मूलाज्ञान तो कह नहीं सकते, क्योंकि अभी ब्रह्मसाक्षात्कार तो हुआ नहीं है। उसके न रहने पर भी यदि अज्ञान की निवृत्ति को कहें तो उक्त दोष रहेगा ही।

यदि मूलाज्ञान से भिन्न कोई है—इस द्वितीय पक्ष को भी स्वीकार नहीं कर सकते, क्योंकि उसके स्वीकार करनेपर अनन्त अज्ञानों की कल्पहा करनी पड़ेगी जिससे गौरवदोष उपस्थित होगा।

समा०—शंका करनेवाले ने जो दोष बताये हैं, वे वस्तुतः नहीं हो पाते हैं। 'शुक्त्यवच्छिन्न चैतन्य' का आवरक जो 'अज्ञान' है, वह 'मूलाज्ञान' ही है। अभी ब्रह्मसाक्षात्कार' के न हो पाने से उसकी (अज्ञान की) निवृत्ति यद्यपि नहीं होती

---

१. मिथ्या यज्ज्ञानमित्यर्थो, न तु मिथ्या यदज्ञानमिति।

२. ज्ञानस्यैव स्वविषयत्वात् इति पू० मु० पाठः।

तच्चाज्ञानं द्विविधं मायाविद्याभेदात्। शुद्धसत्त्वप्रधानं सन्मायेत्युच्यते। मलिनसत्त्वप्रधानं सदविद्येत्युच्यते। "जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती"ति श्रुतेः ॥१२॥

अथवाऽज्ञानस्य शक्तिर्द्विविधा—ज्ञानशक्तिः क्रियाशक्तिश्चेति। रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानशक्तिः। "सत्त्वात्संजायते ज्ञान"मिति स्मृतेः।

●

ननु शुक्त्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाज्ञानं तदन्यद्वा ? नाद्यः, इदानीम्ब्रह्मसाक्षात्काराभावेन तन्निवृत्त्योक्तदोषः[१] स्यादेव। न द्वितीयः, अनन्ताज्ञानकल्पनायाङ्गौरवप्रसङ्गः इति चेत्, न्नैष दोषः। शुक्त्यवच्छिन्नचैतन्यावरकाज्ञानं मूलाज्ञानमेव। इदानीं ब्रह्मसाक्षात्काराभावेन तन्निवृत्त्यभावेऽप्यज्ञानं नष्टमित्यनुभवानुरोधेन शुक्तिज्ञानेन तत्कृतावरणनिवृत्तेः सम्भवान्नोक्तदोषः।

अथवाऽज्ञानं द्विविधं—मूलाज्ञानं तूलाज्ञानञ्च। ब्रह्मावरकमज्ञानमाद्यम्। विषयचैतन्यावरकमज्ञानन्तूलाज्ञानम्। तच्च प्रतिविषयं नाना। शुक्त्यवच्छिन्नचैतन्यावरकमज्ञानं यावद्विषयभावि एकमेव। शुक्तिज्ञानेन तत्कृतमावरणमेव निवर्त्तते नतु तदज्ञानं, ज्ञानेनाज्ञानं निवृत्तमित्यावरणनिवृत्तिरेवानुभूयते इति केचित् ॥

वस्तुतस्त्वेकैकस्मिन्विषयेऽनन्ताज्ञानानि मूलाज्ञानपरतन्त्राणि तिष्ठन्ति। एकैकज्ञानेनैकैकन्निवर्त्तते ज्ञानेनाज्ञानन्निवृत्तमित्यनुभवस्य सर्वसंमतत्वेनावरणनिवृत्तिविषयतया सङ्कोचे मानाभावात्। नचाज्ञानानन्त्याभ्युपगमे कल्पनागौरवमिति वाच्यम्। प्रमाणवतो गौरवस्यादोषत्वात्। तस्माद्दृष्टान्ते साध्यसम्भवाद् अनवद्यम् ॥११॥

अज्ञानं विभजते—**तच्चेति**। द्वैविध्यमाह—**मायेति**। एकमेवाज्ञानं 'सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्या चे'ति द्विधा जातमित्याह—**शुद्धेति**। रजस्तमोभ्यामतिरस्कृतं शुद्धम्। तद्विपरीतं मलिनम्। तत्र श्रुतिप्रमाणमाह—**माया चेति**। **स्वयमेव**

●

सी लग रही है, तथापि 'अज्ञानं नष्टम्'—अज्ञान नष्ट हुआ—यह अनुभव मात्र होता है। उसके अनुरोप से 'शुक्तिज्ञान' से अज्ञानकृत आवरण की निवृत्ति का संभव रहने से उक्त दोष नहीं हो रहा है।

एवं च उक्त विवेचन से अज्ञान का स्वरूप, लक्षण, और प्रमाण—तीनों उपलब्ध हो रहे है, जिससे अनादि, अनिर्वचनीय, भावरूप अज्ञान का अस्तित्व स्पष्ट हो जाता है।

अथवा मूलाज्ञान व तूलाज्ञान—इस प्रकार अज्ञान दो तरह का है। ब्रह्म को आवृत करने वाला मूलाज्ञान है तथा विषय से अवच्छिन्नं ब्रह्म को आवृत करने वाला तूलाज्ञान है। हर विषय से उक्तविधया सम्बद्ध तूलाज्ञान अनेक होते हैं। अतः ब्रह्मसाक्षात्कार के बिना ही सींप की प्रमा से तद्विषयक तूलाज्ञान नष्ट हो जाता है। एवं च उक्तानुमान में दृष्टान्त सुप्रसिद्ध है। कुछ लोग तो मानते हैं कि जब तक विषय रहता है तब तक उससे अवच्छिन्न चेतन का आवरण करने वाला तूलाज्ञान एक ही बना रहता है तथा विषयप्रमा से तूलाज्ञान से होने वाला आवरण ही निवृत्त होता है न कि वह अज्ञान। इस मत में आवरण रूप वस्तु की निवृत्ति से दृष्टान्त की सिद्धि समझनी चाहिये।

वस्तुतः तो मूलाज्ञान के परतन्त्र अनन्त अज्ञान हर विषय से उक्तविधया सम्बद्ध हुए अवस्थित हैं जो हर एक प्रमा से निवृत्त हो जाते हैं अतः केवल आवरणनिवृत्ति मानने का औचित्य नहीं। अनन्त अज्ञान मानने का गौरव कोई दोष नहीं क्योंकि वह प्रामाणिक है। ज्ञान से अज्ञान निवृत्त होता है—यह अबाधित अनुभव ही अनेक तूलज्ञानों में प्रमाण है। अतः दृष्टान्त में साध्य व साधन दोनों के रहने से अनुमान निर्दोष है ॥ १२ ॥

वह अज्ञान दो प्रकार का है—(१) माया और (२) अविद्या। जो अज्ञान शुद्ध सत्त्वगुण प्रधान होता है, उसे माया कहते हैं, और जो अज्ञान मलिन सत्त्वगुण प्रधान होता है, उसे अविद्या कहते हैं।

रजोगुण और तमोगुण दोनों से जब सत्त्वगुण अभिभूत नहीं रहता है, तब उस सत्त्वगुण को शुद्ध कहते हैं, और जब रजोगुण, तथा तमोगुण से सत्त्वगुण अभिभूत हो जाता है, तब उस सत्त्वगुण को मलिन कहते हैं। एवञ्च एक ही अज्ञान सत्त्वगुण की शुद्धि के कारण मायारूप कहलाता है, और वही अज्ञान, सत्त्वगुण को अशुद्धि (मलिनता) के कारण अविद्या कहलाता है। भगवतीश्रुति ने भी इसी तथ्य को अभिव्यक्त किया है यह कहकर कि मूल प्रकृति (अज्ञान) स्वयं ही 'माया'

---

१. दृष्टान्ते विनाऽधिष्ठानप्रमान्मज्ञाननिवृत्तौ ज्ञावनिवर्त्यत्व व स्यादिति। 'तदनिवृत्त्या' इति पाठश्चेत्, स्पष्टोऽर्थः।

सत्त्वेनानभिभूते रजस्तमसी क्रियाशक्तिः। क्रियाशक्तिर्द्विविधा, आवरणशक्तिर्विक्षेपशक्तिश्चेति। रजस्सत्त्वाभ्यामनभिभूतं तम आवरणशक्तिः। तदुक्तम्, "कृष्णं तम आवरणात्मकत्वादिति"। सा च नास्ति न प्रकाशत इति व्यवहारहेतुः। तथाचोक्तम्, "न भाति नास्ति कूटस्थ इत्यापादानमावृति"रिति।

●

यथोक्तप्रकारेण **मायाऽविद्या** चेति द्विधा **भवति**। ताभ्यां मायाविद्याभ्यामेकमेव चैतन्यं जीवेश्वररूपेण द्विधा जातमित्याह—**जीवेशाविति। आभासेन** प्रतिबिम्बरूपेणेत्यर्थः। अयम्भावः—मायाप्रतिबिम्बितं चैतन्यमीश्वरः, अविद्याप्रतिबिम्बितश्चैतन्यञ्जीव इति ॥१२॥

प्रकारान्तरेण मायाविद्याभेदञ्च वक्तुमज्ञानस्य शक्तिं विभजते—**अथवे**त्यादिना। कार्य्यानुकूलकारणनिष्ठसामर्थ्यं **शक्तिः**। ज्ञानशक्तिं व्युत्पादयति—**रज इति। अनभिभूतम**तिरस्कृतम्। इदङ्कुतोऽवगम्यते? इत्यत आह—**सत्त्वादिति**। आवरणशक्तिमाह—**रज इति**। तत्र भाष्यकारसंमतिमाह—**तदुक्तमिति**। 'चमसवदविशेषादि'त्यत्र पूर्वपक्षे "अजामेकां लोहितशुल्ककृष्णा" मित्यस्याजामन्त्रस्य व्याख्यानावसरे कृष्णशब्देन तमोगुणः प्रतिपाद्यते तमोगुणस्यावरणात्मकत्वादिति तस्यावरकत्वं प्रतिपादितं भाष्यकारेणातो यथोक्तलक्षणावरणशक्तिरित्यर्थः। तस्य लक्षणमाह—**सा चेति**। पूर्वं स्वरूपं व्युत्पादितम्, इह तु लक्षणं व्युत्पाद्यत इति विशेषः। अर्थान्नास्ति न प्रकाशत[1] इति व्यवहारकारणमज्ञानशक्तिरिति तल्लक्षणं ज्ञेयम्। तत्र संमतिमाह—**तथा चोक्तमिति**।

●

तथा 'अविद्या' के रूप में परिवर्तित हो जाती है। तब माया और अविद्या—इन दो उपाधियों (विशेषणों) के कारण वह एक ही चैतन्य, 'जीव' तथा 'ईश्वर' के नाम से कहलाता है अर्थात् माया में प्रतिबिम्बित हुए चैतन्य को 'ईश्वर' कहते हैं, और अविद्या में प्रतिबिम्बित हुए चैतन्य को 'जीव' कहते हैं।

इसी तथ्य को श्रुति भी बता रही है—'जीवेशावाभासेन करोति'—अर्थात् एक ही 'अज्ञान', स्वनिष्ठ आभास (प्रतिबिम्ब) के कारण ईश्वर और जीव—ये दो नाम, उस एक ही चैतन्य को प्रदान करा देता है ॥१२॥

कुछ विद्वान्, 'माया' और 'अविद्या' का भेद बताने के लिये 'अज्ञान' की शक्ति को एक दूसरे प्रकार से विभक्त करके बता रहे हैं—**अथवे'ति। अज्ञान की दो प्रकार की** शक्ति होती है—**(१) ज्ञानशक्ति और (२) क्रियाशक्ति**। कार्य के उत्पादक कारण में रहनेवाले सामर्थ्य को शक्ति कहते हैं। उसमें भी ज्ञान की उत्पादक शक्ति को ज्ञानशक्ति कहते हैं, और क्रिया की उत्पादक शक्ति को 'क्रियाशक्ति' कहते हैं।

उपर्युक्त ज्ञानशक्ति को ही ग्रन्थकार बता रहे है—'रज'इति। **रजस् और तमस्—इन दोनों गुणों से अनभिभूत (अतिरस्कृत) होकर रहनेवाला जो सत्त्वगुण है, उसी को ज्ञानशक्ति कहते हैं**। किन्तु यह तथ्य कैसे अवगत हुआ? ऐसा प्रश्न होने पर ग्रन्थकार कह रहे हैं—सत्त्वादि'ति। **'सत्त्वात् सञ्जायते ज्ञानम्'—इस भगवदुक्त गीता वचन के द्वारा अवगत हो रहा है कि सत्त्वगुण से ज्ञान की उत्पत्ति होती है**। एवं च सत्त्वगुण, ज्ञानशक्तिरूप है—इस कथन में श्रीमद्भगवद्गीता का वचन ही प्रमाण माना जाता है।

तथा सत्त्वगुण से अनभिभूत रहनेवाले रजस् और तमस्—इन दो गुणों को क्रियाशक्ति कहते हैं। यह क्रियाशक्ति दो प्रकार की होती है—(१) आवरणशक्ति और (२) विक्षेपशक्ति। आवरण करनेवाली शक्ति को आवरणशक्ति और विक्षेप को पैदा को पैदा करनेवाली शक्ति को विक्षेपशक्ति कहते हैं। उनमें से सत्त्व और रजस्—इन दो गुणों से अनभिभूत रहनेवाल तमोगुण को आवरणशक्ति कहते हैं।

इस तथ्य को भगवान् भाष्यकार ने भी **'कृष्णं तमः आवरणात्मकत्वात्'** कह कर व्यक्त किया है। 'अजामेकां लोहित-शुक्ल-कृष्णाम्'—इस मंत्र में प्रयुक्त 'कृष्ण' शब्द, 'तमोगुण' का ही वाचक है। क्योंकि 'तमोगुण', आवरणात्मक है। उक्त श्रुति की व्याख्या करते हुए भाष्यकार ने 'तमोगुण' की आवरकता का प्रति पादन किया है। अतः 'तमो गुण' को ही आवरण-शक्तिरूप समझना चाहिये। यही आवरण शक्ति का स्वरूप है।

अब 'आवरण शक्ति' का लक्षण बता रहे हैं—**'सा चेति'**। पहिले उसका 'स्वरूप', बताया था, अब उसका 'लक्षण' बताया जा रहा है।

---

१. ग, अर्थादस्ति प्रकाशत इति व्यवहारकारणं ज्ञानशक्तिरिति पाठः।

तमस्सत्त्वाभ्यामनभिभूतं रजो विक्षेपशक्तिः; "रजसो लोभ एव चे"ति स्मृतेः ॥१३॥

लोभादीनां विक्षेपकत्वं प्रसिद्धमेव। सा चाकाशादिप्रपञ्चोत्पत्तिहेतुः। उक्तञ्च,—

"विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजे"दिति। तथाच, पूर्वोक्ताज्ञानं आवरणशक्तिप्रधानं[1] सदविद्येत्युच्यते। ज्ञानशक्तिप्रधानं सन्मायेत्युच्यते।

•

कूटवन्निर्विकारेण तिष्ठतीति कूटस्थः परमात्मा स नास्ति न प्रकाशत इत्यापादानम्। आपादानकारणमावृतिरावरणशक्तिरित्यर्थः। विक्षेपशक्तिमाह—**तम इति ॥१३॥**

ननु रजसो लोभहेतुत्वमुदाहृतस्मृताववगम्यते नतु विक्षेपहेतुत्वमित्याशङ्क्याह—**लोभादीनामिति। आदि**शब्देन मदमात्सर्य्यादियो ग्राह्याः। विक्षेपशक्तेः कृत्यमाह—**साचेति।** सजातीयविजातीयव्यावर्त्तकत्वादिदमेवास्या लक्षणम्। तत्र सम्मतिमाह—**उक्तञ्चेति।** समष्टिव्यष्टिसूक्ष्मशरीरं लिङ्गम्। **आदि**शब्देन पञ्चीकृतभूतानि गृह्यन्ते॥

ननु भवत्वेवं, प्रकृते किमायातमित्यत आह—**तथाचेति।** नच वैपरीत्ये किं विनिगमकमिति वाच्यम्। स्वाश्रयाव्या-

•

'ब्रह्म', नहीं है तथा 'ब्रह्म' प्रकाशित (भासता) नहीं होता है—इस प्रकार के व्यवहार की कारणभूत 'अज्ञान शक्ति' को ही आवरणशक्ति' कहते हैं।

इसी तरह 'ज्ञानशक्ति' का भी लक्षण—'अस्ति प्रकाशते'—इति व्यवहारकारणं ज्ञानशक्ति समझ लेना चाहिये।

उक्त 'आवरणशक्ति' के लक्षण पर श्रीविद्यारण्यस्वामी की सम्मति बता रहे हैं—**'तथाचोक्तमि'**ति। 'कूट' के समान निर्विकार रूप से जो स्थित रहता है, उसे 'कूटस्थ' कहते हैं। **इस प्रकार कूटस्थ परमात्मा रहने पर भी वह नहीं है, वह भासित नहीं होता है'-इस इत्याकारक व्यवहार में जो कारण है, उसी को आवरणशक्ति' कहा जाता है।**

अब 'विक्षेपशक्ति' को बताते हैं **तम** इति। **तमोगुण और सत्त्वगुण—इन दोनों गुणों से अनभिभूत रहनेवाले रजोगुण को ही विक्षेपशक्ति कहते हैं। उक्त कथन में श्रीमद्भगवद्गीता का वचन—"रजसो लोभ एव च"—ही प्रमाण है।** रजोगुण से लोभ आदि की उत्पत्ति होती है, और लोभ, मद, मत्सर इत्यादि में विक्षेप की कारणता प्रसिद्ध ही है। अतः अनभिभूत रजोगुण की—विक्षेप शक्तिरूपता, गीतास्मृति के वचन से स्पष्ट हो जाती है ॥१३॥

लोभ, मद, मत्सर इत्यादि, विक्षेप के कारण हुआ करते हैं, यह प्रसिद्ध ही है। इस विक्षेपशक्ति के अस्तित्व में गीता का वचन प्रमाण है।

विक्षेपशक्ति का लक्षण बता रहे हैं—**आकाशादि प्रपञ्च की उत्पत्ति का कारण जो शक्ति है, उसे विक्षेपशक्ति कहा जाता है।** सजातीय-विजातीयव्यवर्तक होने से यही विक्षेपशक्ति का लक्षण निश्चित किया गया है। इसमें प्राचीन आचार्य का सम्मति भी है—**क्योंकि कहा है कि समष्टि-व्यष्टिरूप लिङ्गशरीर (सूक्ष्म शरीर) से लेकर चतुर्दश भुवनात्मक ब्रह्माण्ड तक सम्पूर्ण जगत् को विक्षेपशक्ति ही उत्पन्न करती है।** उपर्युक्त आदि शब्द से पञ्चीकृतभूतों का ग्रहण किया गया है।

उपर्युक्त कथन से प्रकृत में क्या लाभ हुआ? उसे बताने के लिये कह रहे हैं—तथाचेति। **कहने का निष्कर्ष यह हुआ कि पूर्वोक्त अज्ञान ही आवरणशक्ति प्रधान रहने पर अविद्या शब्द से कहा जाता है, और वही, विक्षेपशक्ति प्रधान रहने पर माया शब्द से कहा जाता है।**

शङ्का—ऊपर अविद्या और माया की जो परिभाषा बताई गई है, उसे विपरीत ही क्यों न माना जाय? अर्थात् आवरणशक्ति प्रधान वाले अज्ञान को माया, और विक्षेपशक्ति प्रधानवाले अज्ञान को अविद्या क्यों न कहा जाय?

समा०—शास्त्रों में अविद्या और माया का लक्षण बताया गया है—'स्वाश्रयाऽव्यामोहकरी माया' अर्थात् अपने आश्रय में जो व्यामोह की प्राप्ति नहीं कराती उसे माया कहते हैं, और 'स्वाश्रयव्यामोहकरी अविद्या'—अर्थात् अपने आश्रय में जो व्यामोह की प्राप्ति कराती है, उसे अविद्या कहते हैं। आवरणशक्ति मोहकारिणी होती है, इसलिये आवरणशक्ति प्रधान

१. ग, ज्ञानविक्षेपशक्तिप्रधानम् पाठः।

एतदभिप्राया स्मृतिरपि

"तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते।
योगी मायाममेयाय तस्मै विद्यात्मने नमः" ॥

●

मोहकरी माया, स्वाश्रयमोहकरी अविद्येति मायाविद्यालक्षणप्रसिद्धेः आवरणशक्तेर्मोहकारित्वात् तत्प्रधानमज्ञानमविद्येत्युच्यते। विक्षेपादिशक्तेरन्यथात्वात्तत्प्रधानमज्ञानं मायेत्युच्यते। तथाच न वैपरीत्यमिति भावः ॥

ननु 'तरत्यविद्यामि'ति श्लोके घटकलशादिवन्मायाविद्याशब्दयोः पर्य्यायत्वमवगम्यते, तत्कथं तयोर्भेदसिद्धिरित्यत आह—**एतदभिप्राया स्मृतिरपीति**। अत्राप्यावरणशक्तिं निमित्तीकृत्याविद्याशब्दः प्रकृतिं व्युत्पादयति। विक्षेपादिशक्तिं निमित्तीकृत्य मायाशब्दोऽपीति। एषोऽभिप्रायो यस्याः सा एतदभिप्राया सा तथोक्ता। योगो ब्रह्मसाक्षात्कारोऽस्यास्तीति **योगी** ब्रह्मनिष्ठ इति यावत्। **यस्मिन्** सर्वान्तर्य्यामिणि सर्वाधिष्ठाने वासुदेवे। **हृदि** अन्तःकरणे। **निवेशिते**ऽहब्रह्मास्मीति साक्षात्कृते सति। कार्य्याकारेणाविष्कृतामावरणशक्तिप्राधान्येनाविद्याशब्दवाच्यां, विक्षेपशक्तिप्राधान्येन मायापदवाच्यां, प्रकृतिं **तरति** नाशयति। **तस्मै नम**इति सम्बन्धः। कीदृशाय नमः? विद्या चैतन्यमात्मा यस्य स तथोक्तस्तस्मै। पुनः कस्मै? **अमेयाय** न मेयोऽमेयः अप्रमेयायेत्यर्थः ॥

ननु पूर्वं साक्षात्कारविषयत्वं ब्रह्मणः प्रतिपादितमिदानीमप्रमेयत्वमुच्यते तथाच पूर्वोत्तरव्याघातः? उच्यते वृत्तिविषयत्वमुक्तं साक्षात्कृते सतीति। अप्रमेयायेति **चैतन्याविषयत्वमुच्यते** 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह'

●

जो अज्ञान है, उसे अविद्या ही कहते हैं। उसे माया नहीं कहते। विक्षेप आदि शक्ति में मोहकारिता न होने से विक्षेप आदि शक्ति प्रधान अज्ञान को माया शब्द से ही कहा जाता है। उसे अविद्या नहीं कहते। विक्षेप आदि में आदि शब्द से ज्ञानशक्ति का भी ग्रहण करना चाहिये। **माया और अविद्या के भेद का समर्थन स्मृति ने भी किया है। स्मृति कहती है—**

कि हृदय में जिस परमात्मा का साक्षात्कार होने पर ब्रह्मज्ञानी योगी, उस आवरणशक्ति—प्रधान अज्ञानरूप अविद्या को तथा उस विक्षेप शक्तिप्रधान अज्ञानरूप माया को नष्ट कर देता है, उस ज्ञानस्वरूप अप्रमेय ब्रह्म को हमारा प्रणाम है।

शङ्का—'तरत्यविद्याम्' इस स्मृति वचन से तो 'घट-कलश' की तरह 'माया' और 'अविद्या' ये दोनों एक दूसरे के पर्याय होते हैं। अतः उनकी भिन्नता कैसे सिद्ध हो सकती है?

समा०—उक्त स्मृति वचन से उन दोनों की भिन्नता ही स्पष्ट की गई है। उक्त वचन में 'आवरण शक्ति' को निमित्त मानकर जो 'अविद्या' शब्द का प्रयोग किया गया है, वह 'प्रकृति' को बता रहा है। और 'विक्षेपादि शक्ति' को निमित्त मानकर 'माया' शब्द का जो प्रयोग किया है, वह भी 'प्रकृति' को ही बता रहा। इसी अभिप्राय से ग्रन्थकार ने स्मृति का उद्धरण दिया है। 'योग' अर्थात् ब्रह्मसाक्षात्कार—जिसे हुआ है, वह 'योगी' अर्थात् 'ब्रह्मनिष्ठ' कहलाता है। उसके हृदय (अन्तःकरण) में जिस सर्वान्तिर्यामी सर्वाधिष्ठान वासुदेव भगवान् श्रीकृष्ण का 'निवेशिते' अर्थात् 'अहम्ब्रह्मास्मि' अर्थात् 'अहं वासुदेवः श्रीकृष्णोऽस्मि' यह साक्षात्कारात्मक अनुभव हुआ है, वही ब्रह्मनिष्ठ योगी, कार्य के आकार में आविष्कृत हुई, आवरणशक्ति की प्रधानता के कारण 'अविद्या' शब्द से वाच्य, और विक्षेप शक्ति की प्रधानता के कारण 'माया' शब्द से वाच्य जो 'प्रकृति' है, उसे नष्ट कर पाता है, उसे हमारा प्रणाम है। वह ब्रह्मनिष्ठ योगी कैसा है? इस प्रश्न के उत्तर में कहा 'विद्यात्मने'। अर्थात् वह ब्रह्मनिष्ठ योगी, चैतन्य स्वरूप मात्र है। दूसरा विशेषण दिया है—'अमेयाय'। अर्थात् अप्रमेय, जो किसी का विषय नहीं होता है।

शङ्का—पहिले तो यह बताया था कि 'ब्रह्म', साक्षात्कार का विषय होता है, और अब कह रहे हैं कि वह 'अप्रमेय' है- अर्थात् किसी का विषय नहीं है। कहना तो पूर्वोत्तरव्याघात रूप है। अर्थात् पहिले जो कहा उसी के विपरीत अब कह रहे हैं। यह ठीक नहीं है।

समा०—'साक्षात्कृते सति' कह कर उसमें वृत्तिविषयता' बताई थी किन्तु अब 'अप्रमेयाय' कहकर 'चैतन्याविषयत्व' को बताया गया है। इसी—अभिप्राय से परमात्मा को विषय और अविषय बताने वाले श्रुतिवचन भी लेने चाहिये। अतः पूर्वोत्तरव्याघात की गन्ध भी नहीं है।

इत्येवंरूपा द्रष्टव्या ।—एवं च मायोपहितं चैतन्यमीश्वरो जगत्कारणमन्तर्यामीत्युच्यते । स एव तत्पद-वाच्यार्थः ॥१४॥

अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते । तदुक्तम्,—

"तमोरजस्सत्त्वगुणा प्रकृतिर्द्विविधा च सा । सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते" ॥

"मायाबिम्बो[1] वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा" ॥ इति ॥

●

'तन्त्वौपनिषदं पुरुषं पृच्छामी'त्यादिश्रुतिभ्यः । अतो न व्याघात इत्यर्थः । मायाविद्याविभागनिरूपणफलमाह—**एवञ्चेति ।** "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी एषो योनिः सर्वस्ये"त्यादिश्रुत्योच्यते इति शेषः ॥

ततः किम् ? तत्राह—**स एवेति । स** ईश्वरः "तत्त्वमसि" वाक्ये तत्पदस्य वाच्यार्थः ॥१४॥

नन्वविद्यायाः कुत्र तर्ह्युपयोग इत्याशङ्क्य 'सुषुप्तस्थाने एकीभूतः प्रज्ञानघन 'एषानन्दमयो ह्यानन्दभुगि'त्यादिश्रुत्या **अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते** स एव त्वं पदस्य वाच्यार्थं इत्यभिप्रेत्य प्रसङ्गाज्जीवस्वरूपं व्युत्पादयति—**अविद्योपहितमिति ।** उक्तश्रुत्येति शेषः । उक्तेऽर्थे वृद्धसंमतिमाह—**तदुक्तमिति ।** सच्चिदानन्दब्रह्मप्रतिबिम्बसमन्विता सत्त्वरजस्तमोगुणात्मिका प्रकृतिरेकैव ।

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" ॥

●

अब 'माया' और 'अविद्या' का जो विभाग बताया गया है, उसका 'फल' बता रहे हैं—**'चैतन्य' जब 'माया' से उपहित होता है, तब उस 'चैतन्य' को ईश्वर' कहते हैं, और उसे ही 'जगत्' का कारण कहते हैं, और उसे ही 'अन्तर्यामी' कहते हैं ।** 'एष सर्वेश्वरः'—यह श्रुति, मायोपहित चैतन्य को 'ईश्वर' कह रही है । तथा 'एषोऽन्तर्यामी'—यह श्रुति, उसे 'अन्तर्यामी' कह रही है । तथा 'एष योनिः सर्वस्य'—यह श्रुति, उसे सर्वकारण बता रही है । एवं च इन श्रुतिप्रमाणों से 'मायोपहित चैतन्य' में 'ईश्वरत्व', 'अन्तर्यामित्व', तथा 'जगत्कारणत्व' सिद्ध हो जाता है ।

उक्त विवेचन से जो निष्कर्ष निकला, उसे ग्रन्थकार 'स एव' कहकर बता रहे हैं—**मायोपहित चैतन्य जो 'ईश्वर' है वही, 'तत्त्वमसि' महावाक्य के 'तत्' पद का 'वाच्यार्थ' है ॥ १४ ॥**

शङ्का—मायारूप उपाधि से उपहित होने पर ही 'चैतन्य' को ईश्वर कहा गया है, तो 'अविद्या' का उपयोग कहाँ होगा ?

समा०—सुषुप्तस्थान में एकीभूत होने वाला **'चैतन्य', दो 'अविद्या' से उपहित रहता है, उसे 'जीव' और प्राज्ञ' भी कहते हैं ।** श्रुति ने भी कहा है—'एष आनन्दमयह्यानन्दभुक् । वह 'जीव' ही 'त्वम्' पद का वाच्यार्थ है, इसी अभिप्राय को ध्यान में रखकर प्रसंगप्राप्त 'जीव' के स्वरूप का प्रतिपादन ग्रन्थकार कर रहे हैं, **अविद्योपहित' मिति ।** यहाँ 'उपहित' शब्द से 'प्रतिबिम्ब' का ग्रहण करना चाहिये । अभिप्राय यह है कि 'माया' में प्रतिबिम्ब चैतन्य 'ईश्वर' है, और अविद्या में प्रतिबिम्बित चैतन्य 'जीव' है । इसी तथ्य को श्रीविद्यारण्यकृत पञ्चदशी में भी कहा गया है—

सच्चिदानन्दानन्द ब्रह्म के प्रतिबिम्ब से युक्त त्रिगुणात्मिका (सत्त्वरजस्तमोगुणात्मिका) जो प्रकृति है, वह, माया और अविद्या के भेद से दो प्रकार की होती है । शुद्धसत्त्वगुण की प्रधानता रहने पर उस प्रकृति माया शब्द से कहा जाता है । और मलिन सत्त्वगुण की प्रधानता रहने पर उसी प्रकृति को अविद्या शब्द से कहा जाता है । माया में प्रतिथिम्बित हुआ जो चैतन्य है, वह, उस माया को अपने वंशगत किये रहता है, अतएव उसे ईश्वर तथा सर्वज्ञ कहा गया है । तथा अविद्या में प्रतिबिम्बित हुआ जो चैतन्य है, उसे जीव कहा गया है । वह जीवसञ्ज्ञक चैतन्य, उस अविद्या के वश रहता हुआ, अविद्या की विचित्रता से स्वयं भी देव, मनुष्य, तिर्यक् आदि रूपों में से अनेक प्रकार के रूपों को धारण करता रहता है ।

अभिप्राय यह है—शुद्धसत्त्वगुण प्रधान माया, एक ही है, अतः उस माया में प्रतिबिम्बित ईश्वर चैतन्य भी एक ही है । और मलिन सत्त्वप्रधान अविद्या है, वह मलिनता की विचित्रता से अनेक प्रकार की है । उस कारण उस अविद्या में प्रतिबिम्बित हुआ जीवचैतन्य भी अनेक प्रकार का होता है । इस पक्ष में नानाजीव-वाद की सिद्धि हो जाती है । उक्त कथन

---

१. मायां बिम्बो इत्यपि पाठः ।

'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः'।
"मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" ॥

इत्येवमादयः श्रुतय उक्ताभिप्राया द्रष्टव्याः ॥१५॥

•

"न तं विदाथ य इमाः जजानान्यद् युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तो" त्यादि श्रुतिभ्यः॥

ननु 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ मायाभिरिति बहुवचनसामर्थ्याल्लिङ्गादज्ञानस्य नानात्वावगमात्कथमेकत्वमवधार्य्यते। न चाजामन्त्रेण तदवगम्यते इति वाच्यम्। श्रुत्यन्तरविरोधे तदवधारणायोगात्। नच परस्परविरोधादुभयोरप्रामाण्यापत्तिरिति वाच्यम्। बहुवचनसामर्थ्यादिज्ञाननानात्वे निश्चितेऽजामन्त्रस्याज्ञानसमष्टिपरत्वोपपत्तेः। तस्मात्प्रकृतिरेकैवेत्यवधारणमनुपपन्नमिति?

मैवम्, श्रौतार्थस्य बलवत्त्वात्प्रकृतेरेकत्वावधारणोपपत्तेः। तथाहि—अजामन्त्रे एकामिति श्रुत्या एकवचनसामर्थ्येन च लिङ्गेन प्रकृतेरेकत्वं निश्चीयते। "इन्द्रो मायाभि"रित्यस्मिन्मन्त्रे बहुवचनसामर्थ्याद्विज्ञाननानात्वमवगम्यते। तत्र श्रुतिलिङ्गयोः श्रुतेर्बलीयस्त्वाच्छ्रौतार्थप्रकृत्यैकत्वमभ्युपगन्तव्यम्। अन्यथा न्यायविरोधापत्तेः। किञ्च, "इन्द्रो मायाभि"रित्यत्र केवललिङ्गादज्ञाननानात्वमवगम्यते। अजामन्त्रे श्रुतिलिङ्गाभ्यामज्ञानैकत्वमिति तदेवावश्यमभ्युपगन्तव्यम्॥

तर्हीन्द्रो मायाभिरिति मन्त्रस्याप्रामाण्यप्रसङ्ग इति चेन्न। अर्थान्तरत्वेन प्रामाण्योपपत्तेः। तथाहि—"इन्द्रो

•

में श्रुति का प्रमाण भी उपलब्ध होता है—**श्रुति ने कहा है कि अकस्मात् वेदात् इस वेद वाक्य से मायी मायोपाधिक परमात्मा, एतत् इस श्रुत्यादि प्रमाण से अवगत होनेवाले विश्वम् आकाशादि ब्रह्माण्डान्तजगत् को सृजते उत्पादयति उत्पन्न करता है, तस्मिन् उसके सृष्ट होने पर अविद्योपाधिक अन्य जो जीव हैं, वह पूर्वोक्त मायया अर्थात् देहादिकों में अहम्, मम इस अभिमान से सन्निरुद्धः बद्ध होता है। प्रकृति ही जगत् का उपादान कारण है, वही माया शब्द से कही जाती है, और मायिनम् मायोपाधिक महेश्वर है, यह समझना चाहिये।**

अभिप्राय यह है कि मायोपाधिक परमात्मा, अपनी उपाधिभूत माया की प्रधानता से जगत् का उपादानकारण है, और अपने स्वरूप की प्रधानता से वही, जगत् का निमित्तकारण भी है। इसी रहस्य को आगे बताएँगे। एवंच सच्चिदानन्द ब्रह्म प्रतिबिम्बित समन्विता सत्त्वरजस्तमोगुणात्मिका प्रकृति एक ही है। अनेक श्रुतियाँ भी उक्त तथ्य को बताती हैं—अजामेकाम् इत्यादि।

उक्त श्रुति का विशद अर्थ, हमारी सांख्य तत्त्व कौमुदी की 'तत्त्वप्रकाशिका' व्याख्या में जिज्ञासुओं को देख लेना चाहिये।

शङ्का—'इन्द्रो मायाभिः पुरुरूप ईयते'—इस श्रुति में मायाभिः—इस बहुवचन के सामर्थ्यरूप लिङ्ग से अज्ञान का नानात्व अवगत होता है, तब आप उसे एक कैसे कह सकते हैं? यदि आप यह कहें कि अजा मन्त्र से एकत्व की प्रतीति होती है, तो यह कहना ठीक नहीं है। अन्यथा श्रुत्यन्तर के साथ विरोध होगा, जिससे, उक्त एकत्व का अवधारण करना संभव नहीं है। यदि आप यह कहें कि श्रुतियों का परस्पर विरोध रहने पर दोनों को अप्रमाण कहने का प्रसंग प्राप्त होगा, तो यह भी नहीं कह सकते, क्योंकि बहुवचन के सामर्थ्य से अज्ञान का नानात्व निश्चित रहने से उक्त अजामन्त्र को अज्ञान समष्टि परक लगाया जा सकेगा। तस्मात् प्रकृति को एक ही बताना उपपन्न नहीं हो रहा है, अर्थात् प्रकृति का एकत्वावधारण अनुपपन्न है।

समा०—श्रौतार्थ के प्रबल रहने से प्रकृति के एकत्वावधारण की उपपत्ति हो जाती है। तथाहि—अजामन्त्र में एकाम् इस श्रुति से और एकवचन के सामर्थ्य रूप लिङ्ग से प्रकृति का एकत्व निश्चित किया जाता है। इन्द्रो मायाभिः—इस मन्त्र में बहुवचन के सामर्थ्य से अज्ञान के नानात्व को प्रतीति होती है। इस परिस्थिति में श्रुति और लिङ्ग का विरोध उपस्थित होनेपर श्रुति की प्रबलता रहने से श्रौतार्थ जो प्रकृत्यैकत्व है, उसी का स्वीकार करना चाहिये। अन्यथा मीमांसा न्याय का विरोध प्राप्त होगा।

यद्वा, यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाठकः पाचक[1] इति व्यपदिश्यते, तथा एकमेवाज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाऽविद्येति च व्यपदिश्यते। तथाच—अविद्याप्रतिबिम्बितं चैतन्यं जीवः, अविद्योपहितं चैतन्य[2]मीश्वरः ॥१६॥

●

मायाभि"रित्यत्र मायाशब्देन प्रज्ञाविशेषो[3] मिथ्याभिमानो वा विधीयते। ततश्चेन्द्रः परमात्मा तैरन्यतरै[4]र्वा हिरण्यगर्भादिभिर्नानारूपः सन् चेष्टते—इत्यर्थान्तरत्वेन प्रामाण्यमुपपद्यते, नाज्ञाननानात्वप्रतिपादने तात्पर्य्यं मन्त्रस्य। अजामन्त्रस्य त्वज्ञानैकत्वप्रतिपादने तात्पर्य्यादर्थान्तरायोगाच्चाज्ञानमेकमेव। तस्मात्प्रकृतिरेकैवेत्यवधारणमुपपन्नम्॥ सा **सत्त्वशुद्धयविशुद्धिभ्यां माया-विद्याभेदेन** द्विविधा। **तद्वैचित्र्याद्** मालिन्यवैचित्र्याद् **अनेकधा** अनेकप्रकारा, अविद्या इति शेषः। अयम्भावः—शुद्धसत्त्वप्रधाना माया एकैव तदुपहित ईश्वरः। मलिनसत्त्वप्रधाना अविद्या मालिन्यवैचित्र्यादनेकधा तदुपहितो जीवोऽपि तथैव। अस्मिन् पक्षे नाना जीवः। उक्तार्थे श्रुत्यन्तरसम्मतिमाह—**अस्मादिति। अस्माद्** वेदात्। **मायी** मायोपाधिकः परमात्मा। **एतद्** श्रुत्यादिप्रमाणेनावगम्यमानम्। **विश्वम्** आकाशादि ब्रह्माण्डान्तं जगत्। **सृजते** उत्पादयति। **तस्मिन् सृष्टेऽन्यो**ऽविद्योपाधिकः **मायया** पूर्वोक्तया देहादिष्वहं ममेत्यभिमानेन **सन्निरुद्धो** बद्धः। **प्रकृतिं** जगदुपादानकारणम्। **मायिनं** मायोपाधिकम्। **विद्यादित्युभयत्र** सम्बध्यते। अयम्भावः—मायोपाधिकः परमात्मा सोपाधिकमायाप्राधान्येन जगदुपादानकारणं स्वप्राधान्येन निमित्तमिति। इममेवार्थमग्रे व्युत्पादयिष्यति ॥१५॥

अज्ञानस्यैकत्वेऽपि मायाऽविद्याभेदं ततो जीवेश्वरभेदञ्चोक्त्वा इदानीमज्ञानमेकमेव, मायाऽविद्याभेदो नास्ति, बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्भेदः, जीवोऽप्येक एवेत्यभिप्रेत्य पक्षान्तरमाह—**यद्वेति। व्यपदिश्यते** इति। तथाच—

●

किञ्च—इन्द्रो मायाभिः में केवल लिङ्ग प्रमाण से अज्ञाननानात्व की प्रतीति होती है, किन्तु अजामन्त्र में श्रुति और लिङ्ग दोनों से अज्ञान के एकत्व की प्रतीति होती है, इसलिये इसे ही मानना उचित होगा।

शंका—तब तो इन्द्रो मायाभिः—इस मन्त्र को अप्रमाण मानने का प्रसंग आवेगा।

समा०—'इन्द्रो मायाभिः'—इस मन्त्र के प्रामाण्य की उपपत्ति उसका अर्थान्तर करने से हो सकती है। तथाहि—इन्द्रो मायाभिः इस मंत्र में माया शब्द से प्रज्ञाविशेष अथवा मिथ्याभिमान का प्रतिपादन किया जा रहा है। तब अर्थ यह होगा कि इन्द्र अर्थात् परमात्मा, हिरण्यगर्भादिकों के नाना रूपों को धारण करने से उसका प्रामाण्य उपपन्न हो जाता है। अतः ज्ञान के नानात्व का प्रतिपादन करने में मन्त्र का तात्पर्य नहीं है। अजामन्त्र का तात्पर्य तो अज्ञान के एकत्व का प्रतिपादन करने में ही है, और उस मन्त्र का अन्य अर्थ करना भी असंभव है, अतः अज्ञान एक ही है। एवंच **'प्रकृति एक ही है'** यह अवधारण जो किया गया है, वह उचित ही है।

निष्कर्ष यह है कि विशुद्धब्रह्म में तो जगत् की कारणता होती नहीं, जगत्कारणता तो मायोपाधिक परमात्मा में ही हुआ करती है, वह मायोपाधिक परमात्मा जगत् का उपादान कारण तथा निमित्तकारण दोनों ही है। उपाधिभूमि माया की प्रधानता से तो वह, जगत् का उपादान कारण है और अपने चैतन्यरूप की प्रधानता से वह परमात्मा, जगत् का निमित्तकारण होता है।

अज्ञान के एक होने पर भी माया और अविद्या के भेद से जीव और ईश्वर का भेद तथा जीवों का नानात्व बताया गया ॥१५॥

जो लोग 'अज्ञान' का 'एक' मानते हैं, तथा 'माया', अविद्या के भेद को न मानकर 'बिम्ब—प्रतिबिम्ब भाव' से 'जीव-ईश्वर' के भेद को मानते हैं, तथा 'जीव' को 'एक' ही मानते हैं, उनके मत को ग्रन्थकार अब बता रहे हैं। यद्वेति। **जैसे एक ही देवदत्त, पचन पठन क्रिया रूप निमित्त के भेद से पाचक, पाठक नाम से पुकारा जाता है, वैसे एक ही अज्ञान,**

---

१. वशेन पाचको याचक इत्यपि पाठः।
२. बिम्बचैतन्यमित्यपि पाठः।
३. मिथ्याभिनिवेशो वा इति अधिकः पाठः।
४. अन्यतमैरिति पाठः।

मायाविद्याशब्दौ पर्य्यायवन्तौ, न मायाविद्ययोर्भेद इत्यर्थः। कथं तर्हि जीवेश्वरयोर्भेदस्तत्राह—**तथाचेति**। अविद्यायां प्रतीयमानम-विद्याप्रतिबिम्बितम्। परमात्मनो नीरूपत्वेन सूर्य्यादिवत्प्रतिबिम्बायोगात्। अविद्योपाधिकमविद्योपहितम्।

नच तत्र प्रमाणाभाव इत्याह—**आभास एव चेत्यादिना**। द्वितीये स्थितम् 'अंशो नानाव्यपदेशादन्यथा' चापि [1]दासदाशकितवादित्वमधीयत एके।

तत्र पूर्वाधिकरणे जीवेश्वरयोरुपकार्य्योपकारकभाव उक्तः, स किं स्वामिभृत्ययोरिव आहोस्विदग्निविस्फुलिङ्ग-योरिवेति संशयः। तत्रानियम इत्येकः पूर्वपक्षः।

द्वितीयस्तु भेदश्रुत्यनुरोधात् स्वामिभृत्यवदेव जीवपरयोरुपकार्य्योपकारकभावः इति प्राप्ते इदमाह—परस्यांश इवांश आभासरूपो जीवः। कुतः? नानाव्यपदेशात्। "य आत्मनि तिष्ठन्नि"त्यादिना। अन्यथा चापि—परमात्माभिन्नश्च जीवः 'ब्रह्मदाशा[1]ब्रह्मदासा[2] ब्रह्मेवेमे कितवा[3] उत' "तत्त्वमसि'आदि" श्रुतिभिरभेदप्रतिपादनात्।

जीवेश्वरयोरत्यन्तैक्ये "अहरहः सन्ध्यामुपासीत', गृहस्थः सदृशीं भार्य्यामुपेयात्', 'ब्राह्मणो न हन्तव्यः', 'मिश्रीभावः[4] गुर्वङ्गनां नोपगच्छेदि"त्यनुज्ञापरिहारयोरानर्थक्यप्रसङ्ग इति चेन्न। देहाभिमानादर्थवत्वोपपत्तेस्तयोः॥

नन्वेवमपि कर्म्मफलव्यतिकरः स्यादिति चेन्न। जीवस्य परिच्छिन्नत्वान्न कर्म्मफलव्यतिकरः। जीवस्य परमात्मा-भिन्नतया कथं परिच्छिन्नत्वमित्याशङ्क्याह सूत्रकार '**आभास एव चे**'ति। जलादिप्रतिबिम्बित-सूर्य्यादिवदाभास एव प्रतिबिम्बरूप एव जीवः।

कस्तत्र प्रतिबिम्बोपाधिरिति चेत्?

अत्र केचित् अन्तःकरणविशिष्टे कर्त्तृत्वादिसंसारस्यानुभूयमानत्वात्, "कार्योपाधिरयं जीव" इति वचनाच्च अन्तःकरणं प्रतिबिम्बोपाधिरिति वदन्ति॥

●

विक्षेप और आवरण शक्तिरूप निमित्त के भेद से माया, अविद्या इन दो नामों से कहा जाता है। अभिप्राय यह है कि जैसे 'पाचक पाठक'—दोनों शब्द, 'एक ही देवदत्त' के वाचक हैं, उन वाचक शब्दों के भिन्न रहने पर भी 'देवदत्त' का भेद नहीं होता है। उसी तरह 'माया' और 'अविद्या' ये दोनों शब्द, उस एक ही 'अज्ञान' के वाचक हैं। उन वाचक शब्दों का भेद रहने पर भी, उस 'अज्ञान' का भेद नहीं हैं। अतः 'माया' और 'अविद्या' का भेद नहीं हैं।

इस प्रकार के एक अज्ञानरूप अविद्या में जो चैतन्य का 'प्रतिबिम्ब' है, उसे 'जीव' कहते हैं। और उसी—अविद्या से उपहित 'बिम्ब चैतन्य' को 'ईश्वर' कहते हैं। एवंच 'माया-अविद्या' के भेद का स्वीकार न करने पर भी बिम्ब-प्रतिबिम्बभाव को मानकर 'जीव' और 'ईश्वर' का भेद उपपन्न हो जाता है। 'माया और अविद्या' ये दोनों शब्द, एक-दूसरे के पर्याय हैं। एवंच माया और अविद्या में कोई भेद (भिन्नता) नहीं है॥ १६॥

उपर्युक्त अभिप्राय को 'आभास एव च' इस व्याससूत्र द्वारा भी बताया गया है। जैसे जलादि उपाधियों में सूर्य-चंद्रादि का प्रतिबिम्ब पड़ता है वैसे यह जीव भी चैतन्य का प्रतिबिम्ब ही है।

शङ्का—जैसे सूर्य-नक्षत्रादि के प्रतिबिम्ब का 'जल' उपाधि है, वैसे इस जीव रूप प्रतिबिम्ब का तथा बिम्बभूत ईश्वर का उपाधि कौन है?

समा०—कुछ विद्वान् तो 'अन्तःकरण' को ही 'जीव' का 'उपाधि' मानते हैं, क्योंकि 'अन्तःकरण विशिष्ट चैतन्य' में ही 'अहं कर्ता, अहं भोक्ता' इस प्रकार से 'कर्तृत्व-भोक्तृत्वादि संसार' का अनुभव हुआ करता है। और 'कार्योपाधिरयं जीवः'—यह श्रुति भी उस 'अन्तःकरण' रूप 'कार्य' को ही जीव' के उपाधि रूप में बता रही है। इसलिये वह 'अन्तःकरण' ही

१. प्रचलितसूत्रपाठे दासशब्दो नास्ति, पाठान्तरेऽपि नास्ति।

१. दाशाः कैवर्त्ताः।

२. दासा भृत्याः।

३. कितवा द्यूतकृतो भ्रष्टाः।

४. पाठान्तरे नास्तीदं पदम्।

अपरेतु—अन्तःकरणस्याज्ञानकार्य्यतया स्वातन्त्र्यायोगेन जीवपरमात्मभेदकत्वायोगाद् नान्तःकरणं जीवोपाधिः। किन्त्वज्ञानं, स्वातन्त्र्यात्। तदपि नाना। तत्प्रतिबिम्बो जीवः, सोऽपि नाना, तदुपाधेरज्ञानस्य नानात्वात्। तथाच; ब्रह्मण्यारोपितानामज्ञानानां परिच्छिन्नतया तत्प्रतिबिम्बितरूपाणां जीवानामपि परिच्छिन्नत्वादितरेतरव्यावृत्तत्वाच्च न कर्म्मफलव्यतिकर इति सूत्रार्थं इति नानाजीववादिनामभिप्रायमाहुः॥

अन्येतु—जीवेश्वरविभाजकोपाधिरज्ञानमेव, तस्य स्वातन्त्र्यात्। तदप्येकमेव, तत्प्रतिबिम्बो जीवः; उपाधेरेकत्वात् सोऽप्येक एव; अज्ञानैक्ये प्रमाणं दर्शितम्। 'आभास एव चे'त्येकवचनसामर्थ्याच्च।

ननु जीवैक्ये बन्धमोक्षव्यवस्था कथम्? इत्थम्—अन्तःकरणनानात्वे प्रमातॄणां नानात्वं तत्त्वज्ञानेनैकस्मिन् प्रमातरि मुच्यमाने तद्रहितः प्रमाता बद्ध इति बन्धमोक्षव्यवस्था सम्भवति।

●

'प्रतिबिम्ब रूप जीव' का उपाधि है। वह 'अन्तःकरण', एक नहीं है, अपितु 'नाना' है तथा परिच्छिन्न है। उस कारण उन अन्तःकरणों में प्रतिबिम्ब रूप जो जीव है, वह भी 'नाना' हैं और परिच्छिन्न हैं, यह एक पक्ष का कथन है।

कुछ विद्वागों का यह कहना है कि 'अन्तःकरण' तो 'अज्ञान' का कार्य है, उस कारण वह स्वतंत्र नहीं है, अपितु परतंत्र है। अतः उस अन्तःकरण में 'बिम्ब-प्रतिबिम्बभाव' से जीव-परमात्मा के भेद का होना संभव नहीं है। इसलिये 'अन्तःकरण' को जीव का 'उपाधि' नहीं कह सकते। किन्तु 'अज्ञान', स्वतन्त्र होने के कारण उसी को (अज्ञान को) ही 'जीव' का उपाधि मानना चाहिये।

जीव का उपाधि रूप अज्ञान भी एक नहीं है, अपितु वह भी नाना है। उस अज्ञान रूप उपाधि के नाना होने से उस में (अज्ञान में) 'प्रतिबिम्ब रूप जीव' भी 'नाना' ही हैं, और 'ब्रह्म' में आरोपित रहने के कारण वे 'अज्ञान' भी परिच्छिन्न हैं। उन परिच्छिन्न अज्ञानों में प्रतिबिम्बरूप जो जीव हैं, वे भी परिच्छिन्न ही हैं। और वे परस्पर भिन्न हैं। अतः पुण्य-पाप कर्मों के सुख-दुःख-रूप फलों का व्यतिकर भी नहीं होता है। एक के सुखी अथवा दुःखी होने पर सभी को सुख या दुःख की प्राप्ति होने को 'कर्मफल-व्यतिकर' कहते हैं। अतः जैसे 'एक जीव-पक्ष' में 'कर्मफल व्यतिकर' प्राप्त होता है, वैसा इस 'नाना जीव पक्ष' में 'कर्मफल व्यतिकर' नहीं होता है। उस कारण वे 'नाना अज्ञान' ही 'बिम्बरूप ईश्वर' तथा 'प्रतिबिम्बरूप जीवों' को परस्पर भिन्न करने वाला 'उपाधि' है। इस रीति से उक्त व्यास सूत्र का अर्थ नाना जीववादियों के पक्ष में सिद्ध होता है।

कुछ व्याख्याकारों का यह कहना है कि 'जीव' और 'ईश्वर' को भिन्न करनेवाला 'उपाधि' स्वतंत्र होने से 'अज्ञान' ही है। और वह 'अज्ञान' 'नाना' नहीं है, अपितु 'एक ही' है। उस 'एक अज्ञान' में चैतन्य का प्रतिबिम्बरूप जो 'जीव' है, वह भी 'अज्ञानरूप उपाधि' के एक रहने से 'एक' ही है, और 'अपरिच्छिन्न' है। उस 'अज्ञान' के एक होने में 'अजामेकां लोहितशुक्ल-कृष्णाम्'—यह श्रुति ही प्रमाण है।

'इन्द्रो मायाभिः पुरुरूप ईयते'—इस श्रुति में 'माया' का जो 'बहुत्व' बताया गया है, वह, 'मायारूप अज्ञान' की शक्तियों के 'बहुत्व' को ध्यान में रखकर अथवा 'सत्त्वादि गुणों' के 'बहुत्व' को ध्यान में रखकर कहा—गया है। अतः श्रुति विरोध का प्रश्न ही नहीं उठता। और 'जीव' के एक होने में 'अजो ह्येको जुषमाणोऽनुशेते'—यह श्रुति, प्रमाण है। तथा 'आभास एव च'—इस व्यास सूत्र में एक वचन का प्रयोगकर सूत्रकार ने भी 'जीव' का 'एक' होना ही बताया है। अतः 'जीव' का एक होना अर्थात् 'एक जीववाद' को ही स्वीकार करना उचित प्रतीत होता है।

शंका—'जीव' को एक मानने पर बन्ध और मोक्ष की व्यवस्था कैसे हो पाएगी? अभिप्राय यह है कि 'तत्त्वज्ञान' के होने पर, वह तत्त्वज्ञानी जीव' मुक्त हो जाता है, और जिस जीव को 'तत्त्वज्ञान' नहीं होता वह जीव, बद्ध रहता है—इस प्रकार से बन्ध-मोक्ष की व्यवस्था तो 'नाना जीव' के मानने पर उपपन्न हो जाती है। किन्तु 'एक जीव' बाद में वह बन्ध-मोक्ष व्यवस्था का बनना संभव नहीं है। अतः 'नाना जीव वाद' का मानना ही उचित प्रतीत हो रहा है।

समा०—यद्यपि 'अज्ञान' तथा 'जीव' एक होने पर भी उस एक अज्ञान के कार्यभूत जो अन्तःकरण हैं, वे नाना (अनेक) हैं, और 'अन्तःकरण विशिष्ट चैतन्य' को प्रमाता कह जाता है, इसलिये उन अन्तःकरणों के अनेक (नाना) रहने से तदवच्छिन्न चैतन्यरूप 'प्रमाता' भी नाना (अनेक) हैं। अतः तत्त्वज्ञान होने पर 'एक प्रमाता' के मुक्त हो जाने पर भी,

स्यादेतत्—कोऽयं मोक्षो नाम ? अविद्यानिवृत्तिरिति चेद् ? न तावत्कार्याविद्या निवृत्तिर्मोक्षः सकलभ्रान्तिज्ञाननिवृत्तेरसम्भवात् । मूलाविद्यासत्त्वेन पुनर्भ्रान्तिज्ञानोदयसम्भवात् । यत्किञ्चिद्भ्रान्तिज्ञाननिवृत्तेरपुरुषार्थत्वात् । नन्वज्ञानगतावरणशक्तिरविद्या, तन्नानात्वेन यस्य प्रमातुस्तत्त्वज्ञानमुत्पन्नं तस्य स्वसंसारहेतुभूताविद्यानिवृत्तिर्मोक्षः, यस्य तन्नोत्पन्नं तस्य बन्ध इति बन्धमोक्षव्यवस्थोपपद्यत इति चेन्न । नानाजीववादप्रसङ्गात् । तथाहि—अविद्याया नानात्वेन बन्धहेतुतया तदाश्रयजीवभेदस्यावश्यकतया नानाजीववादप्रसङ्गः । अन्यथा बन्धमोक्षव्यवस्था न स्यात्, प्रतिज्ञाविरोधश्च । अस्तु तर्हि मूलाविद्यानिवृत्तिर्मोक्ष इति चेन्न । एकमुक्तौ सर्वमुक्तिप्रसङ्गात् । नच जीवैक्ये सर्वमुक्त्युपपादनमनुपपन्नमिति वाच्यम् हिरण्यगर्भशुकवामदेवादीनां मुक्त्यभ्युपगमेनास्मदादीनां संसारानुपलम्भप्रसङ्गात् । तदनभ्युपगमे तत्प्रतिपादकशास्त्रस्याप्रामाण्यप्रसङ्गात् । किञ्च 'यावदधिकारमवस्थितिराधिकारिकाणामि'त्यत्रोपासनेनेन्द्रादिपदं प्राप्तानामधिकारिपुरुषाणां निमित्तवशेन जन्मान्तरसत्त्वेऽपि तत्त्वज्ञानप्रतिबन्धा-

●

'तत्त्वज्ञान' जिनको नहीं हुआ है, वे 'प्रमाता' बद्धावस्था में ही रहते हैं । इस रीति से 'प्रमाताओं' का भेद मानकर 'एकजीववाद' में भी बन्ध-मोक्ष की व्यवस्था उपपन्न हो जाती है ।

शङ्का—एकजीववादियों के मत में 'मोक्ष' का क्या स्वरूप है ? यदि वह एकजीववादी 'अविद्यानिवृत्ति' को मोक्ष कहता है, तो उसे हम पूछना चाहते हैं कि क्या वह 'कार्यरूप अविद्या' को निवृत्ति को मोक्ष कहना चाहता है, अथवा मूलाविद्या की निवृत्ति को मोक्ष कहना चाहता है ? उक्त दोनों पक्षों में से 'प्रथम पक्ष' तो संभव नहीं हो सकता, क्योंकि देह आदि में 'आत्मत्वबुद्धिरूप जो भ्रान्तिज्ञान' है, उसे ही 'कार्यरूप अविद्या' कहते हैं । उन समस्त भ्रान्तिज्ञानों की निवृत्ति होना कभी भी संभव नहीं है, क्योंकि 'मूलाविद्या' के विद्यमान रहते पुनः-पुनः उन भ्रान्तिज्ञानों की उत्पत्ति तो अवश्य होती ही रहेगी, और यत्किञ्चित् भ्रान्तिज्ञान की निवृत्ति को पुरुषार्थरूप नहीं कहा जा सकता । इसलिये उस 'कार्यरूप अविद्या को निवृत्ति' को मोक्ष नहीं कह सकते । यदि तुम 'अज्ञान' की आवरणशक्ति को अविद्या कहो, और उस आवरणशक्तिरूप अविद्या के नाना (अनेक) रहने से जिस प्रमाता को तत्त्वज्ञान होता है, उसी प्रमाता के लिये उसके संसार को हेतुभूत जो अविद्या है, उसकी निवृत्ति का होना ही 'मुक्ति' मोक्ष) है, और जिस प्रमाता को वह 'तत्वज्ञान' उत्पन्न नहीं हुआ, उस प्रमाता के लिये उक्त अविद्या के विद्यमान रहने से बन्ध की अवस्था बनी (कायम) रहती है । इस प्रकार से 'एकजीववाद' में भी 'बन्ध-मोक्ष' की व्यवस्था का होना संभव होता है । किन्तु तुम्हारा यह कथन उचित नहीं है, क्योंकि अविद्या को नाना मानकर उसे यदि बन्ध का हेतु मानोगे तो उसके (अविद्या के) आश्रयभूत जीवों को तुमने नाना (अनेक) मान ही लिया, तब तो तुमने भी 'नानाजीववाद' का स्वीकार कर लिया, यही कहना होगा, किन्तु तुम्हें अपने सिद्धान्तभङ्ग के भय से उसका स्वीकार करना अभीष्ट नहीं होगा ।

यदि पुनः द्वितीय विकल्प का स्वीकार करके 'मूलाविद्या' की निवृत्ति को मोक्ष कहोगे, तो वह भी उचित नहीं होगा, क्योंकि 'तत्त्वज्ञान' से 'एक मूलाविद्या' की निवृत्ति होने पर सभी की मुक्ति हो जानी चाहिये, किन्तु होती नहीं है ।

यदि यह कहो कि 'एक ही जीव' है,—इस पक्ष में 'सभी की मुक्ति हो जानी चाहिये'—यह कहना की उचित नहीं है ।

किन्तु इस प्रकार अनौचित्यप्रदर्शन करना तुम्हें भी उचित न होगा, क्योंकि तुम्हारे 'एक जीववाद' के मत में शुक-वामदेव आदिकों की मुक्ति (मोक्ष) हुई है अथवा नहीं ?

यदि उनकी मुक्ति हुई है, यह कहते हो तो उन शुक-वामदेवादिकों को प्राप्त हुए 'तत्त्वज्ञान' से 'एक मूलाविद्या' के निवृत्त हो जाने कारण हमको आपको अभी संसार की प्रतीति नहीं होनी चाहिये थी, परन्तु हो रही है ।

यदि द्वितीय विकल्प—उनकी मुक्ति नहीं हुई—यह कहते हो तो उन शुक-वामदेव आदि की मुक्ति को बतानेवाला शास्त्र अप्रामाणिक कहलाएगा । और उन शुक-वामदेवादि जैसे महापुरुषों की भी यदि मुक्ति नहीं हुई तो हम जैसे प्राकृत-अतिप्राकृत साधारण लोगों को मुक्ति की आशा रखना ही व्यर्थ है ।

किञ्च—'यावदधिकारमवस्थितिरधिकारिणाम्'—इस व्याससूत्र की व्याख्या करते हुए भगवत्पूज्यपाद भाष्यकार ने कहा है कि अपनी उपासना के बल पर इन्द्रादि पदों को प्राप्त हुए अधिकारी पुरुषों को किसी वरदान अथवा शाप आदि के कारण जन्मान्तर की प्राप्ति होने पर भी उन्हें तत्त्वज्ञान की प्राप्ति होने में कोई किसी प्रकार की रुकावट (प्रतिबन्ध) नहीं

भावेनाधिकारावसाने मोक्षोऽभ्युपेयते। एकजीवपक्षे तत्सर्वं दत्तजलाञ्जलिः स्यात्। अपि च, साक्षात्कृततत्त्वो गुरुः शिष्याय तत्त्वमुपदिशतीत्यभ्युपगन्तव्यम्। 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियम् ब्रह्मनिष्ठम्" "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" इत्यादिश्रुतिस्मृतिभ्यः। ततश्चैकजीवपक्षे उत्पन्नब्रह्मसाक्षात्कारस्य गुरोरभावेन गुरुशिष्यव्यवस्थाया असम्भवादनिर्मोक्षः प्रसज्येत। किञ्च। कर्म्मकाण्डज्ञानकाण्डयोरेकजीवपक्षेऽधिकारिभेदाभावेनाप्रामाण्यप्रसङ्गः। तस्मादज्ञानमेकं तदुपाधिको जीवोऽप्येक एव इत्यनुपपन्नमिति॥

अत्र ब्रूमः—'अजामेकां' 'मायान्तु प्रकृतिं विद्यात्' 'नीहारेण प्रावृताः' 'अज्ञानेनावृतं ज्ञानं' मम माया दुरत्यया' 'विभेदजनकेऽज्ञाने 'इत्यादिश्रुतिस्मृतीतिहासपुराणेषु लाघवानुगृहीतश्रुतिलिङ्गाभ्यामविद्यैक्ये निश्चिते तदुपाधिको जीवोऽप्येक एवेति निश्चीयते। नच बन्धमोक्षव्यवस्थानुपपत्तिरिति वाच्यम्। अज्ञस्य बन्धो ज्ञानिनो मोक्ष इति व्यवस्थासम्भवात्। हिरण्यगर्भादीनां मुक्तिप्रतिपादकशास्त्रस्य प्रवृत्तिकरत्वेन स्वार्थे तात्पर्य्याभावात्। नच महानुभावानां तेषां तत्त्वज्ञानाभावेऽप्यस्मदादीनां तत्त्वज्ञानोपपत्तौ का प्रत्याशेति वाच्यम्। सृष्ट्यादिविक्षिप्तचित्तत्वेन तेषां ज्ञानाभावेऽपि विवेकवैराग्यसम्पन्नानामस्मदादीनां तत्त्वज्ञानोत्पत्तौ बाधकाभावात्। "स्वर्गकामो यजेते"त्यादिवाक्यप्रामाण्यात् स्वर्गोद्देशेन यागादिप्रवृत्तिवद् 'द्रष्टव्यः श्रोतव्य' इत्यादिप्रामाण्यात्, ज्ञानोद्देशेन श्रवणादिषु प्रवृत्त्युपपत्तेः। नच क्रममुक्त्युपासनाशास्त्रविरोधः। व्यावहारिकप्रमातृभेदविषयतया स्वप्नवदविरोधोपपत्तेः॥ नन्वेवं सति पूर्वकल्पे दहराद्युपासनया ब्रह्मलोकं गतानां तत्त्वसाक्षात्कारेणाज्ञाननिवृत्तेर्मोक्षस्य सम्पन्नत्वेनास्मदादीनां संसारानुपलब्धिप्रसङ्ग इति चेन्मैवम्। स्वप्नवत्तदुपपत्तेः। न हि स्वप्नावस्थायां स्वभ्रान्तिकल्पितप्रमातुर्मुक्तिदर्शनेन बन्धदर्शनेन वा स्वस्य मुक्तिर्बन्धो वा भवति। नच शास्त्राप्रामाण्यम्॥

एतेनाधिकारिभेदाभावात् कर्म्मज्ञानकाण्डाप्रामाण्यं[१] प्रत्युक्तम्। नच गुरुशिष्यव्यवस्थानुपपत्तिः। परोक्षज्ञानिनोऽपि तन्निष्ठस्योपदेष्टृत्वोपपत्तेः। अथवा परमेश्वरो वा गुरुशरीरमाविश्य साधकमनुगृह्णातीति व्यवस्था न विरुध्यते। तस्मादेक

●

रहती। उस कारण उन अधिकारी पुरुषों को उनके इन्द्रपद का अधिकार काल समाप्त होने पर मुक्ति (मोक्ष) प्राप्ति अवश्य होती है। कथन एक जीव वाद के पक्ष में मिथ्या हो जाएगा। और प्रत्यगभिन्न ब्रह्म का साक्षात्कार किया हुआ ब्रह्मवेत्ता पुरुष, अपने शिष्यों को ब्रह्म का उपदेश करता है, तथाहि—'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः'—यह श्रुतिस्मृति आदि का कथन, एकजीववाद के पक्ष में असंगत ही हो जाएगा, क्योंकि एकजीववाद में साक्षात्कार करनेवाले गुरु का ही अभाव है, उस कारण गुरु-शिष्य भाव की व्यवस्था ही नहीं बनेगी। उस व्यवस्था के न बन पाने पर किसी की भी मुक्ति नहीं होगी।

किञ्च—एकजीववाद के पक्ष में कर्मकाण्ड तथा ज्ञानकाण्ड के भिन्न-भिन्न अधिकारियों का होना भी संभव नहीं होगा। तब अधिकारी के अभाव में कर्मकाण्ड और ज्ञानकाण्ड को भी अप्रमाण कहना होगा। इन सब विपत्तियों की उपस्थिति के कारण अज्ञान को एक कहना तथा अज्ञानोपहितजीव को भी एक समझना उचित नहीं है।

समा०—'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादि श्रुतियों में तथा 'अज्ञानेनावृतं ज्ञानं' 'माया दुरत्यया' इत्यादि स्मृतियों में 'अज्ञान' का एकत्व ही बताया गया है, इसलिये 'अज्ञान' को एक ही मानना चाहिये। जब 'अज्ञान' ही 'एक' है, तब उस एक अज्ञान से उपहित 'जीव' भी 'एक' ही है, यह स्वीकार करना चाहिये।

'एक जीव वाद' के पक्ष में 'बन्ध-मोक्ष' आदि की सम्पूर्ण व्यवस्था उपपन्न हो जाती है। जैसे स्वप्नावस्था में स्वप्नद्रष्टा पुरुष, स्वयं की भ्रान्ति से ही अनेक प्रमाताओं की कल्पना कर लेता है, उनमें से किसी प्रमाता के तो बन्ध को देखता है और किसी प्रमाता की मुक्ति को देखता है। तथापि उस बन्ध-मोक्ष के दर्शन से उस स्वप्नद्रष्टा पुरुष को बन्ध या मोक्ष की प्राप्ति नहीं होती। उसी तरह जागरित अवस्था में भी उस 'एक जीव' के द्वारा अनेक प्रमाताओं की कल्पना की जाती है, उन कल्पित अनेक प्रमाताओं में से बद्ध रहता है और कोई मुक्त हो जाता है। उन कल्पित प्रमाताओं के बन्ध-मोक्ष को देखने से इस 'एक जीव' को बन्ध या मोक्ष की प्राप्ति नहीं हुआ करती। अतः 'एक जीववाद' के पक्ष में भी बन्ध-मोक्ष की व्यवस्था उपपन्न हो जाती है। इसी प्रकार उक्त स्वप्नदृष्टान्त से गुरु-शिष्य आदि की व्यवस्था भी हो जाती है अतः 'एक जीववाद' के पक्ष में पूर्वोक्त दोष नहीं आ पाते। क्योंकि 'एक जीववाद' के पक्ष में अन्तःकरण विशिष्ट अनेक प्रमाताओं की कल्पना की जाती

१. एतेनेति विधेः प्रवृत्त्युपपत्तेः स्वप्नवव्द्योपपत्तेरित्यर्थः।

'आभास एव च' 'अत एव चोपमा सूर्य्यादिवत्'।

"यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा"॥

●

एव जीवः॥ किञ्च "आभास एव च 'स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः'[2] 'सता सोम्य तदा सम्पन्नो भवति' 'प्रज्ञेनात्मना संपरिष्वक्तः' 'प्राज्ञेनात्मनान्वारूढः' इत्यादिष्वेकवचनसामर्थ्याज्जीवैक्यमभ्युपगन्तव्यम्॥ ननु 'एवमेवेमाः सर्वाः प्रजाः सति सम्पद्य न विदुः, 'वीतरागभयक्रोधा मन्मया मामुपाश्रिताः', 'यावदधिकारमवस्थितिराधिकाकारिणा"मित्यादिषु बहुवचनसामर्थ्याज्जीवबहुत्वं किन्न स्यादिति चेन्नैतदेवं, लाघवात्तदैक्योपपत्तेः। तस्मादेक एव जीव इति वदन्ति॥१६॥

अतएवेति। तृतीये स्थितं 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि'। जीवः सुषुप्त्यादौ येन ब्रह्मणा सम्पन्नो भवति तत् किं निर्विशेषं सविशेषमुभयलिङ्गं वाऽन्यतरलिङ्गं वा। अन्यतरलिङ्गमित्यत्रापि सविशेषलिङ्गं वा निर्विशेषलिङ्गं वेति

●

है। उन प्रमाताओं में से कोई प्रमाता सुखी, और कोई प्रमाता दुःखी होता है—यह सुख-दुःख की व्यवस्था बन पाती है। इस 'एक जीववाद' के पक्ष में 'प्रतिबिम्बत्वधर्म' से विशिष्ट हुए 'चैतन्य' को 'जीव' कहा गया है, और 'बिम्बत्वधर्म' से विशिष्ट हुए 'चैतन्य' को 'ईश्वर' कहा गया है। इस पक्ष में 'अन्तःकरणादिरूप उपाधि' कृत दोष, उस प्रतिबिम्बरूप 'जीव' में ही रहते हैं। वे दोष, बिम्बभूत 'ईश्वर' में नहीं होते हैं। क्योंकि वह अन्तःकरणरूप 'उपाधि', प्रतिबिम्ब' का ही पक्षपाती होता है, वह 'बिम्ब' का पक्षपाती नहीं होता। अतएव 'जलादि उपाधि' के 'चलनादिक धर्मों' की प्रतीति 'प्रतिबिम्ब' में ही होती है, 'बिम्ब' में उनकी प्रतीति नहीं होती॥१६॥

अत एव ब्रह्मसूत्र के तृतीयाध्याय, द्वितीयपाद के अठाहरवें सूत्र 'अत एव चोपमा सूर्यकादिवत्' में सूत्रकार भगवान् व्यास कहते हैं कि जिस कारण यह आत्मा चैतन्यैकरस, परप्रतिषेध से उपदेश्य है, उसीकारण 'यथाह्ययम्' इत्यादि शास्त्रों में उपाधिकृत सविशेषत्व को लेकर ही जलगत सूर्य-प्रतिबिम्ब के समान यह जीव है—यह उपमा दी गई है, वस्तुतः 'ब्रह्म', सविशेष नहीं है। यथा होति। जैसे यह ज्योतिः स्वरूप सूर्य, स्वतः एक होने पर भी भिन्न-भिन्न जलों में भिन्न-भिन्न प्रतिबिम्ब पड़ने से अनेक प्रकार का प्रतीत होता है, वैसे ही यह जन्मरहित, स्वप्रकाश, उपाधि के कारण भिन्न-भिन्न क्षेत्रों में अनुवृत्त होने से अनेक प्रकार का प्रतीत होता है। एक अन्य श्रुति वाक्य भी उपलब्ध होता है—एक एवेति। एक ही भूतात्मा, प्रत्येक भूत में विशेष रूप से अवस्थित है। जल में प्रतिबिम्बत चन्द्र के समान एकधा और बहुधा दीखता है। इस प्रकार से श्रुति और सूत्र में कहा गया है। निष्कर्ष यह है कि जैसे सूर्य-चन्द्र आदि के भेद और कम्पन आदि धर्म 'जल' आदि उपाधियों से कल्पित हैं, उसी प्रकार 'आत्मा' के भेद आदि धर्म, उपाधि से कल्पित है। इस दृष्टान्त श्रुति से ज्ञात होता है कि 'ब्रह्म', निर्विशेष तत्त्व है।

ब्रह्म सूत्र के तृतीयाध्याय के द्वितीय पाद में ग्यारहवें सूत्र "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि"—(ब्र० सू० ३।२।११) के द्वारा भगवान् व्यास कह रहे हैं कि 'परब्रह्म' में निर्विशेष और सविशेष रूप दो स्वभाव नहीं हो सकते, क्योंकि जो सत्य वस्तु है, उसमें दो विरुद्ध धर्म नहीं रह सकते। यदि कदाचित् उपाधि के कारण दो—स्वभाव कहो, तो उन्हें सत्य नहीं माना जा सकता। क्योंकि अग्नि के सम्बन्ध मात्र से उष्ण हुए जल में अग्नि का स्वभाव कहो, तो उन्हें सत्य नहीं

२. 'स एव तु कर्मानुस्मृतिशब्दविधिभ्यः' इत्येदनन्तरं—अस्यार्थः—तत्र यः सुप्तो जीवः स एव उत्तिष्ठति उतान्यो वेति संशये जलराशौ क्षिप्तबिन्दोरिवानियम इति प्राप्ते। सिद्धान्तः, यः सुप्तो जीव स एवोत्तिष्ठति, नान्यः। कुतः? कर्मानुस्मृतिशब्दविधिभ्यः। पञ्चभ्यो हेतुभ्यः। दिनद्वयकर्मणोऽर्द्धं कृत्वा सुप्तो भवति। पुनरुत्थायावशिष्टमर्धं कर्म करोति।१। अनु शब्देन प्रत्यभिज्ञा 'योऽहं पूर्वदिने काशीनाथमद्राक्षं सोऽहमिदानीं मणिकर्णिकायां स्थितोऽस्मि' इत्याद्याकारा सूच्यते।२। पश्चाद्ग्रामसेतुं गतस्येदृशः काशीनाथ इत्यादिस्मरणं स्मृतिशब्देनोच्यते।३। "पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैवे"ति श्रुतिजातं शब्दः, अयनं गमनं, आयः प्रतिनियमगमनं प्रतिन्याया, स यथा भवति तथा योनिं शरीरं प्रतिसुप्तः पुनरागच्छेज्जागरायेत्यर्थः।४। कर्मविद्याविधयो विधिशब्देनोच्यन्ते। यदि सुप्तस्य पुनर्नोत्थानं तदोक्तविधयो बाध्येरन्। तस्मात् सुप्त एवोत्तिष्ठतीति सिद्धम्।५। इत्यधिकं पाण्डुलिपिपत्रे दृश्यते।

"एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवद् ॥"

इत्यादि श्रुतिसूत्रयोः सत्त्वात् ॥

●

संशयः। तत्र "सत्यकामः सत्यसङ्कल्पः 'अस्थूलमनण्वह्रस्वमि"त्याद्युभयविधश्रुतिसम्भवाद् उभयलिङ्गं ब्रह्मेति प्राप्तेऽभिधीयते—नोभयलिङ्गम्ब्रह्म। एकस्य वस्तुनो द्वैरूप्यायोगात्। न ह्येकमेव सविशेषं निर्विशेषञ्च भवतीति युक्त्या वक्तुं शक्यम् ॥

अस्तु तर्ह्युपाधितः सविशेषं स्वभावतो निर्विशेषञ्चेत्युभयलिङ्गं ब्रह्मेति चेन्नैतदेवम्। न ह्युपाधितोऽपि स्वभावतो निर्विशेषं सविशेषम्भवति विरोधात्सर्वत्र। किन्तु पारमार्थिकं निर्विशेषस्वरूपं, सविशेषस्वरूपं मायामयम्। तथाच श्रुतिस्मृती भवतः—

'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते'॥

'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव, 'एवं वाऽरेऽयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन एव' ॥

'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते'।

●

माना जा सकता। क्योंकि अग्नि के सम्बन्ध मात्र से उष्ण हुए जल में अग्नि का स्वभाव नहीं माना जा सकता। इसलिये 'अशब्दम्' इत्यादि ब्रह्मपरक जो अनेक वेदान्त-वाक्य हैं, उनमें निर्विशेष एक रूप ही ब्रह्म उपदिष्ट है।

उक्त सूत्र का रहस्योद्घाटन करते हुए भाष्यकार आचार्य-चरण कहते हैं कि सुषुप्ति-मरण आदि में उपाधि का उपशम होने से 'जीव', जिस 'ब्रह्म' के साथ सम्पन्न होता है, उसके स्वरूप का श्रुति से निर्धारण किया जाता है। ब्रह्म विषयक श्रुतियाँ दो लिङ्गवाली (उभयलिङ्गवाली) हैं। 'सर्वकर्म्मा सर्वकामः सर्वगन्धः सर्वरसः'—(छां० उप० ३।१४।२), अर्थात् सम्पूर्ण विश्व जिसका कर्म है, समस्त दोषों से रहित जिसका काम है, सर्वसुखकर जिसका गन्ध है, और सर्वसुखकर जिसका रस है—इत्यादि श्रुतियाँ 'सविशेष लिङ्गवाली' हैं, तथा 'अस्थूलमनण्वह्रस्वमदीर्घं'—(बृ० उप० ३।८।८) अर्थात् वह स्थूल नहीं है, अणु नहीं है, ह्रस्व नहीं है, और दीर्घ नहीं है—इत्यादि श्रुतियाँ निर्विशेष लिङ्गवाली हैं। तब प्रश्न यह उपस्थित होता है कि उक्त श्रुतियों में 'दोनों लिङ्गवाला' (उभय लिङ्गवाला) 'ब्रह्म' समझना चाहिए अथवा दोनों श्रुतियों में 'एक लिङ्गवाला' समझना चाहिए।

यदि अन्यतरलिङ्गवाला समझा जाय, तो वह सविशेष है या निर्विशेष है? इसका विचार करना चाहिए।

पू० पक्ष—उभयलिङ्गवाली (दोनों लिङ्गवाली) श्रुतियों के अनुग्रह से उभयलिङ्गवाला ही ब्रह्म समझना चाहिये।

सि० पक्ष—परब्रह्म के स्वतः (स्वभावतः) ही दो लिङ्ग उपपन्न नहीं हो सकते, क्योंकि एक ही वस्तु, स्वभावतः रूपादिविशेष से युक्त हो और रूपादिविशेष से रहित हो—इस प्रकार विरोध होने कारण अवधारण नहीं किया जा सकता।

यदि कहो कि स्थान से अर्थात् पृथिवी आदि उपाधि के सम्बन्ध से वैसा हो सकेगा, तो वह भी उपपन्न नहीं हो सकेगा, क्योंकि उपाधियोग से भी अन्य प्रकार की वस्तु का स्वभाव, दूसरे प्रकार का नहीं हो सकता। जैसे स्वभावतः स्वच्छ स्फटिक, अलक्तक (लाख) आदि उपाधि के योग से अस्वच्छ नहीं हो जाता। अस्वच्छता का अभिनिवेश, स्फटिक में भ्रममात्र है। उपाधियों का उपस्थापन, अविद्या से होता है। इसलिए अन्यतर लिंग का स्वीकार करें, तो भी समस्त विशेष से रहित निर्विकल्पक ही ब्रह्म समझना चाहिये। उससे विपरीत नहीं, क्योंकि ब्रह्मस्वरूप प्रतिपादक अशब्दमस्पर्शमरूपमव्ययम् (कठ० १।३।१५, मुक्तिकोप० २।७२) इत्यादि श्रुतिवाक्यों में शब्दरहित, स्पर्शरहित, रूपरहित और अव्यय (नित्य) आदि समस्तविशेषशून्य ब्रह्म ही सर्वत्र उपदिष्ट है।

श्रुति कहती है—(बृह० उप० ४।५।१३) कि जैसे लवणपिण्ड अन्दर और बाहर अन्य रस से रहित है, समस्त लवण एक रस ही है, वैसे ही हे मैत्रेयि। यह आत्मा अन्दर और बाहर अन्य रूप से रहित है, वह सम्पूर्ण प्रज्ञानघन ही है।

इसी प्रकार स्मृतियों में भी (गी० १३।१२) अन्य के प्रतिषेध से ही उसका उपदेश किया गया है। उक्त श्रुति-स्मृतिवचनों के पर्यालोचन से स्पष्ट हो जाता है कि ब्रह्म निर्विशेष है। अतः 'सविशेषमेव ब्रह्म, न निर्विशेषं सत्यकाम-त्वादिश्रुतेः—कहनेवालों का खण्डन हो गया है।

इत्यादि। एतेन सविशेषमेव ब्रह्म न निर्विशेषं सत्यकामत्वादिश्रुतेरिति प्रत्युक्तम्॥

ननु ब्रह्मणो निर्विशेषत्वे सगुणवाक्यानां सृष्ट्यादिवाक्यानां वा का गतिरिति चेन्न। तेषामन्यपरत्वेन तत्र तात्पर्य्याभावात्। तथाहि? "सर्वे वेदा यत्पदमामनन्ती" तिशास्त्रेण सर्ववेदप्रतिपाद्यत्वमवगम्यते। ततश्च कर्म्मवाक्यानि स्वप्रतिपाद्यवागाद्यनुष्ठानेन सत्त्वशुद्धिद्वारा ब्रह्मसाक्षात्कारोत्पादनेन तत्र पर्य्यवस्यन्ति। उपासनावाक्यानि तत्तद्गुणविशिष्टोपासनविधानेन चित्तैकाग्र्यद्वारा ब्रह्मणि पर्य्यवस्यन्ति। तत्त्वमस्यादिवाक्यानि साक्षाद्ब्रह्मणि पर्य्यवस्यन्ति। तदुक्तम्,

"शुद्धिद्वारा कर्म्मकाण्डस्यवाक्यम् चित्तैकाग्र्यद्वारतो ध्यानवाक्यम्।
साक्षादेतत् तत्त्वमस्यादिवाक्यम् सत्यानन्दे स्वप्रकाशे प्रयाति"॥ इति।

सृष्टिप्रलयादिवाक्यानि तु अध्यारोपापवादन्यायेन सृष्ट्यादिदर्शनस्य ब्रह्मज्ञानोपायतया ब्रह्मणि पर्य्यवस्यन्ति। तदुक्तमाचार्य्यचरणैः—

"मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन"॥

●

शंका—'ब्रह्म की निर्विशेष यदि माना जाय तो सगुणवाक्यों की तथा सृष्ट्यादिवाक्यों की क्या गति होगी?

समा०—यह शंका करना ठीक नहीं है, क्योंकि उन वाक्यों का अभिप्राय, अन्य अर्थ में है, प्रस्तुत प्रसंग में उनका तात्पर्य नहीं है। तथाहि—सर्वे वेदा यत्पदमामनन्ति—इस वचन से सर्ववेदप्रतिपाद्यत्व जाना जाता है। अतः कर्म प्रतिपादक वाक्य, स्वप्रतिपाद्य याग आदि के अनुष्ठान से सत्त्व (अन्तःकरण) शुद्धि के द्वारा ब्रह्म साक्षात्कार का उत्पादन करते हुए उस ब्रह्म में ही पर्यवसित हो जाता है। उसी तरह उपासना प्रतिपादक वाक्य भी तत्तद्गुणविशिष्ट की उपासना का विधान करते हुए चित्त की एकाग्रता के द्वारा ब्रह्म में ही पर्यवसित होते हैं। और तत्त्वमसि आदि वाक्यों का पर्यवसान तो साक्षात् ही ब्रह्म में होता है।

सृष्टि-प्रलयादि वाक्यों का 'ब्रह्म' में पर्यवसान तो 'अध्यारोपापवाद' न्याय से सृष्ट्यादि का ज्ञान (अनुभव), ब्रह्मज्ञान का उपाय होने के कारण, माना जाता है। इस बात को पूज्यपाद आचार्य चरणों ने कहा है—

मृत्-लोह-विस्फुलिङ्गादि अनेकानेक दृष्टान्तों द्वारा श्रुति में तरह तरह से सृष्टि इसीलिये बताया है कि जीव व ईश्वर का अभेद समझा जा सके। अतः उत्पत्ति आदि का प्रतिपादन भेद प्रपंच को सिद्ध नहीं करता। एवञ्च सगुणोपासन और सृष्टि आदि के प्रतिपादक वाक्यों ब्रह्मज्ञान का उपाय प्रदर्शन करते हुए निर्विशेष ब्रह्म में ही पर्यवसित होते हैं। 'ब्रह्म' निर्विशेष है, उस कारण वह, अविद्या में प्रतिबिम्बित होकर 'जीव' कहलाता है, और वही, अविद्या से उपहित होकर 'ईश्वर' कहलाता है। इस प्रकार 'बिम्ब-प्रतिबिम्बभाव' से 'जीवेश्वरभाव' की उपपत्ति लग जाती है।

शंका—यह जो कहा गया था कि 'अज्ञान आदि' में प्रतिबिम्बित 'चैतन्य' को जीव कहते हैं, वह ठीक नहीं है, वह ठीक नहीं है, क्योंकि 'प्रतिबिम्ब', तो रूपवान् वस्तु का ही हुआ करता है। रूपरहित (नीरूप) वस्तु का 'प्रतिबिम्ब', नहीं होता है। जैसे—रूपवान् सूर्य-चन्द्र-नक्षत्र आदि का जल आदि में 'प्रतिबिम्ब' होता है, किन्तु 'ब्रह्म' तो नीरूप अर्थात् रूपादिगुणों से रहित है। अतः 'अज्ञान' में 'ब्रह्म' का प्रतिबिम्बित होना संभव नहीं है।

यदि यह कहो कि जैसे रूपरहित आकाश, 'जल' में प्रतिबिम्बित होता है वैसे ही रूपरहित ब्रह्म का भी अज्ञान में प्रतिबिम्बित होना भी संभव हो सकता है। किन्तु यह कहना उचित नहीं होगा, क्योंकि रूपरहित होने से अकाश का प्रतिबिम्ब 'जल' में पड़ना संभव नहीं है, किन्तु आकाश के आश्रित जो आकाशप्रभा, तारे (नक्षत्र) चन्द्र, सूर्य आदि रूपवान् पदार्थ हैं, उनका ही जल आदि प्रतिबिम्ब पड़ता है। जल आदि में 'आकाश' के प्रतिबिम्ब का अनुभव जो लोगों को होता है, वह तो केवल भ्रम है। अतः ब्रह्म और जीव का 'बिम्ब-प्रतिबिम्बभाव' से जो विभाग कहते है, वह असंभव ही है।

समा०—'रूपवान् पदार्थ का ही प्रतिबिम्ब होता है'—इस नियम का होना सर्वत्र संभव नहीं है, क्योंकि कतिपय स्थनों में रूपरहित वस्तु (पदार्थ) का भी प्रतिबिम्ब दृष्टिगोचर होता है। जैसे—रूप आदि गुण, 'रूपरहित' होते हैं, फिर भी जपापुष्प आदि के लोहितरूप आदिका, 'स्फटिक' आदि में प्रतिबिम्ब, प्रत्यक्ष दिखाई पड़ता है।

यदि यह कहो कि रूपरहित द्रव्य का प्रतिबिम्ब नहीं पड़ा करता—यह नियम है। अतः रूपादिक गुण, द्रव्यरूप न होने से उनका प्रतिबिम्ब पड़ने पर भी उक्त नियम का भंग नहीं हो रहा है।

इति। ततश्च सगुणोपासनसृष्ट्यादिप्रतिपादकवाक्यानां ब्रह्मज्ञानोपायतोपदर्शनमुखेन निर्विशेषे ब्रह्मणि पर्य्यवसानात् निर्विशेषम् ब्रह्म यतः, अतो ब्रह्माविद्याप्रतिबिम्बितं सञ्जीवोऽविद्योपहितं सदीश्वर इति बिम्बप्रतिबिम्बभावेन जीवेश्वरभाव इति अत्र वेदान्तेषु जलसूर्य्यादिदृष्टान्तोपादानमिति सूत्रकार आह **'अत एवे'ति।** यतो ब्रह्म निर्विशेषं अत एवेति वेदान्तेषु जलसूर्य्याद्युपमोपादीयते। तानेव वेदान्तानुदाहरति—**यथेत्यादिना।**

ननु सूर्य्यादीनां रूपवत्त्वेन जलादौ प्रतिबिम्बसम्भवेऽपि ब्रह्मणो रूपादिरहितत्वेन कथमविद्यायां प्रतिबिम्बोदयः? न च जले आकाशादिप्रतिबिम्बवत् अविद्यायां ब्रह्मप्रतिबिम्बसम्भव इति वाच्यम्। आकाशस्यापि रूपादिशून्यतया जलादौ प्रतिबिम्बासम्भवात्। नच स्वल्पजलभाजने साभ्रनक्षत्राकाशानुभवविरोध इति वाच्यम्। तत्रापि रूपादिमन्नक्षत्रादिप्रतिबिम्ब एवानुभूयते। आकाशप्रबिम्बानुभवस्तु भ्रम एव। तस्माद्बिम्बप्रतिबिम्बभावेन ब्रह्मणो जीवेश्वरविभागोऽनुपपन्न इति चेद्।

न; रूपवत एव प्रतिबिम्ब इति नियमाभावात्। रूपादिरहितस्य लोहितरूपादेः स्फटिकादौ प्रतिबिम्बदर्शनात्।

●

किन्तु यह कहना भी ठीक नहीं है, क्योंकि रूपरहित आकाशद्रव्य का भी जल आदि में प्रतिबिम्ब दीख पड़ता है। तब जैसे नीलरूपवाला आकाश अथवा विशालतावाला आकाश प्रतीत होता है, वैसे ही कूप-तटाक-सरोवर आदि के स्वल्प जल में भी वही नीलता-विशालतावाला आकाश प्रतीत होता है, वहाँ स्वल्प जल में वस्तुतः वह विशालतावाला आकाश है नहीं। उस कारण उस जल में भासमान उस आकाश को बाह्य आकाश का प्रतिबिम्ब रूप ही मानना होगा, और जलादिकों में यह आकाश का ही प्रतिबिम्ब है, यह अनुभव भी सब लोगों को होता है। उस अनुभव का कभी बाध भी नहीं होता है, इसलिये उस अनुभव को भ्रम कहना ठीक नहीं है। विरोधीज्ञानरूप बाधक के रहने पर ही अनुभव को भ्रम कहा जाता है। जैसे—नेदं रजतम् इस विरोधी ज्ञान रूप बाधक के रुप पर ही शुक्ति में इदं रजतम्—इस अनुभव को भ्रमरूप कहा जाता है। ऐसी स्थिति यहाँ पर नहीं है, क्योंकि 'अयमाकाशप्रतिबिम्बो नास्ति'—यह आकाश का प्रतिबिम्ब नहीं है—इत्याकारक विरोधज्ञान रूप बाधक यहाँ नहीं कह है। अतः उक्त अनुभव को भ्रमरूप नहीं कह सकते। एवंच रूपरहित (नीरूप) आकाश-द्रव्य का प्रतिबिम्ब जैसे सिद्ध होता है उसी प्रकार ब्रह्म के बिम्ब-प्रतिबिम्बभाव के कारण जीव और ईश्वर का विभाग भी संभव हो सकता है।

यदि पूर्वपक्षी का दुराग्रह ही हो कि रूपरहितद्रव्य का प्रतिबिम्ब हो ही नहीं सकता, तो उसके सन्तोषार्थ हम सिद्धान्ती ब्रह्म को द्रव्यरूप नहीं मानते क्योंकि नैयायिकों ने गुणक्रियावत्त्वं समवायिकारणत्वं वा द्रव्यसामान्यलक्षणम् अर्थात् यत् समवायसम्बन्धेन गुणस्य कर्मणो वाऽऽश्रयः, यश्च कस्यापि समवायिकारणं भवेदेव, तदेव द्रव्यं नाम। अर्थात् नैयायिकों ने गुण के आश्रय को तथा समवायिकारण को ही द्रव्य माना है। और साक्षी चेता केवलो निर्गुणस्य (श्वे उ०) यह श्रुति ब्रह्म को निर्गुण कह रही है। उस कारण ब्रह्म को गुणों का आश्रय नहीं कह सकते, तथा समवाय को हमारे यहाँ स्वीकार नहीं किया है, उस कारण ब्रह्म में समावायिकारणता भी नहीं बन सकती। अतः रूपरहित (नीरूप) रूपादिगुणों के समान ही ब्रह्म का प्रतिबिम्ब मानने में भी कोई विरोध नहीं है।

अथवा 'अज्ञान' में 'ब्रह्म' का प्रतिबिम्ब न मानने पर भी जीव और ईश्वर का विभाग उपपन्न हो सकता है। तथाहि—अज्ञानात्मक अविद्या से विशिष्ट हुए 'चैतन्य' को जीव कहते हैं, और 'अविद्या' से उपहित जो 'चैतन्य' उसे 'ईश्वर' कहते हैं ॥ १६ ॥

एवञ्चानयोस्तादात्म्यादेतदुपहिततैजससूत्रात्मनोरपि तादात्म्यम्भवति। भिन्नत्वे सति अभिन्नसत्ताकत्वं तादात्म्यम्। ततश्च हिरण्यगर्भोहंग्रहोऽपास्त्या तत्प्राप्त्या सर्वोत्कृष्टानन्दावाप्तिः प्रयोजनं सम्भवतीति तज्ज्ञानमर्थवदिति भावः।

"पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते"।

इति श्लोकोक्तपुर्य्यष्टकशब्दार्थं प्रक्रियान्तरमाह—**एतदेवेति**॥२६॥

ननु केयमविद्येत्यत आह—**तत्रेति**। कार्याविद्यां विभजते—**स चेति**। चातुर्विध्यमेवाह—**अनित्य इति**। **असुखे** सुखभिन्ने दुःखे तत्साधने **सुखबुद्धिरिति** तत्साधनबुद्धेरप्युपलक्षणम्। तत्र योगशास्त्रसम्मतिमाह—**तदुक्तमिति**। सूत्रं व्याचष्टे—**अस्यार्थ इति**।

ननु—"अशोकमहिमं तस्मिन् वसति शाश्वतीः समा" इत्यादिश्रुत्या ब्रह्मलोकस्य नित्यत्वावगमात्कथमनित्यत्वम्? न च तस्य कर्म्मसाध्यत्वेन लौकिककृष्यादिफलवद् "अन्तवत्तु फलन्तेषामि"त्यादिस्मृत्या "तद्यथेह कर्म्मचित्तो लोकः क्षीयते एव मेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादि श्रुत्या चाऽनित्यत्वमवगम्यत इति वाच्यम्। उपासनाविधेरप्रामाण्यप्रसङ्गात्। यथा स्वर्गादावनित्यत्वदोषदर्शनेन स्वर्गतत्साधनेच्छानिवृत्तिनिरोधेन प्रवृत्तिनिरोधेन नित्यफलोद्देशेन तत्साधनेऽप्रवृत्तिः, एवम् ब्रह्मलोकादावनित्यत्वदोषदर्शनेन तदुद्देशेन तत्साधनानुष्ठाने प्रवृत्तिनिरोधात्सर्वेषामन्यत्र प्रवृत्तिप्रसक्त्योपासनाविधायिशास्त्राप्रामाण्यम् प्रसज्येत। न च तदिष्टम्, ब्रह्मलोकातिरिक्तनित्यफले मानाभावात्। अन्यत्रापि दोषदर्शनेन प्रवृत्तिनिरोधात् सन्दिहानः सर्वोऽपि लोकोऽनर्थं प्राप्नुयात, मोक्षशास्त्रं सर्वमनर्थकं प्रसज्जेतेत्यतः केवलकर्म्मसाध्यस्यानित्यत्वेऽपि यथोक्तशास्त्रप्रामाण्यात् ज्ञानकर्मसमुच्चयसाध्यस्य ब्रह्मलोकस्य नित्यत्वमभ्युपगन्तव्यम्। एवं च सति श्रुतिस्मृती श्रुत्यन्तरविरोधादितरविषये व्याख्येये। तस्मात् ब्रह्मलोकस्यानित्यत्वकथनमसङ्गतमेव—इति।

●

समा०—जो अपञ्चीकृत सूक्ष्मभूत, उस व्यष्टि-सूक्ष्म शरीर के उपादान कारण हैं, वे ही सूक्ष्म-पञ्चभूत, उस समष्टि सूक्ष्म शरीर के अन्तर्गत हैं। उस कारण वह समष्टि सूक्ष्म शरीर, उस व्यष्टि सूक्ष्म शरीर का उपादान कारण हो सकता है। अतः 'उपादान-उपादेयभाव' के होने से उन दोनों का तादात्म्य भी हो सकता है।

उक्त 'सूक्ष्म शरीर' को 'पुर्यष्टक' भी कहा जाता है। पूर्वोक्त सूक्ष्म शरीर ही (१) अविद्या, (२) काम, (३) कर्म, इन तीनों से युक्त होकर—'पुर्यष्टक' नाम से कहा जाता है। अष्टपुरियाँ ये हैं—(१) पञ्च ज्ञानेन्द्रिय, (२) पञ्च कर्मेन्द्रिय, (३) अन्तःकरण चतुष्टय, (४) पञ्च प्राण, (५) पञ्च सूक्ष्मभूत, (६) अविद्या, (७) काम, (८) कर्म। इनमें से 'इन्द्रिय', 'अन्तःकरण' 'प्राण', और 'पञ्चभूत'—इनका निरूपण, पूर्व किया जा चुका है। अतः अब 'अविद्या', 'काम', 'कर्म'—इन तीनों का निरूपण किया जायगा॥२६॥

'अविद्या' शब्द से 'कार्य अविद्या' को समझना चाहिये। 'अन्य में बुद्धि होना'—यही 'कार्यभूत अविद्या है।

कार्यरूप अविद्या का विभाग बता रहे है—**वह कार्यरूप अविद्या चार प्रकार की है। (१) अनित्य पदार्थ को नित्य समझना। (२) अशुचि (अपवित्र) को शुचि (पवित्र) समझना। (३) जो सुख नहीं है, उसे सुख समझना। (४) जो आत्मा नहीं है, उसे आत्मा समझना।** स्वर्गलोक, ब्रह्मलोक आदि जो हैं, वे सब कर्मरूप उपासना के ही फल हैं। वे सब अनित्य हैं, क्योंकि उपासनारूप कर्म ही जब अनित्य हैं, तो उनके फल, नित्य कैसे हो सकते हैं? उन अनित्य फलों को नित्य समझना—यही प्रथम अविद्या है मल-मूत्रादिकों से परिपूर्ण होने से यह शरीर अपवित्र (अशुचि) है, उसी तरह स्त्री-पुत्रादिकों

अत्र ब्रूमः—नित्यत्वप्रतिपादकश्रुतेरर्थवादत्वाद् ब्रह्मलोकोऽनित्य एव। तथाहि, "पूर्णाहुत्या सर्वान् कामान् वाप्नोती"ति वचनस्य[1]विध्यपेक्षिततया इतरकर्म्मविध्यानर्थक्यप्रसङ्गेन च यथाऽर्थवादत्वं, तथाऽस्यापि तथात्वमेव। न चोपासनाविधिस्तन्नित्यत्वमपेक्षते। किं तर्हि ? फलमात्रम्। अन्यथा स्वर्गादिसाधनविधेरपि तथात्वेन कर्म्मफलानां तारतम्याभावप्रसङ्गेनाग्निहोत्रानुष्ठातुरुत्तरकालकर्म्मानुष्ठाने उपासनायाञ्च प्रवृत्तिर्न स्याद्। अतो विधिः फलमेवापेक्षते, न तन्नित्यत्वमपि।

नच ब्रह्मलोकस्यानित्यत्वदोषदर्शनेन तत्साधनोपासनायामवृत्या तद्विधायकशास्त्रस्याप्रामाण्यमानर्थक्यञ्च प्रसज्येतेति वाच्यम्। तर्हि कर्म्मविधायकशास्त्रस्यापि तथात्वप्रसङ्गात्।

नच कर्मफलानित्यत्वज्ञानेऽपि रागवशात्प्रवृत्तिसम्भवेन कर्म्मशास्त्रस्य नाप्रामाण्यमानर्थक्यञ्चेति वाच्यम्। तर्हि प्रकृतेऽपि तुल्यत्वात्। किञ्च "तद्यथेह कर्म्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादि श्रुतेः श्रवणविध्यपेक्षिततया भूतार्थवादत्वेन स्वर्गार्थवादवत् स्वार्थे प्रामाण्यसम्भवेन पुण्यकार्य्यस्य ब्रह्मलोकान्तस्यानित्यत्वमेव।

नच ब्रह्मलोकस्य विद्यासाध्यत्वेन कर्मफलवैलक्षण्येन नित्यत्वमिति वाच्यम्। तत्त्वविद्याया ब्रह्मभिन्नसर्वनिवर्त्तकत्वेन तत्साधनत्वाभावादुपासनायास्तु मानसक्रियारूपत्वेन पुण्यान्तर्भूततया तत्साध्यब्रह्मलोकस्यानित्यत्वं स्यादेव।

किञ्च, "तद्यथा पेशस्कारी पेशसोमात्रामपादायान्यन्नवतरं कल्याणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्य अविद्याङ्गमयित्वान्यन्नवतरं रूपं कल्याणतरं रूपं कुरुते पित्र्यं वा गन्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वे"त्यादिना ब्रह्मलोकान्तस्य सर्वस्य कर्मफलत्वेन संसारगोचरत्वमुक्त्वा "अथाकामयमान" इत्यारभ्य "ब्रह्माप्येती"त्यन्तेन संसारासंस्पृष्टमविद्याकामकर्मातीतं ब्रह्मभावं मोक्षं नित्यफलं ब्रह्मलोकातिरिक्तं दर्शयति श्रुतिः। अतस्तदतिरिक्तनित्यफले मानाभाव इत्युन्मत्तप्रलापः। किञ्च,

"यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्" "अतोऽन्यदार्त्तम्"

"अविनाशि तु तद्विद्धि येन सर्वमिदं ततं। विनाशमव्ययस्यास्य न कश्चित्कर्त्तुमर्हति॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। मामुपेत्य पुनर्जन्म दुखालयमशाश्वतम्॥
नाप्नुवन्ति महात्मानः संसिद्धिं परमाङ्गताः। आब्रह्माभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन"॥

इत्यादिश्रुतिस्मृतिभिरखण्डैकरसब्रह्मभावव्यतिरिक्तस्यानित्यत्वदुःखहेतुत्वावगमात् ब्रह्मलोकस्यानित्यत्वमेव।

अपि च "यत्कार्य्यं तदनित्यमि"ति व्याप्त्या भावकार्य्यस्य सर्वस्यानित्यत्वावगमाद् ब्रह्मलोकस्यापि कर्म्मसाध्यत्वेन

●

का भी शरीर अपवित्र है, उन शरीरों को पवित्र समझना—यह दूसरी अविद्या है। तथा पीड़ारूप जो दुःख है, उसको सुख समझना, और दुःख के साधन ब्रह्म हत्या आदि तथा मद्य (सुरा) पान आदि को सुख साधन समझना—यह तीसरी अविद्या है। तथा अनात्म (जड़) रूप देह (शरीर), इन्द्रिय आदि को ही 'अहम्' (मैं) के रूप में समझना अर्थात् 'आत्मा' समझना—यह चौथी अविद्या है। इस कथन में योगशास्त्र की भी सम्मति हैं।

किञ्च—"तद्यथा पेशस्करी" इत्यादि श्रुति वाक्यों में ब्रह्म लोकान्त जितने भी लोक हैं, सभी कर्मफल स्वरूप होने से पुनः संसार में ही आना पड़ता है—यह बताकर "अथाकामयमानः" से आरम्भ कर "ब्रह्माप्येति" तक के वाक्यों से संसार से असंस्पृष्ट, अविद्या-काम, कर्म से परे ब्रह्मभाव अर्थात् मोक्ष, जिसे नित्य फल बताया जाता है, उसे ब्रह्मलोकादि-लोकों से भिन्न (अतिरिक्त) श्रुति ने बताया है। अतः तत्तत् लोकों के अतिरिक्त किसी नित्य फल के होने में कोई प्रमाण नहीं है—कहना केवल उन्मत्त प्रलाप ही है यह समझना चाहिये।

श्रुति-स्मृति के नाना वाक्यों के द्वारा अखण्डैकरसब्रह्मभाव के व्यतिरिक्त जो कुछ भी शेष है, वह सभी अनित्य है, और दुःखदायक (दुःख का कारण) ही है। अतः ब्रह्मलोकादि लोक भी अनित्य ही हैं।

अपि च—'जो कार्य होता वह अनित्य होता है'—इस व्याप्ति (नियम) के अनुसार सम्पूर्ण भावकार्य अनित्य ही है, यह समझ में आता है। ब्रह्मलोक भी कर्म से ही साध्य होने से भाव कार्यरूप ही है, अतः वह भी अनित्य ही है। इसलिये

१. विध्यनपेक्षिततयेति पाठभेदः।

१. क, ग, अनात्मतु देहेन्द्रियादिष्वहमित्यात्मबुद्धिः पाठः।

अशुचिषु स्वशरीरपुत्रभार्य्यादिशरीरेषु शुचित्वबुद्धिरपरा, दुःखेषु दुःखसाधनेषु च सुखतत्साधनबुद्धिरन्या, अनात्मनि देहादिष्वहमित्यात्मबुद्धिरितरा चेति अविद्या चतुर्विधेति ॥२७॥ कामो रागः ।

●

भावकार्य्यत्वेनानित्यत्वं स्यादेव । तस्मा"दशोकमहिममि"त्यादिवाक्यानां न्यायशून्यतया विध्यनपेक्षिततया च गुणार्थवादत्वाद्-ब्रह्मलोकस्य श्रुतिस्मृतिन्यायैरनित्यत्वावगमाच्च तस्मिन्नित्वबुद्धिरविद्येति निरवद्यम् ।

मलमूत्रपूर्णत्वाच्छरीरस्याशुचित्वम् । तदुक्तम्,

"बीजात्स्थानादुपष्टम्भान्निस्यन्दान्निधनादपि । कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः" इति ॥

अन्यत्रापि,

अमेध्यपूर्णं कृमिजालसङ्कुलं स्वभावदुर्गन्धमशौचमध्रुवम् । कलेवरं मूत्रपुरीषभाजनं रमन्ति मूढा न रमन्ति पण्डिता" इति । अतोऽशुचौ शुचित्वबुद्धिरविद्येत्याह—**अशुचिष्विति** । शुचित्वं निर्मलत्वम् । प्रतिकूलवेदनीयं पीडात्मकं दुःखं तत्साधनं ब्रह्महननापेयपानादि । अनुकूलवेदनीयं प्रीत्यात्मकं सत्त्ववृत्तिरूपं सुखं तत्साधनं ब्रह्मपूजनं गङ्गाजलपानादि । दुःखतत्साधनेषु सुखतत्साधनभ्रमं मुचुकुन्द आह

"विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च[1] वञ्चित" इति ।

इयमस्माकं सर्वेषां प्रत्यक्षसिद्धा चेत्यतो दुःखादिषु सुखादिबुद्धिरविद्येति सूक्तमित्याह—**दुःखेष्विति** । शेषं स्पष्टार्थम् ।

अविवेकेनाहङ्कारचिदात्मनोस्तादात्म्याध्यासपूर्वकमिदं मे भूयादितिजायमानान्तःकरणवृत्तिविशेषो **रागः** ।

●

'अशोकमहिमम्' इत्यादि वाक्य, न्यायशून्य रहने से और उन्हें विधि-वाक्य की अपक्षा रहने के कारण वे गुणार्थवाद हैं । उस कारण ब्रह्मलोकादि जैसे श्लोकों की अनित्यता ही श्रुति-स्मृति तथा न्याय से अवगत होती है । उन अनित्य लोकों को नित्य समझना—यह अविद्या ही है, इसमें कोई सन्देह नहीं है । मल-मूत्रादि से पूर्ण रहने से यह शरीर भी अपवित्र है ।

अतः अशुचि में शुचित्व बुद्धि रखना 'अविद्या' है इसी को बता रहे हैं—**अपने पुत्र के तथा पत्नी आदि के अशुद्ध शरीरों को शुद्ध समझना दूसरी अविद्या है । दुःख और उसके उपाय को सुख व उसका उपाय समझना भी एक अविद्या है । आत्मभिन्न देहादि को 'मैं' समझना यह भी अविद्या ही है । इस प्रकार अविद्या चार प्रकार की है ।** 'शुचित्व' का अर्थ है निर्मलत्व । पीडात्मक दुःख तथा उसके साधनभूत ब्रह्महत्या, अपेयमान, आदि प्रतिकूल वेदनीय कहलाते हैं अर्थात् इनका आचरण करने के लिये आत्मा (मन) तैयार नहीं रहता । प्रीत्यात्मक सत्त्ववृत्तिरूप सुख तथा उसके साधनभूत ब्राह्मणपूजन, गंगाजलपान, आदि अनुकूल वेदनीय कहलाते हैं, अर्थात् उनका आचरण करने के लिए मन प्रसन्नता से तैयार रहता है । बुरे संस्कार के कारण वैसा आचरण कदाचित् न कर पाये, यह अलग बात है ।

मुचुकुन्द कहते हैं—हे परमेश्वर ! आपकी माया से यह जीव वंचना को प्राप्त होता है । अनर्थ का उपाय ही इसे सूझता है अतः यह आपका भजन करता नहीं जबकि दुःख के उत्पादक गृह स्त्री आदि में ही सुख की आशा से आसक्ति किये रहता है । इस स्थिति का सभी को प्रत्यक्ष अनुभव है । अत दुःख आदि को सुख समझना अर्थात् दुःखादि में सुख बुद्धि करना 'अविद्या' ही है । इसी रहस्य को बताने के लिये कहते हैं—'दुःखेष्विति' । इस रीति से अविद्या चार प्रकार की होती है, यह बता चुके हैं ॥२७॥

अविवेक (विचारशून्यता) के कारण अहंकार और चिदात्मा का तादात्म्याध्यास (एकरूपता-यानी अभिन्नता) होता है, जिससे **'यह वस्तु, हमें प्राप्त हो'—इस प्रकार की जो अन्तःकरणवृत्ति बनती है, उसे 'राग' कहते हैं । उस राग का ही दूसरा नाम 'काम'** है ।

अब कर्म का विभाग करते हैं—**कर्मेति** । उसके त्रैविध्य को बताते हैं—'सञ्चितमिति' । अर्थात् **(१) संचित,**

---

१. ग, योषित् पुरुषैश्चेति पाठः ।

कर्म्म त्रिविधं—सञ्चितमागामि प्रारब्धञ्चेति। स्वकृतं फलमदत्वा अदृष्टरूपेण विद्यमानं सञ्चितं कर्म्म, यथ, सन्ध्यावन्दनाग्निहोत्रादि। आगामि—अस्मिँश्छरीरे क्रियमाणं कर्म्म। वर्त्तमानशरीरारम्भकं प्रारब्धङ्कर्म्म।

सञ्चितागामिकर्म्मणोः फलभोगेन विरोधिकर्म्मान्तरेण व ब्रह्मज्ञानेन वा विनाशः। प्रारब्धस्य तु भोगेनैव विनाशः ॥२८॥

●

कर्म्मं विभजते—**कर्म्मेति**। त्रैविध्यमेवाह—**सञ्चितमिति**। सञ्चितं निरूपयति—**स्वेति**। तदुदाहरति—**यथेति**। तत्त्वज्ञानादूर्ध्वं क्रियमाणं कर्म्मागामीत्यभिप्रेत्याह—**आगामीति**। प्रारब्धङ्कर्म्मं लक्षयति— **वर्त्तमानेति**।

"अवश्यमेव भोक्तव्यं कृतं कर्म्मं शुभाशुभम्। नाभुक्तं क्षीयते कर्म्मं कल्पकोटिशतैरपि ॥
प्रायश्चित्तैरपैत्येनो यदज्ञानकृतम्भवेत्। कामतो व्यवहार्य्यस्तु वचनादिह जायते" ॥

"क्षीयन्ते चास्य कर्म्माणि तस्मिन्दृष्टे परावरे"।
"तरति शोकं तरति पाप्मानं" "सर्वंपाप्मानं तरति"।
"ज्ञानाग्निः सर्वकर्म्माणि भस्मसात्कुरुते तथा"।

सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम्। भूयस्तपस्वी भवति पङ्क्तिपावनपावनः॥
परोक्षं ब्रह्मविज्ञानं शाब्दं दैशिकपूर्वकम्। बुद्धिपूर्वंकृतं पापं कृत्स्नं दहति वह्निवत्॥
प्रारब्धं भोगतो नश्येच्छेषं ज्ञानेन दह्यते। इतरद्वितयं कर्म्मं तद्वेषिप्रियवादिनोः ॥

"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशाद्; इतरस्याप्येवमसंश्लेषः पाते तु, भोगेन त्वितरे क्षपयित्वा सम्पद्यते" इत्यादिश्रुतिस्मृतीतिहासपुराणन्यायैः सञ्चितागामिनोः फलभोगविरोधिकर्म्मब्रह्मज्ञाननाश्यत्वम्। प्रारब्धस्य भोगैकनाश्यत्वमित्याह— **सञ्चितेति**।

●

(२) आगामी, (३) प्रारब्ध के भेद से 'कर्म' तीन प्रकार का है। वह त्रिविध कर्म, (१) विहित, और (२) निषिद्ध के भेद से दो प्रकार का होता है। उनमें से जिसका आचरण करना श्रुति-स्मृति के द्वारा बताया हो, उस कर्म को 'विदित' कहते हैं। जैसे—सन्ध्यावदन, अग्निहोत्रादि यज्ञ, दान, तप, जप आदि। तथा जिन कर्मों का आचरण न करना श्रुति-स्मृति के द्वारा कहा गया हो, उसे निषिद्ध कर्म कहते हैं। जैसे ब्रह्म हत्या, सुरा (मदिरा) पान करना आदि निषिद्ध कर्म हैं। विहित कर्म का आचरण करने से मनुष्य को पुण्य (धर्म) की प्राप्ति होती है। तथा निषिद्धकर्म के आचरण से मनुष्य को पाप (अधर्म) की प्राप्ति होती है। इस धर्म और अधर्म को ही 'अदृष्ट', 'अपूर्व' शब्द से भी कहा जाता है। धर्मरूप, अदृष्ट से मनुष्य को 'सुख' मिलता है, और अधर्मरूप अदृष्ट से मनुष्य को 'दुःख' मिलता है। अब कर्म का विभाग बताते हैं—**कर्मेति**। वह कर्म सञ्चित-आगामि-प्रारब्ध के भेद से तीन प्रकार का होता है। **पूर्वजन्म में अथवा इस जन्म में किया हुआ कर्म, जब अपना फल न देकर केवल अदृष्ट के रूप रहता है, तब उस कर्म को 'संचित' कहा जाता है, और तत्त्वज्ञान के पश्चात् किये जाने वाले कर्म को 'अगामि कर्म' कहते हैं, और सञ्चित से निकलकर जो कर्म, 'वर्तमानशरीर' का आरंभक होता है, उसे 'प्रारब्धकर्म' कहते हैं।** प्रसंगतः उन कर्मों के नाश की प्रक्रिया को भी जानना उचित है। **संचित-आगामि दोनों कर्मों का नाश, फलभोग से या विरोधी कर्म से, अथवा ब्रह्मज्ञान से होता है।** यद्यपि क्रियारूप कर्म का नाश, फलभोग के बिना ही हो जाता है, तथापि यहाँ पर 'कर्म' शब्द से कर्मजन्य धर्म-अधर्म (अदृष्ट) समझने चाहिये। उन अदृष्टों का नाश तो फलभोग करने से ही होता है। उसी तरह **प्रारब्ध कर्म का नाश फलभोग से हो होता है।** उसका विनाश, तत्त्वज्ञान से अथवा विरोधी कर्मों से नहीं हो पाता। क्योंकि—(आवश्यमिति) मनुष्य के द्वारा किये गये शुभ अथवा अशुभ कर्मों का फल उसे भोगने ही पड़ते हैं। सैकड़ों-करोड़ों कल्प भी बीत जाएँ तो भी उनका नाश नहीं हो पाता। इन वचनों से उनका नाश नहीं हो पाता यही स्पष्ट हो रहा है। (प्रायश्चित्तैरिति) अज्ञान से किया हुआ पाप, प्रायश्चित्त करने से नष्ट हो जाता है। इत्यादि वचनों से प्रायश्चित्तरूप विरोधी कर्म के करने से उन पाप कर्मों का नाश बता रहे हैं। उनमें भी पाप कर्मों का तो प्रायश्चित्तरूप विरोधी कर्म के करने से नाश होता है, किन्तु पुण्य कर्मों का नाश 'कर्मनाशा नदी' के जल स्पर्शरूप विरोधी कर्म से नाश होता है। और (क्षीयन्तइति) 'अहं ब्रह्माऽस्मि'—इत्याकारक ब्रह्मसाक्षात्कार होने पर प्रारब्धकर्मों के अतिरिक्त (भिन्न) समस्त कर्मों का नाश हो जाता है।

किं बहुना ! प्रारब्धव्यतिरिक्तानामविद्यादीनां पञ्चक्लेशानां तत्त्वज्ञानान्नाशः। तथाहि—"अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः"। कार्य्यकारणरूपा द्विविधाऽविद्या निरूपिता। अहङ्कारस्य सूक्ष्मावस्थाऽस्मिता, इदमेव महत्तत्त्वं

●

न च सञ्चितस्य कर्म्मणः प्रायश्चित्तज्ञानाभ्यां नाशोऽस्तु आगामिकर्म्मणः कथं नाशः स्यात्तस्य तदानीमनुत्पन्नत्वादिति वाच्यम्। तस्याप्यश्लेषसम्भवेन फलाजनकतया नष्टप्रायत्वादिति तात्पर्य्यम् ॥२८॥

न केवलं ब्रह्मसाक्षात्कारेण कर्म्मनाशः[1] किन्त्वविद्यादिसर्वबन्धनिवृत्तिर्भवतीत्याह—**किमिति**। के ते पञ्चक्लेशा **इत्याकाङ्क्षायां** तान्निरूपयितुमाह—**तथाहीति**। पतञ्जलिसूत्रं पठति—**अविद्येति**। तत्राविद्या पूर्वमेव निरूपितेत्याह—**कार्य्येति**।

●

(ज्ञानाग्निरिति) क्योंकि ज्ञानरूप अग्नि, सब कर्मों को भस्म कर देता है। उसीतरह अन्यान्य वचन भी इसी तथ्य को बता रहे हैं। जैसे—प्रारब्धकर्म, केवल भोग से ही निवृत्त होता है। ज्ञानी मनुष्य, फलभोग के द्वारा प्रारब्ध कर्म का नाश होने पर शरीर पात के पश्चात् निर्विशेष ब्रह्मभाव को प्राप्त हो जाता है। इससे स्पष्ट है कि प्रारब्ध कर्म का नाश, फलभोग करने से ही होता है।

शंका—संचित कर्मों का नाश, प्रायश्चित्त करने से अथवा तत्त्वज्ञान से होता है। किन्तु तत्त्वज्ञान के पश्चात् किये जाने वाले जो आगामी कर्म हैं, उनका नाश, तत्त्वज्ञान से कैसे संभव हो सकेगा ?

समा०—ब्रह्मसाक्षात्कार (ब्रह्मज्ञान=तत्त्वज्ञान) के प्रभाव से उस ज्ञानी पुरुष को उन आगामी कर्मों का लेप नहीं हो पाता। उस कारण वे आगामी कर्म उसके लिये, फलजनक (फलोत्पादक) नहीं बन पाते। उन आगामी कर्मों का फलजनक न हो पाना ही उनका नाश है। इसी तथ्य को ब्रह्मसूत्रकार व्यास भगवान् ने अपने ब्रह्मसूत्र के द्वारा बताया है—कि ब्रह्मसाक्षात्कार किये हुए ज्ञानी पुरुष के पूर्व संचित कर्मों का नाश हो जाता है, और ज्ञानोत्तर किये हुए आगामी कर्मों का लेप उसे नहीं हो पाता। इत्यादि श्रुति-स्मृति-इतिहास-पुराण-न्यायादि के द्वारा सञ्चित और आगामी कर्मों का फलभोग विरोधी कर्म से अथवा ब्रह्मज्ञान से नाश होना बताया गया है। किन्तु प्रारब्धकर्म का नाश तो केवल भोग भुगतने से ही हो पाता है।

शंका—संचित कर्मों का नाश, प्रायश्चित्त अथवा ज्ञान से भले ही हो जाय, किन्तु आगामी कर्म का नाश कैसे हो सकेगा ? क्योंकि वे आगामी कर्म तो उस समय उत्पन्न ही नहीं हुए हैं।

समा०—उन आगामी कर्मों का अश्लेष (लेपाभाव) संभव रहने से वे फल के अजनक अर्थात् फल के उत्पादक नहीं बन पाते। उनकी फलोत्पादकता का न होना ही उनका नाश है।

ज्ञानी पुरुष के सञ्चित कर्मों का नाश, ज्ञान से और ज्ञानोत्तर कर्मों का लेप उसे न होने की बात श्रुति ने भी बताई है—जैसे मूंजकी (ईषिकाकी) तूल (पुंज = समूह) अग्नि में डलते ही शीघ्र दग्ध हो जाता है, उसी तरह ज्ञानी पुरुष के संचित कर्म, ब्रह्मज्ञानरूप अग्नि से शीघ्र ही दग्ध हो जाते हैं—इस श्रुति ने तत्त्वज्ञानी पुरुष के पहले संचित कर्मों का नाश बताया है। और ज्ञानोत्तर कर्मों से लिप्त न हो पाने की बात को यह अन्य श्रुति बता रही है कि जैसे जल में रहने वाले कमलपत्र को जल का लेप नहीं हो पाता अर्थात् वह जल से गीला नहीं होता, उसी तरह ज्ञानी पुरुष को ज्ञानोत्तर कर्मों का लेप नहीं होता—इस श्रुति ने ज्ञानी मनुष्य की आगामी कर्मों से अलिप्तता बताई है।

उक्त सूत्र में तथा श्रुति में प्रयुक्त जो 'पाप' शब्द है, वह 'पुण्य' का भी उपलक्षण है। अर्थात् 'पाप' शब्द से पाप और पुण्य दोनों को समझना चाहिये। अतएव 'सुहृदः साधुकृत्यं द्विषन्तः पापकृत्यम्'—इस श्रुति में ज्ञानी पुरुष की सेवा करने वाले भक्तों को उसके (ज्ञानी पुरुष के) आगामी पुण्यकर्मों की प्राप्ति बताई गयी है, और उससे द्वेष करनेवाले निन्दकों को उसके पाप कर्मों की प्राप्ति बताई गयी है। अतः 'पाप' शब्द से 'पुण्य-पाप' दोनों का ग्रहण करना उचित है ॥२८॥

किञ्च—'ब्रह्मसाक्षात्कार' से ज्ञानी पुरुष के केवल कर्मों का ही नाश नहीं होता, अपितु अविद्यादि पंचक्लेशों का भी नाश हो जाता है। वे पञ्चक्लेश कौन से हैं ? यह जिज्ञासा होने पर उनका निरूपण करते हैं—**तथाहीति**। योगशास्त्रकार महर्षि—पतञ्जलि ने उन पंचक्लेशों को नामतः एक सूत्र में बताया है कि "**(१) अविद्या, (२) अस्मिता, (३) राग, (४) द्वेष,**

१. **अभ्युपेत्यवादोऽयम्। साक्षात्कारेणाविद्यानिवृत्तौ कर्मसद्भावासम्भवात् कर्माभासस्य च फलजनकतायां मानाभावादिति।**

सामान्याहङ्कार इति चोच्यते। राग उक्तः। द्वेषः क्रोधः। स्वीकृतस्य पुनस्त्यागाऽसहिष्णुत्वमभिनिवेशः। एतेषां पञ्चानाम्ब्रह्मसाक्षात्काराभिवृत्तिः। "ज्ञात्वा देवं मुच्यते सर्वपाशै"रित्यादिश्रुतेः। पाशैः पञ्चक्लेशैरित्यर्थः॥ २९॥

●

अस्मितां निरूपयति—अहङ्कारस्येति। सूक्ष्मावस्था कारणावस्थेत्यर्थः। कपिलपतञ्जलिभ्याम् इदमेव महत्तत्त्वमित्युच्यते। वेदान्तिभिः सामान्याहङ्कार इत्युच्यते। ताभ्यां प्रकृतेर्महान्महतोऽहङ्कार इति सृष्टिक्रमाभ्युपगमाद्, अस्माभिर्व्यष्ट्यहङ्कारस्य सामान्याहङ्कारापरपर्यायभूतसूक्ष्माकाशादिसात्त्विकांशसमुदायादुत्पत्तिस्वीकारात् व्यष्ट्यहङ्कारसूक्ष्मावस्था सामान्याहङ्कारो वक्तुं शक्यते।

न च प्रमाणाभावः, पूर्वमेवोक्तत्वादिति भावः। तत्र प्रमाणमाह—ज्ञात्वेति। आदिशब्देन "एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति"। "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥"

इत्यादिश्रुतयो गृह्यन्ते। स्मृतिरपि, "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन" इत्यादि।

"ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिरिति" वाक्यशेषानुरोदेनोदाहृतश्रुतिं व्याचष्टे—पाशैरिति। अस्यार्थः—देवं स्वप्रकाशमहम्ब्रह्मास्मीति साक्षात्कृत्वाऽविद्यास्मितारागद्वेषाभिनिवेशैः पञ्चभिः क्लेशापरपर्यायपाशशब्दाभिधेयैर्मुच्यते इत्यर्थः। एतत्सर्वमभिप्रेत्य भगवता वार्तिकाचार्य्येणाप्युक्तम्

"यः पश्येत्सर्वगं शान्तमानन्दात्मानमद्वयम्। न तेन किञ्चिदाप्तव्यं ज्ञातव्यं वावशिष्यते"॥
कृतकृत्यो भवेद्विद्वान् जीवन्मुक्तो भवेत्सदा इति॥ २९॥

●

और (५) अभिनिवेश—ये पञ्च (पाँच) क्लेश हैं। उनमें से अविद्या'—'कार्य अविद्या' और 'कारण अविद्या' के भेद से दो प्रकार की होती है। दोनों प्रकार की अविद्या को पहले बता दिया गया है।

अस्मिता का निरूपण करते हैं—अहङ्कारस्येति। अहंकार की कारणरूप जो सूक्ष्मावस्था, उसे 'अस्मिता' कहते हैं। अर्थात् अहंकार की सूक्ष्मावस्था (कारणावस्था) को ही अस्मिता कहते हैं। इसी अस्मिता को सांख्यशास्त्र के प्रवर्तक कपिल महामुनि और योगशास्त्र के प्रवर्तक महर्षि पतञ्जलि 'महत्तत्त्व' के नाम से सम्बोधित करते हैं। और वेदान्ती विद्वान् उसी अस्मिता को 'सामान्य अहङ्कार' के नाम से कहते हैं। कपिल और पतञ्जलि (सांख्य और योग) ने प्रकृति से महत्तत्त्व और महत्तत्व से अहङ्कार—यह सृष्टिक्रम बताया है। किन्तु हम वेदान्ती लोग सामान्याऽहंकार का पर्यायभूत सूक्ष्म आकाशादि के सात्त्विक-अंश समूह से 'व्यष्टि अहंकार' की उत्पत्ति मानते हैं। अतः व्यष्टि अहंकार की सूक्ष्म अवस्था को 'सामान्याहङ्कार' के नाम से कहा जा सकता है।

राग—'यह वस्तु मुझे प्राप्त हो'—इत्याकारक जो अन्तःकरणवृत्तिविशेष है, उसे 'राग' कहते हैं।

द्वेष—क्रोध को ही 'द्वेष' कहते हैं।

अभिनिवेश—'अहम्', 'मम' अर्थात् मैं और मेरा कहकर जो देहादि पदार्थ अपनाये जाते हैं, उनका त्याग न कर पाना ही 'अभिनिवेश' है। अर्थात् त्याज्य (हेय) का त्याग न कर सकना ही अभिनिवेश है। इन पंचक्लेशों को आत्मपुराण के अष्टम अध्याय में विस्तार से बताया गया है। इन पंचक्लेशों की भी ब्रह्मज्ञान (ब्रह्मसाक्षात्कार) से ही निवृत्ति हो जाती है। उक्त कथन में प्रमाण उपस्थित करते हैं—ज्ञात्वेति। (ज्ञात्वेति) अर्थात् यह अधिकारी पुरुष 'स्वयंप्रकाश परब्रह्म' का 'अहं ब्रह्मास्मि' इत्याकारक अनुभव करता हुआ अविद्यादि पञ्चक्लेशरूप पाशों से मुक्त हो जाता है। इत्यादि श्रुति वचन, पंचक्लेशरूप पापों से मुक्त होना बता रहे हैं। 'इत्यादि श्रुतिः'—यहाँ के 'आदि' शब्द से अन्यान्य श्रुतियाँ भी उक्त तथ्य की समर्थक बताई जा सकती हैं।

भगवान् वार्तिकाचार्य ने भी कहा है—सर्वव्यापक, शान्त, आनन्द, अद्वितीय आत्मा का जो साक्षात्कार कर लेता लेता है उसके लिये पाने या जानने योग्य कुछ बचता नहीं। वह विद्वान् कृत कृत्य हो जीवन्मुक्त हो जाता है॥ २९॥

तिष्ठतु तावत्प्रासङ्गिकम् । एवं सूक्ष्मशरीरोत्पत्तिनिरूपिता ।

पञ्चीकृतभूतानि स्थूलभूतानि । पञ्चीकरणं तु पूर्वोक्तानामाकाशादीनां तामसांशान् एकैकं द्विधा[1] समं विभज्य तत्रैकं चतुर्धा विभज्य स्वांशं परित्यज्य इतरांशेषु योजनं पञ्चीकरणम्[2] "तासां त्रिवृतं त्रिवृतमेकैकं करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् पञ्चीकरणं प्रामाणिकमेव ॥ ३० ॥

●

प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति—तिष्ठत्विति । प्रसङ्गादागतं प्रासङ्गिकमुपसंहरति-एवमिति । एवमुक्तरीत्या यथोक्तक्रमेणेति यावत् । एवं वार्तिककृदपि सृष्टिक्रममाह स्म

"आसीदेकं परब्रह्म नित्यमुक्तमविक्रियम् । तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् । स्पर्शात्मकस्ततो वायुस्तेजोरूपात्मकं ततः ॥
आपोरसात्मकास्तस्मात्ताभ्यो गन्धात्मिका मही । शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ॥
शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते । शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः ॥
शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही । तेभ्यः समभवत्सूत्रं लिङ्गं सर्वात्मकं महत्" इति ॥

तेभ्योऽपञ्चीकृतभूतसात्त्विकांशराजसांशेभ्यः समष्टिव्यष्ट्यात्मकं लिङ्गशरीरमुत्पन्नमित्यर्थः ।

एवं सूक्ष्मशरीरोत्पत्तिं सप्रपञ्चां निरूप्य स्थूलभूतोत्पत्तिं वक्तुं तानि लक्षयति—पञ्चीकृतेति । तान्यपञ्चीकृतभूतानां तामसांशेभ्यो जायन्त इति शेषः । पञ्चीकरणप्रक्रियामनुभाषते—पञ्चीकरणन्त्विति ।

●

अभी तक प्रासंगिक कथा चल रही थी, उसे समाप्त कर अब पुनः प्रकृत का अनुसरण कर रहे हैं—तिष्ठत्विति । प्रसंगवशात् सूक्ष्म शरीरोत्पत्ति का निरुपण अभी तक यथोक्त क्रम से किया गया । इसीप्रकार वार्तिककार ने भी सृष्टिक्रम को बताया है ।

उन अपञ्चीकृत भूतों के सात्त्विक अंशों से समष्टि-लिङ्ग शरीर और उन्हीं भूतों के राजस अंशों से व्यष्टिलिङ्ग शरीर उत्पन्न हुए । इस रीति से सूक्ष्म शरीरोत्पत्ति का सप्रपञ्च (सविस्तर) निरूपण किया गया । अब स्थूल भूतों की उत्पत्ति बताने के लिये उन्हें लक्षित कर रहे हैं—पञ्चीकृतेति । अपञ्चीकृतभूसों (सूक्ष्मभूतों) के तामस अंशों से ये स्थूलभूत पैदा होते हैं । पञ्चीकरण की प्रक्रिया को प्रदर्शित करने के लिये कह रहे हैं—पञ्चीकरणं त्विति । पञ्चीकरणभाव को प्राप्त हुए जो पंचभूत हैं उन्हीं को 'स्थूलभूत' कहते हैं । पञ्चभूतों का पंचीकरण करने का प्रकार यह है—तमोंशप्रधान पूर्वोक्त जो आकाश आदि पाँच सूक्ष्मभूत हैं, उन भूतों में से एक-एक भूत के प्रथमतः समान रूप से भाग करने चाहिये । उन दोनों में से एक-एक भाग को पृथक्-पृथक् रखे दूसरे भाग के पुनः चार-चार भाग करे । उन चारों भागों को यथाक्रम दूसरे चार भूतों के आधे भाग में मिला देना चाहिये—इसी को पञ्चीकरण कहते हैं । 'उनमें से प्रत्येक को त्रिवृत करू"'—यह 'त्रिवृत्करण बोधक श्रुति उपलक्षणा से पंचीकरण को भी बताती है अतः पंचीकरण प्रमाणसिद्ध ही है । जैसे—एक आकाश के समान दो भाग किये । उन दो भागों में से एक भाग को तो पृथक् रख दिया । और दूसरे भाग के पुनः चार भाग किये । उन चार भागों में से एक भाग तो 'वायु' में मिलाया, और दूसरा भाग 'तेज' में मिलाया, और तीसरा भाग 'जल' में मिलाया और चौथा भाग 'पृथिवी' में मिला दिया ।

इसी प्रकार 'वायु' के भी दो समान भाग किये । एक भाग को पृथक् रख दिया । दूसरे भाग के पुनः चार भाग किये । उनमें से एक भाग 'आकाश' में मिलाया, दूसरा भाग 'तेज' में मिलाया । तीसरा भाग 'जल' में मिलाया । चौथा भाग 'पृथिवी' में यिलाया । यही रीति 'तेज' आदि तीनों भूतों के विभाग में भी समझनी चाहिये । इस प्रकार से आकाशादि पंचभूतों का आधा-आधा भाग तो अपना सिद्ध है, और आधा-आधा भाग वायु आदि चार भूतों में सिद्ध रहता है ।

१. क, ग, द्विधा विभज्येति पाठः । सीरीज पुस्तके ।

२. योजनमित्यतः परं त्रिवृतमित्यतश्च पूर्वं तेषां पृथ्वी मलमांसमनः, जल मूत्रलोहितप्राणाः, तेजोऽस्थिमज्जात्वक् इति पाठः सीरीजपुस्तके अधिकः, पंजीकरणं, तासामिति च पदे तत्र न स्तः ।

ननु छान्दोग्ये तेजोऽबन्नानां सृष्टिमुक्त्वा त्रिवृत्करणप्रतिपादनात् पञ्चीकरणप्रक्रियाव्युत्पादनमसङ्गतम्, तत्र प्रमाणाभावात्। न च सृष्टिपरिपूर्त्तये भूतत्रयसर्गश्रुतेर्वियदधिकरणन्यायेन तैत्तरीयकश्रुत्यनुसारेण च "आकाशं वायुं च सृष्ट्वा तेजोऽसृजतेति" व्याख्यातत्वेन पञ्चीकरणस्याप्युचितत्वादिति वाच्यम्, त्रिवृत्करणेनापि सर्वव्यवहारोपपत्तेरित्याशङ्क्याह—**तासामिति। तासां** पृथिव्यप्तेजोरूपाणां मध्ये **एकैकां** देवतां **त्रिवृतं** यथा भवति तथा **करवाणि**। एषा च प्रक्रिया—पृथिव्यप्तेजसां त्रयाणां भूतानां मध्ये एकैकं भूतं द्विधा विभज्य तत्राप्येकं भागं द्विधा विभज्य स्वांशं परित्यज्येतरयोर्योजनीयं त्रिवृत्करणम्। एतदभिप्रायेण सूत्रकारोऽप्याह "सञ्ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशादि"ति।

श्रुतिसूत्रप्रसिद्धत्वेन भूतानां त्रिवृत्करणमेव, न पञ्चीकरणमिति वाचस्पतिमिश्राः।

आचार्यास्तु छान्दोग्यश्रुतौ पञ्चभूतसर्गविवक्षायां त्रिवृत्करणमेव न पञ्चीकरणमिति प्रतिपादने प्रकरणविरोधप्रसङ्गाद् आकाशवाय्वोः शब्दस्पर्शानुपलब्धिप्रसङ्गाच्चानिच्छतापि पञ्चीकरणमेवाभ्युपगन्तव्यम्। यदि पञ्चीकरणाभावेऽपि आकाशवाय्वोः शब्दस्पर्शोपलब्धिः स्यात्तर्हि तद्वदेव त्रिवृत्करणाभावेऽपि तेजोऽबन्नेषु रूपाद्युपलब्धिप्रसक्तया व्यवहारोपपत्तौ त्रिवृत्करणमपि न

●

कुछ ग्रन्थकारों का कहना है कि—एक-एक भूत के दो विषम भाग करने चाहिये। अर्थात् एक भाग तो 'चार अंश रूप' और दूसरा भाग, 'एक अंश रूप' उस एक अंश रूप अल्प भाग के पुनः पांच करके यथाक्रम उन पांच भूतों में एक-एक भाग को मिला देना ही पंचीकरण है। पञ्चीकरण का यह भी एक प्रकार है। यह प्रकार आत्मपुराण के ग्यारहवें अध्याय में बताया है।

शंका०—छान्दोग्य उपनिषद् में तेज, जल और अन्न (पृथिवी) इन तीन भूतों की उत्पत्ति (सृष्टि) बताकर 'तासां त्रिवृतमेकैकं करवाणि'—इन श्रुति के द्वारा उन तेज आदि तीन भूतों का त्रिवृत्करण' बताया गया है। अतः पञ्चीकरण प्रक्रिया का प्रतिपादन करना असंगत है। क्योंकि पञ्चीकरण करने में कोई प्रमाण नहीं है। तेज आदि तीन भूतों का त्रिवृत्करण करने की प्रक्रिया यह है—एक 'तेज' के दो भाग, समान रूप से किये। उन दो भागों में से एक भाग को पृथक् रख दे। दूसरे भाग के पुनः दो भाग करे। उन दो भागों में से एक भाग 'जल' में मिला देना चाहिये। दूसरा भाग, 'पृथिवी' में मिला देना चाहिये। यही रीति 'जल' तथा 'पृथिवी' में भी समझनी चाहिये—यही **त्रिवृत्करण** है। इस त्रिवृत्करण में उक्त श्रुति तथा भगवान् व्यास का सूत्र प्रमाण है। किन्तु उपर्युक्त पञ्चीकरण में कोई श्रुति या सूत्र प्रमाण नहीं है। इस लिये पञ्चीकरण का निरुपण करना संगत नहीं है।

यदि यह कहें कि तीन भूतों की सृष्टि का प्रतिपादन करने वाली श्रुति की, वियदधिकरण न्याय से और तैत्तिरीयक श्रुति के अनुसार 'आकाशं वायुं च सृष्ट्वा तेजोऽसृजत"—यह व्याख्या की गई हे। अतः पञ्चीकरण-प्रतिपादन को भी उचित कहा जा सकता है।

किन्तु यह कहना उचित नहीं है, क्योंकि त्रिवृत्करण से ही सम्पूर्ण व्यवहार उपपन्न हो जाता है।

उक्त आशंका को ही अभिव्यक्त करते हैं—**तासामिति**। अर्थात् तासां अर्थात् पृथिवी, अप्, तेजोरूप देवताओं में से एक-एक देवता का त्रिवृत्करण जैसे हो सके उस तरह से करना चाहिये। यही प्रक्रिया 'पृथिवी, अप्, तेज'—इन तीन भूतों में से एक-एक भूत के दो विभाग करके, उनमें भी एक भाग को द्विधा विभक्त करे और अपने अंश को छोड़कर अन्य दो अंशों में उसे मिला देने को त्रिवृत्करण कहते हैं। इसी अभिप्राय से सूत्रकार भी 'त्रिवृत्कुर्वतः' कहा है। एवं च त्रिवृत्करण के निरूपण में श्रुति-सूत्र आदि प्रमाणों के उपलब्ध रहने से 'त्रिवृत्करण' की ही सर्वत्र प्रसिद्धि है। अतः "भूतानां त्रिवृत्करणमेव न पञ्चीकरणम्" इति।

समा०—आचार्य तो यह बताते हैं कि तैत्तिरीयश्रुति ने आकाशादि पंचभूतों की उत्पत्ति का निरूपण किया है। उस श्रुति के विरोध से बचने के लिये छान्दोग्य श्रुति में आकाश, वायु की उत्पत्ति के पश्चात् ही तेज आदि तीन भूतों की उत्पत्ति बताई गई है। छान्दोग्यश्रुति तथा व्याससूत्र में जो त्रिवृत्करण बताया है, उसे पञ्चीकरण का भी उपलक्षण समझना चाहिये। 'त्रिवृत्करणमेव न पञ्चीकरणम्' यह कहने पर प्रकरणविरोध उपस्थित होगा।

यदि कदाचित् पञ्चीकरण का स्वीकार नहीं करेंगे तो आकाश और वायु के शब्द, स्पर्श गुणों की पृथिवी आदि में प्रतीति नहीं होनी चाहिये, किन्तु पृथिवी आदि में शब्दस्पर्श गुणों की प्रतीति तो होती है। अतः पंचीकरण को अप्रामाणिक न

"वैशेष्यात्तु तद्वादस्तद्वाद" इति न्यायेन स्वांशभूयस्त्वाद्विशेषव्यपदेशोऽपि सम्भवति। एवं च सति आकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शौ, तेजसि शब्दस्पर्श रूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्पर्शरूपरसगन्धाः। तथाच

•

सिद्धयेत्। ततश्च श्रुतेरप्रामाण्यं प्रसज्येत ततश्च श्रुतेरप्रामाण्यपरिहाराय सर्वत्र व्यवहारोपपत्तेश्च श्रुतिसूत्रयोः पञ्चीकरणं विवक्षितमेवेति त्रिवृत्करणश्रुतिसूत्रयोः पञ्चीकरणस्याप्युपलक्षणत्वात्पञ्चीकरणं प्रामाणिकमित्याहुः[१] ॥ ३० ॥

ननु यदि पञ्चीकरणेन सर्वेषां भूतानामेकीभावस्तर्हीयं पृथिवीदं जलमित्यादिविशेषव्यपदेशः कथं स्यादित्याशङ्का सूत्रेण परिहारमाह—**वैशेष्यादिति**। विशेषस्य भावो वैशेष्यं स्वांशभूयस्त्वम् तस्मात् तत्तद्वादः इयं पृथिवीदं जलमित्यादि विशेष-व्यपदेश इति सूत्रार्थः। उक्तमेवार्थमनुसन्दधाति—**स्वांशेति**। पञ्चीकरणस्य प्रयोजनमाह—**एवञ्चेति**। पञ्चीकरणे कृते सतीत्यर्थः। **आकाशे** पञ्चीकृताकाशे; एवं सर्वत्र द्रष्टव्यम्।

•

समझकर उसे प्रामाणिक समझना चाहिये और न चाहते हुए भी उसका स्वीकार करना चाहिये।

यदि पञ्चीकरण के अभाव में भी आकाश-वायु के शब्द-स्पर्श गुणों की उपलब्धि की संभावना करोगे तो उसीतरह त्रिवृत्करण के अभाव में भी 'तेज, अप्, अन्न' में रूप आदि गुणों की उपलब्धि का प्रसंग प्राप्त होने से व्यवहार की उपपत्ति हो ही जायगी तब त्रिवृत्करण भी सिद्ध नहीं हो सकेगा। तब श्रुति का अप्रामाण्य प्रसक्त होगा। अतः श्रुति के अप्रामाण्य का परिहार करने के लिये और सर्वत्र व्यवहारोपपत्त्यर्थं श्रुति और सूत्र में 'पञ्चीकरण' को नियतरूप से विवक्षित किया गया है। एवंच त्रिवृत्करण को श्रुति और सूत्र के अनुरोध से पञ्चीकरण का भी उपलक्षण समझकर पञ्चीकरण को प्रामाणिक ही समझना चाहिये ॥३०॥

शंका—पञ्चीकरण के द्वारा समस्त भूतों का एकीभाव यदि माना जाय तो 'यह पृथिवी है', 'यह जल है'—यह विशेष व्यवहार नहीं हो सकेगा, किन्तु होता तो है, तो वह क्यों कर होता है?

समा०—ब्रह्मसूत्र के आधार पर उक्त शंका का समाधान किया जाता है। पंचीकरण करने पर भी उन **पृथिवी आदि भूतों में अपना-अपना अंश, अधिक रहता है, और अन्य भूतों का अंश अल्प होता है। अतः उस अधिक अंश को लेकर ही 'यह पृथिवी', 'यह जल'—इत्याकारक विशेष व्यवहार हुआ करता है।** एवंच पंचीकरण के होने पर भी विशेष व्यवहार की उपपत्ति में कोई रुकावट नहीं है। ब्रह्मसूत्रकार व्यास ने अपने सूत्र 'वैशेष्यात्तु' के द्वारा उक्त व्यवस्था का प्रतिपादन किया है।

शंका—अधिक अंश के अनुरोध से जब विशेष व्यवहार हो ही जाता है, तब पंचीकरण करने की आवश्यकता क्यों हुई?

समा०—आकाशादि पंचभूतों का पंचीकरण होने से ही पंचीकृत आकाश में 'एक शब्दगुण' ही अभिव्यक्त हो पाता है। तथा पंचीकृत वायु में 'शब्द और स्पर्श' ये दो गुण अभिव्यक्त हो पाते हैं। तथा पंचीकृत तेज में 'शब्द, स्पर्श, रूप' ये तीन गुण अभिव्यक्त हो पाते हैं। तथा पञ्चीकृत जल में 'शब्द, स्पर्श, रूप, रस'—ये चार गुण अभिव्यक्त हो पाते हैं। तथा पञ्चीकृत पृथिवी में 'शब्द, स्पर्श, रूप, रस, गन्ध'—ये पांच गुण अभिव्यक्त हो पाते हैं।

यद्यपि वे शब्दादिक पांचों गुण, यथाक्रम अपंचीकृत आकाशादि पंचभूतों में भी विद्यमान थे, तथापि उन अपंचीकृत (सूक्ष्म) भूतों में रहनेवाले वे शब्दादि गुण प्रत्यक्ष के योग्य नहीं थे। किन्तु पञ्चीकरण करने के अनन्तर उन पञ्चीकृत भूतों में वे शब्दादि गुण, प्रत्यक्ष के योग्य बन पाये। प्रत्यक्ष के योग्य हो पाना ही उन गुणों का अभिव्यक्त होना है। उन पाँच गुणों में भी एक-एक भूत का एक-एक गुण ही 'असाधारण' रहता है, और शेष अन्य गुण, अपने-अपने कारण से उसमें, आते हैं। जैसे—'पृथिवी' में उसका अपना असाधारण गुण, एकमात्र 'गन्ध' है। और अन्य शब्दादि चार गुण, आकाशादि कारणों से उसमें आकर प्राप्त हुए हैं। इसी प्रकार जल आदि में भी समझना चाहिए।

---

१. वस्तुतस्तु 'वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा चे' ति प्रश्नश्रुतेः श्रौतमेव पञ्चीकरणमिति साम्प्रदायिकाः। अतः 'श्रुतियुक्तिसम्प्रदायैः पञ्चीकरणसाधने। सत्यकस्मात्कुतोऽद्राक्षीद् वाचस्पतिमतं शुभम् ॥' इति।

पञ्चीकृतपृथिव्याः ब्रह्माण्डमुत्पन्नं, तदन्तर्वर्त्तिलोकाः चतुर्दश ब्रह्माण्डान्मनुशतरूपे जाते, ब्रह्माण्डान्तर्वर्त्तिपृथिव्या ओषधय उत्पन्नाः, ओषधिभ्योऽन्नम्, पितृभ्यां भुक्तान्नपरिणामरेतःशोणितद्वारा स्थूलशरीरमुत्पन्नम्। तच्चतुर्विधम्—जरायुजमण्डजं स्वेदजमुद्भिज्जञ्चेति। मनुष्यादिशरीरं[1] जरायुजम्, पक्षिपन्नगादिशरीरमण्डजम्, यूकामशकादिशरीरं स्वेदजम्, तृणगुल्मादिशरीरमुद्भिज्जम् ॥३१॥

उक्तं स्थूलशरीरं पुनः प्रकारान्तरेण द्विविधं समष्टिव्यष्टिभेदात्। पञ्चीकृतपञ्चमहाभूततत्कार्य्यंब्रह्माण्डान्तं

●

"आपो वार्कस्तद्यदपांशर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निवर्त्ततागिन"रिति श्रुतिमाश्रित्य पञ्चीकृतपृथिव्याः ब्रह्माण्डोत्पत्तिमाह—**तथेति**। "सं वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवताम्"इति श्रुतिमाश्रित्य ब्रह्माण्डात्मनो विराट्पुरुषात् मनुशतरूपयोरुत्पत्तिमाह—**ब्रह्माण्डादिति**।

"पृथिव्या ओषधयः ओषधीभ्योऽन्नमन्नात्पुरुष" इति श्रुत्युक्तक्रममाश्रित्य पृथिव्याः सकाशादोषध्याद्युत्पत्तिक्रमेण स्थूलशरीरोत्पत्तिमाह—**ब्रह्माण्डान्तर्वर्त्तीति**। स्थूलशरीरं विभजते—**तदिति**। जरायुजादीनि दर्शयति—**मनुष्यपश्वादीति**[2] ॥३१॥

प्रकारान्तरेण स्थूलशरीरं विभजते—**उक्तमिति**। समष्टिस्थूलशरीरं व्युत्पादयति—**पञ्चीकृतेति**। पक्षान्तरमाह—

●

पञ्चीकृत पृथिवी से ब्रह्माण्ड की उत्पत्ति बता रहे हैं—तथाचेति। पञ्चीकृत पृथिवी आदि भूतों से ब्रह्माण्ड की उत्पत्ति हुई। उस ब्रह्माण्ड के अन्तर्गत, ऊपर के सात लोक और नीचे के सात लोक अर्थात्, चतुर्दश (चौदह) लोक उत्पन्न किये गये।

इस श्रुति के अनुसार ब्रह्माण्डरूप विराट् पुरुष से 'मनु' और 'शतरूपा' की उत्पत्ति हुई। मनु और शतरूपा से मनुष्यादि की सृष्टि हुई इत्यादि प्रसंग, आत्मपुराण के चतुर्थाध्याय में बताया गया है।

ब्रह्माण्ड के अन्तर्गत जो पञ्चीकृत पृथिवी है, उससे औषधियाँ अन्न आदि उत्पन्न हुए। उस अन्न का भोजन स्त्री-पुरुषों ने किया। पुरुष के शरीर में जो अन्न पहुँचा वह अन्न तो 'शुक्र' (रेत) के रूप में परिणत हुआ, और स्त्री के शरीर में जो अन्न पहुँचा, वह 'शोणित' (रज) के रूप में परिणत हुआ। पुरुष के वीर्य को 'शुक्र' कहते हैं, और स्त्री के वीर्य को 'शोणित' कहते हैं। पिता-माता के शुक्र-शोणित से मनुष्यादि के 'स्थूल शरीर' उत्पन्न हुए। वह स्थूल शरीर भी (१) जरायुज, (२) अण्डज, (३) स्वेदज और (४) उद्भिज्ज के भेद से चार प्रकार का होता है। माता के उदर में गर्भ का आच्छादक जो चर्मविशेष है, उसे 'जरायु' कहते हैं। मनुष्य, गो, अश्वादिपशुओं के शरीर 'जरायुज' कहे जाते हैं। अण्डे से उत्पन्न होनेवाले शरीरों को 'अण्डज' कहते हैं। जैसे—पक्षी, सर्प, छिपकली आदि के शरीरों को अण्डज कहा जाता है।

स्वेद (पसीने) से उत्पन्न होनेवाले शरीरों को स्वेदज कहते हैं। जैसे—यूका, मशक, मत्कुण, कृमि आदि के शरीर, स्वेदज होते हैं। भूमि को फोड़कर बीज से जो शरीर उत्पन्न होते हैं, उनको 'उद्भिज्ज' कहते हैं। जैसे—वृक्ष, लता, तृण आदि के शरीर उद्भिज्ज हैं। मनुष्यादि के शरीर के समान ही वृक्ष, लता आदि के शरीर में भी प्राण रहते हैं, वे भी जीवात्मा के शरीर हैं, अतः वे भी जीवधारी (सजीव) हैं, यह सभी के प्रत्यक्ष है, अनादिकाल से उनकी सजीवता का ज्ञान भारतीयों को है। किन्तु अंगरेजी शिक्षा के फलस्वरूप आज के अंगरेजी सभ्यता के उच्छिष्ट भोजी बड़े-बड़े शिक्षाविद् भी वृक्ष को न्यूटरजण्डर ही कहते फिरते हैं, और न्यूटर की परिभाषा 'निर्जीव' पढ़ते-पढ़ाते भी हैं। आज के स्वतन्त्र भारत में भी नई शिक्षा नीति का ढिंढोरा पीटनेवाले उच्छिष्ट भोजी शिक्षाशास्त्र के वैदुष्य का अभिमान रखनेवाले महान् शिक्षाशास्त्री इस भूल को नहीं समझ पाये। यह है देश का दुर्भाग्य। न समझ पाने का एकमात्र कारण भारतीय शिक्षा का न होना ही है ॥३१॥

प्राकारान्तर से स्थूलशरीर का विभाग बताते हैं—**उक्तमिति। 'समष्टि' और 'व्यष्टि' के भेद से वही पूर्वोक्त 'स्थूलशरीर' पुनः दो प्रकार का है। पूर्वोक्त पञ्चीकृत पञ्च महाभूत तथा उन भूतों का कार्यरूप ब्रह्माण्ड के अन्तर्वर्ती कार्य-**

१. मनुष्यपश्वादिशरीरमिति टीकानुसारी पाठः।

२. क्वचित् कोशे मनुष्यादीतीत्येव पाठः।

तदन्तर्वर्त्तिकार्य्यं सर्वं समष्टिरित्युच्यते। अथवा व्यक्तिषु गोत्वादिवत् सर्वव्यष्टिष्वनुस्यूतं पञ्चीकृतभूतकार्य्यं ब्रह्माण्डात्मकं व्यापकं समष्टिः। वनवत्सकलस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते। एतदुपहितं चैतन्यं विराट् वैश्वानर इति चोच्यते। विविधं राजमानत्वात्, सर्वनराभिमानित्वाच्च। प्रत्येकं स्थूलशरीरं गवादिव्यक्तिवद्व्यावृत्तं व्यष्टिरित्युच्यते। एतदुपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरे प्रविष्टत्वात् ॥३२॥

अनयोः समष्टिव्यष्ट्योः सामान्यविशेषयोरिव तादात्म्याभ्युपगमादेतदुपहितविश्ववैश्वानरयोरपि तादात्म्यम् ॥३३॥

●

अथवेति। तत्रैव मतान्तरमाह—**वनवदिति**। ततः किम्? तत्राह—**एतदिति**। समष्टिस्थूलशरीरोपहितचैतन्ये विराड्वैश्वानरशब्दयोः प्रवृत्तिनिमित्तमाह—**विविधेति**। व्यष्टिस्वरूपं व्युत्पादयति—**प्रत्येकमिति**। व्यष्टिस्थूलशरीरोपहितचैतन्यस्य विश्वसंज्ञामाह—**एतदिति**। तत्र युक्तिमाह—**सूत्रेति** ॥३२॥

ननु समष्टिस्थूलशरीरोपाधिकवैश्वानरज्ञानं व्यष्टिस्थूलशरीरोपाधिकविश्वज्ञानञ्च निष्प्रयोजनं सुखदुःखप्राप्तिपरिहारयोरसम्भवादित्याशङ्क्य विश्ववैश्वानरयोरभेदोपासनया वैश्वानरप्राप्त्या तदानन्दावाप्तिप्रयोजसम्भवादित्यभिप्रेत्य[1] तदुपासनोपयोगित्वेन समष्टिव्यष्टिस्थूलशरीरयोस्तादात्म्यप्रतिपादनेन तदुपहितयोरपि तादात्म्यं प्रतिपादयति—**अनयोरिति**। यथा सत्ता

●

ये सब मिलकर 'समष्टि स्थूलशरीर' कहे जाते हैं। अथवा जैसे अनेक गोव्यक्तियों में 'गोत्वजाति' अनुस्यूत रहती है, वैसे ही जो शरीर, 'समस्त व्यष्टि स्थूल व्यक्तियों' में अनुस्यूत रहता है, तथा 'पञ्चीकृत पञ्चमहाभूतों' का कार्य होता है, और सम्पूर्ण ब्रह्माण्डरूप रहता है तथा व्यापक रहता है, उस शरीर को 'समष्टि स्थूल शरीर' कहाजाता है।

जैसे अनेक वृक्षों के समूह को 'वन' कहते हैं, वैसे ही समस्त 'व्यष्टि स्थूलशरीरों के समूह' को 'समष्टिस्थूलशरीर' कहते हैं। इस 'समष्टि स्थूलशरीर' से उपहित चैतन्य को 'विराट्' और 'वैश्वनर'—इन दो नातों से कहाजा है। समष्टि स्थूल शरीरोपहित चैतन्य में विराट्-वैश्वानर शब्दों की प्रवृत्ति में निमित्त (प्रवृत्तिनिमित्त) बतारहे हैं—**विविधेति। विविध प्रकार से प्रकाशमान् होने के कारण उस चैतन्य को 'विराट्' कहागया है, और समस्त नरों का अभिमानी होने से उसी चैतन्य को 'वैश्वानर' भी कहागया है।** 'व्यष्टि' के स्वरूप को बताते हैं—**प्रत्येकमिति। जैसे एक गोव्यक्ति से दूसरी गोव्यक्ति व्यावृत्त (पृथक्) रहती है, वैसे ही परस्पर व्यावृत्त रहनेवाले जो प्रत्येक स्थूलशरीर** हैं, **उन्हें व्यष्टि स्थूलशरीर कहाजाता है।** व्यष्टि-स्थूशरीरोपहित चैतन्य की संज्ञा बतारहे हैं—**एतदिति। व्यष्टिस्थूलशरीरोपहित चैतन्य को 'विश्व' नाम से कहाजाता है।** उस चैतन्य को 'विश्व' के नाम से कहने में युक्ति बतारहे हैं—**सूक्ष्मेति। क्योंकि यह चैतन्य, सक्ष्मशरीर का परित्याग बिना किये ही स्थूल शरीर में प्रवेश करता है, इसलिये इस चैतन्य को 'विश्व' नाम दिया गया है ॥३२॥**

शंका—समष्टिस्लथूशरोपाधिक चैतन्य को 'वैश्वनर' समझना और व्यष्टिस्थूलशरीरोपाधिक चैतन्य को 'विश्व' समझना निष्प्रयोजन है, क्योंकि सुख-दुःख की प्राप्ति या परिहार का कोई संभव नहीं है

समा०—विश्व और वैश्वानर की अभेदोपासना करने से 'वैश्वानर' संज्ञक चैतन्य की प्राप्ति (साक्षात्कार) होती है, और उससे आनन्दावाप्ति का अनुभव होना ही प्रयोजन है,—इनी अभिप्राय से उसकी उपासना में उनके तादात्म्य का उपयोग रहने से समष्टि-व्यष्टि स्थूलशरीरों का तादात्म्य बताकर उनसे उपहित चैतन्यों का भी तादात्म्य बताया जारहा है—**अनयोरिति। जैसे 'घट' आदि व्यक्ति का और 'घटत्व' आदि जाति का परस्पर तादात्म्य रहता है, वैसे ही इस समष्टि-स्थूलशरीर का औ व्यष्टिस्थूलशरीर का भी परस्पर तादात्म्य समझना चाहिये। इन दोनों उपाधियों का तादात्म्य होनेपर 'वैश्वानर' और 'विश्व'—इन दोनों उपहित चैतन्यों का भी तादात्म्य होजाता है।** जैसे सत्तासामान्य और द्रव्यादिविशेष का तादात्म्य सर्वानुभव सिद्ध है, 'समवाय' का निरसन तो पहले ही कर दिया गया है। अतः 'समवाय' का तो प्रश्न ही नहीं उठता। एवं च जाति-व्यक्ति का तादात्म्य ही रहता है। उसी तरह यह व्यष्टिस्थूलशरीर भी समष्टिस्थूलशरीरान्तर्गत पञ्चीकृत भूतों का कार्यरूप है' अतः दोनों में 'उपादानोपेयभाव' है, उसकारण दोनों शरीरों का तादात्म्य ही समझना चाहिये। अर्थात् 'उपादानकारण' और 'उपादेय कार्य' का परस्पर तादात्म्य लोकप्रसिद्ध है। अतः दोनों स्थूलशरीरों का तादात्म्य रहता है।

१. क, पुस्तके अभ्युपगमादिति न दृश्यते।

सामान्यद्रव्यादिविशेषयोस्तादात्म्यं, समवायस्य पूर्वमेव निराकृतत्वात्, तथा व्यष्टिस्थूलशरीरस्य समष्टिस्थूलशरीरान्तर्गतपञ्चीकृतभूतकार्य्यत्वेनोपादानोपादेयभावसम्भवात्तयोस्तादात्म्यात्तदुपहितयोरपि विश्ववैश्वानरयोस्तादात्म्यम्, एवमनयोर्भेदाभेदासम्भवादभेदांशमादाय अहमेव वैश्वानरोऽस्मीति अभेदोपासनया तत्साक्षात्कारेण तदानन्दावाप्तेः सम्भवात् । तज्ज्ञानं सप्रयोजनमिति भावः ।

अथवा श्रुत्युक्तप्रकारेण विश्ववैश्वानरतैजससूत्रात्मप्राज्ञेश्वराद् ज्ञात्वा प्रथमं विश्वं वैश्वानरात्मत्वेनाहमेव वैश्वानरोऽस्मीति विभाव्य, ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मास्मीति विभाव्य, अनन्तरं प्राज्ञमीश्वरात्मत्वेनाहमेवेश्वरोऽस्मीति विभाव्य, अनन्तरं समष्टि व्यष्टिथूलसूक्ष्मकारणोपाधिकमोंकारवाच्यं परम्ब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य, पश्चान्मनसैकाग्रतामापन्ने सति सर्वं जगत्स्थूलसूक्ष्मादिक्रमेण निर्विशेषचिन्मात्रेणऽखण्डैकरसानन्दे परब्रह्मणि विलाप्य, तदनन्तरमेकाग्रेण मनसा स्वस्याखण्डैकरसब्रह्मानन्दात्मतां साक्षात्कुर्य्यादित्यभिप्रायेण समष्टिव्यष्ट्योस्तादात्म्यनिरूपणेन तदुपहितयोस्तादात्म्यनिरूपणं कृतम् । तदुक्तम्—

"समाधिकालात्प्रागेवं विचिन्त्यातिप्रयत्नतः । स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेदिति ॥"

कल्पतर्वाचार्य्यैरप्युक्तम्,

"निर्विशेषं परम्ब्रह्म साक्षात्कर्त्तुमनीश्वराः । ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात् । तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्" ॥इति ।

●

इस प्रकार उपाधियों का तादात्म्य रहने से उन उपाधियों से उपहित 'विश्व-वैश्वानर' संज्ञक चैतन्यों का भी तादात्म्य मानने में कोई आपत्ति नहीं है। अर्थात् दोनों (विश्व-वैश्वानर) चैतन्यों का भी तादात्म्य ही है। इसरीति से इन दोनों चैतन्यों की भिन्नता न रहने से (अभेद रहने से) उनके अभेदांश की दृष्टि से 'अहमेव वैश्वानरोऽस्मि'—इत्याकारक अभेदोपासना से उसका साक्षात्कार होता है और उससे आनन्द का अनुभव होता है। अभिप्राय यह है कि यह 'विश्व' नाम का 'जीव' जब 'मैं वैश्वानर हूँ'—इस प्रकार की अभेदोपासन करता है, तब उसे 'वैश्वानर' का साक्षात्कार होता है, उस कारण इस विश्वनामक-जीव को वैश्वानर के आनन्द की प्राप्ति होती है। अतः विश्व-बैश्वानर के तादात्म्य का निरूपण निष्प्रयोजन नहीं है। किन्तु फलप्राप्ति का हेतु होने से सप्रयोजन ही है। एवंच विश्व-वैश्वानर का ज्ञान प्राप्त करना सप्रयोजन ही है।

अथवा—श्रुति में प्रतिपादित पद्धति के अनुसार अधिकारी पुरुष, प्रथमतः 'विश्व,-वैश्वानर-तैजस-सूत्रात्मा-प्राज्ञ और ईश्वर-इन सबका स्वरूप ज्ञान प्राप्त करे। तदनन्तर प्रथमतः वह अपने को (विश्व को) वैश्वानर के रूप में अर्थात् 'अहमेव वैश्वानरोऽस्मि'—'मै ही वैश्वानर हूँ'—इस प्रकार समझकर चिन्तन करे। तदनन्तर अपने को (तैजस को) सूत्रात्मा के रूप में अर्थात् 'अह मेव सूत्रात्माऽस्मि'—मैं ही सूत्रात्मा हूँ—इस प्रकार से 'तैजस' का 'सूत्रात्मा' के रूप में चिन्तन करे। तदनन्तर अपने को (प्राज्ञ को) 'ईश्वर' के रूप में अर्थात् 'अहमेव ईश्वरोऽस्मि'—मैं ही ईश्वर हूँ—इस प्रकार 'प्राज्ञ' का 'ईश्वर' के रूप में चिन्तन करे। तदनन्तर समष्टि—व्यष्टिरूप स्थूल—सूक्ष्मकारणोपाधिक (उपाधिवाला) ॐकार (प्रणव) का वाच्यरूप जो 'परब्रह्म' है, वह मैं ही हूँ अर्थात् 'परम्ब्रह्माऽहमस्मि' ऐसा समझकर 'आत्मा' का 'सर्वात्म' के रूप में चिन्तन करे। तब मन की एकाग्रता सम्पन्न होने पर वह अधिकारी पुरुष, 'समस्त जगत्' का स्थूल-सूक्ष्म के क्रम से अखण्ड,-एकरस, आनन्दस्वरूप निर्विशेष चिन्मात्र (परब्रह्म) में जय कर दे। अर्थात् स्थूल का सूक्ष्म में लय करे, और सूक्ष्म का उसके कारण में लय करे, और उस कारण का परब्रह्म में लय करे। तदनन्तर एकाग्र मन से 'मैं अखण्ड एकरस ब्रह्मानन्दरूप' हूँ—इस प्रकार से अपने आत्मा का साक्षात्कार करे। इसी अभिप्राय से समष्टि-व्यष्टि-(उपाधियों) का तादात्म्य-वर्णन पहले किया गया है, तथा तदुपहित चैतन्यों का भी तादात्म्य बताया गया है। अतः तादात्म्यवर्णन को निष्फल नहीं समझना चाहिये। किन्तु पूर्वोक्त पद्धति से वह, 'आत्मसाक्षात्कार' (फल) का हेतु रहने से सफल है। कहा भी है कि यह अधिकारी पुरुष, समाधि से पूर्व, शास्त्रोक्तरीति से 'विश्व-वैश्वानर आदिकों का अभेद चिन्तन करके प्रयत्न पूर्वक जगत् का स्थूल-सूक्ष्मादि कम से चेतन-आत्मा में लय करे। कल्पतरुकार आचार्य ने भी कहा है कि जो मन्द धी पुरुष, निर्विशेष ब्रह्म को साक्षात्कार कर पाने में असमर्थ हैं, उन मन्दधी पुरुषों को,—सद्गुरु, सविशेष ब्रह्म का निरूपण करके ही अनुग्रहीत करते हैं। उस सगुणब्रह्म की उपासना से ही एकाग्र मन हुए उन पुरुषों के मन में, समस्त उपाधियों से रहित (निरुपाधिक) निर्विशेष ब्रह्म, स्वयं ही आविर्भूत (प्रकट) हो जाता है। अर्थात् सगुण ब्रह्म के उपासकों को निर्गुण ब्रण का साक्षात्कार अपने आप हो जाता है। इसी अभिप्राय का निरूपण श्रुति ने भी किया है कहकर कि यह आत्मा, प्राणिमात्र में स्थित है, तथापि अज्ञान से आवृत होने के

एक एव जीवो जाग्रदवस्थायां स्थूलसूक्ष्मकारणाविद्याभिमानी सन् विश्व इत्युच्यते। स एव स्वप्नावस्थायां सूक्ष्मशरीरकारणाविद्याभिमानी सन् तैजस इत्युच्यते। स एव सुषुप्तौ कारणाविद्याभिमानी सन् प्राज्ञ इत्युच्यते। स एव शरीरत्रयाभिमानरहितः सन् शुद्धपरमात्मा भवति ॥

●

एतदभिप्रायाश्रुतिरपि,

"एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्रया बुद्धा सूक्ष्मया सूक्ष्मदर्शिभिरि"ति ॥
तस्माद्वैश्वानरादिज्ञानमर्थवदित्यर्थः ॥३३॥

ननु व्यष्टिस्थूलसूक्ष्मकारणाभिमानिनो विश्वतैजसप्राज्ञाः संसारिणः प्राङ्निरूपितास्ते किं स्वतन्त्रा जीवाः आहो स्विदेकस्यैवावस्थाविशेषाः। नाद्यः, सर्वेषां स्वतन्त्रतया परस्परभेदाभ्युपगमे सुषुप्तिस्वप्नयोरनुभूतस्य पदार्थस्य जाग्रदवस्थायां विश्वस्य स्मरणाभावप्रसङ्गाद् अन्यानुभूतपदार्थस्मरणायोगादन्यस्, अन्यथातिप्रसङ्गात्। तस्माद्द्वितीयः परिशिष्यत इत्याह—**एक एवेति**। अयम्भावः—असङ्गोदासीनः प्रत्यगात्माऽविद्यामात्मत्वेनोपगतः प्राज्ञ इति उच्यते। स एव सूक्ष्मशरीरमात्मत्वेनोपगत-

●

कारण (गूढ होने क कारण) किसी को भी वह प्रकट नहीं होता है अर्थात् किसी को उसका ज्ञान नहीं होता। किन्तु विवेक से अत्यन्त सूक्ष्म हुई बुद्धि के द्वारा हो सूक्ष्मदर्शी मनुष्य उसका साक्षात्कार कर पाता है। अतः वैश्वानरादियों का ज्ञान प्राप्त करना सार्थक ही है, निरर्थक नहीं है ॥३३॥

शंका—पहिले 'स्थूल-सूक्ष्म और कारण'—इन तीन व्यष्टि शरीरों के यथाक्रम से अभिमानी तोन जीव **'वैश्व**, तैजस, प्राज्ञ'—आपने बताये थे। अतः जिज्ञासा होती है कि वे तोनों जीव, क्या स्वतंत्र हैं? या वे तोनों, एकही चैतन्य की विशेष-विशेष अवस्थाएँ हैं?

उक्त दो विकल्पों में से प्रथम विकल्प का स्वीकार करना संभव नहीं है, क्योंकि यदि ये तीनों जीव स्वतन्त्र होंगे, ती तीनों का परस्पर भेद भी अवश्य रहेगा, उस कारण सुषुप्ति अवस्था में स्थित 'प्राण' संज्ञक जीव के द्वारा अनुभूत सुखादि पदार्थ, तथा स्वप्नावस्था में स्थित 'तैजस' संज्ञक-जीव के द्वारा अनुभूत गज-रथादि पदार्थ है, उनका जाग्रत् अवस्था में स्थित 'विश्व' संज्ञक जीव को स्मरण नहीं होना चाहिये, क्योंकि अन्य पुरुष के द्वारा अनुभूत पदार्थों का स्मरण, किसी अन्य-पुरुण (व्यक्ति) को नहीं हुआ करता। यदि यह कहें कि अन्यानुभूत पदार्थ का स्मरण, किसी अन्य व्यक्ति को भी हो सकता है, तो चैत्रव्यक्ति के द्वारा अनुभूत किये गये पदार्थ का स्मरण, उससे भिन्न 'मैल' संज्ञक व्यक्ति को भी होना चाहिये। किन्तु वैसा होता नहीं है। अतः प्रथम विकल्प का स्वीकार करना असंभव है।

समा०—अतएव द्वितीय विकल्प ही स्वीकार के योग्य है—एक एवेति

एक ही जीव जागने की स्थिति में स्थूल-सूक्ष्म-कारण-शरीरों में अभिमान वाला हुआ विश्व कहा जाता है। वही सपने की स्थिति में सूक्ष्म-कारण-शरीरों में अभिमान वाला हुआ तैजस कहा जाता है। वही गहरी नींद की स्थिति में कारणीभूत अविद्या में अभिमान वाला हुआ प्राज्ञ कहा जाता है। तीनों शरीरों में अभिमान न करता हुआ वही शुद्ध परमात्मा है।

विश्व, तैजस, 'प्राज्ञ'—ये तीनों जीव स्वतंत्र नहीं है। किन्तु एक ही 'प्रत्यक् जोवात्मा' की जाग्रदादि तीनों, विशेष अवस्थाएँ हैं। अभिप्राय यह है कि यह 'प्रत्यगात्माजीव' तो असंग तथा उदासीन है, किन्तु वह जब अविद्या को ही 'आत्मा' के रूप में (अपने रूप में) यानी 'आत्मा' समझने लगता है, तब उसे 'प्राज्ञ' कहा जाता है। वही जब सूक्ष्मशरीर को आत्मा के रूप में (आत्मा) समझने लगता है, तब उसे तैजस कहा जाता है, और वही जब स्थूलशरीर को आत्मा के रूप में (आत्मा) समझने लगता है, तब उसे विश्व कहाजाता है। अभिप्राय यह है—विश्वादिक तीनों, एक ही जीवात्मा के अवस्थाविशेष हैं। तथाही एक ही जीवात्मा, 'जाग्रत' आवस्था में व्यष्टिस्थूलशरीर, व्यष्टिसूक्ष्मशरीर, और व्यष्टि कारण अविद्या—इन तीनों का अभिमानी होकर 'विश्व' के नाम से कहा जाता है। और वही जीवात्मा, स्वप्नावस्थ में सूक्ष्मशरीर कारण अविद्या इन तोनों का अभिमानि बनकर तैजस के नाम से कहा जाता है। और वही जीवात्मा, सुषुप्ति अवस्था में एक कारणभूत

स्तैजसः। स एव स्थूलशरीरमात्मत्वेनोपगतो विश्वः। एवं विश्वतैजसप्राज्ञाः प्रत्यगात्मन एकस्यैवावस्थाविशेषा इतीममेवार्थं स्पष्टयति—**जाग्रदवस्थायामिति।**

अर्थादनेन त्वं पदार्थशोधनोपायावन्वयव्यतिरेकौ दर्शितौ। तथाहि—जाग्रदवस्थायां शरीरत्रयसाक्षित्वेन, स्वप्ने शरीरद्वयसाक्षित्वेन, सुषुप्तौ कारणशरीरसाक्षित्वेन, समाधौ शुद्धस्वप्रकाशचिद्रूपेण भानमन्वयः। स्वप्ने स्थूलशरीराभानं सुषुप्तौ सूक्ष्मशरीराभानं समाधौ कारणशरीराभानञ्च शरीरत्रयव्यतिरेकः। चित्तस्य वृत्तिशून्यतयात्मैकाकारावस्था समाधिस्तदानीं देहादिषु सर्वत्राभिमानस्य निवृत्तत्वात् समाध्यवस्थायां शरीराणां व्यतिरेको भवत्येव। तस्यामवस्थायामात्मा वस्तुतः शुद्धः परमात्मा भवति सर्वाभिमानशून्यत्वाद्। इदमेवान्वयव्यतिरेकाभ्यां त्वं पदार्थशोधनं यद्व्यावृत्तं तत्सर्वमनात्मेति निश्चित्य यदन्वितं स आत्मेति निश्चयः। तदुपायावन्वयव्यतिरेकाविति। **शुद्धेति**। समाध्यवस्थायामिति शेषः॥

जाग्रदाद्यवस्था निरूपयितुमाह—**तस्येति**। ता एवोद्दिशति—**जाग्रदिति**। जाग्रदवस्थां लक्षयति—**दिगिति आदिशब्देन—**

•

अविद्या का अभिमानी होता हुआ 'प्राज्ञ' के नाम से कहा जाता है। और वही जीवात्मा समाधि अवस्था में स्थूल-सूक्ष्म-कारण, तीनों शरीरों के अभिमान से रहित होकर शुद्ध परमात्मा के नाम से कहा जाता है।

इस प्रकार से एक ही प्रत्यगात्मा की 'विश्व, तैसज, प्राज्ञ'—ये तीन अवस्था विशेष हैं, इसी तथ्य को स्पष्ट किया गया है—**जाग्रदवस्थायामिति।** उक्त कथन से 'त्वम्' पदार्थ का जो शोधनोपाय है, उसके अन्वय और व्यतिरेक अर्थात् ही निर्दिष्ट हो जाते हैं। तथाहि—यद्यपि यह जीवात्मा, एक स्थूल शरीरमात्र के अभिमान से ही 'विश्व' संज्ञा को प्राप्त हो जाता है। उसी तरह एक सूक्ष्म शरीरमात्र के अभिमान से ही उसे 'तैजस' संज्ञा प्राप्त हो जाती है। तथापि 'स्थूल, सूक्ष्म और कारण'—इन तीन शरीरों के अभिमान से जीवात्मा को जो 'विश्व' की संज्ञा दी गयी है, तथा 'सूक्ष्म' और 'कारण'—इन दो शरीरों के अभिमान से जो उसे 'तैजस' संज्ञा दी गयी है वह 'त्वम्' पदार्थ के शोधन में उपयोगी जो अन्वय और व्यतिरेक हैं, उनकी सूचना के लिए ही दी गयी है।

वे अन्वय-व्यतिरेक इस प्रकार बताये जाते हैं—जाग्रत् अवस्था में स्थूल-सूक्ष्म-कारण—इन तीनों शरीरों के साक्षी के रूप में आत्मा की प्रतीति होती है। तथा स्वप्नावस्था में सूक्ष्म-कारण—इन दोनों शरीरों के साक्षी के रूप में आत्मा का भान होता है। तथा सुषुप्ति अवस्था में एक अविद्यारूप कारण शरीर के साक्षी के रूप में आत्मा का भान होता है। तथा समाधि अवस्था में शुद्ध स्वप्रकाश चैतन्य के रूप में आत्मा का भान होता है—चारों अवस्थाओं (जाग्रत्, स्वप्न, सुषुप्ति और समाधि) में 'आत्मा' का यही अन्वय है। और स्वप्नावस्था में जाग्रत् के स्थूल शरीर का भान नहीं होता, तथा सुषुप्ति अवस्था में स्वप्न के सूक्ष्मशरीर का भी भान नहीं होता। तथा समाधि अवस्था में सुषुप्ति के 'कारणशरीर' का भी भान नहीं होता। 'स्थूल, सूक्ष्म और कारण'—इन तीन शरीरों का यही 'व्यतिरेक' है। समस्त अनात्माकार (जड़) वृत्तियों से रहित होकर चित्त की जो केवल आत्मैकाकार अवस्था है, उसी को 'समाधि' कहते हैं। उस समाधि अवस्था में देहादि समस्त पदार्थों से मनुष्य का अभिमान निवृत्त हो जाता है। उस कारण उस समाधि अवस्था में उन स्थूलादि तीनों शरीरों का व्यतिरेक (अभाव) ही रहता है। तब समाधि अवस्था में यह जीव समस्त अभिमान से रहित हो जाता है, उस कारण वह जीव, शुद्ध परमात्मारूप ही हो जाता है। अन्वय-व्यतिरेक के द्वारा किया जानेवाला यही 'त्वम्' से व्यावृत्त होता है, वह सब 'आनात्मा' ही है, और जो सर्वत्र अन्वित होता है, वही 'आत्मा' है। इसी निश्चय को 'त्वम्' पदार्थ का शोधन कहते हैं। यह 'त्वम्' पदार्थ का शोधन उक्त अन्वय-व्यतिरेक से ही सिद्ध होता है।

अब जीव की जाग्रद् आदि अवस्थाओं का निरूपण करते हैं—

उसी देशभिमानी जीव की पँच अवस्थाये होती हैं—(१) जाग्रत्, (२) स्वप्न, (३) सुषुप्ति, (४) मूर्च्छा और (५) मरण। इन्द्रियों पर शासन करने वाले दिग् आदि देवताओं की कृपा प्राप्त करने वाली इन्द्रियों से शब्द आदि विजयों का अनुभव जिस स्थिति में होता है वह जाग्रद् अवस्था है। जाग्रद् में सुखःदुःख-रूप भोग देने वाले पुण्य-पाप कर्म एवं श्रोत्रादि इन्द्रियों के उपरत होने पर जाग्रत् के अनुभव से जन्य संस्कारों से शब्द आदि विषय और उनका ज्ञान जिस अवस्था में होता है वह स्वप्न अवस्था है। जाग्रत् व स्वप्न दोनों अवस्थाओं में भोग देने वाले कर्म उपरत होने से स्थूल व सूक्ष्म शरीरों में अभिमान हटने के द्वारा समस्त विशेष अनुभवों की अपरम रूप जो स्थिति है, जिसमें बुद्धि अपने कारणीभूत अज्ञान रूप से

तस्यैवाभिमानिनो जीवस्यावस्थाः पञ्च जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणभेदात्। दिगाद्यधिष्ठातृदेवतानुगृही-तैरिन्द्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था। जाग्रद्भोगप्रदकर्म्मोपरमे सति इन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूत-विषयतज्ज्ञानावस्था स्वप्नावस्था। जाग्रत्स्वप्नोभयभोगप्रदकर्म्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानो-परमात्मिका, बुद्धेः कारणात्मनावस्थितिः सुषुप्तिः॥३४॥

●

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः।
तथा—चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वर'' ॥

इति श्लोकोक्तदेवता वातादिदेवता गृह्यन्ते। ताभिर्देवताभिरनुगृहीतानि अधिष्ठितानीन्द्रियाणि यानि श्रोत्रादीनि तैरिति यावत्। शब्दादिविषयानुभवावस्था जाग्रदवस्थेत्युक्ते स्वप्नेऽतिव्याप्तिस्तत्रापि वासनामयविषयानुभवस्य सत्त्वात्तद्व्यावृत्त्यर्थं **दिगादीत्युक्तम्**; स्वप्नावस्थायामिन्द्रियाणामुपरतत्वात्तज्जन्यविषयाननुभवान्नातिव्याप्तिः। विषयानुभवावस्था जाग्रदवस्थेत्युक्ते सुषुप्तावतिव्याप्ति-स्तत्राप्यज्ञानविषयकसाक्ष्यनुभवस्य सत्त्वात्। अत उक्तं—**शब्दादीति**। सुषुप्तौ शब्दादीविषयाणामन्तःकरणवृत्तेस्तदाश्रयप्रमातृत्वो-पाध्यन्तःकरणादीनाञ्च लीनत्वान्नातिव्याप्तिः। शब्दादिविषयाकारान्तःकरणवृत्तिप्रतिबिम्बितं चेतन्यं शदादिविषयानुभवः। अन्तःकरणवृत्तिरग्रे निरूपयिष्यते।

स्वप्नावस्थां लक्षयति—**जाग्रदिति**। विषयतज्ज्ञानावस्था स्वप्नावस्थेत्युक्ते सुषुप्तावतिव्याप्तिस्तद्वारणाय **जाग्रदि-त्यादिविशेषणम्**। सुषुप्तावज्ञानतत्साक्षिणोरनादिसिद्धत्वेन संस्कारोद्भूतत्वाभावान्नातिव्याप्तिः। तावत्युक्ते जाग्रदवस्थायामति-व्याप्तिः, रजतानुभवजन्यसंस्कारोद्भूतानिर्वचनीयविषयतज्ज्ञानस्य तादृशस्मृतेर्वा सत्त्वात्तद्वारणा**येन्द्रियोपरम** इति। उपरमे निमित्तमाह—**जाग्रदिति**।

सुषुप्तिलक्षणमाह—**जाग्रदिति**। विशेषविज्ञानोपरमात्मिका सुषुप्तिरित्युक्ते जाग्रदवस्थायामतिव्याप्तिः; समाधौस्तदा विशेषविज्ञनोपरमसत्त्वात्। अत उक्तं—**बुद्धेः कारणात्मनावस्थानमिति**। समाधावन्तःकरणस्य स्वरूपेण सत्त्वान्नातिव्याप्ति-रित्यर्थः। विशेषविज्ञानोपरमे निमित्तमाह—**स्थूलेति**। तत्रापि निमित्तमाह—**जाग्रादिति** ॥ ३४ ॥

●

ही स्थित रहती है, वह सुषुप्ति अवस्था है। मुद्गरप्रहार आदि निमित्त से जन्य दुःख से जिस स्थिति में विशेष अनुभव नहीं रह जाते उसे मूर्छा अवस्था कहते हैं। बादरायण महर्षि द्वारा यों बतायी गयी है। मूर्छा में कुछ सुषुप्ति के व कुछ अवस्थान्तर के लक्षण हैं अतः वह तीन से अतिरिक्त से अवस्था है। वर्तमान स्थूल देह में भोगार्थ सामग्री प्राप्त कराने वाले कर्म समाप्त होने के कारण शरीर में दोनों प्रकार के अभिमानों की निवृत्ति से करण-समूह जब इस शरीर को छोड़कर भावि शरीर की प्राप्ति तक इकट्ठा हुआ रहता है तब जीव की महावस्था कही जाती है। कुछ विचारक मरण का मूर्छा में अन्तर्भाव बताते हैं। इन अवस्थाओं के विषय में वेद, स्मृति, पुराण तथा प्रत्यक्षादि प्रमाण प्रसिद्ध ही है।

यहाँ यदि जाग्रत् का इतना ही लक्षण करें—शब्द आदि विषयों के अनुभव की अवस्था; तो स्वप्न में अति व्याप्ति होगी क्योंकि वहाँ भी वासनामय विषयों का अनुभव होता ही है। अतः इन्द्रियों से यह कहा। स्वप्न में इन्द्रियाँ उपरत होने से उनसे अनुभव नहीं होता। यदि विषयानुभव की अवस्था—इतना ही लक्षण कहें तो सुषुप्ति में भी साक्षी को अज्ञान विषयक अनुभव होने से अतिव्याप्ति होगी। अतः शब्दादि कहा। शब्दादि विषयों के आकार वाले अन्तःकरणवृत्ति में चैतन्य का प्रतिबिम्बित होना शब्दादि विषयानुभव है व सुषुप्ति में ऐसा हो नहीं सकता कारण कि अन्तःकरण लीन रहता है। वस्तु-तस्तु इन्द्रियों से—यह कह देने पर यह मूर्छा अवस्था, जाग्रदादि अवस्थाओं में भिन्न ही अवस्था है। इसे महर्षि व्यास ने 'मुग्धेऽर्द्ध-सम्पत्तिः परिशेषात्' सूत्र में कहा है। सूत्र का अर्थ यह है—मुद्गर प्रहार आदि निमित्त से इस जीव (पुरुष) को जो मूर्छा आती है, वह (मूर्छा), जाग्रदादि चार अवस्थाओं में से ही किसी अवस्था के अन्तर्गत है, या उन चार अवस्थाओं से भिन्न कोई अवस्था है? यह सन्देह होनेपर, पूर्वपक्षी ने पूर्वपक्ष उपस्थित किया है कि श्रुति-स्मृति के वचनों ने तो इस जीवात्मा की जाग्रत् आदि अवस्थाओं का ही निरूपण किया है; उनसे भिन्न मूर्छा अवस्था को तो बताया नहीं है। अतः इस मूर्छा अवस्था को जाग्रत् आदि अवस्थाओं में से ही किसी के अन्तर्गत समझना ही उचित होगा। एवं च विशेषज्ञानों की उपरान्तता रूप सुषुप्ति में और मूर्छा में समानता प्रतीत होती है। उस कारण मूर्छा का सुषुप्ति में ही अन्तर्भाव करना उचित प्रतीत होता है। अतः यह मूर्छावस्था, 'सुषुप्ति' से भिन्न नहीं है।

मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमावस्था मूर्च्छावस्था। तदुक्तम्, "मुग्धेऽर्द्धसम्पत्तिः परिशेषादि"ति। एतच्छरीरभोगप्रापककर्म्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या संपिण्डितकरणग्रामावस्था भाविशरीरप्राप्तिपर्य्यन्तं मरणावस्था।

केचित्त्वस्या उक्तावस्थास्वन्तर्भावं वदन्ति। अत्र श्रुतिस्मृतिपुराणप्रमाणानि प्रसिद्धानि ॥३५॥

●

मूर्च्छावस्थां लक्षयति—मुद्गरेति। विशेषविज्ञानोपरमावस्था मूर्च्छेत्युक्ते सुषुप्तावतिव्याप्तिरतउक्तं-मुद्गरेति। मुद्गरप्रहारजनितविषादावस्था मूर्च्छा इत्युक्ते जाग्रदवस्थायामतिव्याप्तिरत उक्तं—विशेषेति। मूर्च्छाया अवस्थान्तरत्वे व्याससूत्रं संवादयति—तदुक्तमिति। तृतीये स्थितं, मुद्गरादिप्रहारादिनिमित्ते सति पुंसां यां मूर्च्छामाचक्षते लोकाः सा मूर्च्छा जाग्रदन्तर्भूता आहोस्विदवस्थान्तरमिति संशयः। तत्र श्रुत्यादिष्ववस्थान्तरत्वेनाप्रसिद्धत्वाज्जाग्रदादिष्वन्तर्भूता तत्रापि विशेषविज्ञानोपरमसाम्यात् मूर्च्छा सुषुप्तावेवान्तर्भूता नावस्थान्तरमिति प्राप्ते, अभिधीयते-मूर्च्छाजाग्रदादिभ्योऽवस्थान्तरं, परिशेषात्। सा तावन्न जाग्रत्स्वप्नयोरन्तर्भवति, विज्ञानाभावात्। नापि मरणे, पुनरुत्थानदर्शनात्। नापि सुषुप्तौ, लक्षणवैलक्षण्यात्। तथाहि—सुषुप्तस्य प्रसन्नवदनत्वनिष्कम्पत्वादिकं लक्षणं, मुग्धस्य तु विकरालवदनत्वसकम्पत्वादिकमतो लक्षणवैलक्षण्यान्न सुषुप्तावन्तर्भवति मूर्च्छा, किन्तु परिशेषादवस्थान्तरमेवेति। सकम्पत्वादीनां सुषुप्तिवैलक्षण्येऽपि विशेषविज्ञानोपरमेण सुषुप्तिसाम्यादर्द्धसम्पत्तिमूर्च्छेति निर्णयः।

मरणावस्थां लक्षयति—एतदिति। देहाभिमानो द्विविधः—सामान्याभिमानो विशेषाभिमानश्चेति। सुषुप्तौ सामान्याभिमानः पुनरुत्थानदर्शनात्। जीवस्य निरभिमानस्योत्थानायोगात्। सुषुप्तौ जीवस्य देहे सामान्याभिमानस्तिष्ठत्येव, जाग्रत्स्वप्नयोर्विशेषाभिमानः—मनुष्योऽहम्ब्राह्मणोऽहमिति। मरणे भोगेन प्रारब्धक्षये द्विविधस्य सामान्यविशेषरूपस्याभिमानस्य निवृत्त्या भाविदेवादिशरीरप्राप्तिपर्य्यन्तं संपिण्डितकरणग्रामावस्था एकीकृतचतुर्दशकरणग्रामावस्था मरणावस्थेत्यर्थः।

●

यह पूर्वपक्ष प्राप्त होने पर महर्षिव्यास ने सूत्र के द्वारा यह सिद्धान्त किया कि यह मूर्छा अवस्था पूर्वोक्त जाग्रदादि अवस्थाओं से भिन्न अवस्था है। तथाहि—जाग्रत, स्वप्न अवस्था में 'विशेषज्ञानों का अभाव नहीं हुआ करता। किन्तु मूर्छावस्था में तो समस्त विशेषज्ञानों का अभाव रहता है उसकारण जाग्रत् और स्वप्न अवस्था में 'मूर्छावस्था' का अन्तर्भाव नहीं हो सकता।

मरणावस्था के अनन्तर मनुष्य का उत्थान (उठाना) संभव नहीं रहता, किन्तु मूर्छावस्था के अनन्तर तो मनुष्य का पुनः उत्थान होता है। उसकारण मरणावस्था में भो मूर्छावस्था का अन्तर्भाव नहीं किया ज सकता सुषुप्ति अवस्था में मनुष्य का मुखमण्डल प्रसन्न रहता है, तथा शरीर, निष्कम्प रहता है, किन्पु मूर्छित मनुष्य का मख, विकराल रहता है, तथा शरीर भी कम्पित होता रहता है। उसकारण सुषुप्ति अवस्था में भी मूर्छावस्था का अन्तर्भाव नहीं किया जासकता। किन्तु परिशेषात् उक्तचारों अवस्थाओं से (जाग्रत्, स्वप्न, सुषुप्ति और मरण से) भिन्न ही यह मूर्छा अवस्था है, यह निश्चय किया गया है।

शंका—सुषुप्ति और मूर्छा की परस्पर विलक्षणता रहने पर भी दोनों अवस्थाओं में, 'विशेषज्ञानों का अभाव' तो समान (तुल्य) ही है। इसलिये 'मूर्छा' को अर्धसुषुप्ति' (अर्धसम्पत्ति) कहना ही ठीक है—यही निर्णय किया गया।

शरीर के भोगदायक कर्मों की निवृत्ति से सामान्य प्रकार का और विशेष प्रकार का देहाभिमान निवृत्त होता है। अर्थात् भोगप्राप्ति से प्रारब्धकर्म का क्षय होने पर सामान्य और विशेष उभयविध अभिमान की निवृत्ति हो जाती है तदनन्तर भावी देवादिक शरीर की प्राप्ति होने तक जो सप्तदश तत्त्वों की पिण्डीभाव अवस्था है, उसे 'मरणावस्था' कहते हैं। अर्थात् सपिण्डितकरणग्रामावस्था (एकीकृत चतुर्दशकरणग्रामावस्था) ही मरणावस्था है।

अभिप्राय यह है कि देहाभिमान, 'सामान्य' और 'विशेष' के भेद से दो प्रकार का होता है। सुषुप्तिअवस्था में 'विशेष-देहाभिमान' की निवृत्ति होने पर भी मनुष्य को 'सामान्य देहाभिमान' तो रहता ही है। उस सामान्य देहाभिमान के कारण ही वह, सुषुप्ति से उठ पाता है यदि कदाचित् मनुष्य को सुषुप्ति में 'सामान्य देहाभिमान' भी न होता तो वह सुषुप्ति से उठ ही नहीं पाता। जैसे, मरण अवस्थावाले मनुष्य का पुनः उत्थान नहीं होता। अतः 'उत्थान' रूप हेतु के बल पर सुषुप्ति में मनुष्य के 'सामान्य देहाभिमान' का अर्थात् 'सुषुप्तौ सामान्याभिमानः पुनरुत्थानदर्शनात्' इत्याकारक अनुमान किया जाता

एवमेक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन् वैश्वानर इत्युच्यते। "अहमेव वैश्वानरोऽस्मी"त्येतदुपासनया तत्प्राप्तिः फलम्भवति। वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां एवमेव श्रुत्यर्थस्य प्रतिपादनात्।

स एव परमात्मा समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन् हिरण्य गर्भइत्युच्यते। एतदुपासनया तत्प्राप्तिः फलम्भवति ॥३६॥

•

सूत्रकृता मरणावस्थाया जाग्रदादिबहिर्भावेनानुक्तत्वाद् यथोक्तजाग्रदादिष्वन्तर्भाव इति मतान्तरमाह—**केचित्त्विति**। तत्रापि मरणावस्थाया न जाग्रत्स्वप्नयोरन्तर्भावः देहाभिमानाभावान्नापि सुषुप्तौ पुनरुत्थानाभावात्। अतः परिशेषान्मूर्च्छायामन्तर्भावः। तत्र कर्म्मशेषे सति पुनरुत्थानं, भोगप्रदकर्म्मशेषाभावे मरणमिति भावः ॥३५॥

ननु सन्तु विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः, वैश्वानरसूत्रात्मेश्वरेषु को निर्णय इति? तत्राह—**एवमिति**। यथा विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः एवं वैश्वानरसूत्रेश्वरा इत्यर्थः।

ननु भयाऽरत्यादिश्रवणात् कथं वैश्वानरसूत्रात्मनोरीश्वरत्वं तस्य जीवलिङ्गत्वादीश्वरस्य तद्रहितत्वात्, तथाच श्रुतिः "योऽशनाया पिपासे शोकं मोहं जरां मृत्युमत्येती"त्याद्या अशनायाद्यतीतत्वमीश्वरस्य दर्शयति, तस्मादेकस्य परमेश्वरस्या-

•

है, और जाग्रत् अवस्था में तथा स्वप्न अवस्था में मनुष्य को 'मैं मनुष्य हूँ', 'मैं ब्राह्मण हूँ'—इत्याकारक विशेष अभिमान रहता है। और मरणावस्था में मनुष्य का उभयविध (दोनों प्रकार का) देहाभिमान निवृत्त हुआ रहता है।

कुछ लोग 'मरणावस्था' को 'मूर्छावस्था' से भिन्न नहीं मानते। उस 'मरणावस्था' का उस मूर्छावस्था में ही अन्तर्भाव मानते हैं। अर्थात् मरणावस्था का 'जाग्रत्' या 'स्वप्न' में अन्तर्भाव नहीं मानते, क्योंकि देहाभिमान का अभाव रहता है। 'सुषुप्ति' में भी उसका अन्तर्भाव नहीं मानते, क्योंकि पुनरुत्थान नहीं होता है। अतः परिशेषात् 'मूर्छा' में ही उसका (मरणावस्था का) अन्तर्भाव बताते हैं। मूर्छित मनुष्य के भोगप्रद कर्म यदि शेष हों तो मूर्छा से उसका पुनरुत्थान होता है, और यदि भोगप्रद कर्म, शेष न हों तो उसका मरण हो ही जाता है। अतः मरणावस्था को मूर्छावस्था के अन्तर्भूत (अन्तर्गत) मानना ही उचित है ॥३५॥

विश्व, तैजस, प्राज्ञ—ये तीनों अवस्थाएँ भले ही एक जीवात्मा को रहे, किन्तु वैश्वानर, सूत्रात्मा, ईश्वर के विषय में क्या निर्णय है? यह जिज्ञासा शान्त करने के लिये ग्रन्थकार '**एवमिति**' से बता रहे हैं। जैसे विश्व, तैजस, प्राज्ञ—ये तीनों एक ही जीवात्मा की अवस्था विशेष हैं, वैसे वैश्वानर, हिरण्य गर्भ, ईश्वर—ये तीनों भी एक ही परमात्मा की अवस्था विशेष हैं अर्थात् **एक ही परत्मा, जब 'समष्टि स्थूल शरीर तथा समष्टि सूक्ष्म शरीर' इन दोनों की कारण भूत 'माया' में उपहित रहता है, तब उसे 'वैश्वानर' कहते हैं। और वही परमात्मा, जब सूक्ष्म शरीर और उसकी कारण भूत 'माया' से अर्थात् दोनों से उपहित रहता है, तब उसे 'हिरण्यगर्भ' कहते हैं और वही परमात्मा, जब केवल एक माया से ही उपहित रहता है, तब उसे 'ईश्वर' कहते हैं।**

शंका—वैश्वानर, हिरण्यगर्भ, ईश्वर—इन तीनों की उपासना का फल क्या है?

समा०—जब 'जीवात्मा मैं ही वैश्वानर हूँ'—इस प्रकार से उस वैश्वानर की अभेदोपासना करता है, तभी इस जीव को वैश्वानर भाव की प्राप्ति हो जाती है—यही फल है। और यह जीव, जब मैं ही 'हिरण्यगर्भ हूँ—इस प्रकार से उस हिरण्यगर्भ की अभेदोपासना करता है, तभी इस जीव को 'हिरण्यगर्भ भाव' की प्राप्ति हो जाती है—यही फल है। और जब यह जीव, मैं ही ईश्वर हूँ—इस प्रकार से उस ईश्वर को अभेदोपासना करता है, तभी इस जीव को 'ईश्वरभाव' की प्राप्ति हो जाती है—यही फल है। इस अभेदोपासना को ही 'अहं ग्रहोपासना' कहते हैं।

शंका—वैश्वानर, हिरण्यगर्भ, ईश्वर—ये तीनों अवस्थाएँ एक ही परमात्मा की अवस्था विशेष हैं, इस कथन से तीनों में ईश्वरत्व ही सिद्ध होता है, परन्तु यह कैसे संभव हो सकता है? क्योंकि श्रुति ने अशना, पिपासा, शोक, मोह, जरा, मरण इत्यादि समस्त धर्मों से रहित जो होता है, उसे ईश्वर कहा है, किन्तु वैश्वानर हिरण्यगर्भ—दोनों में तो श्रुति ने क्षुधा, भय, जन्म, मरण, बन्ध, मोक्ष—इत्यादि धर्म बताये हैं, जो जीव के ही प्रसिद्ध हैं। हिरण्यगर्भ ने 'विराट् पुत्र को' उत्पन्न किया,

वस्थाविशेषा इत्यसङ्गतमिति चेन्मैवम्। सूत्रकृता बादरायणेन वैश्वानरसूत्रात्मनोः "सुखविशिष्टाभिधानादेव च" "वैश्वानरः साधारणशब्दविशेषादि"त्यत्रेश्वरस्योक्तत्वात्। कथं तर्हि "हिरण्यगर्भं जनयामास पूर्वम्" "तमेतावतः कालस्य पुरस्तादसृजत "तं जातमभिव्याददात् स भाणकरोत्" "सो बिभेत्" "स वै नैव रेमे" "कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात्"

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदम्" ॥

इत्यादिश्रुतिस्मृतिसूत्रैस्तयोर्जन्ममरणबन्धमोक्षभयाऽरत्यादिप्रतिपादनम्? शृणु। वैराग्यार्थं तत्प्रतिपादनम्। तथाहि—श्रुत्यादिभिस्तयोर्जन्मादिषु प्रतिपादितेषु तत्रापि दोषदर्शनेन वैराग्यमुत्पद्यत इति तत्प्रतिपादनम्।

न च तावता तयोर्जीवत्वम्, तथात्वे ईश्वरस्यापि तथात्वप्रसङ्गात्। तस्यापि कामनादिश्रवणात्। कामनादेर्जीवलिङ्गत्वात्। तस्माद्

"यः सर्वज्ञः स सर्वविद् यस्य ज्ञानमयं तपः" "तमीश्वराणां परमं महेश्वरम्" "आप्तकाममात्मकाम"मित्यादिश्रुत्या निरतिशयज्ञानैश्वर्य्यादिशक्तिमत्वावगमाद्यथाकामनादिश्रवणेऽपि न जीवत्वं तथा

"ज्ञानमप्रतिघं यस्य वैराग्यञ्च जगत्पते। ऐश्वर्यञ्चैव धर्म्मश्च सहसिद्धं चतुष्टयम्" ॥

इति स्मृत्या सूत्रात्मवैश्वानरयोरप्रतिहतस्वतःसिद्धनिरतिशयज्ञानैश्वर्य्यादिशक्त्यवगमाद्[1] जन्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च न जीवत्वमत ईश्वरत्वमेव। युक्तं चैतत्।

यथा जीवस्य "नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्य" इति न्यायेन जन्माद्यभावे निश्चितेऽपि "चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वादि"ति न्यायेनौपाधिकमुत्पत्तिविनाशवत्त्वं, तथा "असम्भवस्तु सतोऽनुपपत्ते"रिति न्यायेन

●

तब वह (हिरण्यगर्भ) बुभुक्षा से आतुर (पीड़ित) हुआ। सब वह (हिरण्यगर्भ), अपने विराट् पुत्र को ही खाने के लिये प्रवृत्त हुआ, उसे देखकर भयभीत हुए उस विराट् ने 'भाण' शब्द किया। ये क्षुधा, भय आदि धर्म तो 'जीव' के धर्म हैं। उस कारण 'वैश्वानर' और हिरण्यगर्भ में 'ईश्वरत्व' की सम्भावना नहीं की जा सकती, किन्तु 'जीवत्व' की ही सम्भावना की जा सकती है। अतः एक (अद्वितीय) परमेश्वर की ये अवस्था विशेष हैं—यह कहना असंगत है।

समा०—इसी प्रकार अनेक श्रुति, स्मृतियों ने ब्रह्मसूत्र ने (१-२-२४) वैश्वानर और हिरण्यगर्भ में ईश्वरत्व का प्रतिपादन किया है।

शंका—तब श्रुतियों व स्मृतियों ने वैश्वानर और हिरण्यगर्भ के जन्म, मरण, बन्ध, मोक्ष, क्षय, अरति आदि धर्मों का प्रतिपादन कैसे किया है?

समा०—जन्मादि धर्मों के प्रतिपादन का तात्पर्य, वैश्वानर और हिरण्यगर्भ का जीवत्व बताने में नहीं है। अपितु उनके भी जन्म आदि अनित्य दोषों को ध्यान में रखकर उस हिरण्यगर्भादि के स्थान (पद) से अधिकारी पुरुष को विरक्त कराने में उनका तात्पर्य है। अर्थात् हिरण्यगर्भादि पद के प्रति अधिकारी पुरुष के मन में वैराग्य प्राप्त कराने के लिए वे वाक्य हैं। एवंच वैश्वानर ओर हिरण्यगर्भ का जीवत्व बताने में उन वचनों का तात्पर्य नहीं है।

यदि श्रुति प्रतिपादित क्षुधा, भय आदि जीव धर्मों के सम्बन्ध से उन वैश्वानर, हिरण्यगर्भ को जीवरूप माना जाय तो जीव में प्रसिद्ध जो इच्छादिक धर्म हैं, उनका ईश्वर में प्रतिपादन करनेवाली 'सोऽकामयत तदैक्षत तन्मनोऽकुरुत' इत्यादि जो श्रुति दृष्टिगोचर होती है, उसके बलपर ईश्वर में भी जीवरूपता कहनी होगी, क्योंकि 'कामना' आदि तो 'जीव' के लिङ्ग (चिह्न) होते हैं। किन्तु ईश्वर को जीवरूप तो कोई नहीं कहता है।

श्रुतियां उसके निरतिशय ज्ञान, ऐश्वर्यादि शक्तिमत्व का बोधन कराती हैं।

जैसे कामना आदि का श्रवण रहने पर भी उसमें जीवत्व की संभावना नहीं की जाती, वैसे ही—स्मृति वचन से सूत्रात्मा और वैश्वानर की भी अप्रतिहत स्वतः सिद्ध निरतिशय ज्ञान ऐश्वर्यादि शक्ति का बोध हो रहा है, उस कारण यह स्पष्ट होता है कि उसके जन्म आनि का प्रतिपादन वैराग्योत्पत्ति के लिये ही है। अतः उस में जीवत्व की कल्पना न करके 'ईश्वरत्व' का निश्चय करना ही उचित है।

---

१. ख, ग, पुस्तके प्रतिहतस्वतः पाठः।

"न जायते म्रियते वा विपश्चिद्" "आकाशवत्सर्वगतश्च नित्य"इत्यादिश्रुत्या जन्माद्यभावे निश्चितेऽपि समष्टिस्थूलसूक्ष्मोपाधिप्रयुक्तमुत्पत्त्यादीश्वरस्याप्यस्तु हिरण्यगर्भादिरूपेण। नच तावता जीवत्वम् अनावृतस्वरूपत्वेन परिच्छेदाभिमानाभावात्। आवृतस्वरूपेण परिच्छेदाभिमानस्यैव जीवत्वप्रयोजकत्वादन्यथोपाधिसम्बन्धमात्रेण जीवत्वे निरुपाधिकस्य ब्रह्मणो जीवत्वेश्वरत्वयोरनभ्युपगमेन सोपाधिकस्य तदभ्युपगमेन तस्य जीवत्वं प्रसज्येत। तस्मात् सूत्रात्मवैश्वानरयोः सूत्रकारेण ईश्वरत्वप्रतिपादनात्तत्प्रतिपादकश्रुतिस्मृतिसम्भवाच्च औपाधिकजन्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च निरतिशयज्ञानैश्वर्य्यादियोगाच्चानावृतस्वरूपत्वेन परिच्छेदाभिमानाभावाच्च तयोरीश्वरत्वम्।

एवञ्च तदुपासकानां तत्प्रसादेन क्रममुक्तिरुत्पद्यते। तस्मादेकस्यैव परमात्मनो वैश्वानरसूत्रेश्वरा अवस्थाविशेषा इत्यभिप्रेत्येममर्थं स्पष्टयति—**एक एवेति**। "तस्य हवा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा" इत्यादिश्रुत्युक्तसकलगुणविशिष्टवैश्वानरोऽहमस्मीत्यर्थः। **एतदिति** वैश्वानरोपासनयेत्यर्थः। यथोक्तप्रकारेण वैश्वानरं परमात्मानं ज्ञात्वा तदुपासनेन साधकस्तद्भावं प्राप्नोतीत्यत्र सम्मतिमाह—**वैश्वानरेति**।

शारीरके समन्वयलक्षणे स्थितं "वैश्वानरः साधारणशब्दविशेषात्।" को न आत्मा किम्ब्रह्मेत्यात्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्य सुतेजस्त्वादिगुणयोगं द्युसूर्य्यप्रभृतीनामेकैकोपासननिन्दया मूर्धादिभावमुपदिश्याम्नायते "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्य्यपचन आस्यमाहवनीय" इत्यादि।

●

किञ्च—जैसे जीव की उत्पत्ति आदि औपाधिक ही निश्चित की गयी है वैसे श्रुति से यद्यपि जन्म आदि का न होना निश्चित है, तथापि समष्टि स्थूल और समष्टि सूक्ष्म रूप उपाधि से होने वाली (उपाधि प्रयुक्त) जो उत्पत्ति आदि धर्म, हिरण्यगर्भ आदि के रूप में ईश्वर के भी हो सकते हैं, किन्तु उतने मात्र से उसका (ईश्वर का) जीवत्व सिद्ध नहीं किया जा सकता, क्योंकि अनावृत स्वरूप रहने के कारण परिच्छेदाभिमान नहीं रहता। आवृतस्वरूप होने से ही परिच्छेदाभिमान रहता है, और वही 'जीवत्व' का प्रयोजक होता है। अन्यथा उपाधिके सम्बन्ध मात्र से ही यदि 'जीवत्व' का होना माना जाय तो, निरुपाधिक (उपाधिशून्य) 'ब्रह्म' में जीवत्व और ईश्वरत्व का स्वीकार किसी ने भी नहीं किया है, सोपाधिक में ही जीवत्व—ईश्वरत्व का स्वीकार सभी ने किया है, उस कारण उसमें भी 'जीवत्व' की प्रसक्ति होने लगेगी। अतएव सूत्रकार ने सूत्रात्मा और वैश्वानर में ईश्वरत्व का प्रतिपादन किया है, क्योंकि श्रुति-स्मृतियां उपलब्ध होती हैं। औपाधिक जन्मादि का प्रतिपादन तो वैराग्य के लिये किया गया है। निरतिशयज्ञान-ऐश्वर्य आदि का सम्बन्ध रहने से तथा अनावृत स्वरूप रहने से परिच्छेदाभिमान भी न रहने से उन दोनों में (सूत्रात्मा और वैश्वानर में) ईश्वरत्व ही रहता है। एवञ्च उनकी अभेदोपासना करने वालों को उनके अनुग्रह से क्रम मुक्ति का लाभ होता है। अतः एक (अद्वितीय) परमात्मा की ही वैश्वानर-सूत्रेश्वर—ये अवस्था विशेष हैं। इसी अभिप्राय से इस तथ्य का स्पष्टीकरण किया गया है—**एक एवेति**। श्रुत्युक्त 'सकलगुण विशिष्ट वैश्वानरोऽहमस्मि'—इस प्रकार की उपासना करने से वैसी फल प्राप्ति का होना संभव है। 'एतदुपासनया' अर्थात् वैश्वानरोपासना से वैश्वानर संज्ञक परमात्मा को जानकर उसकी उपासना करने के कारण साधक उसके भाव को प्राप्त हो जाता है। उक्त कथन में सम्मति बता रहे हैं—**वैश्वानरेति**। शारीरक के समन्वय लक्षण में (१.२.२४) छान्दोग्योपनिषत् के (५.११.१,६) वाक्य के विषय में विचार किया है। वहाँ आत्मा-शब्द से प्रारम्भ कर समापन में वैश्वानर शब्द का प्रयोग है तथा उसका द्युमूर्धत्व आदि प्रकार से वर्णन है। यहाँ संशय इस प्रकार प्रदर्शित किया गया है—क्या यहाँ पर वैश्वानर और आत्म शब्द से जठराग्नि समझना हैं, भूताग्नि, अथवा देवता अथवा शरीर अथवा परमेश्वर समझना है ? वैश्वार शब्द के आधार पर जाठर अग्नि, भौतिक अग्नि, या देवता ही समझे जायँ यह पूर्वपक्ष है। या शारीर ही वैश्वानर है, क्योंकि आत्म शब्द का प्रयोग किया गया है। उसी में आत्म शब्द की मुख्यता है। वैश्वानर शब्द की भी प्रवृत्ति, उसमें लक्षणा के सहारे हो सकती है। अतः सहारे हो सकती है। अतः यह 'वैश्वानर'—शरीर ही है, 'परमेश्वर' नहीं है—यह पूर्वपक्ष उपस्थित है।

समाधान यह दिया हैं कि यह वैश्वानर 'परमेश्वर' ही हो सकता है, क्योंकि साधारण तथा शब्द विशेष का प्रयोग किया गया है। 'वैश्वानर' शब्द, तीनों के लिये साधारण है, और 'आत्मशब्द', दो के लिये साधारण है, तथापि 'विशेष' दिखाई दे रहा है—"मूर्धैव सुतेजा" के कहने से।

तत्र संशयः—किमिह वैश्वानरो जठराग्निरुत भूताग्निराहोस्विद्देवतात्माथवा शारीरः किं वा परमेश्वर इति वैश्वानरात्मशब्दाभ्यां संशयः। तत्र जाठराग्निर्वा भूताग्निर्वा देवतात्मा वा वैश्वानरः स्यात्। श्रुतिषु सर्वत्र वैश्वानरशब्दप्रयोगात्। अथवा शारीरो वा स्याद्वैश्वानरः, आत्मशब्दादात्मशब्दस्य तत्रैव मुख्यत्वाद्वैश्वानरशब्दस्यापि लक्षणया तत्र प्रवृत्तिसम्भवात्। तस्माच्छारीरो वैश्वानरो न परमेश्वरः।

इत्येवं प्राप्तेऽभिधीयते—वैश्वानरः परमेश्वरो भवितुमर्हति। कस्मात्? साधारणशब्दविशेषात्। वैश्वानरशब्दस्त्रयस्य साधारण आत्मशब्दो द्वयस्य साधारणस्तथापि विशेषो दृश्यते। "मूर्धैव सुतेजा" इत्यादिना। नचायं जठरादीनां सम्भवत्यतः परमेश्वरो वैश्वानरस्तस्य सर्वकारणत्वात् सर्वात्मत्वोपपत्तेः। तस्मिन् यथोक्तविशेषसम्भवात्।

किञ्च, "स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तो"ति वैश्वानरस्य परमेश्वरत्वे तदुपासकस्य तद्भावप्राप्त्या सर्वलोकाश्रयान्नात्तृत्वं सम्भवति। अन्यथा तन्न स्यात्। अपि च "तद्यथेषीका तूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति वैश्वानरस्य परमेश्वरत्वे तदुपासकस्य तद्भावमापन्नस्य सर्वपाप्मदाह उपपद्यते। इतरथा तदयोगात्।

एवञ्च सति वैश्वानरादिशब्दा भाष्यकारोक्तप्रकारेण परमेश्वरे यथासम्भवं योजनीयाः। तस्माद्वैश्वानरः परमेश्वर इति सूत्रकारभाष्यकाराभ्यां श्रुत्यर्थः प्रतिपादितस्तस्माद्वैश्वानरस्येश्वरत्वं तदुपासकस्य तत्प्राप्तिः फलम्भवतीति भावः।

हिरण्यगर्भस्वरूपमाह—**स एवेति**। श्रुत्युक्तगुणोपेतः सूत्रात्मा हिरण्यगर्भोऽहमस्मीत्युपासकस्य तद्भावापत्तिफलमाह—**एतदिति**। हिरण्यगर्भोपासनयेत्यर्थः ॥३६॥

●

'वैश्वानर' शब्द का प्रयोग, यहाँ पर जठर आदि के लिते संभव नहीं हो सकता। अतः 'वैश्वानर' शब्द 'परमेश्वर' के लिये ही किया गया है, क्योंकि वही सर्वकारण है तभी उसमें सर्वात्मत्व की उपपत्ति हो पाती है। उसी में यथोक्त विशेषों संभावना हो सकती है।

किञ्च—श्रुति से प्रतिपादित सर्वलोकाश्रय अन्नातृत्व तभी संभव हो सकता है, जब वैश्वानर को परमेश्वर रूप माना जाय, उसकी उपासना करने से उपासक हो तद्भाव को प्राप्ति होती हो। अन्यथा सर्वलोकाश्रय-अन्नातृत्व का होना संभव ही नहीं हो सकेगा। अपि च श्रुति ने वैश्वानर भाव को प्राप्त हुए उसके उपासक के सर्वविध पापो का दग्ध होना बताया है, यह तभी उपपन्न हो सकता है, जब वैश्वानर को परमेश्वर रूप माना जाय। अन्यथा पापों का दग्ध होना संभव ही नहीं होगा।

भाष्यकार की प्रदर्शित रीति के अनुसार वैश्वानरादि शब्दों की परमेश्वर के अर्थ में ही यथा संभव योजना कर लेनी चाहिये। अतः 'वैश्वानर' परमेश्वररूप ही है—यह श्रुत्यर्थ, सूत्रकार तथा भाष्यकार दोनों ने ही बताया है। अतः वैश्वानर में ईश्वरत्व होने से उसके उपासक को उसकी प्राप्तिरूप फल का होना संभव हो पाता है। हिरण्यगर्भ के स्वरूप को बताते हैं—**स एवेति**। श्रुत्युक्त गुणों से युक्त हुआ सूत्रात्मा 'हिरन्यगर्भोऽहमस्मि'—इस अहंग्रहोपासना से उपासक को तद्भावापत्तिरूप फल की प्राप्ति को बताया है—**एतदिति**।

अतः वैश्वानर और हिरण्यगर्भ, 'ईश्वर' रूप ही हैं, 'जीव' रूप नहीं हैं—यह स्पष्ट हो रहा है। एवंच जो अधिकारी पुरुष, उस ईश्वर की अभेदोपासना करता है वह पुरुष, ईश्वरभाव को ही प्राप्त होता है। अभेदोपासना के उक्त फल का प्रतिपादन श्रुति-स्मृतियों ने भी किया है। श्रुति कहती कि यह अधिकारी पुरुष, उस परमात्मा की वैश्वानर हिरण्यगर्भादि जिन-नि रूपों से उपासना करता है, उसी-उसी रूप से विशिष्ट हुए परमात्मभाव (परमेश्वरभाव) को वह प्राप्त होता। अभेदोपासना के इसी फल को भबवान् शिव ने भगवान् राघवेन्द्र रामचन्द्र से कहा है—"येनाकारेण ये मर्त्या मामेवैक मुपासते। तेनाकारेण तेभ्योऽहं प्रसन्नो वाञ्छितं ददे।

अर्थात् यह जीव, मुझ एक ही (अद्वितीय) परमेश्वर जिस-जिस आकार में उपासना करता है, उसी-उसी आकार को मैं धारण कर उस पर प्रसन्न होता हूँ और उसके अभीष्ट फल को उसे देता हूँ। इसी तथ्य को भगवान् श्रीकृष्ण ने भी गीता में कहा है—

"यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः" ॥३६॥

"अन्तर उपपत्ते"रित्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्यामुपकोशलविद्यायां तथैव प्रतिपादनात्। स एव केवलमायोपाधिकः सन् ईश्वर इत्युच्यते। तदुपासनया तत्प्राप्तिः फलम्भवति ॥३७॥

●

हिरण्यगर्भस्येश्वरत्वे तदुपासकस्य तत्प्राप्तौ च सम्मतिमाह—**अन्तर उपपत्तेरिति**। समन्वयलक्षणे स्थितम् "अन्तर उपपत्तेः" इति। "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति, तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चन्ति वर्त्मनी एव गच्छती"ति श्रूयते। तत्र संशयः किमत्राक्ष्यधिकरणे उपास्यत्वेनोपदिश्यते छायात्मा उत देवतात्मा आहोस्विच्छारीरः किं वा परमेश्वर इति। तत्र दृश्यते इति निर्देशाच्छायात्मोपास्यत्वेनोपदिश्यते इति प्राप्नं तस्यैव चक्षुःसन्निधानात्। अथ वा देवतात्मा स्यादिन्द्रियानुग्राहकत्वेन सन्निहितत्वात्। यद्वा, शारीरः स्यात्तस्यापि करणस्वामित्वेन जाग्रदवस्थायां चक्षुर्विशेषतः सन्निहितत्वात्। तत्रैवात्मशब्दस्यापि मुख्यत्वादेवं निश्चिते सत्यमृतत्वादिकं शारीरे यथाकथञ्चिद्योजनीयम्। तस्माच्छारीर उपास्यो न तु परमेश्वर इति।

एवं प्राप्ते ब्रूमः अक्षिस्थाने परमेश्वर एवोपास्यत्वेन निर्दिश्यते न च्छायादिः। कस्माद्वाक्यशेषगतसंय्यद्वामत्ववामनीत्वभामनीत्वामृतत्वादिगुणजातस्य परमेश्वर एवोपपत्तेः, इतरत्रासम्भवात्। किञ्च वाक्योपक्रमे "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे"ति सुखविशिष्टब्रह्माभिधानात् "य एषोऽक्षिणि पुरुषो दृश्यत" इत्यत्रापि य एष सर्वनाम्नोः प्रकृतपरामर्शित्वेन तस्यैव प्रत्यभिज्ञानात्। "आचार्य्यस्तु ते गतिं वक्ते"त्यग्नीनां वचनाच्च वाक्योपक्रमे निर्दिष्टं सुखविशिष्टं ब्रह्म इहाक्षिस्थाने ध्येयत्वेनोपदिश्यत इति गम्यते। अन्यथा प्रकृतहानाप्रकृतप्रक्रिया प्रसङ्गात्। परमेश्वरस्यापि उपासनार्थमक्षिस्थानत्वमुपपद्यते। तस्मात्परमेश्वर एवोपास्यः।

उपकोशलेनाधीता विद्योपकोशलविद्या तस्याम् इयमाख्यायिका—"उपकोशलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्य्यमुवासे"ति श्रुतौवियमाम्नाता। उपकोशलो नाम कश्चिद्ब्रह्मचारी सत्यकामस्य गुरोर्निकटे ब्रह्मचर्य्यं कृतवान्। तमुपकोशलं

●

'हिरण्यगर्भ' को ईश्वर मानने में और उसके उपासक को उसकी प्राप्ति होने में सम्मति बता रहे हैं—**अन्तर उपपत्तेरिति**। समन्वय लक्षण में 'अन्तर उपपत्तेः' यह सूत्र है। वहाँ के अधिकरण में 'य एषोऽक्षिणि पुरुषो दृश्यत' इत्यादि वाक्य सुना जाता है। तब संशय होता है कि इस अक्ष्यधिकरण में उपास्य के रूप में जिसका उपदेश किया जा रहा है, वह क्या छायात्मा है, या देवतात्मा है, अथवा शरीर है किं वा परमेश्वर है?

उक्त वाक्य में 'दृश्यते' ऐसा निर्देश रहने से यह प्रतीत होता है कि उपास्य के रूप में 'छायात्मा' ही बताया जा रहा है, यही उचित है क्योंकि वही चक्षु के सन्निहित है।

अथवा—उपास्य के रूप में 'देवतात्मा' भी हो सकता है, क्योंकि इन्द्रियों का अनुग्राहक होने से वही सन्निहित है।

अथवा—उपास्य के रूप में वह वैश्वानर, 'शरीर' भी हो सकता है, क्योंकि वह, करणों का स्वामी है। जाग्रदवस्था में चक्षुरिन्द्रिय विशेषतः सन्निहित रहता है। उसी में आत्म शब्द की मुख्यता रहती है। ऐसा निश्चय होने पर शरीर में अमृतत्व आदि की यथंकथंचित् योजना कर लेनी चाहिये। अतः शरीर की ही उपासना करनी चाहिये, 'परमेश्वर' की नहीं।

इसप्रकार पूर्वपक्ष के उपस्थित होनेपर, सिद्धान्त किया गया है कि—'अक्षि' स्थान में परमेश्वर का ही उपास्य के रूप में निर्देश किया गया है, छाया आदि का नहीं। क्योंकि वाक्यशेष के द्वारा निर्दिष्ट सम्पद्धामत्व, वामनत्व, भामनत्व (प्रकाशकत्व), अमृतत्व आदि गुणसमूह की उपलब्धि परमेश्वर में ही उपपन्न हो सकती है, इतरत्र उसकी उपलब्धि होना संभव नहीं है।

किञ्च—वाक्योपक्रम करते समय सुखविशिष्ट ब्रह्म का अभिधान किया है, तथा "य राषोऽक्षिणि पुरुषो दृश्यत" इस में भी 'यः', 'एष'—इन दो सर्वनामों की प्रकृतपरामर्शिता रहने से उक्त सुखविशिष्ट ब्रह्म की ही प्रत्यभिज्ञा होती है। तथा 'आचार्यस्तु ते गतिं वक्ता'—इसप्रकार अग्नि का वचन भी है। इन सब का विचार करने से यही प्रतीति होती है कि वाक्योपनिर्दिष्ट सुखविशिष्ट ब्रह्म ही यहाँपर अक्षिस्थान में धयेय के रूप में (उपास्य के रूप में) बताया गया है अन्यथा प्रकृतहान और अप्रकृत प्रक्रिया का प्रसंग प्राप्त होगा। और उपासना के लिये परमेश्वर में अक्षिस्थानत्व उपपन्न भी होता है। अतः परमेश्वर ही उपास्य है।—यह तथ्य "अन्तर उपपत्तेः" इस अधिकरण में सूत्रकार और भाष्यकार दोनों ने अभिव्यक्त किया है, तथा उपकोशल विद्या में भी उसी प्रकार बताया गया है।

"सर्वत्र प्रसिद्धोपदेशादि"ति शाण्डिल्यविद्यायां, "दहर उत्तरेभ्य" इति दहरविद्यायाञ्च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया तत्प्राप्तिप्रतिपादनात् "तं यथा यथोपासते तत्तथैव[1] भवती"ति श्रुतेश्च ॥३८॥

•

शिष्यमग्निपरिचर्य्यानिमित्तं गृहे स्थापयित्वा गुरुः सत्यकामो द्रव्यार्जनार्थं देशान्तरं जगाम। तदोपकोशलस्य परिचर्य्यया सन्तुष्टास्त्रेताग्नयो ब्रह्मविद्यामुपदिदिशुः "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे"ति, अनन्तरं स्वस्वविद्याश्च। पश्चाद्गतिप्रश्ने कृते "आचर्य्यस्तु ते गतिं वक्ते"त्यग्नय ऊचुः। अनन्तरमागतेनाचार्य्येण प्रणतं शिष्यं प्रति 'ब्रह्मविन्मुखमिव त्वन्मुखं प्रतिभाति केनोपदिष्टा ब्रह्मविद्ये'ति पृष्टे, अग्निरुपदेष्टा आचार्य्यो गतिं वक्ष्यतीत्युक्तमित्युक्त्वोपकोशल आचार्य्यं शरणं प्रतिपेदे। शरणागतं शिष्यं सत्यकामो गुरुरुपदिदेश। "य एषोऽक्षिणि पुरुषो दृश्यते" इत्यादिना। अत इयं विद्योपकोशलेनाधीतत्वादुपकोशलविद्येत्युच्यते। तस्मिन्नुपकोशलविद्यावाक्यविचारे सूत्रकारभाष्यकाराभ्यां समष्टिप्राणोपाधिकसुखविशिष्टपरमात्मोपास्त्या तत्प्राप्तिः प्रतिपादितेति भावः।

इदानीमपीश्वरस्वरूपमाह—**स एवेति**। मायास्वरूपं प्राङ्निरूपितम्। समष्टिस्थूलसूक्ष्मशरीरराहित्यं कैवल्यम्। "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" "स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप" इत्यादि श्रुत्युक्तगुणकः परमात्माहमस्मीत्युपासनया तत्प्राप्तिफलम्भवतीत्याह—**तदिति**। ईश्वरभावापत्तिः फलम्भवतीत्यर्थः ॥३७॥

तत्र सम्मतिमाह—**सर्वत्रेति**। समन्वयलक्षणे स्थितं "सर्वत्र प्रसिद्धोपदेशात्"। "सर्वं खल्विदम्ब्रह्म तज्जलानिति शान्त

•

उपकोशल के द्वारा अध्ययन की हुइ विद्या को 'उपकोशल विद्या कहा गया है। उसमें यह आख्यायिका कही गई है—उपकोशल नामका कोई ब्रह्मचारी, सत्यकास संज्ञक गुरू के निकट जाकर ब्रह्मचर्यव्रत का पालन करते हुए रहने लगा। उस उपकोशल नामक शिष्य को अग्निपरिचर्या के निमित्त घर में रखकर गुरु सत्यकाम द्रव्यार्जनार्थ देशान्तर गए। तब उपकोशल के द्वारा की जाने वाली परिचर्या (सेवा) से त्रेताग्नियां उसपर सन्तुष्ट हुई। सन्तुष्ट होकर उन्होंने उपकोशल को ब्रह्मविद्या का उपदेश दिया और ब्रह्मविद्या का उपदेश करने के साथ ही स्व-स्व विद्याओं को भी बताया। तदनन्तर उपकोशल ने 'गति विषयक प्रश्न', उनसे किया। तब त्रेताग्नियों ने उससे कहा—हे उपकोशल ! गति के विषय में तुम्हारे आचार्य बतावेंगे। उसके पश्चात् आये हुए आचार्य ने प्रणाम करने वाले शिष्य को देखा, तो शिष्य का मुख, ब्रह्मज्ञानी के मुख की तरह दिखाई दिया। तब आचार्य ने कहा कि हे उपकोशल ! आज तुम्हारा मुख, ब्रह्मज्ञानी के मुखमण्डल की तरह दिखाई दे रहा है। अरे उपकोशल ! तुम्हें ब्रह्मविद्या का उपदेश किसने किया ? यह पूछने पर शिष्य ने बताया कि अग्नि ने ब्रह्मविद्या का उपदेश मुझे किया और गति के विषय में तुम्हारे आचार्य, तुम्हें बतावेंगे—यह कहकर उस उपकोशल ने आचार्य के चरणों की शरण ली। शरण आये हुए शिष्य को गुरु सत्यकाम ने "य एषोऽक्षिणि पुरुषो दृश्यते"—कहकर उपदेश दिया। अतः इस विद्या को उपकोशल विद्या कहा गया है, क्योंकि इस विद्या का उपकोशल ने गुरु से अध्ययन किया था। उस उपकोशल विद्या के वाक्य का विचार करते समय सूत्रकार और भाष्यकार दोनों ने समष्टि प्राणोपाधिक सुखविशिष्ट परमात्मा की उपासना करने से उसकी प्राप्ति का प्रतिपादन किया है।

केवल मायोपाधिक होने पर वही 'ईश्वर' कहलाता है। 'माया' का स्वरूप पहले बता चुके हैं। समष्टिस्थूल और समष्टिसूक्ष्म शरीर का अभाव हो जाना ही 'कैवल्य' है। श्रुत्युक्तगुणक परमात्मा 'मैं हूँ'—इसप्रकार अभेदोपासना करने से उस परमेश्वर-भाव की प्राप्ति होना ही फल कहा गया है—**तदिति**। अर्थात् ईश्वर-भावापत्ति फल की प्राप्ति होती है ॥ ३७ ॥

शाण्डिल्यविद्या तथा दहरविद्या का विचार करते हुए ब्रह्मसूत्रकार एवं भाष्यकार ने प्रतिपादित किया है कि शास्त्र-बोधित प्रकार से ईश्वर की उपासना करने से ईश्वर की प्राप्ति हो जाती है। वेद में भी कहा है कि जिस प्रकार से उसकी उपासना की जाती है वैसा ही फल होता है। अतः पूर्वोक्त सिद्धांत स्थिर है।

पूर्वोक्त निर्णय में सम्मति प्रदर्शित करते हैं—**सर्वत्रेति**। समन्वयाध्याय (प्रथमाध्याय) में 'सर्वत्र प्रसिद्धोपदेशात्'—यह सूत्र है। इस अधिकरण में 'यह सब ब्रह्म ही है; यह निश्चय किया है, अर्थात् इसमें सन्देह नहीं है। क्योंकि उसी से (ब्रह्म से)

१. तत्तदेव इत्यपि पाठः।

उपासीत अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत। मनोमयः प्राणशरीरो भारूप" इत्यादि श्रूयते। तत्र संशयः—किमत्र मनोमयत्वादिगुणकः शरीर[1] उपास्यत्वेनोपदिश्यते, आहोस्वित्परम्ब्रह्मेति। तत्र शारीर एवोपास्यत्वेनोपदिश्यते। मनोमयत्वादिगुणजातस्य तस्यैव मुख्यत्वेनोपपत्तेः। न परम्ब्रह्म "अप्राणोह्यमनाः शुभ्र" इत्यादि श्रुत्या प्राणादिसम्बन्धप्रतिषेधेन तस्मिन्मनोमयत्वादिगुणानुपपत्तेः। यद्यपि जीवोऽप्रकृतो, वाक्योपक्रमगतं ब्रह्म प्रकृतम्, तथापि शमगुणविध्यर्थवादगतत्वेन ब्रह्मणोऽप्यप्रकृतत्वादिलिङ्गाच्छारीर[2] एवोपास्यः। एवं निश्चिते वाक्यशेषगतगुणजातं शारीरे योजयितव्यम्। तस्माच्छारीर एवोपास्यो न ब्रह्म।

इति प्राप्तेऽभिधीयते—परमेव ब्रह्म मनोमयत्वादिगुणकमुपास्यतया प्रतिपत्तव्यम्। कस्मात्? सर्वेषु वेदान्तेषु तस्यैवोपास्यत्वेन प्रसिद्धतयोपदेशात्।

अत्रापि प्राणः शरीरमस्येति समासान्तर्गतसर्वनामश्रुत्या सन्निहितस्य ब्रह्मणः परामर्शात्। तद्धितार्थस्य सामान्यरूपतया विशेषापेक्षाया[3] निवर्त्तकत्वाभावाच्च। वाक्यशेषगतानां सत्यकामत्वादिगुणानां ब्रह्मण्येवोपपत्तेश्च शारीरेऽनुपपत्तेः

●

यह जगत् उत्पन्न हुआ है, उसी में लीन होता है, और उसी में चेष्टा करता है, इस कारण शान्त होकर उस ब्रह्म की उपासना करनी चाहिये।

यह 'जीव' संकल्पमय है, यह पुरुष इस लोक में जैसे संकल्प करता है, इस लोक से मरकर वैसा ही होता है। अतः वह उपासना करे—इस प्रकार से उपासना के विधान पर विचार किया गया है। उपनिषत् में मनोमय प्राण शरीर तथा भारूप—कह कर उपासना का विषय बताया गया है—पुरुष को मनोमय, प्राण शरीर, और चैतन्यस्वरूप का ध्यान करना चाहिये। इस प्रसंग में संदेह उत्पन्न होता है कि क्या यहाँ मनोमयत्वादिधर्मों से शारीर आत्मा का उपास्य रूप से उपदेश किया गया है अथवा परब्रह्म का? यह सन्देह होने पर पूर्वपक्षी का कहना है कि शारीर आत्मा को ही उपास्य के रूप में कहा गया है, क्योंकि शरीर और इन्द्रियों के अधिपति शारीर आत्मा का 'मन' आदि के साथ सम्बन्ध प्रसिद्ध है। परब्रह्म का मन आदि से सम्बन्ध प्रसिद्ध नहीं है। क्योंकि 'प्राण से रहित, मन से रहित, और शुभ्र'—इत्यादि श्रुतियों से उसका (परब्रह्म का) मन आदि के साथ सम्बन्ध न रहना बताया गया है। एवञ्च उसमें (परब्रह्म में) मनोमयत्वादि धर्मों (गुणों) की उपपत्ति नहीं होती, अपितु उन धर्मों की उपपत्ति तो इस शारीर आत्मा (जीवात्मा) में ही मुख्यतया होती है। अतः वही (शारीर आत्मा ही) उपास्य है, यह समझना चाहिये।

यद्यपि 'जीव' अप्रकृत है, और वाक्य के उपक्रम में प्रयुक्त ब्रह्म ही प्रकृत है, तथापि शमगुण विधि के अर्थवाद में आने से 'ब्रह्म' भी अप्रकृत है—यह कह सकते हैं। एवञ्च अप्रकृतत्व आदि लिङ्गों (चिह्नों) को देखते हुए शारीर जीव (जीवात्मा) ही उपास्य के रूप में प्रतीत हो रहा है। यह निश्चित होनेपर वाक्यशेष में कहे हुए जितने भी धर्म (गुण) हैं, उनकी योजना शारीर आत्मा (जीवात्मा) में ही करनी चाहिये। अतः 'शारीर ही उपास्य है, ब्रह्म नहीं'—यह पूर्वपक्ष, पूर्वपक्षी के द्वारा उपस्थित किये जाने पर—

सिद्धान्ती कहता है कि मनोमयत्वादि धर्मक (गुणक) परब्रह्म को ही उपास्य के रूप में जानना चाहिये। क्योंकि सम्पूर्ण वेदान्त में उसी की उपास्य के रूप में प्रसिद्धि बताई गई है।

यहाँ पर भी 'प्राणः शरीरमस्य' इसप्रकार समासान्तर्गत सर्वनाम का श्रवण हो रहा है, उस कारण सन्निहित ब्रह्म का ही उससे परामर्श किया जाता है। यहाँ तद्धितार्थ सामान्यरूप होने से अपेक्षा का निवर्तक नहीं हो रहा है। और वाक्यशेष में कहे गये सत्यकामत्वादि गुणों की उपपत्ति ब्रह्म में ही हो सकती है। तथा शमविधिपरक वाक्य से भी उपास्य के रूप में 'ब्रह्म' को ही समझना चाहिये। यह निश्चित होने पर शारीर और परात्मा में अभेद रहने से मनोमयत्वादिकधर्मों की संभवना ब्रह्म में भी की जा सकती है।

१. शारीर इति स्यात्। एवमग्रेपि।

२. अप्रकृतत्वाद् लिंगाच्छारीर इति पाठः स्यात्। लिंगं मनोमयत्वाद्युक्तम्।

३. सर्वनाम मनोमयमेव परामृशत्वित्यत आह—तद्धितेति। तदुक्तं भामत्यां 'समासः सर्वनामार्थः सन्निकृष्टमपेक्षते। तद्धितार्थोऽपि सामान्यं नापेक्षाया निवर्तकः'॥ इति।

शमविधिपरादपि वाक्याद्ब्रह्मैवोपास्यत्वेन ग्राह्यम् एवं निश्चिते शारीरपरात्मनोरभेदात् मनोमयत्वादिकम्ब्रह्मण्यपि सम्भवति। यद्यपि वैपरीत्यं तथापि

"समारोप्यस्य रूपेण विषयो रूपवान् भवेत्। विषयस्य तु रूपेण समारोप्यं न रूपवत्" ॥

इत्याचार्य्यवाचस्पतिमिश्रैरुक्तत्वान्न वैपरीत्यम्।

किञ्च, "एतमितः प्रेत्याभिसम्भावितास्मि"

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥

तमेव शरणं गच्छ सर्वभावेन भारत"।

इति श्रुतिस्मृतिभ्यामुपास्योपासकयोः शारीरपरब्रह्मणोर्गन्तृगन्तव्यभावेन भेदव्यपदेशात्। अनन्तकल्याणगुणकं सर्वज्ञं सर्वशक्तिनित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं परब्रह्मोपास्यम्। यद्यपि "नान्योऽतोस्ति द्रष्टा" "क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत" इति श्रुतिस्मृतिभ्यां परमात्मनोऽन्य शारीरो नास्ति तथाप्यविद्याकल्पितभेदमादाय तद्व्यपदेशः।

एवञ्च यथोक्तपरमेश्वरोपासकस्य तत्प्राप्तिः फलम्भवति। "यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" "मद्भक्ता यान्ति मामपि" "मत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यति शाश्वतमि"त्यादि श्रुतिस्मृतिभ्यः। तस्माद्ब्रह्मैवोपास्यमिति शाण्डिल्यविद्यावाक्ये निश्चितं सूत्रकारभाष्यकाराभ्याम्। एवमन्यत्रापि।

●

शंका—शारीर और परात्मा के अभेद की दृष्टि से विपरीत संभावना भी की जा सकती है।

समा०—'आरोप्य के रूप से विषय रूपवान् हो सकता है, किन्तु विषय के रूप से समारोप्य पदार्थ रूपवान् नहीं हो सकता'—ऐसा श्रीमद्वाचस्पतिमिश्र ने कहा है, अतः वैपरीत्य की संभावना नहीं की जा सकती।

किञ्च—'इस शरीर से छुटकारा पाकर उस आत्मा को प्राप्त करूँगा' (छा० ३।१४।४)—इस श्रुति ने कर्म और कर्ता के रूप से दो पदार्थों का उपदेश किया है। अतः स्पष्टतया प्रतीत होता है कि 'जीवात्मा', मनोमयत्वादि धर्मों (गुणों) से युक्त नहीं हैं। हे अर्जुन! शरीरधारी जीवों को 'माया' के द्वारा घुमाने वाला ईश्वर समस्त भूतों के हृदय में रहता है—यह स्मृति भी शारीर और परमात्मा में भेद बता रही है।

अन्यान्य श्रुति-स्मृतियों के वचनों से 'उपास्य और उपासक' के रूप में तथा 'गन्तृ और गन्तव्य' के रूप में 'शारीर और परब्रह्म' का भेद बताया गया है। एवञ्च—अनन्तकल्याण गुणवाला सर्वज्ञ, सर्वशक्तिमान् नित्य-शुद्ध-बुद्ध-मुक्त-सत्य-परमानन्द-अद्वय परब्रह्म ही 'उपास्य' है।

यद्यपि इससे अन्य द्रष्टा नहीं तथा—हे अर्जुन! सब शरीरों में क्षेत्रज्ञ भी मुझे ही समझो—इत्यादि श्रुति-स्मृति के वचनों से प्रतीत हो रहा है कि परमात्मा से अन्य (भिन्न) शारीर नहीं है, तथापि 'भेद' को अविद्याकल्पित मानकर दोनों में अभेद समझा जाता है।

एवंच यथोक्त परमेश्वर की उपासना करने से शारीर आत्मा (उपासक) को उसकी प्राप्ति (फल) हो जाती है। पुरुष, इस लोक में जैसे संकल्प (ध्यान) करता है, इस लोक से मरकर वैसा ही होता है—इस श्रुति व एतदर्थक स्मृतियों से भी पूर्वोक्त तथ्य की तुष्टि हो रही है। अतएव सूत्रकार तथा भाष्यकार दोनों ने शाण्डिल्यविद्या के वाक्य में 'ब्रह्म' के ही उपास्य होने का निर्णय किया है। इसी तरह अन्यत्र भी समझना चाहिये।

"दहर उत्तरेभ्यः" (ब्र० सू० १।३।१४ अधि० ५)—इस सूत्र के अधिकरण में विचार करने के लिये यह विषय वाक्य उपस्थित किया गया है—अथेत्यादि। (छा० उ० ८।१।१)—इस शरीर (ब्रह्मपुर) में जो अल्प हृदय-कमलरूप घर है, उसमें अल्प अन्तराकाश है, उस आकाश में जो है, उसका अन्वेषण करना चाहिये, उसका ही विशेष ज्ञान प्राप्त करना चाहिये। इस श्रुतिवाक्य में जो 'अल्प (दहर) आकाश' कहा गया है, उस 'आकाश' शब्द से क्या 'भूताकाश' समझना चाहिये या 'विज्ञानात्मा' (जीवात्मा=शारीर) समझना चाहिये, अथवा 'परमेश्वर' (परमात्मा) समझना चाहिये? यह संशय (संदेह) हो रहा है।

संशय उत्पन्न होने का कारण यह है कि श्रुतिवाक्य में 'आकाश' और 'ब्रह्मपुर' शब्द कहे गये हैं। 'आकाश' शब्द का 'भूताकाश' और 'परब्रह्म' में प्रयोग होता देखा जाता है। इससे संदेह हुआ कि दहर 'भूताकाश' है, या 'परब्रह्म'? तथा

"दहर उत्तरेभ्यः"। "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्त-दन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमि"त्याम्नायते, अत्राकाशशब्देन भूताकाशः प्रतिपाद्यते शारीरः परमेश्वरो वेति संशयः। आकाशशब्दस्य भूतविशेषे रूढत्वात्तदेवेह प्रतिपाद्यत इति प्राप्तम्। अथवा शारीरो वा प्रतिपाद्यते। दहराकाशशब्देन तस्मिन्नात्म-शब्दस्य मुख्यत्वात्। तस्माच्छारीर एव दहरो न परमेश्वर इति प्राप्ते—

ब्रूमः दहराकाशः परमेश्वरो भवितुमर्हति। कस्मादुत्तरेभ्यो हेतुभ्यः। तथाहि—उत्तरत्र"यावान् वा अयमाका-शस्तावानेषोऽन्तर्हृदयाकाश" इति बाह्याकाशेन दहराकाशस्योपमानोपमेयभावः प्रतिपाद्यते। स च भूताकाशपरिग्रहे नोपपद्यते, तेन तस्योपमेयत्वायोगात्। तथा जीवपरिग्रहेऽपि तस्योपाधिपरिच्छिन्नस्य तेन तदयोगात्।

●

'ब्रह्मपुर' में 'ब्रह्म' शब्द, 'जीव' का वाचक है, क्योंकि उसका 'पुर' होने से यह शरीर 'ब्रह्मपुर' कहलाता है, या 'परब्रह्म' का पुर होने से यह 'ब्रह्मपुर' कहलाता है ? यह संशय होता है। इस संशय के बाद यह संशय होता है कि 'जीव' और 'परब्रह्म' से कौन 'दहराकाश' है ?

'आत्मा' शब्द का प्रयोग 'शरीर जीवात्मा' में ही मुख्यतया किया जाता है। अतः 'दहराकाश' शब्द से 'शारीर जीवात्मा' को ही समझना उचित होगा। 'परमेश्वर' को 'दहराकाश' शब्द से समझना उचित नहीं है—यह पूर्वपक्षी ने कहा। उक्त पूर्वपक्ष का अभिप्राय यह है कि 'आकाश' शब्द 'भूताकाश' में रूढ है। अतः 'दहर' शब्द, 'भूताकाश' का ही वाचक है। उसका स्थान 'अल्प' होने से उसे 'दहर' कहते हैं। कहा भी है कि जितना 'भूताकाश' है, उतना ही हृदय के भीतर यह 'दहराकाश' है—इस प्रकार बाह्य और आभ्यन्तर भेद की कल्पना से भेद मानकर 'उपमानोपमेयभाव' है और 'आकाश' तथा 'पृथिवी' आदि उसमें अवस्थित हैं, क्योंकि अवकाशस्वरूप होने से 'आकाश' एक है।

अथवा 'दहर' शब्द से 'जीवात्मा' को भी समझा जा सकता है। क्योंकि 'ब्रह्मपुर' शब्द सुनाई पड़ रहा है। 'जीवात्मा' का 'शरीर' होने से इस शरीर को 'ब्रह्मपुर' भी कहते हैं। क्योंकि 'जीवात्मा', उसे अपने कर्मों से प्राप्त करता है, और गौणीवृत्ति से 'जीव' को भी 'ब्रह्म' शब्द से कहा जा सकता है। 'परब्रह्म' का शरीर के साथ 'स्व-स्वामिभाव' सम्बन्ध भी नहीं है। जैसे नगर का स्वामी, नगर के एक भाग में रहता है, अथवा जैसे राजा, राजधानी के एक भाग में (राजभवन में) रहता हे। उसी तरह 'मन', तो 'जीव' की उपाधि है। वह मन, प्रायः हृदय में रहता है। अतः जीव की ही हृदय में स्थिति हो सकती है, और 'दहरत्व' भी उसी में घटित हो पाता है। एवंच वही (जीवत्मा ही) उपास्य है।

इस पूर्वपक्ष पर **सिद्धान्ती** उत्तर देता है—'दहराकाश' शब्द से 'परमेश्वर' को ही समझना चाहिये। क्योंकि यह समझने का औचित्य, अनेक कारणों से है। **तथाहि**—

सिद्धान्ती का कहना है कि यहाँ पर 'परमेश्वर' ही दहराकाश है। 'भूताकाश' या 'जीव'—दहराकाश नहीं है, क्योंकि 'वाक्यशेष' में कहे गये हेतुओं से यही समझमें आता है। 'तं चेद् ब्रूयुः'—आचार्य से शिष्य, यदि कहे—यह उपक्रम करके यहाँ, वह क्या है ? जो अन्वेषण करने योग्य है, और विशेषरूप से जिज्ञासा करने योग्य है'—इसप्रकार आक्षेपपूर्वक समाधान करते हैं—(छां० उ० ८।१।३) वह कहे कि जितना बड़ा यह बाह्य आकाश है, उतना ही हृदय में यह आभ्यन्तर आकाश है, स्वर्ग और पृथिवी दोनों उसके भीतर स्थित हैं। इस वाक्य से प्रतीत होता है कि कमल के अल्पत्व से जिसको अल्पत्व प्राप्त हुआ है, उस आकाश की, प्रसिद्ध आकाश के साथ उपमा देकर उसके अल्पत्व की निवृत्ति करते हुए आचार्य दहराकाश में भूताकाशत्व की भी निवृत्ति करते हैं। यद्यपि 'आकाश' शब्द 'भूताकाश' में रूढ है, तथापि उसीके साथ उसकी उपमा नहीं बन सकती। अतः 'दहर' शब्द से भूताकाश की प्रतीति की आशंका निवृत्त हो जाती है। जब एक ही आकाश के बाह्य और आभ्यन्तर भेद की कल्पना से भेद मान लेते हैं, तब उपमानोपमेयभाव बन जाता है—यह जो पूर्वपक्षी ने कहा था, वह संभव नहीं है, क्योंकि काल्पनिक भेद, उपायान्तर के अभाव में ही माना जाता है।

किञ्च—भेद की कल्पना करके उपमानोपमेय भाव का वर्णन करने वाले के मत में आभ्यन्तर आकाश, परिच्छिन्न होने से बाह्य आकाश के बराबर नहीं हो सकेगा।

परन्तु 'ज्यायानाकाशात्'—(श० ब्रा० १०।६।३।२) आकाश से बड़ा—इत्यादि अन्य श्रुति से परमेश्वर का भी परिमाण आकाश के परिमाण के बराबर नहीं हो सकता।

किञ्च, "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इति वाक्यशेषगतानां गुणानां शारीरभूताकाशयोरनुपपत्तेः। दहराकाशः परमेश्वर एव। अपि च, "तद्ये[1] इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति" "य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति दहराकाशोपासकस्य तद्भावापत्तिफलं दर्शयति तच्च शारीरभूताकाशपरिग्रहे नोपपद्यते। तस्माद्दहराकाशः परमेश्वर एवेति दहरविद्यावाक्ये सूत्रकारभाष्यकाराभ्यामीश्वरोपासनया तद्भावापत्तिः प्रतिपादिता। तस्मात्तदुपासनया तत्प्राप्तिः फलम्भवतीति निरवद्यम्।

ईश्वरोपासनया तत्प्राप्तिः फलम्भवतीत्यत्र श्रुत्यन्तरं संवादयति—तं तथेति। तं परमात्मानं यथा येन प्रकारेण यादृशगुणविशिष्टत्वेनोपासते अहमेवेश्वरोऽस्मीति ध्यायति तथैव तादृशमेव फलम्भवति। तदुक्तम् सदाशिवेन रघुनाथं प्रति—

"येनाकारेण ये मर्त्या मामेवैकमुपासते। तेनाकारेण तेभ्योऽहं प्रसन्नो वाञ्छितं ददे"॥ इति।

चकारेण स्मृतिं समुच्चिनोति।

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय! सदा तद्भावभावितः"॥ इति स्मृतेश्चेत्यर्थः॥३८॥

●

यह दोष नहीं हैं। क्योंकि वह वाक्य पुण्डरीक के वेष्टन से प्राप्त हुए अल्पत्व को केवल निवृत्ति ही करता है, भूताकाश के तुल्य परिमाण को नहीं बताता। दोनों को यदि बतावेगा तो 'वाक्यभेद' होगा। और काल्पनिक भेदवाले पुण्डरीक से वेष्टित हुए आकाश के एकदेश में स्वर्ग, पृथिवी आदि का रहना भी संभव नहीं है।

यह 'आत्मा' पाप से विमुक्त, जरा, मरण और शोक से रहित, भूख और प्यास से मुक्त, सत्यकाम और सत्यसङ्कल्प है—इस वाक्यशेष के द्वारा बताये गये गुणों का शरीर आत्मा तथा भूताकाश दोनों में भो रहना संभव नहीं है। अतः 'दहराकाश' शब्द वाच्य, परमेश्वर को ही समझना चाहिये।

अपिच—जो यहाँ आत्मा का और इन सत्य कामों का आचार्य के उपदेशानुसार ध्यान से अनुभव कर परलोक में जाते हैं, उनका सभी लोकों में स्वेच्छा विहार होता है—इस वाक्य से प्रकृत दहराकाश के विज्ञान का फल, अनन्त बताकर 'दहर' परमात्मा ही है, यह तथ्य, श्रुति ने सूचित किया है।

यदि 'वाक्यशेष' के बल पर यह स्वीकार करते हैं कि 'दहर' शब्द से परमेश्वर का ग्रहण करना ही उचित है तो जो यह जीव इस शरीर से उठकर परं ज्योति को प्राप्त करके अपने स्वरूप से अभिव्यक्त होता है, वह 'आत्मा' है, ऐसा प्रजापति ने कहा है (छां० उ० ८।३।४) इस वाक्य में दूसरे का (जीवका) भो परामर्श होता है। 'जीव' का प्रतिपादक वाक्यशेष "अथ य एष' इत्यादि है। 'दहर' को बताने के बाद, मुक्तों द्वारा गम्य, 'शुद्ध ब्रह्म' बताया गया है। जो यह सम्प्रसाद (जीव) है, वह इस देहेन्द्रियों के समूह से समुत्थान करके (उनसे आत्मा का विवेक करके विविक्त आत्मा का स्वरूप से अर्थात् ब्रह्मरूप से साक्षात्कार करके) उसी प्रत्यक् 'पर ज्योति' को प्राप्त करता है। ऐसी व्याख्या करना ही उचित है, जैसे—'मुखं व्यादाय स्वपिति'—इस वाक्य का अर्थ—सोकर मुख खोलता है—किया जाता है, वैसे ही 'परं ज्योतिरुपसम्पद्य' का अर्थ, अपने स्वरूप का साक्षात्कार करके 'परज्योति को प्राप्त करता है'—यह करना उचित है। इस प्रकार जीव का परामर्श करने से 'दहरोऽस्मिन्नन्तराकाशः—वाक्य में 'जीव' ही कहा गया है।

उक्त कथन, 'जीव' में उपपन्न न हो सकने से ठीक नहीं है। क्योंकि बुद्धि आदि उपाधियों के अभिमानी जीव को 'आकाश' की उपमा नहीं दी जा सकती। और उपाधिगत धर्मों के अभिमानी में 'पापराहित्यादिधर्म' का रहना संभव नहीं है। अतः 'दहराकाश' शब्द से 'ब्रह्म' को ही समझना चाहिये, 'जीव' को नहीं। उक्त वाक्यशेष से दहराकाशोपासक को तद्भावापत्तिरूप फल बताया गया है। उसकी उपपत्ति, 'शारीर' या भूताकाश' का ग्रहण करने पर नहीं हो सकेगी। अतः 'दहराका' परमेश्वर ही है। इसप्रकार दहरविद्यावाक्य में सूत्रकार भाष्यकार दोनों ने ईश्वरोपासना से ईश्वरभावापत्तिरूप फल बताया है। एवञ्च उसकी उपासना से उसकी प्राप्तिरूप फल मिलता है। यह बताया गया है जो सर्वथैव उचित है। ईश्वरोपासना फल की प्राप्ति के होने में अन्यश्रुति भी उपस्थित की है—'तं यथेति। उस परमात्मा को जिस प्रकार से अर्थात् यादृशगुणविशिष्ट के रूप में उपासना करते हैं, यानी 'अहमेव ईश्वरोस्मि' इस प्रकार से ध्यान करता है, उसे उसीप्रकार का फल मिलता है।

इसी बात को भगवान् सदाशिव ने राघवेन्द्र रामचन्द्र से, तथा अर्जुन को श्रीकृष्ण ने कहा है।

---

१. अथ ये—इत्युपनिषदि।

भावनामान्द्ये तु तत्तारतम्येन सार्ष्टिसारूप्यसामीप्यसालोक्यफलानि भवन्ति । "साम्नः सायुज्यं सलोकतां जयती"-त्यादि श्रुतेः।

●

ननु भावनोत्कर्षेण तत्साक्षात्कारवतस्तत्फलम्भवतु भावनामान्द्ये किं स्यादिति ? तत्राह—**भावनेति**। मनुष्यत्व-विस्मृतिपूर्वकं तद्भावापत्तिर्भावनोत्कर्षः। देहे मनुष्योऽहमिति यथा, तद्वत् ईषन्मनुष्यत्वस्मरणपूर्वकं तद्भावापत्तिर्भावनामान्द्यम्। तत्तारतम्येन परमेश्वरेण समानैश्वर्यभोगवत्त्वं सार्ष्टिः जगद्व्यापारवर्जम्[1]। तदुक्तम्, "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वा-च्चेति"। समानरूपत्वं सारूप्यम्। समीपवर्त्तित्वं सामीप्यम्। समानलोकत्वं सालोक्यम्। एवं भावनातारतम्येन फलतारतम्ये श्रुतिं प्रमाणयति—**साम्न इति**। साम्नः प्राणस्य **सायुज्यं** तादात्म्यं तद्भावापत्तिमित्यर्थः। न चान्यस्यान्यभावापत्तिः कथं विरोधादिति वाच्यम्; समष्टि(क)कारणानामेव परिच्छेदाभिमानेन व्यष्टित्वप्राप्तिरिति अपरिच्छिन्नोपासनया परिच्छेदाभिमाननिवृत्त्या व्यष्टित्वनिवृत्तिसम्भवेन तद्भावापत्तेरविरोधादुपासकस्य। इममेवार्थं श्रुतिराह—"देवो भूत्वा देवानप्येति"। एतादृशं फलम्भाव-नोत्कर्षेण भवति तन्मान्द्ये पूर्वोक्तमेव भवतीति दर्शयति—**स लोकतामिति**[1]। **आदिशब्देन** "एतासां देवतानां सायुज्यं सार्ष्टितां समानलोकतां यान्तीति" इत्यादिश्रुतयो गृह्यन्ते। सालोक्यादिफलभेदः पुराणेषु स्फुटः।

एवं सगुणोपासकानां तत्पदवाच्यार्थनिरूपणप्रसङ्गेन तत्तदुपासनया तत्तत्प्राप्तिफलमुक्त्वोपासनाप्रङ्गेन सर्वतो विरक्तानां मन्दप्रज्ञानां विचाराक्षमाणां[2] ब्रह्मजिज्ञासूनां निर्गुणब्रह्मोपासनया तत्साक्षात्कारद्वारा "ईक्षतिकर्म्मव्यपदेशात्स" इति न्यायेन

●

शंका—पूर्व कथनानुसार भावना के उत्कर्ष से ईश्वर का साक्षात्कार कर लेनेवाले पुरुष को ईश्वरभाव की प्राप्ति भले ही हो, किन्तु मन्दभावनावाले साधक पुरुष को किस फल की प्राप्ति होगी ?

समा०—भावनेति। मन्दभावनावाले साधक को पूर्वोक्त फल तो प्राप्त नहीं होता, तथापि मन्दभावना के तारतम्य के अनुरूप उस साधक को (१) सार्ष्टि, (२) सारूप्य, (३) सामीप्य, (४) सालोक्य—चार प्रकार का फल प्राप्त होता है।

अपने मनुष्यभाव (मनुष्यत्व) की विस्मृति पूर्वक उपास्य देवभाव की प्राप्ति का होना ही भावना का उत्कर्ष है। और अपने मनुष्यभाव के किञ्चित् स्मरण पूर्वक—उपास्य देवभाव की प्राप्ति का होना ही भावना की मन्दता है। जगत् की उत्पत्ति आदि व्यापार को छोड़कर उपासक पुरुष को परमेश्वर के समान ऐश्वर्य तथा भोगों की प्राप्ति होने को 'सार्ष्टि' कहते हैं। तथा उस मन्दभावनावाले उपासक को ईश्वर के समानरूप की प्राप्ति होने को 'सारूप्य' कहते हैं। तथा ईश्वर की समीपवर्तिता की प्राप्ति होने को 'सामीप्य' कहते हैं, और ईश्वर के लोक में निवास प्राप्त होने को 'सालोक्य' कहते हैं। इस रीति से वह उपासक अपनी मन्दभावना की तरतमता के कारण चार फलों को प्राप्त करता है। इसी बात को श्रुति कह रही है—"साम्नः" इत्यादि।

यह उपासक पुरुष अपनी भावना की तरतमता से हिरण्यगर्भ (प्राण) के सायुज्य (तादात्म्य), सालोक्यादि फलों को प्राप्त करता है। अर्थात् उसे तद्भावापत्ति प्राप्त होती है।

शंका—सभी कोई अपने ही स्वरूप में रहा करते हैं। कोई भी किसी दूसरे के रूप को ग्रहण नहीं किया करता, यह सभी को प्रत्यक्ष है, तब अन्य को अन्यभाव की प्राप्ति कैसे हो सकती है ? क्योंकि दोनों रूप एक-दूसरे से भिन्न (विरुद्ध) हैं।

समा०—समष्टि कारणों हो ही 'परिच्छेद' के अभिमान से व्यष्टित्व की प्राप्ति हुआ करती है। अतः अपरिच्छिन्नो-पासना से परिच्छेदाभिमान की निवृत्ति हो जाने से व्यष्टित्व का निवृत्त होना सम्भव है। उस कारण तद्भावापत्ति के होने में कोई विरोध नहीं है। एवञ्च उपासक को तद्भावापत्तिरूप फल प्राप्त होता है। इसी तथ्य को श्रुति ने भी बताया है—"देवो भूत्वा देवानप्येति"। अतः देवभाव (ईश्वरभाव) रूप फल की प्राप्ति, भावना के उत्कर्ष से ही होती है। और भावना के मन्द रहने पर उपर्युक्त चार प्रकार के फल प्राप्त होते हैं। 'इत्यादिश्रुतेः'—यहाँ के 'आदि' शब्द से अन्य श्रुतिवाक्यों का भी ग्रहण किया गया है। पुराणों में सालोक्यादि भिन्न-भिन्न फलों की प्राप्ति का होना स्पष्टतया बताया गया है।

'तत्' पदार्थ के वाच्यार्थ का निरूपण करते समय सगुण-ब्रह्म के उपासक पुरुषों को अपनी-अपनी उपासना के अनुरूप तत्तत् सगुणब्रह्म की प्राप्तिरूप फल बता चुके हैं।

१. सालोक्यानि इत्यपि पाठः।
२. विचाराक्षमाणामिति स्यात्।

ये पुनः साधनचतुष्टयसम्पन्ना विचारासमर्थाः मन्दप्रज्ञाः तेषां गुरुमुखाद् ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दलक्षणं ब्रह्माऽहमस्मीति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे जीवदवस्थायां मरणावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिफलम्भवति श्रुतिन्यायसामान्यात्। "ॐ मित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत"……

•

मणिप्रभायां मणिबुद्ध्या प्रवृत्तस्य मणिप्राप्तिवन्निर्गुणब्रह्मप्राप्तिं दर्शयति—**ये पुनरिति**। नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयम्। एतच्च अग्रे निरूपयिष्यति। ब्रह्मविचारासमर्था इत्यर्थः। तत्र हेतुमाह—**मन्देति**। नच मन्दप्रज्ञानां ब्रह्मज्ञाने कथं प्रवृत्तिः स्यादिति वाच्यम्, मुमुक्षावशात्। तथा श्रुतिस्मृतीतिहासपुराणेषु मन्दप्रज्ञानां मैत्रेयीप्रभृतीनां मुमुक्षूणां मोक्षसाधने ज्ञानादौ प्रवृत्तिदर्शनात्, प्रायः स्त्रीणां मन्दप्रज्ञत्वाच्च। एवं पुरुषाणामपि तत्सम्भवात् न काप्यनुपपत्तिरितिभावः।

अत्रैषाक्षरयोजना ये मन्दप्रज्ञा गुरुमुखाद्ब्रह्म निश्चित्य निरुपाधिकं ब्रह्माहमस्मीत्युपासते तेषां निर्गुणब्रह्मोपासनयोत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिः-फलम्भवतीति। कदा भवतीत्याकाङ्क्षायामाह—**अस्मिन्नेवेति**। निर्गुणब्रह्मोपास्तेर्निदिध्यासने

•

अब निर्गुणब्रह्म के उपासक पुरुषों को उस निर्गुणब्रह्म की प्राप्तिरूप फल 'ईक्षतिकर्मव्यपदेशात् सः'—इस न्याय से बता रहे हैं—**ये पुनरिति।**

जो पुरुष विवेक आदि चारों साधनों (साधन चतुष्टय) से सम्पन्न हैं, किन्तु बुद्धि की मन्दता के कारण वेदान्तशास्त्र का विचार करने में समर्थ नहीं हैं, तथापि निर्गुण ब्रह्म के साक्षात्कार की उत्कट इच्छा है, उन पुरुषों को चाहिये कि वे, श्रोत्रिय ब्रह्मनिष्ठ गुरु के मुख से निर्गुण ब्रह्म का यथार्थ ज्ञान प्राप्त करके सम्पूर्ण स्थूल-सूक्ष्म-कारण उपाधियों से रहित (शून्य), तथा सत्-चित्-आनन्दस्वरूप जो ब्रह्म है, वह 'मैं ही हूँ'—इस प्रकार से उपासना करें। उस निर्गुण ब्रह्म की उपासना से उसको या तो इसी शरीर में अर्थात् जीवित अवस्था में या मरणावस्था में या ब्रह्मलोक में निर्गुण-ब्रह्म का साक्षात्कार होकर निर्गुण ब्रह्मभाव की प्राप्तिरूप फल प्राप्त होता है। जैसे मणि की प्रभा में मणि बुद्धि कर के प्रवृत्त होनेवाले पुरुष को अन्ततः मणि की प्राप्ति हो जाती है, उसी प्रकार निदिध्यासनरूप निर्गुण उपासना से उसको निर्गुण ब्रह्म की प्राप्तिरूप फल प्राप्त होता है। अर्थात्—निर्गुण ब्रह्म की उपासना से यानी 'अहं ब्रह्मास्मि' इत्याकारक निदिध्यासन करते रहने से ब्रह्मसाक्षात्कार होने लगता है, इस प्रकार का ब्रह्मसाक्षात्कार का होना ही निर्गुणोपासना का फल है।

यह फल कब मिलता है? इस प्रश्न का उत्तर देते हैं—**अस्मिन्नेवेति।** निर्गुणब्रह्म की उपासना का पर्यवसान निदिध्यासन में होने से और निदिध्यासन, ब्रह्मसाक्षात्कार के प्रति अन्तरंग साधन होने से अनात्मा में आत्मबुद्धि निवृत्त हो जाती है। जिससे संस्कृत हुए अन्तःकरण वाले पुरुष की भावनापरिपाक की तरतमता के अनुसार इसीशरीर में (जीवित अवस्था में) अथवा मृत्यु के समय अथवा ब्रह्मलोक में साक्षात्कार रूप फल की प्राप्ति होती है। श्रुति ने भी यही कहा है कि निर्गुण ब्रह्म की 'अहं ब्रह्मास्मि' इत्याकारक निदिध्यासनरूप उपासना करते रहने से उसका हृदय अत्यन्त पवित्र (निर्मल) हो जाता है। तब उसे निर्गुण ब्रह्मसाक्षात्कार होता रहता है।

हम पहले बता चुके हैं कि वेदान्त वाक्यों के विचार करने में असमर्थ पुरुष, श्रोत्रिय ब्रह्मनिष्ठ गुरु के मुख से निर्गुण ब्रह्म के स्वरूप का परोक्ष निश्चय करके 'अहं ब्रह्मास्मि'—मैं ही निर्गुण ब्रह्म हूँ—इसप्रकार से निर्गुण ब्रह्म की उपासना करे। उस उपासना से उसको निर्गुण ब्रह्म का साक्षात्कार होता है **"ॐ"—इस प्रणवाक्षर के द्वारा ही पर-पुरुष का ध्यान करे। इस प्रकार से ध्यान करनेवाला, इस जीवघन से परात्पर पुरिशय पुरुष को देखता है—इत्यादि प्रतिपादन श्रुतियों ने किया है। गीता में भी प्रणवोपासना से परम गति बतायी है।**

गीता में (३-२५) कहा गया है कि जो पुरुष, मन्दमति हैं, वेदान्तवाक्यों का तात्पर्य नहीं समझ पाते हैं, वे पुरुष, ब्रह्मवेत्ता गुरु के मुख से निर्गुण ब्रह्म का श्रवणकर, जब भी 'अहं ब्रह्मास्मि'—इसप्रकार से ध्यान करता है, उसी समय वह उपासक भी निर्गुणब्रह्म के साक्षात्कार करने के कारण अज्ञानरूप मृत्यु को अवश्य ही तर लेते हैं अर्थात् अवश्य ही उसका अतिक्रमण (उल्लंघन) कर जाते हैं। 'तेऽपि चातितरन्त्येव' यह कहकर 'अपि' शब्द के प्रयोग से भगवान् ने 'कैमुतिकन्याय' को सूचित किया है। अर्थात् वेदान्त विचार न कर सकने वाले मन्दमति लोग भी उस निर्गुण ब्रह्म की उपासना से अज्ञानरूपी मृत्यु का विनाश करने में समर्थ हो जाते हैं, तो विचार कर सकने वाले बुद्धिमान् पुरुष, अज्ञानरूप मृत्यु का विनाशकर सकते हैं—इसमें संदेह ही कैसे किया जा सकता है? अर्थात् इसे अलग से कहने की आवश्यकता नहीं है।

स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते"। "ॐ मित्यात्मानं युञ्जीत"। "ॐ मित्येवं ध्यायथ आत्मान"मित्यादि श्रुतिभ्यः। भगवताप्युक्तम्, "ॐ मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन् देहं स याति परमाङ्गतिम्" इति ॥३९॥

●

पर्य्यवसानान्निदिध्यासनस्य ब्रह्मसाक्षात्कारं प्रत्यतरङ्गसाधनत्वावगमात्तेनानात्मन्यात्मबुद्धिनिवृत्तौ तत्संस्कृतान्तःकरणस्य भावनापरिपाकतारतम्येनास्मिन्नेवशरीरे जीवदवस्थायां मरणावस्थायां ब्रह्मलोके वा ब्रह्मसाक्षात्कारो भवति। "ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः" "ध्यानयोगेन सम्पश्यन्नात्मन्यात्मानमात्मना ध्यानेनात्मानं पश्यन्ति केचिदात्मानमात्मने"ति[1] श्रुतिभ्यः। ततः प्रारब्धे क्षीणे स्वस्वरूपेण ब्रह्म प्राप्नोतीत्यर्थः।

ननु मन्दप्रज्ञानां ब्रह्मस्वरूपस्याज्ञातत्वेन निर्गुणब्रह्मोपास्तिः कथं स्यात्, नह्यज्ञाततत्त्वं केनचिदुपासितुं शक्यत इत्यत आह—**गुरुमुखादिति**। "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियम्ब्रह्मनिष्ठम्" "शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो[2] भूत्वात्मन्येवात्मानं पश्येत्।" "आचार्य्यवान् पुरुषो वेद" "यस्य देवे पराभक्तिः"।

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" ॥
"श्रद्धवाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः" ॥

इत्यादि श्रुतिस्मृत्युक्तप्रकारेण गुरुमुपसृत्य तत्प्रसादात्तदुपदेशेन ब्रह्म तत्पदार्थं त्वं पदार्थञ्च विवेकेन देहेन्द्रियमनोबुद्ध्यहङ्काराज्ञान-विलक्षणत्वेन मायाविलक्षणत्वेन स्थूलसूक्ष्मकारणशरीराधिष्ठानभूतं प्रत्यगात्मानं मायाधिष्ठानं सच्चिदानन्दलक्षणमद्वितीयं परमात्मानञ्च निश्चित्य निश्चयेन ज्ञात्वा "यत्तदद्रेश्यमग्राह्यम्" "अशब्दमस्पर्शमरूपमव्ययम्" "अस्थूलमनण्वह्रस्वमदीर्घम्" "अप्राणो ह्यमनाश्शुभ्रः" "असङ्गोह्ययं पुरुषः"। "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।"

"अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतःस्थाणुरचलोऽयं सनातनः॥"
"अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते"।

"तदव्यक्तमाह" "अक्षरधियान्त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमि"त्यादिश्रुतिस्मृतिन्यायैर्ब्रह्मणो निरुपाधिकत्वावगमान्निर्गुणब्रह्मोपासनं सम्भवत्येव स्वस्य विचारासमर्थत्वेऽपि गुरूपदेशेन तज्ज्ञानस्य परोक्षस्य सम्भवादित्यर्थः।

●

शंका—मन्दमतियों की ब्रह्मज्ञान में प्रवृत्ति होना कैसे सम्भव है?

समा०—मन्दमतियों को भी मुमुक्षा (मुक्ति की इच्छा) तो होती है। मैत्रेयीप्रभृति मन्दमति स्त्रियाँ भी मुमुक्षु थीं। अतएव मोक्ष प्राप्ति के उपायभूत ज्ञान के अर्जनार्थ उनकी प्रवृत्ति हुई है—यह सब, श्रुति-स्मृति-पुराण-इतिहास के देखने से अवगत होता है। स्त्रियों की तरह पुरुष भी मन्दमति हुआ करते हैं। मुमुक्षावशात् उनकी भी प्रवृत्ति होना असम्भव नहीं है। तब अर्जितज्ञान के प्रसाद से निर्मल अन्तःकरण हो जाने से अपने में ही अपने स्वरूप को ध्यान के द्वारा देखते हैं। तदनन्तर प्रारब्ध कर्म के क्षीण हो जाने पर स्व-स्वरूप से ही वह स्थिर हो जाता है अर्थात् वह ब्रह्म को प्राप्त कर लेता है।

शंका—जो मन्दप्रज्ञ पुरुष हैं, उन्हें ब्रह्म स्वरूप अवगत (ज्ञात) न रहने के कारण वे निर्गुणब्रह्म की उपासना कैसे कर सकेंगे? क्योंकि जो ज्ञात नहीं है, उसकी उपासना करना कभी सम्भव नहीं है।

समा०—अज्ञात पदार्थ को जानने के लिए श्रुति-स्मृतियों के कथनानुसार गुरु के पास जाकर उन्हें प्रणाम कर आर्तभाव से उनकी प्रार्थना करे, तब कृपापूर्वक उनके प्रसाद से उपदेश प्राप्त होगा। उससे 'तत्त्वमसि'—महावाक्य के 'तत्' पदार्थ, और 'त्वम्' पदार्थ का विवेक हो पायेगा। तब समझ में आवेगा कि देह-इन्द्रिय-मन-बुद्धि-अहङ्कार-अज्ञान इन सबसे बिलक्षण तथा माया से भी भिन्न (विलक्षण) होने के कारण स्थूल-सूक्ष्म-कारण शरीरों का अधिष्ठानभूत सत्-चित्-आनन्दलक्षण अद्वितीय परमात्मा है।

आगे विलापन का प्रकार बताया जायेगा। उस प्रकार विलापन करने से 'ब्रह्म' से उपाधिका विनिर्मोक समझ लेना चाहिये। यथोक्त उपासना करने से यथोक्त फल होता है—यह श्रुति व ब्रह्मसूत्रादि न्याय से भी समर्थित है।

---

१. ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मनेति गीतासु (१३.२) इह्याप्युभयात्र आत्मनमित्यत्र आत्मनमित्येव पठितव्यम् ॥

२. श्रद्धावित्त इत्युपनिषदि।

"अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥"

इति च। एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणस्तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितम्। अयमेवाध्यारोप इत्युच्यते। अस्यापवादश्चेदानीमुच्यते।

●

निर्गुणोपासनमभिनीय दर्शयति—**सर्वेति**। उक्तलक्षणं 'ब्रह्मैवाहमस्मि अहम्ब्रह्मास्मी'ति व्यतिहारेणोपासनं कर्त्तव्यं, "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते" "तद्योऽहं सोऽसै योऽसौ सोऽहं" "व्यतिहारो विशिषन्ति हीतरवदि"त्यादि श्रुतिसूत्रेभ्यः। तथा चोक्तम्,

"चिदात्माहं नित्यशुद्धबुद्धमुक्तसदद्वयः। परमानन्दसन्दोहो वासुदेवोऽहमोमि"ति॥

वक्ष्यमाणविलापनेन ब्रह्मण उपाधिविनिर्मोको द्रष्टव्यः। एवं यथोक्तोपासनेन यथोक्तं फलम्भवतीति कुतो ज्ञायते? इत्याकाङ्क्षायामाह—**श्रुतीति**। "तं यथा यथोपासते तत्तथैव भवती"त्युदाहृतश्रुतेः। तन्मूलस्य "अप्रतीकालम्बनान्नयतीति बादरायणः उभयथाऽदोषात्तत्[1] क्रतुश्चे"ति न्यायस्य प्रकृतेऽपि तुल्यत्वादेवं ज्ञायत इत्यर्थः। यथोक्तब्रह्मोपासनेन तत्प्राप्तौ प्रमाणत्वेन श्रुत्यन्तराण्युपन्यस्यति—**ॐइत्येतेनेति**। अत्र तृतीया द्वितीयार्थे द्रष्टव्या, ॐकारवाच्यः परमात्माहमस्मीति **यः परं पुरुषं** परमात्मानम**भिध्यायीत** उपासीत **स** उपासकः**पुरुषमीक्षत** इति श्रुतौ योजना। अयमेवार्थः श्रुत्यन्तराणामपि। **आदिशब्देन** "ॐ कम्ब्रह्म खम्ब्रह्म" "खम्ब्रह्म खं पुराण"मित्यादि श्रुतिर्गृह्यते। तत्र स्मृतिमप्याह—**भगवतेति**। प्रणवजपङ्कुर्वन् **मां** तत्पदलक्ष्यं परमात्मानं वासुदेवमहम्ब्रह्मास्मीति **अनुस्मरन्ननुसन्धानं** कुर्वन् **देहन्त्यजन्** यः पूर्वोक्तयोगधारणवान्मरणं प्राप्नोति **स परमाङ्गतिं** ब्रह्मभावलक्षणां मुक्तिं **याति** प्राप्नोतीत्यर्थः॥३९॥

त्रयोदशाध्यायश्लोकमप्यत्रैवोदाहरति—**अन्येत्विति**। **अन्ये** साधनचतुष्टयसम्पन्ना मन्दप्रज्ञा **एवमजानन्तो** विचारं कर्त्तुमशक्ताः **अन्येभ्य** आचार्येभ्यो ब्रह्मस्वरूपं **श्रुत्वा** तत्त्वं पदार्थौ विवेकेन परिशोध्य **श्रुतिपरायणाः** सन्तोऽहम् ब्रह्मास्मीति **उपासते** ध्यानङ्कुर्वन्ति **तेऽपि** सर्वानर्थहेतुं मृत्युमज्ञानम् **अतितरन्त्येव** अतितरान्नाशयन्त्येव नास्त्यत्र सन्देहः।

"तेषां नित्याभियुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥

●

प्रमाण के रूप में जो भगवदुक्ति मूल में दी है (ॐ इत्येकाक्षर आदि) उसका यह अर्थ है कि प्रणव का जप करते हुए जो पुरुष, देह त्याग करता है, वह मुझे अर्थात् 'तत्' पद के लक्ष्यभूत परमात्मा मुझ वासुदेव को प्राप्त होता है। अभिप्राय यह है कि 'अहम्ब्रह्मास्मि'—यह अनुसन्धान (भावना-स्मरण) करता हुआ जो देह त्याग करता है (मृत्यु को-प्राणों को त्यागता है) वह परमगति अर्थात् ब्रह्मभावलक्षणामुक्ति को प्राप्त करता है॥३९॥

पूर्वोक्त कथन का निष्कर्ष यही है कि ज्ञानकाण्ड में जो सगुणोपासना तथा निर्गुणोपासना बताई गयी है, उन समस्त उपासनाओं का अनुष्ठान एकाग्रचित्त के द्वारा करने पर ब्रह्मसाक्षात्कारात्मक मुख्य फल की प्राप्ति होती है, और ब्रह्मलोकादिलोकप्राप्ति उन उपासनाओं का अवान्तर फल है। इसलिए ब्रह्मसूत्र के रचयिता भगवान् व्यास ने ज्ञानकाण्ड में ही उन उपासनाओं का विचार किया है।

अब ग्रन्थकार गीता के त्रयोदशाध्याय के श्लोक को यहाँ पर उद्धृत कर रहे हैं—**अन्येत्विति**। **अन्य लोग अर्थात् साधनचतुष्टयसम्पन्न मन्दप्रज्ञ लोग उक्त सरणि को न जानने के कारण विचार करने में असमर्थ रहते हैं, तो उनका कर्तव्य है कि वे किसी श्रोत्रिय ब्रह्मनिष्ठ गुरु से ब्रह्मस्वरूप का श्रवण करके 'तत्' और 'त्वम्' पदार्थ का विवेकपूर्वक परिशोधन करके श्रुतिपरायण होते हुए 'अहम्ब्रह्मास्मि' ऐसी उपासना (ध्यान) करें तो वे भी सर्वानर्थकारणीभूत मृत्यु (अज्ञान) के पार हो जाते हैं, अर्थात् उनके अज्ञान का 'समूल' नाश हो जाता है, इसमें किञ्चिन्मात्र भी सन्देह नहीं है।**

वे भी तरजाते हैं—यह कहने से स्पष्ट होता है कि जो विचार कुशल हैं, वे मृत्य को पार कर जाते हैं, यह कहना ही क्या है, यह तो कैमुतिकन्याय से सिद्ध ही है, यह 'अपि' शब्द के प्रयोग से सूचित किया गया है। इस प्रकार—सृष्टि आदि के निरूपण प्रसंग से प्राप्त उपासना के विचार को समाप्त करके मुख्य विषय (परमप्रकृत विषय) का उपसंहार कर रहे हैं—**एवमिति**।

१. ख, उभयथाप्यदोषादिति पाठः।

अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेणाभावनिश्चयः। यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किन्तु शुक्तिरित्यभावनिश्चयः। अयमेव बाधो विलापनमिति चोच्यते। स च बाधस्त्रिविधः॥ शास्त्रियो यौक्तिकः प्रत्यक्षश्चेति ॥४०॥

●

तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥"

इति भगवतोक्तत्वात्। 'तेऽपि चातितरन्ती'त्यनेन विचारकुशलानां मृत्युतरणं कैमुतिकन्यायप्रसिद्धमिति सूचयति **अपिकारणेति** श्लोकतात्पर्य्यार्थः, किम्बहुना! सर्वासां सगुणनिर्गुणोपासनानां चित्तैकाग्र्यद्वारा ब्रह्मसाक्षात्कार एव मुख्यफलं, ज्ञानप्रकरणे पठितत्वात्। एतदभिप्रायेणैव सूत्रकृता बादरायणेनोपासनाविचारो ज्ञानकाण्डे कृतः। ब्रह्मलोकादिफलन्तु नान्तरीयकमिति भावः।

एवं सृष्ट्यादिनिरूपणप्रसङ्गागतमुपासनाविचारं परिसमाप्य परमप्रकृतमुपसंहरति—**एवमिति। एवमुक्तरीत्या।** नन्वध्यारोपापवादयोर्ब्रह्मप्रतिपत्तिहेतुत्वात्तावपि निरूपणीयावित्याशङ्क्य ब्रह्मणो मायाद्वारा सूक्ष्मस्थूलप्रपञ्चसृष्टिनिरूपण**मुखेन** जगज्जन्मादिकारणत्वनिरूपणमेवाध्यारोपनिरूपणमित्याह—**अयमेवेति।** अतस्मिंस्तद्बुद्धिरध्यारोपः। अपवादनिरूपणं प्रतिजानीते—**अस्येति। इदानी**मध्यारोपनिरूपणानन्तरं, प्रसक्तस्य प्रतिषेधसम्भवादिति भावः।

कोऽयमपवादः? इत्याकाङ्क्षायां तत्स्वरूपमाह—**अपवादो नामेति। तद्व्यतिरेकेण** तद्भिन्नत्वेन, इत्थंभावे तृतीया। उक्तमेवार्थमुदाहरति—**यथेति।** ननु तत्त्वमस्यादिवाक्यार्थज्ञानादज्ञानतत्कार्य्यं बाध्यते।

"तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्यासहकार्य्येण नासीदस्ति भविष्यती"ति॥

वार्त्तिकवचनाद्। अस्मदादीनां घटज्ञानेन घटाज्ञाननिवृत्तिवदहम् ब्रह्मास्मीति ब्रह्मसाक्षात्कारेण तदज्ञाननिवृत्तेः विद्वदनुभवसिद्धत्वाच्चेति वदन्ति। तत्र कोऽयम्बाधः? इत्याकाङ्क्षायामयमपवादः स एव बाध इत्युच्यते इत्याह—**अयमेवेति। यत्र** यत्प्रतीयते तत्र तस्य त्रिषु कालेऽष्वत्यन्ताभावनिश्चयो बाधः! तं विभजते—**स चेति।** त्रैविध्यमेवाह—**शास्त्रीयेति ॥४०॥**

●

शंका—ब्रह्मप्रतिपत्ति (ब्रह्मज्ञान) में कारण तो 'अध्यारोप' और 'अपवाद' हैं। अतः उनका भी निरूपण करना चाहिये।

पहिले बता चुके हैं कि 'जगत्' के जन्मादिकों का कारण मायोपहित तत् पदार्थ 'ब्रह्म' है। अर्थात् माया के द्वारा सूक्ष्म-स्थूल प्रपञ्च (सृष्टि) का निरूपण करते हुए 'जगज्जन्मादिकारणत्व' रूप तटस्थलक्षण 'ब्रह्म' का किया गया है, यही 'अध्यारोप' का निरूपण है, अतद् में तद्बुद्धि करना ही अध्यारोप है। जैसे—वस्तुतः जगद्भाव से रहित 'ब्रह्म' में 'जगद्' बुद्धि होना, यही 'अध्यारोप' है। अध्यारोप और अपवाद दोनों के द्वारा ही गुरु अथवा शास्त्र, अधिकारी पुरुष को 'निर्गुण ब्रह्म' का उपदेश करते हैं।

अब अध्यारोप के निरूपण के पश्चात् अपवाद का निरूपण करते हैं, क्योंकि प्रसक्त का प्रतिषेध किया जाता है।

जिस अधिष्ठान (आश्रय) में जिस पदार्थ का किसी भी काल में (तीनों कालों में) अस्तित्व नहीं रहता, तथापि भ्रान्ति से उस पदार्थ की वहाँ प्रतीति होकर, उसी अधिष्ठान में भ्रम से प्रतीयमान पदार्थ के अभाव का निश्चय हो जाना ही 'अपवाद' है। जैसे 'शुक्ति' में भ्रमवशात् 'रजत' की प्रतीति होती है, किन्तु पश्चात् यह रजत नहीं है, अपितु 'शुक्ति' है, इसप्रकार का जो रजत के अभाव का निश्चय होता है, उसी को अपवाद कहा जाता है। प्रकृत प्रसंग में भी 'अधिष्ठानात्मकब्रह्म' में भ्रमवशात् प्रतीयमान जो प्रपञ्च है, उसके अभाव का निश्चय, उसी अधिष्ठान में हो जाता है, क्योंकि ब्रह्मरूप अधिष्ठान में किसी भी काल में प्रपञ्च (सृष्टि) नहीं रहता। इस प्रकार से प्रपञ्चाभाव का जो निश्चय है, वही उस प्रपञ्च का अपवाद है। **इस अपवाद को शास्त्रीय शब्द में 'बाध' कहते हैं, अथवा 'विलापन' कहते हैं।**

शंका—'तत्त्वमसि' आदि महावाक्य के अर्थज्ञान से अज्ञान और उसके कार्य का बाध हो जाता है। वार्तिककार कहते हैं—कि 'घट' के ज्ञान से जैसे घट के अज्ञान की निवृत्ति हो जाती है, उसीतरह 'अहम्ब्रह्मास्मि'—इस ब्रह्मसाक्षात्कार से उसके अज्ञान की निवृत्ति होती है। और यह भो कहा है—कि उक्त तथ्य का अनुभव भी विद्वानों (ज्ञानियों) को हुआ है। प्रश्न—यह 'बाध' पदार्थ क्या है?

उत्तर—पूर्वोक्त 'अपवाद' को ही 'बाध' कहते हैं। जिस अधिष्ठान में जो वस्तु प्रतीत होती है, उसी अधिष्ठान में उस प्रतीयमान वस्तु के त्रैकालिक अत्यन्ताभाव के निश्चय को 'बाध' कहते हैं। **वह बाध तीन प्रकार से होता है— (१) शास्त्रीय, (२) यौक्तिक और (३) प्रत्यक्ष—इन तीन प्रकारों से बाध होता दिखाई देता है॥ ४०॥**

"अथात आदेशो नेति नेति" "नेह नानास्ति किञ्चने"त्यादि शास्त्राद्ब्रह्मव्यतिरेकेण प्रपञ्चाभावनिश्चयः शास्त्रीयो बाधः। मृद्व्यतिरेकेण घटाभावनिश्चयवत् निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपञ्चाभावं निश्चित्य दृश्यमानस्य मिथ्यात्वनिश्चयेन ब्रह्मात्ममात्रत्वनिश्चयो यौक्तिकबाधः। अहम्ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेणाज्ञानतत्कार्य्यनिवृत्तिः प्रत्यक्षबाधः।

यौक्तिकबाधस्यायंक्रमः—स्थूलप्रपञ्चं सर्वमपि स्थूलभूतेषु विलाप्य, तद्व्यतिरेकेण तन्नास्तीति निश्चित्य, स्थूलभूतानि समष्टिव्यष्टिसूक्ष्मशरीरञ्च सूक्ष्मभूतेषु विलाप्य, तत्रापि पृथिवीमप्सु विलाप्य, अपस्तेजसि, तेजोवायौ, वायुमाकाशे, आकाशमज्ञाने अज्ञानं चिन्मात्रे विलापयेत्।

●

आद्यं व्युत्पादयति—**अथात इत्यादिना**। द्वितीयं व्युत्पादयति—**मृद्व्यतिरेकेणेति**। तृतीयं व्युत्पादयति—**अहम्ब्रह्मास्मीत्यादिना**।

"विपर्य्ययेण तु क्रमोऽत उपपद्यते चे"ति न्यायमनुसरंस्तत्र यौक्तिकबाधस्य क्रमन्निरूपयति—**यौक्तिकबाधस्येति**। अयं वक्ष्यमाणः। इदं शब्दार्थमाह—**स्थूलप्रपञ्चमिति**। सर्वं स्थूलशरीरमारभ्य ब्रह्माण्डपर्य्यन्तं **स्थूलभूतेषु** पञ्चीकृतभूतेषु तेषां तत्कारणत्वात्तेषु **तद्विलापनमुचितमिति** भावः। किं तद्विलापनमित्याकाङ्क्षायामाह—**तदिति**। कारणीभूतपञ्चीकृतभूतव्यतिरेकेण ब्रह्माण्डतदन्तर्त्तिकार्य्यजातन्नास्तीति **निश्चित्येत्यर्थः**। एतदुक्तम्भवति—दृश्यमानस्य कार्य्यजातस्य कारणसत्तातिरिक्तसत्तानङ्गीकारात् कारणव्यतिरेकेण कार्य्यन्नास्तीति निश्चित्य तद्विस्मृत्य कारणैकगोचरं स्मरणं विलापनमिति। स्थूलभूतानि स्वस्वकारणीभूततामसांशेष्वन्तःकरणं ज्ञानेन्द्रियाणि स्वस्वकारणीभूतसात्त्विकांशेषु प्राणकर्म्मेन्द्रियाणि स्वस्वकारणीभूतराजसांशेषु विलाप्येत्यर्थः।

●

ग्रन्थकार आद्यबाध अर्थात् शास्त्रीय बाध को बता रहे हैं—**अथात इति। शास्त्रवचन से अधिष्ठानरूप 'ब्रह्म' में सम्पूर्ण प्रपञ्च के अभाव का जो निश्चय होता है, उसे शास्त्रीय बाध कहते हैं।**

द्वितीय यौक्तिक बाध को बताते हैं—**मृद्व्यतिरेकेणेति। मृत्तिकारूप उपादानकारण से भिन्न (पृथक्) रूप में प्रतीयमान जो 'घट' रूप कार्य के अभाव का जैसे—निश्चय किया जाता है, उसी तरह सम्पूर्ण प्रपञ्च का अभिन्न निमित्तोपादानकारण जो 'ब्रह्म' है, उससे भिन्न (पृथक्) सम्पूर्ण प्रपञ्च के अभाव का निश्चय करके तथा उस प्रपञ्च के मिथ्यात्व का निश्चय करके जो एकमात्र 'ब्रह्म' का निश्चय हो पाता है, वह यौक्तिकबाध से होता है। अर्थात् ब्रह्मरूप जो निमित्तोपादानकारण है, उससे भिन्न (पृथक्) प्रपञ्च नाम की कोई वस्तु नहीं है, उसकी जो प्रतीति हो रही है, वह मिथ्या है। इसी को यौक्तिकबाध कहते हैं।**

अब तृतीय प्रत्यक्षबाध को बताते हैं—**अहम्ब्रह्मास्मीति। 'तत्त्वमसि'-इत्यादि वाक्यों से होनेवाले साक्षात्कार का अनुभव करके कार्यरूप प्रपञ्च के सहित अज्ञान की जो निवृत्ति होती है, उसे प्रात्यक्षिकबाध कहते हैं।**

विपर्ययाधिकरण के (२।३।१४) न्याय का अनुसरण करते हुए यौक्तिकबाध के क्रम का निरूपण कर रहे हैं—**यौक्तिकबाधस्येति। यौक्तिकबाध का क्रम इस प्रकार है—स्थूलशरीर से लेकर ब्रह्माण्ड तक जितना भी स्थूल-प्रपञ्च है, वह 'पञ्चीकृत स्थूलभूतों का 'कार्य' है। इसलिए उस स्थूलप्रपञ्च का उन स्थूलभूतों में 'लय' करना चाहिए, अर्थात् 'स्थूलभूतों' से 'स्थूलप्रपञ्च' भिन्न नहीं है—यह भावना निश्चितरूप से करनी चाहिए। तदनन्तर उन स्थूलभूतों का तथा समष्टि और व्यष्टिरूप समस्त सूक्ष्मशरीरों का उनके अपने कारणभूत अपञ्चीकृत पञ्चसूक्ष्मभूतों में लय करे। अर्थात् वे स्थूलभूत तथा समष्टि-व्यष्टि सूक्ष्मशरीर, उन सूक्ष्मभूतों के कार्य होने से उनसे भिन्न (पृथक्) नहीं हैं, यह निश्चयात्मक भावना करनी चाहिए।** तथा जिस-जिस सूक्ष्मभूत के जिस-जिस सात्विकादि अंश से जो-जो इन्द्रियादिकार्य उत्पन्न हुए हैं, उस-उस कार्य का उस-उस सूक्ष्मभूत के सात्विकादि अंश में ही लय करना चाहिये। अर्थात् 'स्थूलभूतों' का 'सूक्ष्मभूतों' के 'तामस अंश' में लय करना चाहिये, और 'ज्ञानेन्द्रियों' का तथा 'अन्तःकरण' का सूक्ष्मभूतों के 'सात्त्विकअंश' में लय करना चाहिये, और 'कर्मेन्द्रियों' का तथा 'प्राणों' का सूक्ष्मभूतों के 'राजसअंश' में लय करना चाहिये। तदनन्तर उन सूक्ष्मभूतों का भी अपने-अपने कारणों में लय करना चाहिये। अर्थात् **'पृथिवी' का तो 'जल' में लय करे, 'जल' का 'तेज' में लय करे, 'तेज' का 'वायु' में लय करे, 'वायु' का 'आकाश' में लय करें, 'आकाश' का 'अज्ञान' में लय करे और 'अज्ञान' का 'चैतन्य' में लय करे।** तात्पर्य यह है

तथाच स्मृतिः—

"जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते ॥" इति।

उक्तञ्च।

"अकारं पुरुषं विश्वमुकारे प्रविलापयेत्।
उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् ॥
मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदि" ति ॥

आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धम्भवति ॥४१॥

तथाहि, मायादिसमष्टिस्तदुपहितश्चैतन्यमेतदाधारानुपहितमखण्डचैतन्यञ्च तप्तायः—पिण्डवत्एतत्त्रयमविविक्तमेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति। विविक्तमखण्डचैतन्यं तत्पदलक्ष्यार्थो भवति ॥४२॥

●

इदानीं सूक्ष्मभूतानामुत्तरोत्तरविलापनमाह—**तत्रापीति**। इदानीं परमकारणस्य मूलाज्ञानस्य चिन्मात्रे विलापनमाह—**अज्ञानमिति**। उक्तक्रमे प्रमाणत्वेन विष्णुपुराणवचनमुदाहरति—**तथा चेति**। तत्र वार्तिकसम्मतिमाह—**उक्तञ्चेति**। अध्यारोपापवादनिरूपणेन फलितमर्थं दर्शयति—**आभ्यामिति** ॥४१॥

तदेवोपपादयति—**तथाहीति**। तत्पदार्थं शोधयति—**मायाति**। माया आदिर्यस्याः स्थूलसूक्ष्मभूतायाः समष्टेः सा तथोक्ता मायादिश्चासौ समष्टिश्चेत्यनन्तरं कर्म्मधारयः। अयम्भावः—समष्टिस्थूलसूक्ष्मशरीरमायातदपहितवैश्वानरसूत्रात्मेश्वरचैतन्यमेतदाधारानुपहिताखण्डचैतन्यमेतत्त्रयं तप्तायःपिण्डवदविविक्तमेकत्वेनावभासमानं तत्पदस्य वाच्यार्थं इति। तत्पदलक्ष्यार्थमाह—**विविक्तमिति**। समष्टिस्थूलसूक्ष्मशरीरमायाभ्यो **विविक्तं** विवेकेनान्वयव्यतिरेकाभ्यां पृथक्कृत्य निश्चितम् **अखण्डचैतन्यं** तत्त्वमसिवाक्ये तत्पदलक्ष्यार्थं इत्यर्थः।

एतावन्वयव्यतिरेकौ तत्पदार्थशोधनोपायौ। तथाहि—स्थूलप्रपञ्चस्थित्यवस्थायां तत्साक्षित्वेन पञ्चीकरणात्पूर्वं सूक्ष्मभूततत्कार्य्यसाक्षित्वेनाकाशादिसृष्टेः पूर्वं प्रलयावस्थायां मायासाक्षित्वेन तत्त्वज्ञानेनाज्ञाननिवृत्तौ भोगेन प्रारब्धे च क्षीणे जीवस्य वर्त्तमानदेहपातोत्तरं विदेहमुक्तावस्थायामखण्डस्वप्रकाशचिद्रूपेण भानं तत्पदार्थस्य परमात्मनोऽन्वयः। समष्टिस्थूलशरीरस्य पञ्ची-

●

कि किसी भी कार्य की सत्ता, उसके अपने उपादान कारण की सत्ता से भिन्न नहीं हुआ करती। अतः कोई भी कार्य, अपने उपादानकारण से भिन्न नहीं है। यह निश्चय करके 'कार्य' को विस्मृत कर दे, तब केवल 'कारण' का ही स्मरण रह जायेगा। इसी को 'कारण' में 'कार्य' का विलापन कहते हैं। सम्पूर्ण प्रपञ्च का परमकारण एकमात्र 'ब्रह्म' है। इसलिये सम्पूर्ण प्रपञ्च को भूलाकर (विस्मृत करके) शेष में जो ब्रह्मविषयक स्मरण है, वही ब्रह्म में सम्पूर्ण प्रपञ्च का विलापन कहलाता है। इसी को वेदान्त में यौक्तिकबाध कहते हैं।

इसी यौक्तिक बाध को विष्णु पुराण में भी कहा गया है—हे नारद ! जगत् के आधारभूत पृथिवी का जल में लय होता है और जल का तेज में लय होता है, और तेज का वायु में लय होता है, और वायु का आकाश में लय होता है और आकाश का अव्यक्त में लय होता है और मायारूपी अव्यक्त का परमात्मा में लय होता है।

इस यौक्तिक बाध को वार्तिककार ने भी बताया है। अध्यारोप और अपवाद निरूपण के द्वारा प्रतिफलित अर्थ को बता रहे हैं—**इसप्रकार अध्यारोप और अपवाद दोनों के द्वारा 'तत्' और 'त्वम्' पदार्थ का शोधन भी सिद्ध होता है ॥४१॥**

शोधन की प्रक्रिया इस प्रकार है—**समष्टि स्थूलशरीर, समष्टि सूक्ष्मशरीर, और माया इन तीनों से यथाक्रम उपहित वैश्वानर, सूत्रात्मा, और ईश्वर चैतन्य—इन सबका अधिष्ठानरूप (आधारभूत) निरुपाधिक अखण्ड चैतन्य (माया, ईश्वर और चैतन्य) इन तीनों का प्रतप्तलोह पिण्ड के समान एक रूपाकार प्रतीत होना 'तत्' पद का 'वाच्यार्थ' है। और समष्टि स्थूल शरीर, तथा समष्टि सूक्ष्मशरीर और माया इन सबका अन्वय—व्यतिरेक के द्वारा पृथक्तया 'तत्वमसि' वाक्य से निश्चित हुआ जो अखण्ड चैतन्य है, वही (अखण्ड चैतन्य) 'तत्' पद का लक्ष्यार्थ (लक्ष्य अर्थ) है।**

'तत्' पदार्थ के शोधन का उपाय (साधन) जो 'अन्वय-व्यतिरेक' है, उसका प्रकार यह है—पञ्चीकृत स्थूल प्रपञ्च (स्थूल भूत) की स्थिति की अवस्था में उसके (स्थूल प्रपञ्च के) साक्षी के रूप में परमात्मा विद्यमान है, उसी तरह

अविद्यादिव्यष्टिरेतदुपहितचैतन्यमेतदाधारानुपहितं प्रत्यक्चैतन्यम्, एतत्त्रयं तप्तायःपिण्डवदविविक्तमेकत्वेनावभासमानं त्वं-पदवाच्यार्थो भवति। विविक्तं प्रत्यक्चैतन्यं त्वं-पदलक्ष्यार्थो भवति। एतौ लक्ष्यार्थावुपादाय सम्बन्धत्रयेण सहितं तत्त्वमस्यादिवाक्यं लक्षणया अखण्डार्थबोधकम्भवति ॥४३॥

●

करणात्पूर्वमभानं समष्टिसूक्ष्मशरीरस्याकाशाद्युत्पत्तेः पूर्वं मायायामुक्तावस्थायां व्यतिरेकः, जीववत्परमात्मनोजाग्रदादिसम्बधाभावात्। कार्य्यस्य कारणात्मनारम्भणाधिकरणन्यायेनारोपितस्य चाधिष्ठानात्मना सत्त्वाङ्गीकारादसदुत्पत्तिवादनिराकरणाच्च। यथोक्तप्रकारेण समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायानां यथोक्तावस्थास्वभानं व्यतिरेकः। तत्पदार्थस्य परमात्मनो भानमन्वय इत्येवमन्वयव्यतिरेकावभ्युपगन्तव्यौ नत्वन्यादृशौ। तयोरत्रासम्भवात्। "अन्यत्र धर्मा"दित्यादिश्रुत्या परमात्मनः पुण्यापुण्यसम्बन्धानवगमाच्च। तस्मादाभ्यामन्वयव्यतिरेकाभ्यां शोधिततत्पदार्थो मायातत्कार्याभ्यामपरामृष्टखण्डसच्चिदानन्दस्वरूपः परमात्मा तत्पदस्य लक्ष्यार्थं इति भावः ॥४२॥

त्वं पदार्थं शोधयति—**अविद्यादीति**। अविद्या आदिर्यस्याः सा तथा सा चासौ व्यष्टिश्चेत्यविद्यादिव्यष्टि। अयमभिप्रायः व्यष्टिस्थूलसूक्ष्मशरीरतत्कारणाविद्या एतदुपहितविश्वतैजसप्राज्ञाश्च एतदाधारानुपहितप्रत्यक्चैतन्यं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थं इति। त्वं पदस्य लक्ष्यार्थमाह—**विविक्तमिति**। अन्वयव्यतिरेकाभ्यां स्थूलसूक्ष्मकारणशरीरेभ्यो **विविक्तं** पृथक्कृत्य। निश्चितं **प्रतीयम्**[1] प्रतीपं जडानृतदुःखात्मकाहङ्कारादिभ्यः प्रातिलोम्येन सच्चिदानन्दलक्षणतयाञ्चति प्रकाशत इति प्रत्यक्, प्रत्यक् च तच्चैतन्यं प्रत्यक्चैतन्यं चेतनस्य भावश्चैतन्यं ज्ञप्तिस्वरूपमिति यावत्। तत्त्वं पदार्थौ शोधनोपायौ अन्वयव्यतिरेकौ दर्शितौ—अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः। सोऽन्वय व्यतिरेकस्तद्भानेऽन्यानवभासम् ॥

●

पञ्चीकरण के पूर्व (अपञ्चीकृत अवस्था में) भी उन सूक्ष्म भूतों के तथा उनके 'कार्य' के साक्षी के रूप में वही परमात्मा विद्यमान है, तथा उन आकाशादि सूक्ष्मभूतों की उत्पत्ति से पूर्व (प्रलयावस्था में) भी 'माया' के साक्षी के रूप में वही परमात्मा विद्यमान है। और 'तत्त्वज्ञान' से मायारूपी अज्ञान के निवृत्त होने पर भी तथा जीव की विदेह मुक्ति की अवस्था में (भोग के द्वारा प्रारब्ध कर्म के नष्ट होने पर जीव के वर्तमान शरीर के पात के अनन्तर) भी वही परमात्मा अखण्ड-स्वप्रकाश चैतन्य के रूप से विद्यमान रहता ही है। यही 'तत्' पदार्थरूप परमात्मा का 'अन्वय' है। और पञ्चीकरण के पूर्व, समष्टि स्थूल शरीर का भान नहीं होता, और आकाशादिक भूतों की उत्पत्ति के पूर्व, 'समष्टि सूक्ष्मशरीर' का भान नहीं होता, तथा 'माया' का 'मुक्ति' की अवस्था में भान नहीं होता। यही 'समष्टि स्थूल शरीर का तथा समष्टि सूक्ष्मशरीर का तथा 'माया' का 'व्यतिरेक' है। इसरीति से अन्वय व्यतिरेक के द्वारा परिशोधित जो 'तत्' पदार्थ है, वह, कार्यसहित माया के सम्बन्ध से रहित हुआ, अखण्ड, सत्, चित्, आनन्दस्वरूप परमात्मा, 'तत्' पद का लक्ष्यार्थ हो जाता है ॥ ४२ ॥

अब 'त्वम्' पदार्थ का शोधन करते हैं—**अविद्यादीति**। (१) व्यष्टि स्थूलशरीर, (२) व्यष्टि सूक्ष्मशरीर, और (३) **दोनों की कारणरूप अविद्या, तथा क्रमशः** इन तीनों शरीरों से उपहित (१) विश्व, तैजस, और (३) प्राज्ञ, **इन तीनों का आधारभूत अनुपहित प्रत्यक् चैतन्य**—अर्थात् (१) अविद्या आदि (२) उपहित हुए वैश्व-तैजस-प्राज्ञ, (३) आधारभूत अनुपहित **प्रत्यक्-चैतन्य, ये तीनों प्रतप्त लोहपिण्ड के समान एकत्वेन भासमान अर्थात् एकाकार (एकरूप से) जब प्रतीत होते हैं उस प्रतीति को 'त्वम्' पद का वाच्यार्थ कहते हैं।**

अब 'त्वम्' पद के लक्ष्यार्थ को बताते हैं—**अन्वय-व्यतिरेक के द्वारा स्थूल-सूक्ष्मकारण, इन तीनों शरीरों से पृथक् प्रतीत होनेवाला जो सत्-चित्-आनन्दस्वरूप प्रत्यक् चैतन्य है, वही 'त्वम्' पद का लक्ष्यार्थ है।**

निष्कर्ष यह है कि उपहित और अनुपहित चैतन्य, और अविद्यादि जड़ पदार्थ की एकाकार प्रतीति जिसमें होती है, वह तो त्वम् पद का 'वाच्यार्थ' है, और उपहित तथा अनुपहित चैतन्य और अविद्यादि जड़ पदार्थ को जिसमें भिन्न-भिन्न रूप से प्रतीति होती है, वह 'त्वम्' पद का 'लक्ष्यार्थ' कहलाता है।

'तत्-त्वम्' पदार्थ के शोधनोपयोगी अन्वयव्यतिरेक को पहिले बता चुके हैं।

---

१. यं प्रति प्रकाशते स आत्मा प्रत्यक्पदार्थः। 'प्रतियम्' इति न चेत् स्यात् सुष्ठु।

सम्बन्धत्रयं तु—पदयोः समानाधिकरण्यम्। समानाधिकरण्यं नाम—भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः। यथा "सोऽयं देवदत्त" इत्यत्र तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायशब्दस्य च एकस्मिन्देवदत्तपिण्डे वृत्तिः सामानाधिकरण्यम्।

पदार्थयोर्विशेषणविशेष्यभावः। यथा तत्रैव स—शब्दार्थतत्कालविशिष्टाय-शब्दार्थैतत्कालविशिष्टयोरन्योऽन्य-भेदव्यावर्त्तकतया विशेषणविशेष्यभावः।

●

लिङ्गाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः। व्यतिरेकस्त्वात्मभाने लिङ्गस्याभानमुच्यते ॥
सुषुप्त्यभाने भानन्तु समाधावात्मनोऽन्वयः। व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनम्' ॥इति॥

एवं तत्त्वंपदार्थौ शोधयित्वा वाक्यार्थं विचारयितुं प्रतिजानिते—**एताविति**। पदार्थज्ञानस्य वाक्यार्थज्ञानकारणत्वात् तत्त्वं पदार्थशोधनोपायान्वयव्यतिरेकाभ्यां "सत्यं ज्ञानमनन्तब्रह्म" "विज्ञानमानन्दं ब्रह्म" "योऽयं विज्ञानमयः प्राणेषु हृद्यन्त-र्ज्योतिः पुरुष" इत्याद्यवान्तरवाक्यैश्च[1] शोधितौ तत्त्वं पदार्थौ लक्ष्यौ गृहीत्वेत्यर्थः ॥४३॥

सम्बन्धेति। सामानाधिकरण्यं विशेषणविशेष्यभावो लक्ष्यलक्षणभावाश्चेति त्रयः सम्बन्धाः। पदयोः सामानाधि-करण्यं पदार्थयोर्विशेषणविशेष्यभावश्च पदयोर्वा पदार्थयोर्वाऽखण्डचैतन्येन सह लक्ष्यलक्षणभावः। एतैः सहितं महावाक्यमखण्डार्थ-बोधकमित्यर्थः। लक्षणामग्रे निरुपयिष्यति।

ननु समानेनाधिकरणेन सम्बन्धः सामानाधिकरण्ये तत्कथं वाक्यार्थज्ञानोत्पत्तौ हेतुः स्यादित्याशङ्क्याह—**सामाना-धिकरण्यमिति**। शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमित्युक्ते घटकलशयोरपि सामानाधिकरण्यं स्यात्ततश्च ताभ्यामपि वाक्यार्थबोधः स्यात्। नच तदस्ति तयोः पर्यायत्वात्। अतस्तद्वारणायोक्तं **भिन्नेति**। तत्रोदाहरणमाह—**यथेति**। विशेषण-

●

इस प्रकार 'तत्' और 'त्वम्' पदार्थ का शोधन करके अब वाक्यार्थ विचार की प्रतिज्ञा कर रहे हैं—**एताविति**। वाक्यार्थज्ञान के होने में पदार्थज्ञान कारण (हेतु) हुआ करता है। अतः शोधित तत्-त्वम् पदार्थों का अभेदरूप महावाक्यार्थ होता है। अर्थात् 'तत्' पद **का लक्ष्यार्थ जो शुद्ध चैतन्य और 'त्वम्' पद का लक्ष्यार्थ भी शुद्ध चैतन्य है, उन दोनों लक्ष्यार्थों को ग्रहण करके वक्ष्यमाण तीन सम्बन्धों के द्वारा 'तत्त्वमसि' आदि महावाक्य, लक्षणाव्यापार (लक्षणावृत्ति) से अखण्डार्थ का बोध करा देता है।** तत्-त्वम् पदार्थों का शोधन श्रुतिवाक्यों से तथा विवेक से किया जाता है ॥४३॥

(१) सामानाधिकरण्य, (२) विशेषण-विशेष्यभाव, (३) लक्ष्य-लक्षणभाव—ये तीन सम्बन्ध, महावाक्य के सहायक होते हैं। 'तत्त्वमसि'—इस वाक्य में जो **'तत्' और 'त्वम्' ये दो पद हैं, उनका तो परस्पर 'सामाधिकरण्यसम्बन्ध'** है, और उन दोनों पदों के अर्थों का परस्पर 'विशेषण-विशेष्यभाव सम्बन्ध' है, और उन दोनों पदों का अथवा उन दोनों अर्थों का 'अखण्डचैतन्य' के साथ 'लक्ष्य-लक्षणभावसम्बन्ध' है। इन तीन सम्बन्धों की सहायता से उक्त महावाक्य, 'अखण्डार्थ' का बोधक होता है।

जिन शब्दों की प्रवृत्ति का निमित्त, भिन्न-भिन्न है, उन शब्दों की एक अर्थ में वृत्ति (रहना) ही उन पदों का परस्पर 'सामानाधिकरण्यसम्बन्ध' है।

उक्त लक्षण में 'भिन्नप्रवृत्तिनिमित्तानाम्'—यह अंश न कहें, तो शेष बचे अंश के अनुसार 'घट-कलश' का भी सामानाधिकरण्य होने लगेगा, तब उनसे भी वाक्यार्थबोध हो सकेगा। किन्तु उनसे वाक्यार्थबोध नहीं होता है, क्योंकि वे दोनों परस्पर एक-दूसरे के पर्याय हैं, इसलिये उनका सामानाधिकरण्य नहीं माना जाता। यही बताने के लिए कहा है—**भिन्नेति**।

इसी को उदाहरण के द्वारा स्पष्ट कर रहे है—**यथेति**। **जैसे—'सोऽयं देवदत्तः' अर्थात् पहिले जिस देवदत्त नाम के पुरुष को तुमने वहाँ देखा था, वही यह देवदत्त है। इस प्रत्यभिज्ञावाक्य में 'सः' शब्द तो तद्देश और तत्काल से विशिष्ट 'देवदत्त' का वाचक है, और 'अयम्' शब्द, एतद्देश, और एतत्काल से विशिष्ट 'देवदत्त' का वाचक है। 'देवदत्त' नामक व्यक्ति एक ही है। उस एक ही व्यक्ति में 'सः' शब्द की प्रवृत्ति का निमित्त 'तद्देश-कालविशिष्टत्व' है, और 'अयम्' शब्द की प्रवृत्ति का निमित्त 'एतद्देशकालविशिष्टत्व' है। और सोऽयम् ये दोनों शब्द भागत्यागलक्षणा (जहदजहल्लक्षणा) से 'तद्देश-कालविशिष्टत्व' तथा 'एतद्देश-कालविशिष्टत्व' इन दो परस्पर**

१. महावाक्यघटकपदार्थबोधि वाक्यमवान्तरम्। जीवब्रह्माभेदबोधि महावाक्यमिति भेदः।

"सोऽयमयं स" इति पदयोरर्थयोर्वा अविरुद्धवाक्यार्थेन सह लक्ष्यलक्षणभावः। यथा तत्रैव "सोऽयमि"त्यादि वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वाऽविरुद्धदेवदत्तपिण्डेन वाक्यार्थेन सह लक्ष्यलक्षणभावः। तथा तत्त्वमस्या"दिवाक्ये तत्त्वंपदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीववाचकयोरखण्डचैतन्ये तात्पर्येण वृत्तिः सामानाधिकरण्यम्। तथा तत्त्वंपदार्थयोरीश्वर जीवयोरन्योन्यभेदव्यावर्त्तकतया तत्त्वमसि त्वं तदसि इति विशेषणविशेष्यभावः। तथा तत्त्वंपदयोस्तदर्थयोर्वा वाक्यार्थेनाविरुद्धखण्डचैतन्येन सह विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः। तदुक्तम्,

'सामानाधिकरण्यञ्च विशेषणविशेष्यता। लक्ष्यलक्षणभावश्च पदार्थप्रत्यगात्मनाम्" इति।

अस्यार्थस्तु उक्त एव। एतदभिप्रायेण वाक्यवृत्तावपि उक्तम् "तत्त्वमस्यादिवाक्यञ्च तादात्म्यप्रतिपादने। लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्त्तते" ॥इति॥

तादात्म्यप्रतिपादने—अखण्डस्वरूपप्रतिपादन इत्यर्थः ॥४४॥

●

विशेष्यभावसम्बन्धमाह—**पदार्थयोरिति**। पदजन्यज्ञानविषयत्वं पदार्थत्वम्। व्यावर्त्तकं विशेषणं व्यावर्त्यं विशेष्यम्, तमुदाहरति—**यथेति**। तत्रैव सोऽयं देवदत्त इति वाक्ये। लक्ष्यलक्षणभावसम्बन्धमाह—**पदयोरिति**। लक्ष्यतेऽर्थोऽनेनेति व्युत्पत्त्या पदम्पदार्थो वा लक्षणम्, अविरुद्धोऽखण्डार्थो लक्ष्यः, वाक्यजन्यज्ञानविषयो वाक्यार्थस्तेनेति यावत्। उदाहरति—**यथेति**। प्रत्यभिज्ञावाक्यं

●

विरुद्ध अंशों का परित्याग करके (अतीत और वर्तमान दोनों विरुद्ध अंशों का त्याग करके) दोनों कालों में स्थित रहनेवाले एकही देवदत्त नामक व्यक्ति का बोधन कर रहे हैं। 'सोऽयम्'—इन दोनों शब्दों का यही परस्पर सामानाधिकरण्य सम्बन्ध है।

पदार्थों का आपसी सम्बन्ध है विशेष्य विशेषणभाव जैसे, 'सोऽयं देवदत्तः' इस वाक्य में ही 'स' शब्द का अर्थ जो 'तद्देश-काल विशिष्टत्व' है, और 'अयं' शब्द का अर्थ जो 'एतद्देशकालविशिष्टत्व' है,—इन दोनों अर्थों के परस्पर भेद की निवृत्ति करनेवाला 'विशेषण-विशेष्यभाव' सम्बन्ध है। यहाँ 'सोऽयम्'—इस वाक्य प्रयोग में 'स' शब्द का अर्थ—'विशेष्य' है, और 'अयम्' शब्द का अर्थ—'विशेषण' है और 'अयं सः'—इस प्रकार के वाक्य में 'अयम्' शब्द का अर्थ—'विशेष्य' है, और 'स' शब्द का अर्थ—'विशेषण' है। और 'सोऽयं देवदत्तः'—इस वाक्य में स्थित 'सः अयम्' इन दोनों शब्दों की 'भागत्याग' लक्षणा करके अर्थात् 'तद्देशकालविशिष्टत्व' और 'एतद्देशकालविशिष्टत्व'—इन दोनों विरोधी अंशों का परित्याग करके अविरुद्ध 'देवदत्त' व्यक्तिमात्र का उस वाक्य से बोध होता है। अतः वह 'देवदत्त' व्यक्तिमात्र ही 'सोऽयम्' इस वाक्य का 'लक्ष्यार्थ' है।

वाक्यार्थरूप लक्ष्य 'देवदत्त' के साथ 'सोऽयम्' इन दोनों पदों का तथा इन दोनों पदों के उक्त अर्थ का लक्ष्य-लक्षणभाव सम्बन्ध है। इनमें बोधन करनेवाले बोधक का नाम 'लक्षण' है और बोध्य आर्थात् जानने के योग्य पदार्थ का नाम 'लक्ष्य' है। यहाँपर 'सोऽयम्'—इन दोनों पदों से अथवा इन दोनों पदों के 'अर्थ' से वही 'देवदत्त व्यक्ति' जाना जाता है। अतः वे 'पद' तथा 'अर्थ' तो 'लक्षण' हैं, और देवदत्तव्यक्ति' 'लक्ष्य' है।

इस प्रकार लौकिक प्रत्यभिज्ञावाक्य 'सोऽयं देवदत्तः' में सम्बन्धत्रय को बताकर अब वैदिक 'तत्त्वमसि' वाक्य में सम्बन्धत्रय को बताते हैं—**तथेति**।

'तत्त्वमसि'—इस महावाक्य में स्थित 'तत्' पद तो 'परोक्षत्व-सर्वज्ञत्व आदि धर्मों से विशिष्ट 'ईश्वरचैतन्य' का 'वाचक' है, और 'त्वम्'—पद—'अपरोक्षत्व—अल्पज्ञत्व आदि धर्मों से विशिष्ट 'जीवचैतन्य' का 'वाचक' है। 'तत्' पद की प्रवृत्ति का निमित्त तो 'परोक्षत्वादिधर्मविशिष्टत्व' है। और 'त्वम्' पद की प्रवृत्ति का निमित्त—'अपरोक्षत्वादिधर्मविशिष्टत्व' है। एवंच 'तत्' और 'त्वम्'—दोनों पदों की प्रवृत्ति का निमित्त भिन्न-भिन्न है, और 'तत् और त्वम्'—ये दोनों पद, भागत्यागलक्षणा के द्वारा एक अखण्डचैतन्य के बोधक होते हैं। यही उन 'तत् और त्वम्' पदों का परस्पर सामानाधिकरण्य सम्बन्ध है।

तथा 'तत्—पदार्थरूप ईश्वर चैतन्य' का और 'त्वम्—पदार्थरूप जीवचैतन्य' का परस्पर भेदभ्रम जिनको होता है, उनके भ्रम को नष्ट करनेवाला 'विशेषणविशेष्यभाव सम्बन्ध' है। 'तत्त्वमसि'—इस वाक्य प्रयोग में 'तत्'—पदार्थ विशेष्य है, और 'त्वम्'—पदार्थ 'विशेषण' है, और 'त्वं तत् असि' में अर्थात् इस प्रकार के वाक्य प्रयोग में 'त्वम्' पदार्थ, विशेष्य' है,

संसर्गस्य वा विशिष्टस्य वा विशिष्टैक्यस्य वा प्रत्यक्षादिविरुद्धत्वेन "तत्त्वमस्या"दिवाक्यप्रतिपाद्यत्वायोगात् ।

●

सप्तम्यर्थः। लौकिके सोऽयमित्यादिवाक्ये सम्बन्धत्रयं व्युत्पाद्य वैदिके "तत्त्वमस्या"दिवाक्ये तद्दर्शयति—**तथेति**। तत्र सम्मतिमाह—**तदुक्तमिति**। लक्षणया तत्त्वमस्यादिवाक्यमखण्डार्थबोधकमित्यत्राचार्य्यसम्मतिमाह—**एतदिति**।

ननु किमिदं तादात्म्यं; तन्निष्ठासाधारणधर्म्मो, भेदसहिष्णुरभेदो वा ? नोभयथापि सम्भवति। अद्वैतासिद्ध्याऽपसिद्धान्तप्रसङ्गादित्यत आह—**तादात्म्येति**। स चासावात्मा च तदात्मा तदात्मनो भावस्तादात्म्यमिति व्युत्पत्त्या तादात्म्यशब्दस्याखण्डार्थस्वरूपमर्थ इति तात्पर्य्यार्थः ॥४४॥

ननु घटमानयेत्यादौ संसर्गो वा विशिष्टो वा वाक्यार्थः सर्वसम्मतः, न त्वखण्डवाक्यार्थः कैश्चिदभ्युपगम्यत इत्याशङ्क्याह—**संसर्गस्येति**। सत्यमेवं तथापि संसर्गत्वं वा विशिष्टत्वं वा न वाक्यप्रतिपाद्यत्वे तन्त्रमनभिमतसंसर्गादेरपि वाक्यार्थत्वापत्तेः। किं तर्हि ? तात्पर्य्यविषयत्वम्। तात्पर्य्यञ्चाखण्डे ब्रह्मण्युपक्रमादिभिर्लिङ्गैर्वेदान्तानामवधृतमित्यखण्डं ब्रह्म वाक्यार्थः। अनभ्युपगमस्य पुरुषदोषत्वात्।

●

और 'तत्'—पदार्थ, 'विशेषण' होता है। इस प्रकार 'तत्' और 'त्वम्' पदार्थ, दोनों का परस्पर अभेदरूप से 'विशेषण-विशेष्यभाव' करने से दोनों के होने वाले भेदभ्रम की निवृत्ति हो जाती है।

तथा 'तत्' और 'त्वम्'—दोनों पदों का एवं उन पदों के अर्थरूप 'ईश्वर' और 'जीव' का वाक्यार्थरूप 'अखण्ड-चैतन्य' के साथ लक्ष्य-लक्षणभाव सम्बन्ध है। अर्थात् 'तत्' और 'त्वम्' पद तथा उन दोनों पदों के अर्थ, उन परोक्षत्व एवं अपरोक्षत्व आदि विरुद्ध अर्थों का परित्याग करके अविरुद्ध अखण्ड चैतन्यमात्र को ही प्रदर्शित करते हैं। इस कारण उन पदों में तथा उनके अर्थों में तो 'लक्षणरूपता' है, और उस 'अखण्डचैतन्य' में 'लक्ष्यरूपता' है। अन्य ग्रन्थकारों ने भी उक्त तीन सम्बन्धों को बताया है।

शंका—वेदान्त के अन्य ग्रन्थों में यह कहा गया है कि 'तत्त्वमसि'—इत्यादि वाक्य, 'भागत्याग लक्षणा' के द्वारा 'अखण्डचैतन्य' का बोध कराते हैं। और आपने तो 'लक्ष्य-लक्षणभावसम्बन्ध' के द्वारा 'तत्त्वमसि'—इत्यादि वाक्यों को 'अखण्ड चैतन्य' का बोधक होना बताया है। अतः उन वेदान्तग्रन्थों के साथ इस ग्रन्थ का विरोध हो रहा है। अतः आपके कथन को प्रामाणिक कैसे कहा जायगा ?

समा०—'लक्ष्य-लक्षणभाव' और 'भागत्यागलक्षणा'—दोनों के नाम ही केवल भिन्न हैं, 'अर्थ' में कोई भेद नहीं है। अतः कोई विरोध नहीं है।

इसी अभिप्राय को ध्यान में रखकर 'वाक्यवृत्ति' ग्रन्थ में 'तत्त्वमसि' आदि वाक्यों को 'भाग-त्यागलक्षणा' के द्वारा 'अखण्डार्थ' का बोधक होना बताया गया है। इसी बात को पद्य के द्वारा बताया गया है, जिसका यह अर्थ है—'तत्त्वमसि' आदि महावाक्य 'तत्-त्वम्' पदों के 'लक्ष्यार्थ' को लेकर ही 'अखण्डस्वरूप' के प्रतिपादन में प्रवृत्त होते हैं।

शंका—जैसे-लोकव्यवहार में 'घटमानय', 'नीलोत्पलम्'—इत्यादि वाक्य, 'पदार्थों के संसर्ग' का अथवा विशिष्ट अर्थ का ही बोधक होता है, अखण्डार्थ का बोधक नहीं होता, तब 'तत्त्वमसि' वाक्य, अखण्डार्थ का बोधक कैसे होगा ?

समाधान—'तत्त्वमसि' आदि वाक्य 'सम्बन्धरूप संसर्ग' के अथवा 'विशिष्ट अर्थ' के बोधक नहीं हुआ करते। वे तो 'एक अखण्ड ब्रह्मस्वरूप' के ही बोधक हुआ करते हैं।

इस बात को 'वाक्यवृत्ति' ग्रन्थ में कहा गया है।

समा०—(क) उक्त शंका का समाधान करते हैं—संसर्गस्येति।

वेदान्तशास्त्र में 'तत्त्वमसि' आदि वाक्यों का 'संसर्गात्मक वाक्यार्थ' अथवा 'विशिष्ट-वाक्यार्थ', सम्मत नहीं है। किन्तु 'अखण्ड-एकरस ब्रह्म' ही वाक्यार्थ के रूप में विद्वानों को सम्मत है।

शंका करनेवाले ने जो शंका की है, वह व्यावहारिक दृष्टि से ठीक है, तथापि वाक्य के प्रतिपाद्य विषय के **निर्धारण में 'संसर्गत्व' या 'विशिष्टत्व' को कारण नहीं कह सकते। क्योंकि प्रतिपाद्यविषय का निर्धारण करना उनके अधीन, नहीं है। अन्यथा अनभिमत संसर्ग आदि को भी वाक्यार्थ को रूप में समझना पड़ेगा। अतः 'तत्त्वमसि'—इस महावाक्य का**

अखण्डत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वम् । सर्वस्य प्रपञ्चस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वाद्विजातीयभेदशून्यता, जीवपरमात्मनोरत्यन्तैक्यात्, सजातीयभेदशून्यता, एकरसत्वात् स्वगतभेदशून्यता ।

●

किञ्च तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वे संसर्गादेः प्रत्यक्षविरोधपरिहारासम्भवेन तस्य तदयोगात् । नच नाहमीश्वर इति प्रत्यक्षादिविरोधात्कथमखण्डवस्तुनो महावाक्यप्रतिपाद्यत्वमिति वाच्यम्, श्रुतिविरोधे प्रत्यक्षादीनामाभासत्वात् । योग्यानुपलब्धेरसम्भवेन जीवनिष्ठेश्वरभेदस्य प्रत्यक्षायोग्यत्वात्, मनसोऽनिन्द्रियत्वेन तथात्वाच्च । जीवाधिकरणेश्वरभेदस्य साक्षिभास्यतया प्रातीतिकत्वेन तद्विषयप्रत्यक्षस्य श्रुत्या बाधसम्भवाच्चन्द्रगतप्रादेशकत्वप्रत्यक्षवत्तद्गतद्वित्वादिप्रत्यक्षवच्च । भेदप्रत्यक्षस्याज्ञानोपाधितन्त्रत्वेन स्वाभाविकाखण्डार्थस्य महावाक्यस्य तेन समं विरुद्धत्वेन तन्निवर्त्तकतया भेदप्रत्यक्षस्य भ्रान्तित्वाच्च ।

नन्वेवं "द्वासुपर्णे"त्यादि श्रुत्या जीवपरयोर्भेदप्रतिपादनात् कथं महावाक्यस्या खण्डार्थत्वमिति चेन्न, भेदस्य मानान्तरसिद्धत्वेन श्रुतिप्रतिपाद्यत्वायोगात्, फलवत्यज्ञातेऽर्थे श्रुतेस्तात्पर्य्यात् । तस्मात्तदनुवादेनोदाहृतश्रुतेरखण्डे ब्रह्मण्येव तात्पर्य्यात् ।

●

तात्पर्य, किसमें है ? अर्थात् उसके तात्पर्य का विषय क्या है ? यह जिज्ञासा होने पर समझ में आता है कि उपक्रमोपसंहारादिषड्विध लिङ्गों की सहायता से उन वाक्यों का तात्पर्य, 'अखण्डब्रह्म' में ही है। इसलिये वेदान्तशास्त्र का यही निर्णय है कि 'अखण्डब्रह्म' ही उक्त महावाक्य का अर्थ है। इस निर्णय को यदि कोई व्यक्ति स्वीकार नहीं करता है, तो उस व्यक्ति के भ्रम-प्रमादादि दोष ही उसके स्वीकार न करने में कारण हैं, यह समझना—चाहिये।

किञ्च—'संसर्ग' आदि को ही 'तत्त्वमसि' आदि महावाक्य का 'प्रतिपाद्य अर्थ' कहें तो प्रत्यक्षविरोध उपस्थित होगा, जिसे दूर करना असम्भव है। इस कारण 'संसर्ग आदि', को 'महावाक्य' का 'अर्थ' नहीं कह सकते। एवंच वेदान्तशास्त्र में महावाक्यों का 'संसर्गात्मक वाक्यार्थ', अथवा 'विशिष्टवाक्यार्थ' मान्य नहीं है। किन्तु 'अखण्ड एकरस ब्रह्म' ही उन महावाक्यों का अर्थ है।

शंका—'नाऽहम् ईश्वरः'—मैं ईश्वर नहीं हूँ—इस कथन से जीव और ईश्वर के भेद का प्रत्यक्ष तो सभी को होता है। तब श्रुत्युक्त 'महावाक्य', सर्वानुभवसिद्ध प्रत्यक्ष के विरुद्ध, 'अखण्डार्थ' का प्रतिपादन कैसे कर पायेंगे ?

समा०—श्रुति के साथ किसी प्रमाण का विरोध रहने पर उसे 'प्रमाण' न कहकर 'प्रमाणाभास' कहा जाता है। उस कारण यहाँ भी श्रुति के साथ प्रत्यक्ष का विरोध उपस्थित होने से उसे 'प्रत्यक्ष' न कहकर 'प्रत्यक्षाभास' ही समझना चाहिये। क्योंकि उपलब्धि के योग्य होने पर उसकी उपलब्धि अवश्य हुआ करती है, उसकी अनुपलब्धि का सम्भव नहीं रहता। ऐसी स्थिति में 'जीव' निष्ठ जो 'ईश्वर' का भेद है, उसका प्रत्यक्ष न हो पाने से उसे प्रत्यक्ष के योग्य नहीं कहा जा सकता। जैसे 'धर्म-अधर्म' पदार्थ, प्रत्यक्ष के योग्य नहीं हैं, वैसे ही उक्त 'भेद' भी प्रत्यक्ष के योग्य नहीं हैं। क्योंकि चक्षुरादि बाह्य इन्द्रियों से बाह्य रूपादि पदार्थों का प्रत्यक्ष हुआ करता है। 'आत्मा' का अथवा 'आत्मवृत्तिधर्म' का उन चक्षुरादि इन्द्रियों से तो प्रत्यक्ष नहीं होता, उस कारण उस 'भेद' का चक्षुरादि इन्द्रियों से 'प्रत्यक्ष' होना सम्भव नहीं है, और अन्तःकरणरूप 'मन' में 'इन्द्रियत्व' का सम्भव न रहने से 'मन' के द्वारा भी उक्त 'भेद' का प्रत्यक्ष नहीं हो सकता। उस भेद को यदि 'साक्षिभास्य' मान लें, तो स्वप्नपदार्थों के समान उस भेद को 'प्रातीतिक' ही कहना होगा। उस 'प्रातीतिक भेदविषयक प्रत्यक्ष' से 'अभेदबोधकश्रुति' का बाध होना संभव नहीं है, प्रत्युत श्रुति से ही 'प्रत्यक्ष' का बाध होना संभव होगा। एवञ्च प्रत्यक्ष-प्रमाण से जीव और ईश्वर के भेद की सिद्धि नहीं हो पा रही है। श्रुतिविरुद्ध 'प्रत्यक्ष' को भ्रम ही कहना चाहिये। जैसे—'चन्द्र' के स्वल्प परिमाण (प्रादेशिक परिमाण) का तथा 'चन्द्रगत द्वित्व' का बोध कराने वाला 'लोकप्रत्यक्ष', चन्द्रमा के महत् परिमाण को तथा एकत्व को बताने वाले ज्योतिषशास्त्र के विरुद्ध होने से 'भ्रम' कहलाता है, वैसे ही भेदविषयक 'प्रत्यक्ष' भी 'अभेद-बोधक श्रुति' के विरुद्ध होने से भ्रमरूप ही है।

किञ्च—संसाररूपी वृक्ष पर मित्रभूत दो पक्षी बैठे हैं—जीव तथा ईश्वर। एक सांसारिक पदार्थों का उपभोग करता है, और दूसरा विषयों का उपभोग न करता हुआ केवल संसार का नियन्त्रण (शासन) करता है—भेदवादी उक्त श्रुति-वचन को अपने भेदसिद्धान्त के समर्थन में उपस्थित किया करते हैं, किन्तु उक्त वचन का तात्पर्य, 'जीव और ईश्वर के भेद-प्रतिपादन' में नहीं है। इस वचन के द्वारा भगवती श्रुतिमाता ने लोकव्यवहार में प्रसिद्ध जो 'भेद' है, उसी का अनुवादमात्र

पैङ्गिरहस्यब्राह्मणेन श्रुत्यैव तथा व्याख्यातत्वाच्च अखण्डब्रह्मैव तत्त्वमस्यादिवाक्यप्रतिपाद्यम्। तस्मात्संसर्गस्य विशिष्टस्य वा महावाक्यप्रतिपाद्यत्वायोगात्तादात्म्यप्रतिपादनइत्यस्याखण्डस्वरूपप्रतिपादन इति व्याख्यानमुचितमेव। तदुक्तम्,

"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः" ॥इति॥

ननु किमिदमखण्डत्वं; जातिरुपाधिर्वा ? नाद्यः। अविद्यातिरिक्तजडजातेरनङ्गीकारात्। ननु घटोऽयं घटोऽयमित्यनुगताकारप्रतीत्या जातिसिद्धेः कथमनङ्गीकार इति चेन्न, अनुगताकारप्रतीत्या घटत्वादिसिद्धावपि तस्य जातित्वे मानाभावात्। नच घटत्वादिकं जातिर्द्रव्यगुणकर्म्मविशेषभिन्नत्वे सति समवेतत्वात् व्यतिरेकेणाभाववदित्यनुमानेन तस्य जातित्वसिद्धिरिति वाच्यम्, समवायस्य निरस्तत्वेन हेत्वसिद्धेः। साध्यप्रसिद्धेरनुमानाङ्गत्वेन जातित्वस्य मानान्तरासिद्धत्वेन व्याप्तिग्रहाभावेन तदनुमानायोगाच्च। अन्यथातिप्रसङ्गात्। तस्मादखण्डत्वं न जातिः। न चाविद्यातिरिक्तजडजात्यनङ्गीकारेऽपि सार्विद्यैवास्तामिति वाच्यम्, तथात्वे तस्य श्रुतिवेद्यत्वाभावप्रसङ्गात्।

न द्वितीयः। तस्यानिर्वचनत्वात्। तथाहि, न तावद्भेदशून्यत्वमखण्डत्वं, भेदस्य प्रसिद्धत्वेन तच्छून्यत्वस्यासम्भवात्। अप्रसिद्धत्वेऽप्रसक्तप्रतिषेधासम्भवेन तच्छून्यत्वस्य ग्रहीतुमशक्यत्वात्। नापि परिच्छेदशून्यत्वम् तत्परिच्छेदो नामावयवो वस्त्वन्तरं वाऽभावो वा। नाद्यः, ब्रह्मणो निरवयवत्वेन अवयवाऽप्रसक्तौ तन्निषेधायोगेन तच्छून्यत्वस्य ग्रहणायोगात्। न द्वितीयः, भवन्मते ब्रह्मव्यतिरिक्तवस्त्वन्तरस्य मानान्तरासिद्धतया तन्निषेधायोगेन तदनुपपत्तेः। न तृतीयः, "अनाद्यनन्तम्" "अजोनित्य" इत्यादि श्रुत्या ब्रह्मणोऽनादिनित्यतया ध्वंसप्रागभावयोरसम्भवात्। अद्वितीयश्रुत्या ब्रह्मणस्त्रैकालिकानादिनित्यात्यन्ताभावस्यासम्भवात्। अतएव तदन्योऽन्याभावस्यासम्भवात्। तस्मादप्रसक्तप्रतिषेधायोगेनाभावः परिच्छेदस्तच्छून्यत्वमखण्डत्वमित्यसङ्गतमेतत्। एतेनानेकपर्य्यायशब्दप्रकाश्यत्वे सत्यविशिष्टत्वं तदिति निरस्तम्, पूर्वोक्तदोषस्यात्रापि तुल्यत्वात्। तस्मादखण्डं ब्रह्मवाक्यार्थ इत्यसङ्गतमित्याशङ्क्याह—**अखण्डत्वं नामेति।**

•

करके अपना तात्पर्य 'अखण्डब्रह्म' में ही बताया है। क्योंकि जिस अर्थ का ज्ञान, अभीष्ट फल की प्राप्ति कराता है, तथा जो 'अर्थ', प्रत्यक्षादि-प्रमाणों से अज्ञात (अनवगत) रहता है, उसी अर्थ को बताने में भगवती श्रुति का तात्पर्य रहता है।

जीव और ईश्वर का भेद 'अज्ञात' नहीं है, क्योंकि शास्त्र-संस्कार-रहित मनुष्य को भी अपने ईश्वर न होने का ज्ञान अर्थात् 'मैं ईश्वर नहीं हूँ'—इत्याकारक ज्ञान रहता ही है। इस भेदज्ञान से उसे किसी इष्टफल की प्राप्ति भी नहीं होती है। श्रुति तो भेददर्शी पुरुष को पुनः पुनः जन्म-मरण की प्राप्ति का होना बता रही है, तथा उसे (भेददर्शी-पुरुष को) पशु के तुल्य उसने बताया है। इससे स्पष्ट होता है कि 'जीव-ब्रह्म' के भेद में उक्त श्रुति का तात्पर्य नहीं है। उसका तात्पर्य तो 'अखण्ड ब्रह्म' में ही है, और 'अखण्ड ब्रह्म', प्रत्यक्षादि प्रमाणों का विषय न रहने से 'अज्ञात' भी है। श्रुतियों ने तो उस अखण्ड ब्रह्म के अज्ञान रूप अनर्थ की निवृत्ति, और परमानन्द की प्राप्तिरूप फल का प्रतिपादन किया है। उस कारण 'अखण्ड ब्रह्म' में ही उस श्रुति का तात्पर्य सिद्ध हो रहा है। एवं च 'तत्त्वमसि' आदि श्रुतिवाक्य का प्रतिपाद्य 'अखण्ड ब्रह्म' ही है।

शंका—'अखण्ड ब्रह्म' ही महावाक्यों का प्रतिपाद्य अर्थ है, यह अद्वैतवादियों का कथन है। किन्तु ब्रह्म में वह 'अखण्डता' क्या है ?

समा०—अखण्डता का निर्वचन अनेक विद्वानों ने अपने-अपने दृष्टिकोण से किया है। कुछ लोगों का कहना है कि **(१) विजातीयभेद (२) सजातीयभेद (३) स्वगतभेद—इन तीनों भेदों से रहित रहना ही 'ब्रह्म' की अखण्डता है।**

'ब्रह्म' में उक्त तीन भेदों के अभाव-बोधनार्थ, प्रथमतः अनात्म पदार्थों में उक्त तीनों भेदों को समझना होगा।

(१) **विजातीय भेद**—भिन्न-भिन्न जाति वाले पदार्थों का जो परस्पर भेद है, उस भेद को 'विजातीय भेद' कहते हैं। जैसे—'वृक्षों' में 'घट-पटादि' पदार्थों का जो भेद है, तथा उन 'घट-पटादि पदार्थों में उन वृक्षों का जो भेद है, उसे—**'विजातीयभेद'** कहा जाता है।

(२) **सजातीय भेद**—समान जातिवाले पदार्थों का जो परस्पर भेद है, उसे 'सजातीय भेद' कहते हैं। जैसे—'आम' के वृक्ष का 'जामुन' के वृक्ष में जो भेद है, तथा जामुन के वृक्ष का उस आम के वृक्ष में जो भेद है, उसे 'सजातीय भेद' कहते हैं।

(३) **स्वगत भेद**—वृक्ष में स्थित जो पत्र, पुष्प, शाखा-आदि हैं, उनका उस वृक्ष में जो भेद है, उसे 'स्वगत भेद' कहते हैं। इस प्रकार सभी अनात्म पदार्थों में ये तीन भेद रहते हैं।

अखण्डत्वमुपाधिरेव। नच तन्निर्वचनासम्भव इत्याह—**विजातीयेति**। नच विजातीयादिभेदस्याप्रसिद्धतयाऽप्रसक्तप्रतिषेधानुपपत्त्या तच्छून्यत्वं दुर्ग्रहमिति वाच्यम्, भ्रान्त्या प्रसिद्धसम्भवेन तच्छून्यत्वग्रहसम्भवात्। वृक्षादीनां विजातीयो घटादिस्तद्भेदो वृक्षेषु प्रसिद्धो लोकानामेकस्य वृक्षस्य वृक्षान्तरं सजातीयं तत्रान्योन्यभेदोऽन्योन्यस्मिन्प्रसिद्धः। स्वगतं शाखापत्रादितद्भेदो वृक्षे प्रसिद्धः प्रत्यक्षादिना। नैवम्ब्रह्मणि सम्भवतीत्याह—**सर्वस्येति**। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" "ऐतदात्म्यमिदं सर्वं" "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यादि श्रुतिसूत्राभ्यां कार्य्यस्य कारणादव्यतिरेकात्सर्वस्य कल्पितत्वम्। नचाज्ञानस्याकार्य्यतया ब्रह्माव्यतिरेकादकल्पितत्वप्रसङ्ग इति वाच्यम्, "एकमेवाद्वितीयम्" "ऐतदात्म्यमिदं सर्वं" मिति श्रुत्या साऽज्ञानस्य कार्य्याकार्य्यसर्वप्रपञ्चस्य ब्रह्माव्यतिरेकावगमेनाज्ञानस्यापि कल्पितत्वसम्भवात्। कल्पितस्य सर्वस्य प्रपञ्चस्य मिथ्यात्वेन परमार्थतोऽधिष्ठानेऽसत्त्वेन विजातीयभेदशून्यत्वम्ब्रह्मण उपपद्यते। एवं "तत्त्वमसि" "अहम्ब्रह्मास्मि" 'क्षेत्रज्ञं चापि मां विद्धी'त्यादि श्रुतिस्मृतिभिर्जीवपरमात्मनोरत्यन्तैक्यप्रतिपादनेन चेतनान्तरस्यासम्भवाज्जीवभावस्य मिथ्यात्वेनाऽज्ञानकल्पितत्वाद्ब्रह्मणः सजातीयभेदशून्यत्वम्। तथा

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। "केवलोनिर्गुणश्च" "असङ्गोह्ययं पुरुषः" "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः" इति श्रुतिस्मृतिभिरवयवगुणक्रियाजातिसम्बन्धप्रतिषेधेन सृष्ट्यादिवाक्यैर्ज्ञायमानावयवगुणादीनां श्रुतिप्रतिपाद्यत्वाभावेन मायाकल्पितत्वेन च मिथ्यात्वाद्ब्रह्मणः स्वगतभेदशून्यत्वमिति भावः। "स्वगतभेदशून्यत्वमखण्डत्व"-मित्युक्ते, साङ्ख्यात्मन्यतिव्याप्तिः, सांख्यैरप्यात्मनोऽवयवगुणक्रियाजातिशून्यत्वाभ्युपगमेन स्वगतभेदशून्यत्वसम्भवात्, तद्वारणाय **सजातीयेत्युक्तम्**। तैर्जीवानां परस्परभेदाभ्युपगमेन सजातीयभेदशून्यत्वाभावान्नातिव्याप्तिः। सजातीयस्वगतभेदशून्यत्वमखण्डत्वमित्युक्ते आकाशेऽतिव्याप्तिस्तद्वारणाय **विजातीयेति**। विजातीयभेदशून्यत्वं तदित्युक्ते सजातीयस्वगतभेदयोरभ्युपगमः स्यादतश्चाद्वितीयश्रुतिविरोधापत्तिः। तद्वारणाय **सजातीयेत्यादि**। एकरसत्वसिद्धये **स्वगतेति**। एवं पदप्रयोजनं द्रष्टव्यम्। प्रकारान्तरेणा-

●

'ब्रह्म' में उक्त तीन भेदों में से कोई—किसी प्रकार का भी भेद नहीं रहता। क्योंकि 'ब्रह्म' में विजातीय भेद तभी रह सकेगा कि जब ब्रह्म से भिन्न कोई वस्तु 'सत्य' हो, किन्तु ब्रह्म से भिन्न कोई 'वस्तु', सत्य नहीं है। अविद्या सहित सम्पूर्ण कार्यप्रपञ्च, उस 'अधिष्ठान रूप ब्रह्म' में कल्पित रहने से मिथ्या ही है। उस कारण 'ब्रह्म' में विजातीय भेद की संभावना भी नहीं की जा सकती। दूसरा है—'सजातीय भेद'। उसकी संभावना ब्रह्म में तभी की जा सकेगी, जब ब्रह्म के सजातीय कोई दूसरा पदार्थ हो, किन्तु उसका सजातीय कोई दूसरा पदार्थ है ही नहीं।

यदि 'जीव' को 'ब्रह्म' का सजातीम पदार्थ कहें तो वह ठीक न होगा, क्योंकि 'तत्त्वमसि', 'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म', 'क्षेत्रज्ञं चापि मां विद्धि'—इत्यादि श्रुति एवं स्मृतियों ने जीव और ब्रह्म दोनों की अत्यन्त एकता का प्रतिपादन किया है। परन्तु सजातीयता तो भिन्न वस्तुओं में हुआ करती है। अभिन्न वस्तु में सजातीयता नहीं हुआ करती। उस कारण 'ब्रह्म' में सजातीय भेद के होने की संभावना नहीं की जा सकती।

तीसरा है—'स्वगतभेद'। उसकी भी ब्रह्म में संभावना तभी हो सकेगी जब 'ब्रह्म' में 'अवयव, गुण, क्रिया, जाति, सम्बन्ध—इन पाँचों में से कोई भी विद्यमान हो, किन्तु उक्त पाँचों में से कोई भी धर्म, 'ब्रह्म' में नहीं है, क्योंकि "श्रुति-स्मृतियों के वचनों ने 'ब्रह्म' में अवयवादि पाँचों का निषेध बताया है। उस कारण 'ब्रह्म' में स्वगत भेद की भी संभावना नहीं है। एवं च उक्त भेदत्रय-राहित्य (शून्यत्व) का होना ही ब्रह्म में 'अखण्डता' है।

शंका०—'विजातीय-सजातीय-स्वगतभेदशून्यत्वम्'-अखण्डत्वम्—इतना दीर्घलक्षण करने की अपेक्षा यदि 'स्वगतभेदशून्यत्वमखण्डत्वम्'—इतना ही लक्षण 'अखण्डत्व' का करें तो क्या हानि है?

समा०—'स्वगतभेदशून्यत्व' मात्र लक्षण करने पर, सांख्यवादियों के द्वारा अभ्युपगत 'आत्मा' में उक्त लक्षण की अतिव्याप्ति होगी। सांख्यवादियों ने भी अपने अभ्युपगत 'आत्मा' में अवयव, गुण, क्रिया, जाति, सम्बन्ध-शून्यत्व का होना बताया है। तब 'स्वगतभेदशून्यत्व' उसमें भी संभव होगा, उसके निवारणार्थ उक्त लक्षण में 'सजातीयभेदशून्यत्व' अवश्य कहना चाहिये। तब उनके 'आत्मा' में अतिव्याप्ति नहीं होगी। क्योंकि सांख्यवादियों ने 'आत्मा' अनेक (नाना) माने हैं। अतः उनके मत में वह 'आत्मा', 'सजातीय भेद' से रहित (शून्य) नहीं है, अपितु 'सजातीयभेदसहित' ही है। उस कारण उनके अभ्युपगत आत्मा में अब अतिव्याप्ति नहीं हो पाएगी।

शंका०—अब यदि 'सजातीय-स्वगतभेदशून्यत्वमखण्डत्वम्' इतना ही लक्षण 'अखण्डत्व' का करें तो क्या हानि है?

अथवा त्रिविधपरिच्छेदशून्यत्वम् अखण्डत्वं। विभुत्वात् देशपरिच्छेदशून्यत्वं। नित्यत्वात् कालपरिच्छेदशून्यत्वं। सर्वात्मकत्वात् वस्तुपरिच्छेदशून्यत्वम् "वेदाहमेतमजरं पुराणं सर्वात्मकं[1] सर्वगतं विभुत्वा"दित्यादिश्रुतेः।

यद्वा अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वमखण्डत्वम्। तदुक्तम्

"अविशिष्टमपर्यायाऽनेकशब्दप्रकाशितम्।
एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे"॥ इति ॥४५॥

●

अण्डत्वं निर्वक्ति-**अथवेति**। ब्रह्मणि लक्षणमुपपादयति-**विभुत्वेति**। परिच्छेदोऽभावो घटत्वादीनां देशपरिच्छेदः पटादिषु तदात्यन्ताभावः स च ब्रह्मणो विभुत्वान्नास्त्येव। अन्यथा विभुत्वमेव न स्यात्, घटादिव्यक्तीनां कालपरिच्छेदः स्वोपादाने ध्वंसः स च ब्रह्मणो नित्यत्वात् नास्त्येव। नित्यत्वञ्च ब्रह्मणः श्रुतिप्रसिद्धम्। घटादीनां वस्तुपरिच्छेदः पटादिषु घटादिप्रतियोगिक-भेदो वा घटादिषु पटादिप्रतियोगिकभेदो वा, द्विविधभेदोऽपि ब्रह्मणः सर्वात्मत्वान्नास्त्येव सर्वस्य स्वप्नकल्पितगजादिवत् ब्रह्मण्या-

●

तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्य्यम्। तच्च षड्विधैर्लिङ्गैर्निश्चीयते वेदे। लिङ्गानि तु दर्शितानि[1]—

●

तात्पर्य्यज्ञानस्य वाक्यार्थप्रमां प्रति कारणत्वमुपपादयितुं तात्पर्य्यं विभजते—**तात्पर्य्यमिति।** तदर्थप्रतीतीच्छयोच्चरितत्वं वक्तृतात्पर्य्यमिति केचिदाहुः। तन्न, मौनिश्लोकादौ तदभावादित्यभिप्रेत्य वक्तृतात्पर्य्यं व्युत्पादयति—**पुरुषेति।** तज्ज्ञानस्य वाक्यार्थप्रमां प्रति कारणत्वं न सम्भवति व्यभिचारादित्यभिप्रेत्याह—**तदिति।** तज्ज्ञानं वाक्यार्थप्रमां प्रति कुतो न कारणमित्याशंक्याह—**तदभावेऽपीति।** अव्युत्पन्नस्य वाक्यार्थज्ञानाभावेन तदिच्छायाः सुतरामसम्भवात्। तस्य तज्ज्ञानाभावेऽपि तद्वाक्याद्वाक्यार्थप्रमादर्शनान्न तत्कारणमित्यर्थः।

शब्दतात्पर्य्यं निरूपयति—**तदिति।** तस्मात्प्रकृतवाक्यार्थादितरोवाक्यार्थस्तत्प्रतीतिमात्रेच्छया अनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्य्यमित्यर्थः। भोजनप्रकरणे सैन्धवमानयेत्युक्ते लवणानयनप्रतीतिवदश्वानयनप्रतीतिरपि स्यात्, तद्योग्यत्वस्य विद्यमानत्वात्तद्वारणाय पूर्व्वदलम्, तथाप्युभयेच्छया सैन्धवमानयेत्युक्ते वाक्येऽव्याप्तिः स्यादत उक्तं **मात्रेति।**

●

इसके अनन्तर 'वाक्यार्थप्रमा' में 'तात्पर्यज्ञान' कारण होता है—इसे बताने के लिये तात्पर्य का विभाग करते हैं। **'तात्पर्य' के दो प्रकार हैं—(१) वाक्तृतात्पर्य और (२) शब्दतात्पर्य। इन में से 'श्रोता को मेरे कथन से अमुक अर्थ का ज्ञान हो'—इत्याकारक जो वक्ता की इच्छा, उसे 'वक्तृ-तात्पर्य' कहते हैं। वक्तृतात्पर्य का ज्ञान वाक्यार्थ के ज्ञान के लिये आवश्यक (जरूरी) नहीं है, क्योंकि स्वयं वाक्यार्थ न जानने वाले व्यक्ति द्वारा बोलेगये वाक्य का भी अर्थ समझ लिया जाता है।**

कुछ लोगों का कहना है कि उस अर्थ के प्रत्यायन की इच्छा से कथन करना ही वक्ता का तात्पर्य होता है। किन्तु यह तात्पर्यलक्षण उचित नहीं है। क्योंकि मौनिश्लोकआदि में यह लक्षण अन्वित नहीं होपाता है।

पूर्वोक्त प्रथमलक्षण—'वक्ता की इच्छा को 'वक्तृतात्पर्य' कहते हैं—ऐसा कहने पर भी उस वक्तृतात्पर्य का ज्ञान, 'शाब्दबोध' के होने में कारण नहीं होता है,। क्योंकि जिस पदार्थ के विद्यमान रहने पर जो 'कार्य' उत्पन्न होता है, और जिस पदार्थ के विद्यमान न रहने पर भी जो कार्योत्पत्ति में हेतु रहता है, उसी पदार्थ को उस कार्य का 'कारण' कहते हैं। जैसे कुलाल, दण्ड, चक्र, चीवर आदि 'घट' की उत्पत्ति में कारण बनते हैं। और जिस पदार्थ के विद्यमान न रहने पर भी जो 'कार्य' उत्पन्न होता है, उसकार्य के प्रति अविद्यमान रहनेवाले उस पदार्थ को 'कारण' नहीं मानाजाता। किन्तु उस पदार्थ को उस कार्य के प्रति 'अन्यथासिद्ध' कहते हैं। जैसे रासभादिकों को उस घट के प्रति 'पंचमअन्यथासिद्ध' ही कहा करते हैं।

उसीप्रकार 'वक्तृतात्पर्यज्ञान' के अभाव में भी दूसरे को 'शाब्दबोध' होता दिखाई देता है। जैसे शुक-सारिका आदि अव्युत्पन्नों का यह अभिप्राय नहीं रहता कि 'हमारे वाक्य से श्रोता को अमुक अर्थ का ज्ञान हो'—अर्थात् इस प्रकार का 'इच्छा' रूप तात्पर्य उनका नहीं रहता है, तथापि व्युत्पन्न श्रोताओं को शुक-सारिका आदि अव्युत्पन्नों के उच्चरित वाक्य से 'शाब्दबोध' होजाता है—यह सर्वानुभव सिद्ध है। अतः 'वक्तृतात्पर्यज्ञान' को 'शाब्दबोध' के प्रति कारण नहीं कह सकते।

प्रकृतवाक्यार्थ से भिन्न किसी अर्थ को बताने की किसी इच्छा से न कहा गया होते हुए प्रकृत वाक्यार्थ के ज्ञान को उत्पन्न करने में समर्थ होना शब्दतात्पर्य है। वेद में वह तात्पर्य छह प्रकार के चिह्नों से निश्चित किया जाता है।

तत्तत् शब्द में तत्तद्वाक्यार्थबोध को उत्पन्न करने को जो योग्यता रहती है, उसी को 'शब्दतात्पर्य' कहते हैं। इस शब्दतात्पर्य का ज्ञान, 'शाब्दबोध' के प्रति नियतरूप से कारण होता है। लौकिक शब्दों के तात्पर्य का निश्चय 'प्रकरण' आदि से होता है। जैसे—'सैन्धवमानय' इस वाक्य में स्थित जो 'सैन्धव' शब्द है, उसके वाच्यार्थ (शक्यार्थ) 'लवण' और अश्व' दोनों हैं। अर्थात् 'लवण और अश्व'—दोनों अर्थों का 'वाचक' यह 'सैन्धव' शब्द है। अतः भोजन के समय 'सैन्धवमानय' वाक्य को सुनने पर सुननेवाले व्यक्ति को 'भोजनप्रकरण' के कारण सैन्धव' शब्द का लवण के अर्थ में तात्पर्यनिश्चय होता है।

---

१. समन्वयसूत्रभाष्यव्याख्याने ब्रह्मविद्याभरणकृद्भिरुपक्रमादीनि सूत्रसिद्धानीति प्रदर्शितम्। व्यस्ततयैषामुपयोगो भाष्यादावप्युलभ्यते। क्रमेण तु विवरण एव प्रथममिमानि प्रालेखिषत। श्लोकश्च तत्त्वदीपने वर्तते।

"उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये" ॥ इति ।

अस्यार्थः—प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः आद्यन्तयोः प्रतिपादनमुपक्रमोपसंहारौ । यथा छान्दोग्यस्य षष्ठे "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं" ब्रह्म[२] "ऐतदात्म्यमिदं सर्व्वमि"त्युपक्रमोपसंहारौ आद्यन्तयोः । प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनमभ्यासः । यथा तत्रैव "तत्त्वमसी"ति नवकृत्वोऽभ्यासः । प्रकरणप्रतिपाद्यस्य मानान्तराविषयताऽपूर्व्वता । यथा तत्रैवाऽद्वितीयवस्तुनो मानान्तराविषयता । "अत्र वावखिल सत्सौम्य न निभालयसे अत्रैव खिलेत्यादि" । प्रकरण-प्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिः प्रयोजनं फलम् । यथा तत्रैव "आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न

●

उभयेच्छया प्रयुक्तत्वेऽपि तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वस्य सत्त्वान्नाव्याप्तिः । तर्हि तत्तात्पर्य्यं केन प्रमाणेन निश्चीयत इत्याकांक्षायामाह—**तच्चेति** । शब्दतात्पर्य्यमित्यर्थः ।

कानि तात्पर्य्यलिङ्गानीत्याकांक्षायां—**लिङ्गानित्विति** । सङ्ग्रहश्लोकं पठति—**उपक्रमेति** । श्लोकं व्याचष्टे—**अस्यार्थः** । को तावुपक्रमोपसंहारावित्याकांक्षायामाह—**प्रकरणेति** । उभयाकांक्षा प्रकरणम् । तत्प्रतिपाद्यस्य वस्तुन आदौ प्रतिपादनमुपक्रमः । अन्ते प्रतिपादनमुपसंहारः । एतद्द्वयं तात्पर्य्यनिर्णायकमेकं लिङ्गमित्यर्थः । तदुभयमुदाहरति—**यथेति** । हे **सोम्य** ! सोमवत्प्रियदर्शन ! **इदं** दृश्यमानं सर्व्वम् **अग्रे** सृष्टेः पूर्व्वं **सदेवासीद् एकमेवाद्वितीयं**, तद्भिन्नं विजातीयं सजातीयं वा किमपि नास्तीत्यर्थः । एवं छान्दोग्ये षष्ठे आदावद्वितीयवस्तुप्रतिपादनमुपक्रमः । तथैतदद्वितीयवस्तु आत्मा यस्य तदेतदात्मा एतदात्मनो भाव **ऐतदात्म्यं इदं सर्व्वं** दृश्यमानम् अद्वितीयवस्तुव्यतिरेकेण नास्तीत्यर्थः । एवमन्तेऽद्वितीयवस्तुप्रतिपादनमुपसंहार इत्यर्थः । अभ्यासं निरूपयति—**प्रकरणेति** । अभ्यासमुदाहरति—**यथेति** । तत्रैव छान्दोग्ये षष्ठे एव नवकृत्वो नववारम् । अपूर्व्वतां

●

तथा कहीं बाहरजाने के समय उसी 'सैन्धवमानय' वाक्य को सुनकर सुननेवाले व्यक्ति को बाहरजाने के (गमन के) प्रकरण के कारण उस 'सैन्धव' शब्द का 'अश्व' के अर्थ में तात्पर्यनिश्चय होता है ।

यदि कदाचित् 'शब्दतात्पर्यज्ञान' को शाब्दबोध के प्रति कारण न मानें तो एकही 'सैन्धव' शब्द से कभी 'लवण' का बोध और कभी 'अश्व' का बोध नहीं हो सकेगा । इसलिये उस शब्दतात्पर्यज्ञान को शाब्दबोधके प्रति कारण अवश्य मानना ही चाहिये ।

वैदिक शब्दों के तात्पर्य का निश्चय षड्विधलिंग के द्वारा किया जाता है । उन षड्विधलिंगों को शास्त्रकारों ने इसप्रकार बताया है—(१) उपक्रम, उपसंहार, (२) अभ्यास, (३) अपूर्वता, (४) फल, (५) अर्थवाद और (६) उपपत्ति इन छह लिंगों के द्वारा वैदिक शब्दों के तात्पर्य का निर्णय किया जाता है ।

(उपक्रमोपसंहार)

अब क्रमशः उक्त षड्लिंगों के लक्षण और उनके उदाहरणों को बतारहे हैं । उनमें से 'उपक्रमोपसंहार' को बताते हैं—

प्रकरण के द्वारा ही प्रतिपादित 'ब्रह्म' रूप अद्वितीय वस्तु है, उस अद्वितीय वस्तु का उस प्रकरण के 'आदि' में तथा 'अन्त' में जो प्रतिपादन किया जाता है, उसी को 'उपक्रमोपसंहार' कहते हैं । 'आदि' में कियेगये 'प्रतिपादन' को 'उपक्रम' और 'अन्त' में कियेगये प्रतिपादन को 'उपसंहार' कहते हैं । जैसे—सामवेद की छान्दोग्य उपनिषद् के षष्ठाध्याय के आदि में उद्दालक-मुनिने अपने पुत्र श्वेतकेतु के प्रति यह वचन कहा—हे प्रियदर्शन श्वेतकेतो ! यह दृश्यमान सम्पूर्ण जगत्, अपनी उत्पत्ति के पूर्व 'सत् ब्रह्म' रूप ही था । वह 'सत्' वस्तु, 'एक-अद्वितीय' रूप ही है । अर्थात् 'सजातीय, विजातीय, स्वगतभेद' से रहित है । इस प्रकार से षष्ठाध्याय के 'आदि' में 'अद्वितीय वस्तु' का जो प्रतिपादन है, उसी का नाम—'उपक्रम' है । तथा उसी षष्ठाध्याय के 'अन्त' में यह वचन कहा गया है—यह दृश्यमान 'समस्त जगत्', 'अद्वितीय ब्रह्म' रूप ही है, उस 'अद्वितीय ब्रह्म' से भिन्न नहीं है । इस प्रकार से उस षष्ठाध्याय के अन्त में उस 'अद्वितीय सत् ब्रह्म' का जो प्रतिपादन कियागया है, उसीका नाम—'उपसंहार' है ।

यह 'उपक्रम' और 'उपसंहार'—दोनों मिलकर एक 'लिङ्ग' कहाजाता है ।

२. अद्वितीयमित्यस्य व्याख्या ब्रह्मेति, न तु श्रुतिपदम् । क्वचित् कोशे ब्रह्मपदं नास्त्येव ।

"विमोक्ष्येऽथ संपत्स्य" इति अद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलम्। प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः। यथा तत्रैव "येनाऽश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात-" मित्यद्वितीयवस्तुप्रशंसनम्।

प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनमुपपत्तिः। यथा तत्रैव "यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यमि" त्यादि वाक्यप्रतिपादितमृदादिदृष्टान्तैरद्वितीयवस्तुप्रतिपादनम् ॥१७॥

●

निरूपयति—**प्रकरणप्रतिपाद्येति**। उदाहरति—**यथेति**। श्रुत्यतिरिक्तं मानं मानान्तरं तदगोचरत्वमपूर्व्वत्वमित्यर्थः। फलं निरूपयति—**प्रकरणेति**। तत्राप्युदाहरणमाह—**यथेति**। **आचार्य्यवान्** गुरुमुखाच्छ्रुतवेदार्थः। **वेद** ब्रह्मास्मीति साक्षात्करोति, तत्त्वमस्यादिवाक्यैरिति शेषः। **तस्य** ब्रह्मसाक्षात्कारवतो **यावन्न विमोक्ष्ये** प्रारब्धफलभोगेन बन्धान्न मुच्यते **तावदेव चिरं** तावत्कालमवस्थानम्। **अथ** भोगेन प्रारब्धे क्षीणे **सम्पत्स्य** ब्रह्म सम्पद्यते परमात्मा भवतीत्यर्थः।

अर्थवादं निरूपयति—**प्रकरणेति**। उदाहरणं दर्शयति—**यथेति**। **येन** श्रुतेन ब्रह्मणाऽश्रुतं **श्रुतं भवति तमादेशमप्राक्षः** पृष्टवानसीति पूर्वेण सम्बन्धः। एवं सर्वत्र द्रष्टव्यम्। उपपत्तिमाह—**प्रकरणेति**। "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः।" तैर्दृष्टान्तैः प्रकरणप्रतिपाद्यप्रतिपादनमुपपत्तिरिति योजना। उदाहरति—**यथेति**। **यथैकेन मृत्पिण्डेन** विज्ञातेन **सर्वं मृण्मयं** घटशरावादिकं **विज्ञातं स्यात्** मृदात्मना, नामधेयं विकारश्चेति द्वयं **वाचारम्भणमनृतं मृत्तिकेत्येव सत्यम्**। अतो

●

(अभ्यास)

प्रकरण के आदि में तथा अन्त में प्रतिपादित वस्तुका उसी प्रकरण के मध्य में पुनः पुनः कियाजानेवाला जो प्रतिपादन है, उसी को 'अभ्यास' कहते हैं। जैसे छन्दोग्य में ही 'तत्त्वमसि' का नौ बार प्रतिपादन किया गया है।

(अपूर्वता)

प्रकरण के द्वारा प्रतिपादित 'वस्तु' में केवल 'श्रुतिप्रमाण' की ही विषयता रहना, अर्थात् श्रुतिप्रमाण के अतिरिक्त प्रत्यक्षादि प्रमाणों की विषयता, उसमें न रहना—इसी को 'अपूर्वता' कहते हैं। जैसे—छान्दोग्य के षष्ठाध्याय में "यं वै सोम्यैतमणिमानं न निभालयसे"—इत्यादिवचनों से बताई गई है।

(फल)

प्रकरण के द्वारा प्रतिपादित वस्तु के ज्ञान से श्रुतिप्रतिपादित वस्तु की प्राप्ति होना ही 'प्रयोजन' कहलाता है, उस प्रयोजन को ही 'फल' कहते हैं। जैसे, षष्ठाध्याय में कहा है—जिस अधिकारी शिष्य ने ब्रह्मनिष्ठ गुरु के मुखारविन्द से श्रवण किया हो, उसी अधिकारी शिष्य को 'तत्त्वमसि' आदिवाक्यों से 'प्रत्यक् अभिन्न ब्रह्म' का 'अहं ब्रह्मास्मि'—इस प्रकार से साक्षात्कार होता है। उस ब्रह्मवेत्ता पुरुष का शरीर, तभी तक स्थित रहता है, जबतक प्रारब्धकर्म के फलभोगों को भोगकर देहादिबन्धनों से वह मुक्त नहीं होता है। 'भोग से प्रारब्धकर्म के निवृत्त होनेपर वह ब्रह्मवेत्ता पुरुष ब्रह्मरूप ही होजाता है'—इस श्रुतिवचन के द्वारा 'अद्वितीय ब्रह्म' के ज्ञान से अद्वितीय ब्रह्म की प्राप्तिरूप प्रयोजन बताया गया है।

(अर्थवाद)

प्रकरण के द्वारा प्रतिपादित 'वस्तु' का जो स्तुतिरूप प्रशंसन, उसी को 'अर्थवाद' कहते हैं। जैसे—षष्ठाध्याय में कहा है—हे श्वेतकेतो! जिस एक वस्तु के श्रवण से 'अश्रुत वस्तु' भी श्रुत हो जाती है, तथा जिस वस्तु का मनन करने से 'अमत वस्तु' भी मनन का विषय बन जाती है। तथा जिस वस्तु का ज्ञान होने पर 'अविज्ञात वस्तु' भी विज्ञात होजाती है। उस एक वस्तु के विषय में तुमने अपने गुरु से पूछा, या नहीं?—इस प्रश्नवचन से उस 'अद्वितीय ब्रह्म' वस्तु की स्तुतिरूप प्रशंसा की गई है। इसी का नाम—'अर्थवाद' है।

(उपपत्ति)

प्रकरण में 'प्रतिपादित वस्तु' को अनेक दृष्टान्तों के द्वारा बताना ही 'उपपत्ति' है। जेसे—षष्ठाध्याय में मृत्तिका,—सुवर्ण आदि के दृष्टान्त को प्रदर्शितकर कारण से भिन्न कार्य को सत्ता का निषेध करके अद्वितीय ब्रह्मवस्तु का प्रतिपादन किया गया है—यही 'उपपत्ति' है ॥१७॥

एवं षड्विधतात्पर्य्यलिङ्गैर्वेदान्तानामद्वितीये ब्रह्मणि तात्पर्य्यनिश्चयः। इदमेव श्रवणमित्युच्यते। श्रुतस्यार्थस्योपपत्तिभिश्चिन्तनं मननम्। विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनम्। तदुक्तम्—

"शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः।
वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्य्यते॥
चेतसस्तु चितिमात्रशेषता ध्यानमित्यभिवदन्ति वैदिकाः।
अन्तरङ्गमिदमित्यमीरितं तत्कुरुष्व परमात्मबुद्धये" इति।

इदं श्रवणादित्रयं साधनसम्पन्नस्य संन्यासिनो ज्ञानं प्रत्यन्तरङ्गसाधनम्, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिश्रुतेः॥१८॥

•

मृद्ज्ञानेन घटादिज्ञानं युक्तमित्यर्थः॥१७॥ एवं लिङ्गानि निरूप्य तैर्वेदान्तानाम्ब्रह्मणि तात्पर्य्यनिश्चयो भवतीत्युपसंहरति—**एवमिति**। ततः किमित्यत आह—**इदमेवेति**। उपक्रमादिषड्विधलिङ्गैरद्वितीये ब्रह्मणि वेदान्तानां तात्पर्य्यनिश्चयानुकूलव्यापाररूपं श्रवणमित्यर्थः। प्रसङ्गान्मननं निरूपयति—**श्रुतस्येति**। निदिध्यासनं निरूपयति—**विजातीयेति**। अनात्मन्यात्मबुद्धिर्द्वैतदर्शनञ्च विजातीयप्रत्ययः। अहम्ब्रह्मास्मीति प्रत्ययात्ततिरस्कारेणेत्यर्थः। अत्र श्रवणेन मानगताऽसम्भावना निवर्त्तते। मननेन मेयगताऽसम्भावना, निदिध्यासनेन विपरीतभावना। अनन्तरं तत्त्वमस्यादिवाक्याद्ब्रह्मापरोक्षज्ञानं शोधिततत्त्वंपदार्थस्य, ततोऽज्ञाननिवृत्तिः। एवं श्रवणादीनां ब्रह्मसाक्षात्कारद्वारा मोक्षे विनियोगः। एतच्चाग्रे व्युत्पादयिष्यति। तत्र सम्मतिमाह—**तदुक्तमिति**। शब्दानां वेदान्तानां शक्तिविषयं **निरूपणं** शक्तितात्पर्य्यावधारणानुकूलव्यापार इत्यर्थः। **युक्तितो** न्यायतो **बुधै**र्वेदान्तशास्त्रार्थरहस्यविद्भिः **वस्तुतत्त्वविषयं निरूपणम**द्वितीयब्रह्मतत्त्वनिर्णयानुकूलव्यापार इत्यर्थः, **युक्तित** उपपत्तितः, सा व्याख्याता। **चेतसः** अन्तःकरणस्य **चितिमात्रशेषता** विजातीयप्रत्ययतिस्कारेण सजातीयप्रत्ययप्रवाहिता; **वैदिकाः** वेदान्तार्थ-

•

जैसे छान्दोग्य के षष्ठाध्याय में उक्त षड्विध लिंगों से अद्वितीय ब्रह्म में तात्पर्यंका निश्चय किया जाता है, वैसे ही उपनिषदों का अद्वितीय ब्रह्म में ही तात्पर्य है—यह निश्चय करना 'श्रवण' कहा जाता है।

'मनन' तथा 'निदिध्यासन' का स्वरूप यह है—**श्रवण किये हुए अद्वितीय ब्रह्मरूप वस्तु का श्रुत्यनुकूल अनुमानादिरूप युक्तियों की सहायता से चिन्तन करना ही 'मनन' है। विजातीय वृत्तियों का तिरस्कार करके सजातीय वृत्तियों का प्रवाहित होते रहना ही 'निदिध्यासन' है।**

'देहादि' अनात्मपदार्थों में जो 'आत्मबुद्धि' है, तथा 'द्वैतप्रपञ्च' का जो दर्शन है, उसे 'विजातीय वृत्ति' कहते हैं, और 'अहं ब्रह्मास्मि इत्याकारक वृत्ति को 'सजातीय वृत्ति' कहते हैं। श्रवण करने से प्रमाणगत असंभावना की निवृत्ति होती है। तथा 'मनन' करने से प्रमेयगत–असंभावना की निवृत्ति होती है। एवं 'निदिध्यासन' करने से विपरीत भावना की निवृत्ति होती है।

'देहादिकों' में जो आत्मबुद्धि होती है, उसी को 'विपरीत भावना' कहते हैं। प्रमाणगत असंभावना और प्रमेयगत-असंभावना दोनों को तृतीय परिच्छेद में बतावेंगे। इसप्रकार श्रवण-मनन-निदिध्यासन के द्वारा असंभावना, विपरीतभावना की निवृत्ति होने के पश्चात् 'तत्-त्वम्' पदार्थ का शोधन जिसने किया हो उस अधिकारी पुरुष को अज्ञान निवृत्तिपूर्वक परमानन्द-प्राप्तिरूपमोक्ष की प्राप्ति होती है। इसप्रकार से 'श्रवणादिकों' का ब्रह्मसाक्षात्कार द्वारा 'मोक्ष' में उपयोग होता है।

उक्त कथन में सर्वज्ञमुनिकी सम्मति बताते हैं—युक्तियों से 'ब्रह्म' में श्रुतियों के तात्पर्यनिश्चय को वेदान्तवेत्ताओं के द्वारा श्रवण कहा जाता है। लक्ष्यभूत अभिन्न वस्तु का युक्तियों से 'स्थिरीकरण मनन' कहलाता है। चित्त की चैतन्य-एकरसता के रूप में स्थिति को श्रौतविचारक 'ध्यान' कहते हैं; इस प्रकार ये अन्तरंग साधन बताये गये हैं। हे शिष्य! परमात्मानुभव के लिये इनका अनुष्ठान करो—यह संक्षेपशारीरक में कहा गया है।

इस प्रकार से यह श्रवणादि त्रय (तीन) साधनचतुष्टयसम्पन्न संन्यासी के ज्ञान के प्रति, अर्थात् ब्रह्मसाक्षात्कार के प्रति अन्तरंग साधन हुआ करते हैं। उक्त कथन में प्रमाण 'श्रुति' है।

साधनानि नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिर्मुमुक्षुत्वञ्चेत्येवं रूपाणि

●

चिन्तकाः। द्वितीयश्लोकस्योत्तरार्द्धं व्याचष्टे—**इदमिति**। **ज्ञानं प्रति** ब्रह्मसाक्षात्कारं प्रति। तत्र प्रमाणमाह—**आत्मेति**। **आदि**-शब्देन "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठास्येत्पाण्डित्यञ्च बाल्यञ्च निर्विद्याथ मुनिः" "तद्विजिज्ञासस्व" इत्यादि-श्रुतयो गृह्यन्ते ॥१८॥

ननु साधनसम्पन्नस्य संन्यासिनः श्रवणादित्रयं ज्ञानं प्रत्यन्तरङ्गसाधनमित्युक्तम्। तत्र कानि साधनानि यैः सम्पन्नः श्रवणाद्यधिकारी स्यात्तत्राह—**साधनानीति**। "अजो नित्यः शाश्वतोऽयं पुराणः", "आकाशवत्सर्वगतश्च नित्यः", "तद्यथेह कर्म्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते"।

"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्। विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति" ॥

"अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः"।

यत्कृतकं तदनित्यं यथा घट इत्यादि श्रुतिस्मृतिन्यायैरात्मा नित्यः। आत्मनोऽन्यदखिलं ब्रह्मलोकान्तमनित्यं पुण्यकार्य्यत्वात्। नच "कर्म्मणा पितृलोको विद्यया देवलोक" इत्यादिश्रुत्या ब्रह्मलोकस्य विद्यासाध्यत्वावगमात्पुण्यकार्य्यत्वानुपपत्तेः

●

उक्त श्रवणादिसाधनों का अधिकारी वही होसकता है, जिसने विवेकादिसाधनचतुष्टय को सम्पन्न करलिया हो, उसी संन्यासी के श्रवणादि तीनों, '**ब्रह्मसाक्षात्कार**' के प्रति अन्तरंग साधन हुआ करते हैं। इसे श्रुति में **इस प्रकार बताया है—** हे मैत्रेयी ! यह आत्मसाक्षात्कार, मुमुक्षुजनों के करने योग्य है। अर्थात् अभोष्ट मोक्षप्राप्ति का साधन, 'आत्मसाक्षात्कार' ही है। अतः आत्मसाक्षात्कार के लिये अधिकारी पुरुष का कर्तव्य है कि वह श्रवण-मनन-निदिध्यासन अवश्य करता रहे। उक्तश्रुति ने आत्मसाक्षात्कार की प्राप्ति के लिये श्रवण-मनन-निदिध्यासन-इन तीन साधनों को बताया है। किन्तु लौकिक-वैदिक कर्मों के अनुष्ठान से विक्षिप्त चित्तवाले मनुष्यों को ये श्रवणादिक साधन रुचिकर नहीं लगते। अतएव 'संन्यस्य श्रवणं कुर्यात्'—इत्यादि वचन भी संन्यासपूर्वक ही श्रवणादि करना बताते हैं। एवंच विवेकादिसाधनचचुष्ट्रयसम्पन्न संन्यासी को ही आत्मसाक्षात्कार के प्राप्त्यर्थ 'श्रवणादि साधन' अपनाने चाहिये ॥१८॥

विवेकादि साधनचतुष्टय (चार साधन) ये हैं—(१) नित्याऽनित्यवस्तुविवेक, (२) इहामुत्रार्थफलभोगविराग, (३) शमादिषट्कसम्पत्ति (४) मुमुक्षुत्व (मुमुक्षुता)।

आत्मा तो नित्य है और आत्मा के अतिरिक्त ब्रह्मलोक पर्यन्त समस्त अनात्म वस्तु अनित्य है—इस प्रकार के विचारों को, जो श्रुति-स्मृति-युक्तियों की सहायता से उत्पन्न हुए हैं, उन्हें विवेक कहते हैं।

श्रुति-स्मृतियों से 'आत्मा' की 'नित्यता' बताई गई है। तथा श्रुति-स्मृतियों के वचनों से यह स्पष्ट हो रहा है कि 'जो कार्य होता है वह अनित्य ही होता है'। जैसे—'घट-पट' आदि कार्य हैं, अतएव वे अनित्य हैं, इत्यादि अनुमानरूप प्रमाण, तथा युक्तियों से 'अनात्मवस्तुओं' का अनित्यत्व निश्चितरूप से अवगत हो जाता है। विवेक करने की इस पद्धति से अधिकारी पुरुष को 'अनात्मवस्तु' के प्रति वैराग्य हो जाता है। इस संसार में जितने पदार्थ, 'सुख' के साधन हैं, जैसे—पुष्पमाला चन्दन, वनिता, उत्तमोत्तम वस्त्र, आभूषण-तेल-फुलेल आदि पदार्थ, 'सुख' के साधन माने जाते हैं, उसीतरह स्वर्गादिपरलोक के पदार्थ भी सुख के साधन हुआ करते हैं। जैसे अमृतपान, अप्सराएँ, दिव्य ऐश्वर्य-वैभव के विलास आदि पदार्थों में भी अनित्यता का निश्चय करके 'कुक्कुरवांतपायस' की तरह उनका भी त्याग करना ही वैराग्य है।

शंका०—"कर्मणा पितृलोको विद्यया देवलोकः"—इस श्रुतिवचन से प्रतीत हो रहा है कि 'ब्रह्मलोक' तो विद्या (ज्ञान) से प्राप्त होता है। अतः इसे 'पुण्यकर्म' का कार्य कहना उचित नहीं है। तब उसे अनित्य कैसे बताया जा रहा है ?

समा०—'विद्यया देवलोकः'—यहाँ 'विद्या' शब्द से 'उपासना' विवक्षित है। वह 'उपासना' मानसक्रियारूप है, क्योंकि उसे किया जासकता है, नहीं भी किया जासकता है, उसे अन्यथा भी कर सकते हैं। 'कर्तुमकर्तुमन्यथाकर्तुं' सभी कुछ उसमें संभव हो सकता है। अतः उपासना के मानस-क्रियारूप होने से 'ब्रह्मलोक' भी पुण्य कर्म का ही कार्य है। इसलिये उसकी अनित्यता; जो बताई गई है, वह अनुपपन्न नहीं है। अतः आत्मा के अतिरिक्त 'सम्पूर्ण विश्व' अनित्य है, एक मात्र 'आत्मा' ही नित्य है—इस प्रकार के विवेचन को ही 'नित्याऽनित्य वस्तु विवेक' कहते हैं।

"परीक्ष्यलोकान्कर्म्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" "शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा आत्मन्येवात्मानं पश्येदि"त्यादिश्रुतिभ्यः ॥१९॥

●

कथमनित्यत्वमिति वाच्यम्। "विद्यया देवलोक" इत्यत्र विद्याशब्देनोपासनाया विवक्षितत्वात्, तस्याः कर्त्तुमकर्त्तुमन्यथा कर्त्तुं शक्यत्वेन मानसक्रियारूपत्वाद् ब्रह्मलोकस्यापि पुण्यकार्य्यत्वेनानित्यत्वोपपत्तेः। एतच्चास्माभिः प्रागेव विस्तरेण प्रतिपादितम्। ततश्च आत्मनोऽन्यदखिलमनित्यम्, आत्मा नित्य इति विवेचनं नित्यानित्यवस्तुविवेकः ॥

ननु कश्चित् स्वयमेव श्रुतिस्मृत्यर्थं न्यायञ्च कथमनुसन्धत्ते ? मास्त्विति चेत् ? तर्हि नित्यानित्यवस्तुविवेकः कथं स्यात् ? किञ्च, "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्भवती" तिश्रुत्या कर्म्मफलस्याक्षय्यत्वावगमात् कथमात्मभिन्नस्यानित्यत्वनिश्चय इति ?

नायं दोषः, मलिनचित्तस्य तदसम्भवेऽपि निष्कामतयाऽनुष्ठितनित्यनैमित्तिकप्रायश्चित्तोपासनैराराधिताराध्यपादश्रीकृष्णभगवदनुगृहीतस्यात्यन्तनिर्मलस्वान्तस्य श्रुत्याद्यनुसन्धानेन नित्यानित्यवस्तुविवेकोपपत्तेः। कर्म्मफलाक्षय्यत्ववचनस्य विध्यनपेक्षिततया गुणार्थवादत्वाद्। "तद्यथेह कर्म्मचितो लोकः क्षीयत" इत्यादिवचनस्य श्रवणविध्यपेक्षितत्वेन न्यायोपोद्वलितत्वेन च भूतार्थवादतया ततो बलवत्त्वाच्च। तत आत्मभिन्नस्यानित्यनिश्चयो भवत्येव। अर्थवादस्त्रिविधः गुणवादोऽनुवादो भूतार्थवादश्चेति। तदुक्तम्—

"विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" ॥ इति।

●

शंका—कोई व्यक्ति स्वयं ही श्रुति-स्मृति के अर्थ का तथा न्याय का अनुसंधान कैसे कर सकेगा ? यदि कहें कि नहीं कर सकता है, तो न करे। तब 'नित्यानित्यवस्तुविवेक, कैसे हो पाएगा ?

किञ्च—"श्रुति से तो ,कर्मफल' की अक्षय्यता (नित्यता) प्रतीत होती है, तब आत्म भिन्न पदार्थों में अनित्यता का निश्चय कैसे किया जाय ?

समा०—मलिन हृदय (मन=चित्त) वाले व्यक्ति के लिये 'नित्याऽनित्यवस्तुविवेक' का होना संभव न रहने पर भी जिस व्यक्ति ने निष्काम कर्म का अनुष्ठान किया है, तथा नित्य; नैमित्तिक, प्रायश्चित, उपासना आदि कर्म के अनुष्ठान से अपने हृदय (मन=चित्त) को कल्मषरहित बना लिया है, निष्काम कर्म के द्वारा तथा नित्यादि कर्मों के द्वारा भगवान् श्रीकृष्ण के आराधनीय पादारविन्द की आराधना करके अनुग्रहपात्र होकर भगवान् श्रीकृष्ण का अनुग्रह प्राप्त किया है, उस निर्मलअन्तः करणवाले व्यक्ति को श्रुत्यादिवचनों के अनुसन्धान से 'नित्याऽनित्यवस्तुविवेक' का होना असंभव नहीं है, अपितु निश्चिरुप से संभव है।

कर्मफल की अक्षय्यता (नित्यता) बतानेवाला वचन तो 'गुणार्थवाद' है, क्योंकि 'विधिवाक्य' को उसकी अपेक्षा है। तथा "तद्यथेह कर्मचितोलोकः क्षीयते"—इत्यादि वाक्य, 'श्रवणविधि' के द्वारा अपेक्षित रहने से और न्याय से उपोद्वलित रहने से 'भूतार्थवाद' रूप है। अतः यह 'गुणार्थवाद' से प्रबल है। उसकारण आत्मभिन्न पदार्थों में अनित्यता का निश्चय होही जाता है।

अर्थवाद तीन प्रकार का होता है—(१) गुणवाद, (२) अनुवाद, (३) भूतार्थवाद। गुणवाद का उदाहरण—'आदित्यो यूपः'। अनुवाद का उदाहरण—'अग्निर्हिमस्य भेषजम्। भूतार्थवाद का उदाहरण—'यन्न दुःखेन सम्भिन्नम्', इत्यादि वाक्य जैसे कितने ही उदाहरण प्रस्तुत किये जासकते हैं।

तथाच विधि को तो फल की ही अपेक्षा रहती है, वह 'नित्य-अनित्य' के प्रतिपादन में उदासीन रहता है। अतः चातुर्मास्य के फल को यदि 'नित्य' मानते हैं; तो ज्योतिष्टोम, अश्वमेधादि की विधियों को अनर्थक ही कहना होगा। अतः चातुर्मास्य के 'अक्षय्यत्व' रुप फल के प्रतिपादक वाक्य को 'गुणार्थवाद' ही कहना चाहिये। जैसे 'पूर्णाहुत्या सर्वकामावाप्ति' के वचन को गुणार्थवाद माना जाता है, उसी तरह प्रस्तुत प्रसंग में भी समझना चाहिये।

अत्र "आदित्यो यूपो भवति" "अग्निर्हिमस्य भेषजम्" "यन्न दुःखेन सम्भिन्नमि"त्यादिवाक्यानि यथाक्रममुदाहरणीयानि।

तथाच विधेः फलापेक्षायामपि नित्यत्वानित्यत्वयोरौदासीन्याच्चातुर्मास्यफलनित्यत्वे ज्योतिष्टोमाश्वमेधादिविधीनामानर्थक्यप्रसङ्गात्तदक्षय्यत्ववचनं गुणार्थवाद एव, पूर्णाहुत्या सर्वकामावाप्तिवचनवत्। "तद्यथेह कर्म्मचितोलोकः क्षीयत" इत्यादि वाक्यं तु श्रवणविध्यपेक्षितत्वान्मानान्तराविरुद्धत्वात् 'यत्कृतकं तदनित्य'मिति न्यायोपोद्बलितत्वादज्ञातार्थबोधकतया भूतार्थवादत्वात् स्वार्थे मानमेव।

तदनेन न्यायेन नित्यानित्यवस्तुविवेके सम्यक् सम्पन्ने कर्म्मफलेष्वनित्यत्वदोषदर्शनेनेहामुत्रार्थफलभोगविरागो भवति। श्ववान्तपायसादाविवैहिकभोगसाधनस्रक्चन्दनवनितादिविषयेष्वमुत्रानृतादिविषयेषु चानित्यत्वदोषदर्शनेनात्यन्तजिहासा सम्पद्यते, अयमेवेहामुत्रार्थफलभोगविरागः। नच प्रथममेतादृशवैराग्यसिद्धौ किं रंहतिपादारम्भेण वैराग्यफलकेनेति[1] वाच्यम्। एतद्दार्ढ्याय तदारम्भोपपत्तेः। ततः शमदमोपरतितितिक्षाश्रद्धासमाधानानि भवन्ति। तान्यग्रे व्युत्पादयिष्यति। ततो मुमुक्षा एवं साधनानि भवन्तीत्यर्थः॥

अत्र विवेकादिसाधनचतुष्टयं समुचितमधिकारिविशेषणमित्याचार्य्याः। अन्ये तु मुमुक्षैवाधिकारिविशेषणं विवेकादिकं तु तत्साधनत्वेन प्रणाल्या[2]। अन्यथा प्रसज्यप्रतिषेधादिति वदन्ति।

विवेकादीनामधिकारिविशेषणत्वे प्रमाणमाह—**परीक्ष्येति। कर्म्मचितान्** कर्म्मसम्पादितान् **लोकान्** ब्रह्मलोकादीन् **परीक्ष्या**नित्यत्वेन निश्चित्य **ब्राह्मणो** ब्रह्मजिज्ञासु**र्निर्वेदं** वैराग्य**मायात्** प्राप्नुयात्। किमिति? यतः, **अकृतो** मोक्षः **कृतेन** कर्म्मणा **नास्ति** न सम्भवति। ततः किं कुर्यादित्यत आह—**तदिति।** विरक्तः सर्वकर्म्माणि नित्यादीनि संन्यस्य **तद्विज्ञानार्थं** मोक्षसाधनीभूतब्रह्मविज्ञानार्थं **गुरुमेवाभिगच्छेत् समित्पाणि**रुपहारपाणिः **श्रोत्रियं** शास्त्रज्ञानवन्तं **ब्रह्मनिष्ठं** करतलामलकवदखण्डैकरसा-

●

"कर्मचितोलोकः क्षीयते"—इत्यादिवाक्य 'श्रवणविधि' से अपेक्षित होने के कारण और प्रमाणान्तर के विरुद्ध अर्थका प्रतिपादन न होने से भी; तथा 'यत् कृतकं तद् अनित्यम्'—इस न्याय से उपोद्बलित रहने से भी; एवं अज्ञात अर्थका बोधक होने से यह वाक्य, 'भूतार्थवाद' है और वह स्वार्थ में प्रमाण भी है।

इसी न्याय से 'नित्याऽनित्यवस्तुविवेक' अच्छीतरह सम्पन्न होनेपर ही कर्मजनित फल में अनित्यत्वदोष का ज्ञान हो पाता है, तब 'इहाऽमुत्रार्थफलभोगविराग' होपाता है। इस विराग के होनेपर ऐहिक भोगसाधन स्रक्-चंदन वनितादिविषयों में तथा पारलौकिक अमृत आदि विषयों में भी अनित्यत्वदोष का ज्ञान होने से अत्यन्त जिहासा (त्यागने की इच्छा) होती है। इसी को 'इहाऽमुत्रार्थफलभोगविराग' कहते हैं।

शङ्का—इसप्रकार की वैराग्यसिद्धि जब पहिले ही हो जाती है, तब वैराग्यफल के प्रतिपादक पाद का आरंभ करने की त्वरा क्यों की गई है?

समा०—वैराग्य को दृढता का सम्पादन करने के लिये पाद का आरंभ किया गया है। उससे शम, दम, उपरति, तितिक्षा, श्रद्धा, और समाधान की निष्पत्ति होती है। तदनन्तर 'मुमुक्षा' जागती है। एवंच विवेकादिसाधनचतुष्टय, समुचित-अधिकारी ब्रह्मजिज्ञासु के विशेषण हुआ करते हैं—ऐसा आचार्य का मत है। किन्तु कुछ लोग केवल मुमुक्षा को ही अधिकारी का विशेषण मानते हैं। और विवेकादिकों को परम्परया उसके साधन के रूप में बताते हैं। अन्यथा प्रसज्यप्रतिषेध प्राप्त होगा।

विवेकादिसाधनों को अधिकारी का विशेषण कहने में प्रमाण उपस्थित करते हैं—कर्म से प्राप्त होने वाले ब्रह्मलोकादि लोक भी अनित्य हैं—यह निश्चय कर ब्रह्म-जिज्ञासु को चाहिये कि वह पूर्णतया विरक्त हो जाय। क्योंकि मोक्ष, (अकृत), कर्म (कृत) से प्राप्त होना संभव नहीं है। इस परिस्थिति में ब्रह्मजिज्ञासु को क्या करना चाहिये? उसे बताते हैं—वह विरक्त हुआ ब्रह्म-जिज्ञासु नित्यादि समस्त कर्मों का विधिवत् परित्याग कर (संन्यास ग्रहण कर)

१. प्रथममिति—अथशब्दार्थतयेत्यर्थः। रंहतिपादस्तृतीयस्याद्यः। 'तत्र प्रथमे तावत्पादे पंचाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते वैराग्यहेतोः' इति सूत्रभाष्यम्।

२. णल बन्धन इति भौवादिकाद् घञि सिद्धेः प्रणाल्येति भवेत्। परम्परयेत्यर्थः। मुमुक्षाप्राधान्यं तस्य सर्वत्रापि प्रकरणेषु फलवाक्यैरधिकारिविशेषणत्वात्। विवेकादीनामेकैकस्मिन् प्रकरणे समाम्नानाद् गौणतेति भावः।

यथोक्तसाधनसम्पन्नस्य संन्यासाधिकारः। विहितानां कर्म्मणां विधिना परित्यागः संन्यासः। स च वैराग्य-हेतुकः।

"यदहरेव विरजेत्तदहरेव प्रव्रजेदि"त्यादि श्रुतेः। "वैराग्यं परमेतस्य मोक्षस्य परमोऽवधिरि"ति स्मृतेश्च। स च वैराग्यस्य तारतम्येन चतुर्विधः—कुटीचकबहूदकहंसपरमहंसभेदात् ॥२०॥

●

नन्दब्रह्मसाक्षात्कारवन्तमिति मुण्डकश्रुतेरक्षरार्थः। कठवल्लीवाक्यमप्युदाहरति—**कश्चिदिति। धीरो** विवेकी जडानृतदुःखाहङ्कारेभ्यः प्रातिलोम्येन सच्चिदानन्दतया अञ्चति प्रकाशत इति प्रत्यङ् स चासावात्मा च प्रत्यगात्मा तं आवृत्तं विषयेभ्यो व्यावृत्तं चक्षुर्यस्य स तथोक्तः। चक्षुरिति सर्वेन्द्रियाणामुपलक्षणम्, जितेन्द्रिय इत्यर्थः। बृहदारण्यकवाक्यमुदाहरति—**शान्त इति। आत्मनि** मनसि **आत्मानम्** अद्वयात्मानं पश्यत्यहम्ब्रह्मास्मीति साक्षात्करोति। **आदिशब्देन** "आत्मनस्तु कामाय सर्वं प्रियम्भवति"।

"असुर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥"

"उदरमन्तरं कुरुतेऽथ तस्य भयम्भवति तत्त्वेव भयं विदुषोऽमन्वानस्य" तस्य त्रय आवसथा स्त्रयः स्वप्ना" इत्यादि-वाक्यानि गृह्यन्ते ॥१९॥

ततः किमित्यत आह—**यथोक्तेति।** यथोक्तसाधनसम्पन्नस्य विवेकादिसाधनसम्पन्नस्य जिज्ञासोरिति शेषः। "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती"त्यादि श्रुतेः।

●

ब्रह्म-ज्ञान के प्राप्त्यर्थ अर्थात् मोक्षसाधनीभूत ब्रह्म-विज्ञानार्थ श्री सद्गुरु के ही शरण में जाय। श्री सद्गुरु के पास रिक्तपाणि (खाली हाथ) कदापि न जाय। किन्तु 'समित्पाणिः' हाथ में समिदादि उपहार लेकर जाय। 'गुरु' भी कैसा होना चाहिये? श्रोत्रिय, ब्रह्मनिष्ठ गुरु होना चाहिये। गुरु को वेद-शास्त्र का यथार्थज्ञान होना चाहिये, एवं उसे ब्रह्मनिष्ठ होना चाहिये, और करतल पर रखे हुए आँवले के साक्षात्कार के समान अखंडैकरस, आनन्द ब्रह्म का साक्षात्कार जिसने किया हो, वही गुरु होने योग्य रहता है।

उक्त तथ्य का समर्थन कठवल्ली का वाक्य भी कर रहा है—अमृतत्व (मोक्ष) की इच्छा रखने वाले जितेन्द्रिय विवेकी पुरुष ने सच्चिदानन्दरूप से प्रकाशित रहने वाले आत्मा का साक्षात्कार किया। इसी के समर्थन में बृहदारण्यक वाक्य भी है—जितेन्द्रिय ब्रह्मजिज्ञासु पुरुष अपने मन में ही 'अद्वय आत्मा' को देखता है। अभिप्राय यह है कि 'अहं ब्रह्मास्मि' यह अनुभव करते हुए उसका साक्षात्कार करता है—इत्यादि अनेक श्रुतियाँ उक्त तथ्य में प्रमाण हैं॥१९॥

क्योंकि सद्गुरु अपने उपदेश के प्रभाव से प्रतिबन्धक की निवृत्ति कर देते हैं, इसलिये साधनसम्पन्न अधिकारी उनकी शरण में जाये—यह अनिवार्य है। वेद-वेदार्थ के ज्ञाता जिस गुरु ने अखण्ड-एक रस मरमानन्द का साक्षात्कार कर लिया है, वही साधक द्वारा आश्रयणीय है। को साधन जुटा चुकने पर मुमुक्षु क्या करना चाहिये?

विवेकादि साधन जिसमें भरपूर हैं ऐसे जिज्ञासु (मुमुक्षु) को संन्यास-ग्रहण करने का अधिकार है, उसका ही संन्यास सफल होता है। विधि से गृहीत कर्मो को विधान के अनुसार ही पूरी तरह अर्थात् साधन-सहित छोड़ना 'संन्यास' कहा जाता है। उसमें कारण वैराग्य ही है।

संन्यास श्रुतिप्रोक्त है। आत्मलोक का इच्छुक संन्यास ग्रहण करे—यह वेद की आज्ञा है।

शंका—साधनयुक्त मुमुक्षु को जिज्ञासा होना संगत नहीं, क्योंकि जिस ब्रह्म की जिज्ञासा होनी है; वह ब्रह्म अज्ञात है या ज्ञात? यदि प्रथम विकल्प स्वीकार्य हो अर्थात् वह अज्ञात हो तो जिज्ञासा संभव नहीं। क्योंकि धर्मी 'ज्ञात' रहने पर ही उसके विषय में जिज्ञासा की जाती है। यदि द्वितीय विकल्प का स्वीकार करते हैं, अर्थात् 'ब्रह्म ज्ञात' है, तब तो उसके विषय में 'जिज्ञासा' होनी ही नहीं चाहिये। इस पर सिद्धान्ती यदि कहे कि 'ब्रह्म ज्ञात है'—यह कहने का तात्पर्य है कि 'ब्रह्म' का ज्ञान आपाततः ही अभी तक हो पाया है। अतः उसके सम्यक् ज्ञान के लिये जिज्ञासा की जा सकती है।

ननु साधनसम्पन्नस्य जिज्ञासा नोपपद्यते। कुत इति चेत्? ब्रह्माज्ञातं ज्ञातं वा? नाद्यः, अज्ञाते जिज्ञासाऽयोगात्। तस्या धर्मिज्ञानसाध्यत्वात्। न द्वितीयो, ज्ञाने सुतरां तदयोगात्। नच तज्ज्ञानमापातस्वरूपमेवेति वाच्यम्। किमिदमापातत्वं—सामान्यरूपत्वं वा संशयरूपत्वं वा परोक्षरूपत्वं वा? नाद्यः, निःसामान्यविशेषे ब्रह्मणि सामान्यलक्षणापाततया असम्भवात्। न द्वितीयः, ब्रह्मणो मानान्तरागम्यत्वेन वेदान्तगम्यत्वेन तज्ज्ञानस्य संशयत्वायोगात्। न तृतीयः नित्याऽपरोक्षे ब्रह्मणि परोक्षज्ञानायोगात्। "यत् साक्षादपरोक्षाद्ब्रह्मे"ति श्रुत्या ब्रह्मणो नित्याऽपरोक्षत्वावगमात्। तस्मात्साधनसम्पन्नस्य जिज्ञासाऽनुपपन्नेति।

उच्यते—यद्यपि ब्रह्मणो मानान्तरागोचरत्वात् स्वप्रकाशसाक्ष्यभिन्नतया नित्याऽपरोक्षत्वाच्च तस्मिन्वेदान्तवाक्याद-परोक्षमेव ज्ञानं जायते, तथापि तज्ज्ञानमापातरूपमेव। अग्रे संशयादिदर्शनात्। तस्यापातत्वं नाम—अविचारितवाक्यजन्यत्वं, संशयादिग्रस्तत्वं वा। नतु संशयत्वं भासमानविरुद्धनानाकोटिजन्यज्ञानस्यैव संशयत्वात्, वाक्यजन्यज्ञानस्यैकोटिकत्वात्। निर्दोष-वेदान्तवाक्यजन्यज्ञानस्य संशयत्वायोगाच्च।

अन्ये तु—क्वचिदेककोटिकज्ञानमप्यनवधारणात्मकम्, अन्यथाऽनभ्यासदशायां जलज्ञानानन्तरं प्रामाण्यसंशयाहित-संशयो न स्यात्। जलज्ञानस्य तत्सत्तानिश्चयरूपत्वात्। न चैककोटिकज्ञानस्य संशयत्वं निश्चयतो निश्चयसंशययोः को भेद इति

●

इस पर पूर्वपक्षी कहता है कि सिद्धान्ती का उक्त कथन उचित नहीं है। सिद्धान्ती प्रथमतः यह स्पष्ट करे कि उसके द्वारा कहा गया 'आपातत्व' कौन वस्तु है? क्या वह 'सामान्यरूप' है? या 'संशयरूप' है? अथवा 'परोक्षरूप' है?

पूर्वपक्षी के द्वारा उपस्थित किये गये तीन विकल्पों में से किसी भी विकल्प को सिद्धान्ती, स्वीकार नहीं कर सकता।

प्रथम विकल्प इसलिये स्वीकार नहीं कर पाएगा कि 'ब्रह्म' तो 'सामान्य-विशेषरहित' है, अर्थात् निःसामान्य-विशेषरूप ब्रह्म है। अतः उसमें 'सामान्यलक्षण आपातता' कैसे संभव हो सकेगी?

तथा द्वितीय विकल्प संशयरूप को भी इसलिये स्वीकार नहीं कर पाएगा कि 'ब्रह्म' तो प्रत्यक्षादि किसी प्रमाण से गम्य (बोध्य) नहीं हैं, वह तो एक मात्र 'वेदान्तवाक्य प्रमाण' से ही गम्य है। अतः उसका ज्ञान 'संशयरूप' हो नहीं सकता।

इसी तरह तृतीय विकल्प 'परोक्षरूप' का भी स्वीकार वह नहीं कर सकता, क्योंकि 'ब्रह्म' तो नित्य अपरोक्ष है, उसका 'परोक्षज्ञान' नहीं हुआ करता। क्योंकि श्रुति कह रही है—ब्रह्म का नित्य अपरोक्षज्ञान हुआ करता है। अतः विवेका-दिसाधन-सम्पन्न व्यक्ति के मन में 'जिज्ञासा' का होना कदापि संभव नहीं है।

समा०—यद्यपि 'ब्रह्म', स्व-प्रकाश साक्षी से अभिन्न होने के कारण किसी अन्य प्रमाण का विषय नहीं है और नित्य अपरोक्ष है, क्योंकि वेदान्त वाक्य से उसका अपरोक्षज्ञान ही होता है।

तथापि तद्विषयक वह प्रत्यक्षज्ञान 'आपातरूप' ही है। क्योंकि आपाततः ज्ञान होने के बाद 'संशय आदि' होते दिखाई देते हैं। अतः वह ज्ञान आपाततः (स्थूल रूप से) हो पाया है। उस ज्ञान में 'आपातत्व' (आपातता) यही है कि वह 'ज्ञान' अविचारित वाक्यजन्य है, अथवा आगे चलकर संशयादि दोषों से ग्रस्त होने वाला वह ज्ञान है। तथापि उस ज्ञान को 'संशयरूप' नहीं कह सकते; क्योंकि जो 'ज्ञान',—भासमान विरुद्ध नानाकोटिजन्य होता है, उसी को संशयज्ञान कहा जाता है। किन्तु यह 'ब्रह्मज्ञान' तो वेदान्तवाक्यजन्य ज्ञान है, अतः 'एक-कोटिक' ही है, नानाकोटिक नहीं है। उसके संशयरूप न होने में एक कारण और भी है कि वह ज्ञान, निर्दुष्ट (दोष-शून्य) वेदान्तवाक्य से जन्य है। अतः उसका संशयरूप होना संभव ही नहीं है।

कुछ अन्य विद्वानों का कहना है कि—'कहीं-कहीं (किसी स्थल विशेष में) 'एक-कोटिकज्ञान भी अनवधारणात्मक (अनिश्चयरूप) होता है। अन्यथा अनभ्यासदशा में 'जलज्ञान' होने पर भी 'प्रामाण्यसंशयाहित संशय' नहीं हो सकेगा। क्योंकि जल बताने वाले का ज्ञान (जल ज्ञान), निश्चय रूप (निश्चयात्मक) है।

शंका—यदि 'एक-कोटिकज्ञान' को भी 'संशय' रूप कहेंगे, तो 'निश्चय' और 'संशय' में भेद ही नहीं रहेगा।

समा०—एक-कोटिकज्ञान को संशयात्मक माननेपर भी संशय और निश्चय में भिन्नता (भेद) रहती है। क्योंकि 'संशयविरोधी ज्ञान' को ही निश्चय कहते हैं। उक्त कथन में 'अन्योन्याश्रय' की आशंका नहीं करनी चाहिये, क्योंकि एक धर्मी में, स्वाकारविरुद्धद्वयवैशिष्ट्यावगाहिज्ञानविरोधिज्ञान को ही 'संशय' कहते हैं।

वैराग्यं द्विविधम्। अपरम्परञ्चेति। तत्रापरं चतुर्विधम्—यतमानव्यतिरेकैकेन्द्रियत्ववशीकारभेदात्। अस्मिन् संसारे इदं सारमिदमसारमिति सारासारविवेको यतमानवैराग्यम्। चित्तगतदोषाणां मध्ये एतावन्तः पक्वा एतावन्तोऽपक्वा इति विविच्यापक्वदोषनिरोधे यत्नोव्यतिरेकवैराग्यम्। विषयेच्छासत्त्वेऽपि मनसोन्द्रियनिरोधावस्थानमेकेन्द्रियत्ववैराग्यम्। वशीकारवैराग्यमैहिकामुष्मिकविषयजिहासा। तदुक्तम्, "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यमिति"। तत्त्रिविधम्—मन्दं तीव्रं तीव्रतरञ्चेति। पुत्रदारादिविषयवियोगे धिक् संसारमिति बुद्धचा विषयजिहासा मन्दवैराग्यम्। अस्मिन् जन्मनि पुत्रदारादि मास्त्विति स्थिरबुद्धचा विषयजिहासा तीव्रम्। पुनरावृत्तिसहितब्रह्मलोकादिपर्य्यन्तं मास्त्विति स्थिरबुद्धचा विषयजिहासा तीव्रतरम्॥२१॥

●

वाच्यम्। संशयविरोधिज्ञानस्यैव निश्चयत्वात्। न चान्योऽन्याश्रयः। एकस्मिन् धर्म्मिणि स्वाकारविरुद्धद्वय-वैशिष्ट्यावगाहिज्ञाना-विरोधि ज्ञानत्वस्यैव संशयत्वात्।[1] एवञ्च वाक्यजन्यमपि ज्ञानमेककोटिकमपि अग्रे संशयादिदर्शनादनवधारणात्मकमेवेति वदन्ति। तथाच साधनसम्पन्नस्य जिज्ञासोः संन्यासाधिकार इति निरवद्यम्।

ननु यथोक्तसाधनसम्पन्नस्य संन्यासाधिकार इत्युक्तम्। तत्र कोऽसौ संन्यास इत्याकाङ्क्षायां तं व्युत्पादयति—**विहितानामिति**। अविहित-निषिद्धत्यागिनां संन्यासित्वाभावाद्—**विहितानामित्युक्तम्**। आलस्यादिना विहितत्यागिनां भ्रष्टानां संन्यासित्ववारणाय **विधिनेत्युक्तम्**।

संन्यासस्य वैराग्यहेतुकत्वे प्रमाणमाह—**यदहरेवेति**। यस्मिन्दिने वैराग्यं प्राप्नुयात् तदहस्तस्मिन्नेव दिने **प्रव्रजेत्** सर्वकर्म्मसंन्यासं कुर्य्यात् इति श्रुतेरक्षरार्थः। **मोक्षस्य** संन्यासस्य। संन्यासं विभजते—**स चेति**॥२०॥

वैराग्यतारतम्यमुपपादयितुं वैराग्यं विभजते—**वैराग्यमिति**। अपरवैराग्यं विभजते—**तत्रेति**। तयोर्मध्य' इत्यर्थः। यतमानवैराग्यं निरूपयति—**अस्मिन्निति**। व्यतिरेकवैराग्यं निरूपयति—**चित्तेति**। एकेन्द्रियत्ववैराग्यमाह—**विषयेति**। चतुर्थमाह—**वशीकारेति**। तत्र पतञ्जलिसूत्रं संवादयति—**तदुक्तमिति**। ऐहिकाः स्रक्चन्दनवनितादयो दृष्टविषया आमुष्मिकाः

●

एवंच वाक्यजन्य ज्ञान भी यद्यपि एककोटिक है तथापि आगे चलकर (बाद में) संशयादि के होने से वह अनवधारणात्मक ही है।

तथाच विवेकादिसाधनसम्पन्न जिज्ञासु को ही संन्यास का अधिकार है।

संन्यास के लक्षण में यदि 'विधि से गृहीत'—इतना न कहें तो निषिद्धादि के त्यागी में अतिव्याप्ति होगी, तथा—'विधान के अनुसार'—यह न कहें तो आलस्य से 'वैध कर्म' छोड़ने वाले भ्रष्ट लोगों में अतिव्याप्ति होगी। अतः यथोक्त ही पूर्ण लक्षण है।

संन्यास में श्रुति प्रमाण है। श्रुति में कहा है कि—जिस दिन वैराग्य होजाय; उसीदिन 'संन्यास ग्रहण' करे। स्मृति में भो बताया है—परम वैराग्य ही मोक्ष की अर्थात् संन्यास की चरम सीमा है। वह वैराग्य—कुटीचक, बहूदक, हंस व परमहंस भेद से चार प्रकार का होता है॥२०॥

वैराग्य की कमी व अधिकता की युक्तता समझाने केलिये वैराग्य के भेद बताते हैं—

वैराग्य दो तरह का होता है—अपर वैराग्य और पर वैराग्य। पर वैराग्य तो 'सर्वथा निस्त्रैगुण्य की दृढ इच्छा' है। अपर वैराग्य चार प्रकार का है—(१) यतमान (२) व्यतिरेक (३) एकेन्द्रिय (४) वशीकार।

(१) इस संसार में यह सार (ग्राह्य) है और यह निःसार है—इस प्रकार सारवान् और निःसारवान् को पृथक्-पृथक् पहचानना 'यतमान वैराग्य' कहा जाता है।

(२) चित्त में स्थित दोषों में से इतने तो निवृत्त हो गये, इतने अभी निवृत्त नहीं हुए—इस तरह दोषों को अलग-अलग करते हुए जो रागादि दोष निवृत्त नहीं हुए हैं; उन्हें हटाने का प्रयत्न करना 'व्यतिरेक वैराग्य' है।

(३) मन में विषय की इच्छा रहने पर भी इन्द्रियों को नियन्त्रण में रख लेना 'एकेन्द्रिय वैराग्य' है।

१. तृतीयपरिच्छेदे (अनु० ५) वक्ष्यतीदम्।

तत्र मन्दवैराग्ये संन्यासाधिकार एव नास्ति ।

"यदा मनसि वैराग्यं जायते सर्ववस्तुषु । तदैव संन्यसेद्विद्वानन्यथा पतितो भवेदि"ति स्मरणात् ।

तीव्रवैराग्ये सति यात्राद्यशक्तौ कुटीचकाधिकारः । तच्छक्तौ बहूदकसंन्याधिकारः । तीव्रतरवैराग्ये सति हंस-संन्यासाधिकारः । एते त्रयः संन्यासाः । एतेषामाचाराश्च स्मृतौ प्रसिद्धाः ।

●

आनुश्रविकास्तेषु विगता तृष्णा यस्य स तथा तस्यैहिकामुष्मिकविषये जिहासायुक्तस्येत्यर्थः । तादृशस्य वशीकारनामकं वैराग्य-म्भवतीति शेषः । अर्थाद्यतमानादित्रयं सूचितं द्रष्टव्यम् । तदपि विभजते—**तदिति** । मन्दवैराग्यस्वरूपं दर्शयति—**पुत्रेति** । तीव्रवैराग्यं निरूपयति—**अस्मिन्निति** । तीव्रतरं निरूपयति—**पुनरावृत्तीति** । न चेदं वैराग्यतारतम्यं कुतोऽवगम्यते इति वाच्यम् । परवैराग्ये मृदुमध्यतीव्रभेदेन तारतम्यावगमात् । अपरे स्वानुभवानुरोधेन तदुपपादितमिति भावः ॥२१॥

कस्मिन्वैराग्ये सति को वा संन्यासः कर्त्तव्य इत्याकाङ्क्षायां तद्वक्तुं मन्दवैराग्ये सति संन्यासानधिकारमाह—**तत्र मन्देति** ।तत्र गमकमाह—**यदेति** । यात्राद्यशक्तिशक्तिभ्यां तीव्रविरक्तस्य संन्यासद्वयमाह—**तीव्रेति** । तीव्रतरविरक्तस्य हंससंन्यासाधि-कारमाह—**तीव्रतरेति** । तर्हि ते संन्यासा निरूपणीयास्तेषामाचाराश्च वक्तव्या इति ? तत्राह—**एत इति** । मुमुक्षोः परमहंस-संन्यासाधिकारमाह—**तीव्रतरेति** । परमहंससंन्यासं विभजते—**स चेति** । विविदिषा-संन्यासस्य लक्षणमाह—**साधनेति** । तत्र

●

(४) ऐहलौकिक तथा पारलौकिक विषयों को नाशवान् (अनित्य) जानकर उनको त्यागने की इच्छा करना ही 'वशीकार' नाम का वैराग्य है । इसी वशीकारसंज्ञक वैराग्य के स्वरूप को भगवान् पतञ्जलि ने अपने योगसूत्र में बताया है ।

इस वशीकारवैराग्य के भी (१) मन्द, (२) तीव्र, (३) तीव्रतर भेद से तीन प्रकार होते हैं । इनमें से 'मन्दवैराग्य' तब होता है, जब स्त्री, पुत्र, धन आदि प्रिय वस्तुओं से वियुक्त करने वाले इस संसार को मनुष्य धिक्कारने लगता है और सांसारिक सभी विषयों को त्यागने की इच्छा करने लगता है, तब उसे 'मन्दवैराग्य' (श्मशानवैराग्य) हुआ है समझना चाहिये ।

तथा जन्म पाकर भी मनुष्य का स्त्री, पुत्र धन, प्रतिष्ठा आदि प्राप्त न करने का जब दृढ निश्चय रहता है, और उसी कारण उन्हें सर्वदा एवं सर्वथा त्यागने की इच्छा रखता है, तब उसे 'तीव्र वैराग्य हुआ' है, समझना चाहिये ।

उसीतरह मनुष्य, ब्रह्मलोक तक के उत्तमोत्तम लोकों को भी विनाशी (अनित्य) समझकर उन्हें पाने की इच्छा नहीं रखता, अर्थात् ऐहलौकिक तथा पारलौकिक किसी भी विषय के मोह में न फँसकर उनके प्राप्त न करने में दृढ़ संकल्प रहता है, तब उसे 'तीव्रतर वैराग्य' हुआ है; समझना चाहिये ॥२१॥

मनुष्य के मन में जब समस्त वस्तुमात्र के प्रति वैराग्य उत्पन्न हो जाय, उसी समय वह विवेकी मनुष्य समस्त कर्मों से संन्यास ले ले । तथाकथित वैराग्य के विना यदि सन्यासग्रहण करता है, तो वह मनुष्य 'पतित' हो जाता है ।— इस स्मृतिवचन से सिद्ध है कि 'मंद वैराग्य' होने पर संन्यास में अधिकार नहीं है ।

'तीव्र वैराग्य' के होनेपर पुरुष को (१) कुटीचक और (२) बहूदक—इन दो संन्यासों में अधिकार होता है । जो तीव्र वैराग्यवान् पुरुष, 'तीर्थयात्रा' करने में समर्थ न हो, उसे 'कुटीचक संन्यास' का अधिकार होता है, और जिसका शरीर 'तीर्थयात्रा' करने में सशक्त (समर्थ) हो, उसे 'बहूदक संन्यास' का अधिकार होता है ।

तीव्रतर वैराग्य के प्राप्त होने पर पुरुष को 'हंस-संन्यास' का अधिकार होता है । 'कुटीचक', 'बहूदक', 'हंस'— इन तीन सन्यासों का स्वरुप और उनके आचारों को मनु-पराशर स्मृति में बताया गया है । तथा आत्मपुराण में भी उन्हें कहा गया है ।

पूर्वोक्त सबप्रकार के वैराग्यों में उत्कृष्ट जो वैराग्य है, वह 'परवैराग्य' है । इसके स्वरूप को आगे बताया जायगा । इस परवैराग्य को प्राप्त किये हुए पुरुष को 'परमहंससंन्यास' का अधिकार होता है । अर्थात् तीव्रतर वैराग्य से सम्पन्न मुमुक्ष को ही 'परमहंससंन्यास' का अधिकार होता है । यह परमहंस संन्यास भी (१) विविदिषा और (२ विद्वत्संन्यास के भेद से दो

तीव्रतरवैराग्ये मुमुक्षोः परमहंससंन्यासाधिकारः। स च परमहंसो द्विविधः—विविदिषासंन्यासो विद्वत्संन्यासश्चेति। साधनसम्पन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः। "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती"त्यादि श्रुतिस्तत्र मानम्। स च द्विविधः जन्मापादककर्मत्यागात्मकः, प्रैषोच्चारणपूर्वकं दण्डधारणाद्याश्रमरूपश्चेति। "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशु"रित्यादि श्रुतिराद्ये मानम्। विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्यासप्रतिबन्धे आद्ये संन्यासेऽधिकारः। अत्र स्त्रीणामप्यधिकारः। जनकादीनां मैत्रेयीप्रभृतीनां तत्त्वविदां श्रुतिस्मृतिपुराणेतिहासेषूपलम्भात् ॥२२॥

●

प्रमाणमाह—एतमेवेति। लोको द्विविधः। आत्मलोकोऽनात्मलोकश्चेति। तत्रानात्मलोकः श्रुत्या त्रिविधः प्रतिपादितः। "अथ त्रयो वाव लोका मनुष्यलोक" इति श्रुतिः। आत्मलोकोऽपि श्रुत्या प्रतिपादितः—"अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एतमविदितो न भुनक्ति यथा ह वेदो वाननक्तोऽन्यद्वा कर्म्माकृतं यदि ह वा अप्यनवं विन्महत् पुण्यं कर्म्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते:"। "किं प्रजया करिष्यामो येषां नोऽयमात्माऽयंलोक" इत्याद्याःश्रुतयः। ततश्च एतमिति सर्वनाम्नः प्रकृतपरामर्शित्वात् "स वा एष महानज आत्मा" इत्यात्मनः प्रकृतत्वादिहापि लोकमिति लोकशब्देनात्मलोको विवक्षित इति गम्यते। एवञ्च लोक्यतेऽनेनेति व्युत्पत्त्या लोकमात्मानुभवमिच्छन्तः प्रव्राजिनो विरक्ताः प्रव्रजन्ति संन्यासं कुर्वन्तीत्यर्थः। अत्रापूर्वत्वात्संन्यासं कुर्य्युरिति विधिर्द्रष्टव्यः। "उपांशुयाजमन्तरा यजतो"त्यत्र यथा तद्वत्। तदुक्तम्, "विधिर्वा धारणवदि"ति।

विविदिषा संन्यासं विभजते—स चेति। जन्मापादकं कर्म्म काम्यं, फलाभिसन्धिकृतं नित्यादि कर्म्म तस्य त्यागः। काम्यकर्मणां स्वरूपेण त्यागो विवक्षितः। नित्यादीनां फलाभिसन्धित्यागमात्रं विवक्षितं न स्वरूपेणान्यथावान्तरभेदो[1] न स्यादिति भावः। तत्र प्रथमे विवदिषासंन्यासे प्रमाणमाह—नेति। कर्म्मणा काम्येन फलाभिसन्धिकृते[2] नित्यादिना वा कर्म्मणाऽमृतत्वं नाप्नुयुरेवं सर्वत्र योजनीयम्। प्रजया पुत्रेण धनेन हिरण्यादिना, एके विरक्ताः त्यागेन यथोक्त-जन्मापादक-कर्म्मत्यागात्मकसंन्यासेन अमृतत्वं मोक्षसाधनं ब्रह्मसाक्षात्कारमानशुः प्राप्नुयुरित्यक्षरार्थः।

●

प्रकार का होता है। विवेकादिसाधनचतुष्टयसम्पन्न पुरुष, जब तत्त्वज्ञान के प्राप्त्यर्थ संन्यासग्रहण करता है, तब उसे 'विविदिषा संन्यास' कहते हैं। भगवती श्रुति कह रही है कि वैराग्यसम्पन्न पुरुष के पाने योग्य जो यह आत्मलोक है, उसे प्राप्त करने की इच्छा से वह (अधिकारी मुमुक्षु पुरुष) संन्यासग्रहण करे।

अभिप्राय यह है कि (१) आत्मलोक (२) अनात्मलोक के भेद से 'लोक' दो प्रकार का है। श्रुति ने (१) मनुष्य लोक, (२) पितृलोक, (३) देवलोक के भेद से अनात्मलोक को तीन प्रकार का बताया है। तथा आत्मलोक को भी 'अथ यो ह वा' इत्यादि श्रुति ने बताया है—यहाँ पर 'एतम्' सर्वनाम पद, प्रकृत परामर्शी है। और "स वा एष महानज आत्मा"—इस श्रुति से 'आत्मा' ही प्रकृत है। अतः यहाँ पर भी 'लोकम्' कहने से अर्थात् 'लोक' शब्द से आत्मलोक' की ही विवक्षा की गई है। आत्मसाक्षात्कार की इच्छा से संन्यास ग्रहण करते हैं—यहाँ पर अपूर्वार्थ का प्रतिपादन रहने से 'संन्यासं कुर्युः'—ऐसा 'विधि' जानना चाहिये। जैसे—'उपांशुयाजमन्तरा यजति'—यहाँ पर 'उपांशुयाग' का विधि समझा जाता है। यही बात 'विधिर्वाधारणवत्' से भी कही गई है।

अब विविदिषा संन्यास का भेद बताते हैं—विविदिषा संन्यास भी दो प्रकार का होता है—(१) जन्मा—पादक कर्म का त्यागरूप। अर्थात् एक तो जन्म की प्राप्ति कराने वाले कर्मों का त्याग रूप होता है (२) और दूसरा प्रैष-मन्त्र के उच्चारण पूर्वक दण्ड धारणादि आश्रमरूप होता है।

फल-प्राप्ति के उद्देश्य से किये जाने वाले काम्यकर्म तथा नित्यकर्म के अनुष्ठान से जन्म की प्राप्ति होती है। जिसमें उक्त कर्मों का त्याग किया जाता है, उसे 'विविदिषा संन्यास' कहते हैं। इसमें 'काम्यकर्म' का तो स्वरूपेण ही (स्वरूप से ही) परित्याग विवक्षित है, किन्तु 'नित्य कर्मों' का स्वरूपेण परित्याग विवक्षित नहीं है, अन्यथा अवान्तर भेद नहीं होगा। अपितु उनके फल की केवल इच्छा मात्र का परित्याग विवक्षित है। 'विविदिषासंन्यास' में प्रमाणभूत श्रुति को बताते हैं—

१. विविदिषासंन्यासद्वैविध्यमित्यर्थः नित्यादिकुर्वत्सु संन्यासपदं गीतोक्तरीत्या गौणं ज्ञेयम्।

२. कृतेनेति तृतीयान्तः स्यात्।

द्वितीये तु "दण्डमाच्छादनं कौपीनं परिगृहेच्छेषं विसृजेदि"ति ।

"संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया । प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः" ॥

इत्यादि वचनानि प्रमाणानि ।

गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नसाक्षात्कारेण गृहस्थादिना (विक्षिप्तचित्तस्य) चित्तविश्रान्तिलक्षणां जीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यासः । तत्र "एतमेव विदित्वामुनिर्भवति"; "अथ योगिनां परमहंसानामि"त्यादि-परमहंसोपनिषत्;

"यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् । तदैव दण्डं संगृह्य सोपवीतां शिखां त्यजेद् ॥" इत्यादिश्रुतिस्मृति-वचनानि प्रमाणानीति ॥२३॥

•

कस्य तत्राधिकार इत्याकाङ्क्षायामाह—**विरक्तस्येति** । **संन्यासप्रतिबन्धे** दण्डधारणाद्याश्रमरूपसंन्यासप्रतिबन्धे । जन्मापादककर्म्मत्यागात्मकसंन्यासे स्त्रियोऽप्यधिक्रियन्त इत्याह—**अत्रेति** । तत्र गमकमाह—**जनकादीनामिति** । आदिशब्देनाजातशत्रु-याज्ञवल्क्यकहोलप्रभृतयो गृह्यन्ते । **मैत्रेयीप्रभृतीनामिति** । नच स्त्रीणामुपनयनाभावात् वेदाध्ययनानर्हतया कथम्ब्रह्मज्ञानाधिकारस्तस्य महावाक्यजन्यत्वादिति वाच्यम् । अतीतानेकजन्मसुकृतपरीपाकवशेन नितान्तनिर्मलस्वान्तानां मनुष्याणां पुराणश्रवणादिना तत्त्वज्ञानोत्पत्तौ बाधकाभावात् । त्रैवर्णिकानामेव वेदान्तश्रवणादिना ज्ञानोत्पत्तिः । एतदभिप्राया श्रुतिरपि "यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्त" इति । अत एवेतिहासपुराणेषु विदुरादीनां तत्त्वज्ञानं श्रूयते । किमु वक्तव्यं ब्राह्मणीनां मैत्रेय्यादीनां तत्त्वज्ञानाऽधिकारेऽत्रैवर्णिकस्त्रीणां ज्ञानमात्रोपयोगिश्रुत्यभ्यासे न विरोध इति केचि[1]त्तदाह—**श्रुतिस्मृतीति** ॥२२॥

द्वितीयविविदिषा संन्यासे प्रमाणमाह—**द्वितीय इति** । "यदि वेतरथा ब्रह्मचर्य्यादिव प्रव्रजेद् गृहाद्वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्" ।

"प्रवृत्तिलक्षणोयोगोज्ञानं संन्यासलक्षणम् । तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ।"

"त्यज धर्म्ममधर्म्मञ्च उभे सत्यानृते त्यज । उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥"

"कर्म्मणा बध्यते, जन्तुर्विद्यया च विमुच्यते । तस्मात्कर्म्म न कुर्वन्ति यतयः पारदर्शिनः ॥"

इत्यादि-वचनान्यादिशब्देन गृह्यन्ते ।

•

पूर्ववर्ती अधिकारी पुरुषों ने फलाभिसन्धिकृत अथवा नित्य कर्मों के द्वारा मोक्षसाधनीभूत ब्रह्मसाक्षात्कार नहीं किया, उसी तरह पुत्र-पौत्रादि प्रजा के द्वारा तथा गौ, सुवर्णादि धन के द्वारा उस ब्रह्मसाक्षात्कार को नहीं प्राप्त किया, किन्तु उन पूर्ववर्ती विरक्त पुरुषों ने 'जन्मापादक कर्मों के त्यागरूप संन्यास' के द्वारा ही मोक्षसाधनीभूत ब्रह्मसाक्षात्कार को प्राप्त किया था। अतः वर्तमान काल के विरक्त अधिकारी पुरुष भी काम्य तथा नित्यकर्म के त्यागरूप संन्यास के द्वारा ही ब्रह्मसाक्षात्कार का सम्पादन करें—इस श्रुति ने विविदिषा संन्यास को ही बताया है ॥२२॥

इस विविदिषा संन्यास के ग्रहण करने का अधिकार किसे है ? यह जिज्ञासा होने पर कहते हैं—जिन विरक्त गृहस्थादिकों को किसी प्रबल निमित्त के कारण दण्डधारण रूप आश्रम (संन्यास) ग्रहण करने में बाधा (प्रतिबन्ध) उपस्थित हो, तो वे गृहस्थ पुरुष, इस विविदिषा संन्यास के ही अधिकारी हैं।

तथा जन्मापादक कर्मत्यागात्मक विविदिषा संन्यास में जनकादिकों की तरह स्त्रियों को भी अधिकार है। क्योंकि श्रुति, स्मृति, इतिहास, पुराणों ने जनक, याज्ञवल्क्य, अजातशत्रु, कहोल, मैत्रेयी, गार्गी आदि को ब्रह्मसाक्षात्कार की प्राप्ति का वर्णन किया है। इन सब को 'विविदिषा संन्यास' से ही ब्रह्मसाक्षात्कार हुआ है।

शंका—उपनयन संस्कार के द्वारा ही यज्ञोपवीतधारण तथा वेदाध्ययन करने का अधिकार प्राप्त होता है। स्त्रियों का तो उपनयन संस्कार नहीं होता है, उसी कारण उन्हें वेदाध्ययन का भी अधिकार नहीं है। क्योंकि "स्त्री-शूद्रौ नाधीयाताम्"—इस श्रुति ने स्त्री और शूद्र को वेदाध्ययन का निषेध किया है, और 'तत्त्वमसि' आदि वैदिक महावाक्यों से ही

१. 'द्विजस्त्रीणामपि श्रौतज्ञानाभ्यासेऽधिकारिते' ति स्कान्दसंहितावचनादिति बोध्यम् ।

विद्वत्संन्यासमुपपादयति—**गृहस्थाश्रमादाविति**। उत्पन्नो ब्रह्मसाक्षात्कारो यस्य स तथा तेनेति यावत्। **आदि** शब्देन ब्रह्मचारिवानप्रस्थौ गृह्येते। चित्तविश्रान्तिर्नाम विक्षेपोपशमः। विद्वत्संन्यासे प्रमाणमाह—**तत्रेति**। एतं परमात्मानं **विदित्वा** ब्रह्मास्मीति साक्षात्कृत्य **मुनिर्मननशीलो भवतीत्यर्थः**। तच्च मननशीलत्वमसति कर्त्तव्यान्तरे सम्भवतीति संन्यासो विधीयते। तस्य जीवन्मुक्तिरेव फलं तत्त्वज्ञानस्य सम्पन्नत्वादितिभावः। **आदिशब्देन** "एतं वैवमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्ति", "न दण्डं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः"।

"कंथा-कौपीनवासास्तु दण्डधृग् ध्यानतत्परः। एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः॥"

●

ब्रह्मसाक्षात्कार की प्राप्ति होती है। एवंच स्त्रियों और शूद्रों को महावाक्य के श्रवण का अधिकार न होने से उन्हें तो ब्रह्मज्ञान प्राप्त करने का अधिकार ही नहीं है।

समा०—स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्—यह कहकर स्वयं भगवान् ने ही स्त्री-शूद्रों को भी मोक्ष की प्राप्ति का होना बताया है। किञ्च—श्रुति[1] ने तो मनुष्य मात्र के लिये ब्रह्म-विद्या के द्वारा सर्वात्मभाव की प्राप्ति का होना बताया है। और 'ब्रह्मज्ञान' तो वेदान्तशास्त्र के श्रवण के विना संभव नहीं है। अतः व्यवस्था इस प्रकार सिद्ध होती है—वेदाध्ययन के अधिकारी जो-ब्राह्मण, क्षत्रिय और वैश्य—त्रैवर्णिक हैं, उन्हें तो उपनिषद्रूप वेदान्तशास्त्र के श्रवण से ही 'ब्रह्मज्ञान' होता है। और अनेकानेक पूर्वजन्मों में अर्जित पुण्यपुञ्ज से परिपूतनिष्कलमष अन्तःकरण वाले, वेदाध्ययन के अनधिकारी जो स्त्री, शूद्र आदि हैं, उनको वेदान्त में बताए गये अर्थ के प्रतिपादक पुराणादि के श्रवण से ही ब्रह्मज्ञान हो जाता है। अतएव इतिहास-पुराणों में विदुरादि शूद्रों को ब्रह्मज्ञान की प्राप्ति का वर्णन किया गया है। इसी रीति से मैत्रेयी, गार्गी आदि स्त्रियों को भी ब्रह्मज्ञान की प्राप्ति में अधिकार है।

बृहदारण्यक उपनिषद् में योगोश्वर याज्ञवल्क्य ने अपनी पत्नी मैत्रेयी को निषादस्थ पतिन्याय से श्रुतिवचनों के द्वारा ही ब्रह्मविद्या का उपदेश किया है। तथा उसी उपनिषद् में गार्गी और योगोश्वर याज्ञवल्क्य दोनों का संवाद प्रसिद्ध ही है। अतः आत्मज्ञान के उपयोगी तावदुक्त तात्कालिक वेदान्त श्रुतियों के श्रवण में त्रैवर्णिक-स्त्रियों का अधिकार है। यह तो अकाट्य सत्य है कि उपनयन-संस्कार से रहित होने के कारण स्त्रियों को वेदाध्ययन का अधिकार नहीं है। 'गुरु मुखोच्चारणानूच्चारणमध्ययनम्'—अर्थात् गुरुमुख से उच्चरित वेद वाक्यों का, पश्चात् शिष्य के द्वारा उच्चारण किया जाना ही 'अध्ययन' पदार्थ है। स्त्रियों को वेदान्त वाक्यों के श्रवण का अधिकार निषादस्थपतिन्याय से तात्कालिक है। याज्ञवल्क्य-मैत्रेयी के संवाद का निरूपण आत्मपुराण के सप्तमाध्याय में भी किया गया है ॥२३॥

अब दूसरे प्रकार के आश्रमरुप विविदिषा संन्यास में प्रमाण बताते हैं—**भगवती श्रुति कहरही है कि दण्ड को तथा शीतनिवारणार्थ कन्था को तथा कौपीन एवं कमण्डलु को संन्यासी ग्रहण करे। इनके अतिरिक्त समस्त वस्तुओं का परित्याग करे।**

इसीप्रकार स्मृति भी कह रही है—कि ब्रह्मलोकपर्यन्त सम्पूर्ण संसार को निःसार देखकर 'परमात्मरूप सार' को देखने की इच्छा से 'पर वैराग्य' को प्राप्तहुआ विरक्त अधिकारी पुरुष, गृहस्थाश्रम के पूर्व ही आश्रमरूप विविदिषा संन्यास को ग्रहण करे—इत्यादि श्रुति तथा स्मृति के वचनों ने आश्रमरूप विविदिषा संन्यास को बताया है। यहांतक द्विविध विविदिषा-संन्यास का निरूपण किया गया।

अब विद्वत्संन्यास का उपपादन करते हैं—

ब्रह्मचर्य, गृहस्थ अथवा वानप्रस्थाश्रम में वेदान्तश्रवण करके जिस अधिकारी पुरुष को ब्रह्मसाक्षात्कार हुआ हो, वह तत्त्ववेत्ता पुरुष, अपने चित्तविक्षेपनिवृत्तिरुप जीवन्मुक्ति के उद्देश्य से जिस संन्यास का ग्रहण करता है, उसी को 'विद्वत्संन्यास' कहते हैं। इस विद्वत्संन्यास को भी श्रुति-स्मृति के प्रमाणभूत वचनों ने बताया है।

श्रुतिस्मृतियों का यह अभिप्राय है—'अहं ब्रह्मास्मि'—इस प्रकार से 'परमात्मा' का साक्षात्कार करके विद्वान् पुरुष, मननशील (मुनि) होजाता है। अर्थात् परमहंस संन्यासी हो जाता है। यह मननशीलता तभी हो पाती है, जब कोई दूसरा कर्तव्य नहीं रहता। पूर्व ही तत्त्वज्ञान के सम्पन्न होजाने के कारण 'मनन' का फल 'मुक्ति' ही है। आत्मसाक्षात्कार

१. यद् ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते इति श्रुतिः।

तत्राद्यसंन्यासो जन्मान्तरीयेऽपि[1] ज्ञाने उपकरोति जनकादीनां तत्त्वज्ञानोपलम्भाच्छ्रुत्यादिषु । "यद्यातुरःस्यान्मनसा वाचा वा संन्यसेदि"त्यातुरसंन्यासविधानाच्च । आतुरेऽपि विरक्तस्यैवाधिकारात् न संन्यासान्तरम् । अन्यथा प्रकरणविरोध-प्रसङ्गात् । तदुक्तम्—

"जन्मान्तरेषु यदि साधनजातमासीत्संन्यासपूर्वकमिदं श्रवणादिकञ्च ।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र तत्राश्रमादिषु वसन्न निवारयामः" इति ॥२४॥

●

"कपालं वृक्षमूलानि कुचैलमसहायता । समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥
इत्यादि-वचनानि गृह्यन्ते ॥२३॥

ननु विविदिषा संन्यासस्तत्त्वज्ञानहेतुरित्युक्तं तदयुक्तम् । याज्ञवल्क्यजनकप्रभृतीनां तत्त्वज्ञानोपलम्भादित्याशंक्याह—**तत्रेति** । तयोर्मध्य इत्यर्थः । जन्मान्तरीयसंन्यासस्य ज्ञानोपकारित्वे गमकमाह—**जनकादीनामिति** । बृहदारण्यकश्रुत्यादिष्वित्यर्थः । गमकान्तरमाह—**यद्यीति** । "यदहरेव विजेत्तदहरेव प्रव्रजेदिति" वैराग्यहेतुकं संन्यासं साङ्गं कर्त्तव्यत्वेन विधाय दशाविशेषे "यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदि"ति पूर्वविहितं वैराग्यहेतुकं संन्यासमनूद्येतराङ्गव्यावृत्तये विकल्पेन वाङ्मनसरूपसाधनद्वयं विधीयते "मनसा वाचा वा संन्यसेदि"ति । तदानीं मुमूर्षोः श्रवणाद्यसम्भवेन तत्त्वज्ञानासम्भवात्, स च संन्यासो जन्मान्तरे ज्ञाने उपकरोतीत्यङ्गीकर्त्तव्यमन्यथा संन्यासस्य वैयर्थ्यं स्यादिति भावः ।

●

करके तत्त्वज्ञानी पुरुष, 'पुत्रैषणा, वित्तैषणा, लोकैषणा—इन तीनों एषणाओं का परित्याग करके भिक्षावृत्ति करता है, अर्थात् विद्वत्संन्यास का आचरच करता है । वह तत्त्वज्ञानी परमहंस संन्यासी दण्ड, शिखा, यज्ञोपवीत, आच्छादन में से किसी को भी धारण नहीं करता ।

स्मृति कहतीहै—**वैराग्यशील अधिकारी पुरुष को जिस क्षण में परब्रह्म सनातन तत्त्व का साक्षात्कार होजाय, उसीक्षण वह** एकदण्ड **का ग्रहण करके यज्ञोपवीत सहित शिखा का परित्याग करे** । जो विद्वान् पुरुष, शीत के निवारणार्थ केवल कथा, कौपीन वस्त्र को धारण करके सर्वदा प्रत्यगात्मा के ध्यान में तत्पर रहता है, तथा एकाकी विचरण करता है, उस विद्वान् पुरुष को देवतागण, 'ब्रह्मवेत्ता परमहंस संन्यासी कहते हैं । इस प्रकार के परमहंस का लक्षण यह रहता है कि वह भिक्षा के निमित्त मृण्मय कपाल को अपने पास रखता है, और वृक्ष के नीचे निवास करता है, तथा कुत्सित वस्त्र को धारण करता है, और जिसको किसी की सहायता नहीं है, तथा सम्पूर्ण प्राणिमात्र में जिसकी बुद्धि समान रहती है,—इन्हीं लक्षणों से उस मुक्त परमहंस को पहिचाना जाता है,—इत्यादि श्रुतिस्मृति के वचनों से विद्वत्संन्यास को बताया गया है । इस विद्वत्संन्यास का फल, 'जीवन्मुक्ति' ही है । इन विद्वत्परमहंस संन्यासियों का चिन्ह तथा आचार अव्यक्त होता है । क्योंकि कहीं पर तो श्रुति-स्मृतियों ने उनके लिये दण्ड, वस्त्रादि का अभाव बताया है, और कहीं पर दण्ड, वस्त्रादिकों का धारण करना बताया है । इस अव्यक्त चिह्न एवं अव्यक्त आचार का निरूपण, आत्मपुराण के ग्यारहवें—अध्याय के आरम्भ में किया गया है ॥२३॥

शंका—पूर्वोक्त विविदिषा संन्यास को तत्त्वज्ञान (ब्रह्मज्ञान) का हेतु (कारण) बताया गया था, किन्तु वह कैसे संभव हो सकता है? क्योंकि जनक, अजातशत्रु, याज्ञवल्क्य आदि को विविदिषा संन्यास के अभाव में भी तत्त्वज्ञान (ब्रह्मज्ञान) हुआ है, यह श्रुति-स्मृतियों के वचनों से अवगत हो रहा है ।

समा०—केवल वर्तमान जन्म (इसी जन्म) का ही विविदिषा संन्यास, उस तत्त्वज्ञान (ब्रह्मज्ञान) का कारण होता है, यह नहीं समझना चाहिये । किन्तु जन्मान्तरीय (पूर्वजन्म का) गृहीत विविदिषा संन्यास भी तत्त्वज्ञान (ब्रह्मज्ञान) का हेतु (कारण) होता है । अतएव जनक, याज्ञवल्क्य प्रभृतियों को वर्तमान जन्म में विविदिषा संन्यास के अभाव में भी जन्मान्तरीय विविदिषा संन्यास से ही ब्रह्मज्ञान (तत्त्वज्ञान) की प्राप्ति हो गई थी । इस प्रकार ब्रह्मज्ञान रूप कार्य से जन्मान्तरीय विविदिषा संन्यासरूप कारण का अनुमान किया जा सकता है । जन्मान्तरीय संन्यास भी तत्त्वज्ञान के होने में उपकारक हुआ करता है, इस रहस्य को बृहदारण्यकश्रुति ने भी जनकादिकों के उदाहरणों को देकर बताया है ।

१. जन्मान्तरीयोऽपीति पाठान्तरम् । ज्ञान इति तन्निमित्तमित्यर्थः ।

तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकारणत्वमन्वयव्यतिरेकाभ्यां निश्चीयते, अर्हार्थे श्रोतव्य इत्यादि-तव्यप्रत्यय इति वाचस्पतिमिश्राः। आचार्य्यास्त्वेवं वर्णयन्ति—यथोक्ताधिकारिणो "द्रष्टव्यः श्रोतव्य" इत्यादि वाक्यैर्दर्शनमुद्दिश्य मननिदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां सह श्रवणं नामाङ्गि विधीयते।

•

नन्विदं ब्रह्मलोकसाधनं संन्यासान्तरमस्तु? नच तत्र प्रमाणाभावः "संन्यासाद्ब्रह्मणः स्थानमि"ति स्मृतेः सत्त्वात्; तथाच न वैयर्थ्यमित्याशंक्याह—**आतुरेऽपीति।** तथाच "संन्यासाद्ब्रह्मणः स्थानमि"ति स्मृतिः, तस्यैव नान्तरीयकफलं प्रतिपादयति। अथवा स्मार्त्तसंन्यासस्य तत्फलमस्तु, प्रकृतस्य वैराग्यहेतुकस्य संन्यासस्य ज्ञानैकफलत्वादिति भावः। विपक्षे दण्डमाह—**अन्यथेति।** तत्र सम्मतिमाह—**तदुक्तमिति** ॥२४॥

एवं संन्यासं सप्रपञ्चं निरूप्य साधनसम्पन्नस्य संन्यासिनः श्रवणादिकं तत्त्वज्ञानहेतुः तथैवान्वयव्यतिरेकानुविधानादित्युपसंहरति—**तदेवमिति।** यस्मात्कारणात्साधनचतुष्टयसंपन्नस्य जिज्ञासोः श्रवणादिकं तत्त्वज्ञानं प्रत्यन्तरङ्गसाधनं

•

इसी रहस्य को अन्य युक्ति (गमकान्तर) से बतारहे हैं—'यदहरेव' श्रुति, वैराग्यवान् (विरक्त) पुरुष के लिये सम्पूर्ण अंगोंसहित विविदिषा संन्यास का विधान कर रही है। तदनन्तर पुनः उसी प्रकरण में व्याधि (रोग) से आतुर-**होने पर उसी क्षण अन्यान्य अंगों के बिना ही केवल मन, अथवा वाणी से 'संन्यास' का ग्रहण करे—इस आतुर संन्यास का विधान कर रही है।** मृत्यु के समीप प्राप्त हुए उस आतुर संन्यासी को उस समय आत्मज्ञान की प्राप्ति श्रवणादिकों से होना संभव नहीं है। उस कारण यह स्वीकार करना ही होगा कि वह उस समय का आतुर संन्यास, उस मरणासन्न पुरुष को उसके जन्मान्तरीय (अन्य पूर्व जन्म की) आत्मज्ञान की प्राप्ति करा देता है। अन्यथा वह आतुर संन्यास ही व्यर्थ हो जायेगा। इस युक्ति से (गमक से) भी स्पष्ट होता है कि जन्मान्तरीय विविदिषा संन्यास में 'आत्मज्ञान' की कारणता (हेतुता) है।

शंका—ब्रह्मलोकप्राप्ति का हेतुभूत यह आतुर संन्यास, पूर्वोक्त विविदिषा संन्यास से भिन्न ही (पृथक् ही) संन्यास है। क्योंकि 'संन्यासाद्ब्रह्मणः स्थानम्'—इस स्मृति ने 'आतुर संन्यास' का फल–'ब्रह्मलोक प्राप्ति' बताया है। अतः आतुर संन्यास प्रमाण रहित न होने से व्यर्थ भी नहीं है।

समा०—इस आतुर संन्यास में भी 'विरक्त पुरुष' का ही अधिकार होता है। और 'विविदिषा संन्यास' के प्रकरण में ही इस आतुरसंन्यास का विधान किया गया है। अतः यह आतुरसंन्यास, पूर्वोक्त 'विविदिषा संन्यास' से 'भिन्न संन्यास' नहीं है। अपितु उस विविदिषा संन्यास के अन्तर्गत ही है। और 'संन्यासाद्ब्रह्मणः स्थानम्'—इस स्मृति ने तो आतुरसंन्यास के ब्रह्मलोकप्राप्तिरूप अवान्तर फल को बताया है। उस कारण 'आत्मज्ञानरूप मुख्य फल' का निषेध नहीं किया गया है।

अथवा उस स्मृति ने 'कुटीचकादिरूप स्मार्तसंन्यास' के ब्रह्मलोकप्राप्ति रूप फल को बताया है। उस कारण वैराग्यहेतुक **'आतुर संन्यास'** का 'आत्मज्ञान प्राप्ति' ही मुख्य फल है। अन्यथा प्रकरण विरोध होगा।

अपने कथन में सम्मति बताते हैं—जन्मान्तरीय संन्यास से भी आत्मज्ञान की प्राप्ति होती है, इस तथ्य को श्रीसर्वज्ञ महामुनि ने संक्षेप शारीरक में भी बताया है। सांक्षेप शारीरक में सर्वज्ञ महामुनि कहते हैं—

यदि कदाचित् अधिकारी पुरुष को अपने जन्मान्तरीय किये हुए संन्यास पूर्वक श्रवणादि साधन सिद्ध हुए हों (परिपक्व हुए हों) तो अन्य जन्म में गृहस्थादि किसी भी आश्रम में रहते हुए भी पूर्वकृत उन साधनों के प्रभाव से उस अवस्था में भी उसे वे ब्रह्मविद्याप्राप्ति रूप फल की प्राप्ति करा देते हैं—इस तथ्य का निषेध हम नहीं कर सकते। इससे यह सिद्ध हुआ कि जनक, याज्ञवल्क्यादिकों को जन्मान्तरीय विविदिषा संन्यास से आत्मज्ञान की प्राप्ति होना असंभव नहीं है, अर्थात् संभव है। यहाँ तक संन्यास का सप्रपञ्च निरूपण किया गया है ॥२४॥

इस प्रकार पूर्वोक्त साधनयुक्त अधिकारी को तत्त्वसाक्षात्कार उत्पन्न तो श्रवणादि के कारण ही है। क्योंकि श्रवणादि के होने पर ज्ञानोत्पत्ति तथा उनके बिना ज्ञान की अनुत्पत्ति—इस अन्वय-व्यतिरेक से निश्चित होता है।

श्रोतव्यः—श्रवण करना चाहिये—इत्यादि तव्यप्रत्यय (चाहिये शब्द) योग्यता बताता है, अर्थात् श्रवण के योग्य है, (उचित है) इतना ही बताता है, विधान नहीं करता ऐसा वाचस्पति मिश्र का मन्तव्य है।

तस्मात्कारणादित्यर्थः। नच तत्त्वज्ञानोद्देशेन "श्रोतव्य" इत्यादिना श्रवणादिविधिः किं न स्यादिति वाच्यम्, विधेरप्राप्तविषयत्वात्। यद्यपि ब्रह्मसाक्षात्कारं प्रति श्रवणादीनां कारणत्वं मानान्तरेणाप्राप्तं तथापि षड्जादिस्वरसाक्षात्कारं प्रति गान्धर्वशास्त्राभ्यासस्य कारणताग्रहकाले श्रवणत्वेन दुर्ज्ञेयवस्तुसाक्षात्कारत्वेनान्वयव्यतिरेकाभ्यां सामान्याकारेण कार्य्यकारणभावस्य निश्चितत्वात्। ब्रह्मणोऽप्यतिसूक्ष्मतया दुर्ज्ञेयत्वात् तत्साक्षात्कारं प्रत्यपि श्रवणादीनामन्वयव्यतिरेकाभ्यां कारणत्वं प्राप्तमेवेति न तत्र विधिरिति भावः। ननु "श्रोतव्य" इत्यादितव्यप्रत्ययानां का गतिरित्याशंक्याह—**अर्हार्थं इति**। नियमादृष्टसाध्यस्य परमापूर्वस्यासम्भवेन नियमविध्यसम्भवादर्हार्थे श्रोतव्य इत्यादितव्यप्रत्ययो युक्त इति वाचस्पतिमिश्राणामाशयः।

मतान्तरमाह—**आचार्य्यास्त्विति**। "आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मादाचार्य्यस्तेन चोच्यते"॥

●

आचार्य तो यह वर्णन करते हैं—दर्शन के योग्य आत्मा के विषय में श्रवण करे—इत्यादि वाक्यों द्वारा अधिकारी के लिये आत्मदर्शन के उद्देश्य से फलोत्पत्ति में सहायक मनन-निदिध्यासन रूप अंगों सहित अंगी (श्रवण) का विधान किया जा रहा है।

साधनसम्पन्न संन्यासी को 'तत्त्वज्ञान' की प्राप्ति में अन्वय-व्यतिरेक के द्वारा 'श्रवणादिक' हेतु होते हैं। 'आत्मा वा अरे'—श्रुति के द्वारा अधिकारी पुरुष को, आत्मज्ञान प्राप्त करने के लिये श्रवणादिकों का करना कहा गया है। इस सन्दर्भ में श्रीवाचस्पतिमिश्र आदि कुछ ग्रन्थकार तो 'श्रवण' की विधि नहीं मानते, और विवरणाचार्य आदि कुछ विद्वान् 'श्रवण' का विधान (विधि) मानते हैं।

श्रीवाचस्पतिमिश्र का यह अभिप्राय है—विवेकादि साधन-चतुष्टयसम्पन्न जिज्ञासु के द्वारा किये गये 'श्रवणादिकों' में 'आत्मज्ञान प्राप्ति' की हेतुता (कारणता) का निश्चय अन्वय-व्यतिरेक से हो रहा है। उस कारण 'श्रवणा' दिकों का विधान करना संभव नहीं है। क्योंकि अप्राप्त अर्थ का ही विधान हुआ करता है। जैसे—'यजेत स्वर्गकामः'—यहाँ पर 'याग' में 'स्वर्गसाधनता', 'प्रत्यक्षादि' प्रमाणों से सर्वथा अप्राप्त है। उस कारण 'स्वर्गनिरूपित साधनता' का बोधक 'यजेत स्वर्गकामः'—यह वाक्य विधिरूप है।

यद्यपि श्रवणादिकों में ब्रह्मसाक्षात्कार की कारणता (हेतुता), उक्त श्रुत प्रमाण से भिन्न अन्य किसी प्रमाण से प्राप्त नहीं है, तथापि अतिसूक्ष्म होने से दुर्विज्ञेय जो षड्जादिक स्वर हैं, उन स्वरों के साक्षात्कार के प्रति गान्धर्वशास्त्राभ्यास को 'अन्वय-व्यतिरेक' के बल पर 'कारण' माना जाता है। तथैव उन स्वरों के समान ही 'ब्रह्म' भी अति सूक्ष्म होने से दुर्विज्ञेय है। अतः ब्रह्मसाक्षात्कार के प्रति भी वेदान्तशास्त्र के श्रवण में 'कारणता', अन्वय-व्यतिरेक से प्राप्त ही है। प्राप्त होने के कारण ही 'श्रवण' का विधान करना संभव नहीं है।

शंका—'श्रोतव्यः' में जो 'तव्य' प्रत्य है, उसकी गति कैसे लगाई जायेगी?

समा०—'तव्य' प्रत्यय का अर्थ यहाँ पर 'विधि'—नहीं है, किन्तु 'योग्यता' (अर्हार्थक) अर्थ है। अर्थात् 'आत्मा', श्रवण करने योग्य है। इसी प्रकार 'मन्तव्यः, निदिध्यासितव्यः'—इन दोनों में भी 'विधि' नहीं है—यह समझना चाहिये। क्योंकि नियमादृष्ट से साध्य होने वाले परमापूर्व का संभव न रहने से नियम विधि का यहाँ संभव नहीं है। इसलिये अर्हार्थ में ही श्रोतव्यः इत्यादि तव्यप्रत्यय को करना उचित होगा। किन्तु आचार्यों का सिद्धान्त पृथक् है।

प्रश्न—आचार्य किसे कहते हैं?

उत्तर—शास्त्रतात्पर्य का पूर्ण पर्यालोचनपूर्वक निर्णय कर स्वयं उसे आचरण में जो उतारे तथा अन्यों द्वारा भी उसका आचरण करावे, वही आचार्य-शब्द का वाच्य, शास्त्रों में बताया है। केवल बहुश्रुत या सूक्ष्मचिन्तन में कुशल को आचार्य नहीं माना जाता। यह लक्षण पंचपादिकाकार भगवान् पद्मपाद के सिद्धान्त का अनुसरण करने वाले विवरणकार प्रकाशानन्द-श्रीचरण आदि में समुपलब्ध होता है, अतः उन्हें ही आचार्य कहा जाता है।

प्रश्न—श्रवण विहित है या नहीं? इस पर आचार्यों का मत क्या है?

उत्तर—श्रुति में विवेकादि साधनचतुष्टयसम्पन्न संन्यासी के प्रति 'आत्मसाक्षात्कार' की प्राप्ति कराने के लिये मनन-निदिध्यासनरूप फलोपकारी अंगों सहित 'श्रवण' रूप अंगी का विधान किया जा रहा है। साक्षात् फलसाधन के रूप में जिस

इति श्लोकोक्तलक्षणाः पञ्चपादिकाचार्य्यमतानुसारिणो विवरणाचार्य्यप्रभृतय आचार्य्या इत्युच्यन्ते। **एवं** वक्ष्यमाण-रीत्या। एवं शब्दार्थमाह—**यथेति**। साधनचतुष्टयसम्पन्नस्य जिज्ञासोः कृतसंन्यासस्येत्यर्थः।

यथा तुषनिवृत्तिमुद्दिश्य "व्रीहीनवहन्ती"त्यवघातो विधीयते एवं "द्रष्टव्य" इति ब्रह्मसाक्षात्कारमुद्दिश्य "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्पाण्डित्यं बाल्यञ्च निर्विद्याथ मुनिः" "तद्विजिज्ञासस्वे"त्यादि वाक्यैः साङ्गं श्रवणं नामाङ्गी विधीयते। यत्साक्षात् फलसाधनत्वेन श्रुतं तदङ्गी, शेषी, प्रधानमिति चोच्यते। तत्सन्निधौ फलं विना यत्कर्त्तव्यत्वेन श्रुतं तदङ्गं, शेषः, सहकारीत्यभिधीयते। "यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"ति विधिना दर्शपूर्णमासाग्नेयादयः षट् यागाः साक्षात्फलसाधनत्वेन विहितास्त एवाङ्गिनः। तत्प्रकरणे "व्रीहीन्प्रोक्षति" "समिधो यजती"त्यादिना प्रोक्षणादयः समिदादयश्च साक्षात्स्वर्गफलमन्तरेण कर्त्तव्यत्वेन विहितास्तान्यङ्गानि "फलवत्सन्निधावफलं तदङ्गमिति" न्यायात्।

तानि चाङ्गानि द्विविधानि—स्वरूपोपकारीणि, फलोपकारीणि चेति। तत्र प्रोक्षणादयः स्वरूपोपकारिणस्त एव सन्निपत्योपकारिण इत्युच्यन्ते। प्रयाजादयस्तु फलोपकारिण आरादुपकारिण इति भाष्यन्ते। एवं प्रकृतेऽपि वेदान्तश्रवणं प्रमाण-विचारात्मकतया साक्षाद्ब्रह्मसाक्षात्कारफलसाधनत्वेन विहितत्वादङ्गी; विवेकादिगुरूपसदनान्तानि तत्सन्निधौ विहितानि स्वरूपोपकार्य्यङ्गानि ज्ञानातिरिक्त-फलाश्रवणात्; मननादि फलोपकार्य्यङ्गं, फलं विना तत्सन्निधौ विहितत्वात्। तथा च मनन-निदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां श्रवणं नामाङ्गी विधीयते "श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति। नच तद्विषये

●

पदार्थ का श्रवण किया जाता है, उस पदार्थ को 'अंगी, शेषी या प्रधान' शब्द से कहा जाता है, और उस अंगी के समीप ही फल रहीत जिस पदार्थ का 'कर्तव्य' के रूप में श्रवण किया जाता है, उसे 'अंग', शेष, अप्रधान' सहकारी शब्द से कहा जाता है।

वे 'अंग' भी (१) 'स्वरूपोपकारी' और (२) फलोपकारी' के भेद से दो प्रकार के होते हैं। जो अंग, 'अंगी' के स्वरूप की उत्पत्ति में उपकारक होते हैं, उन 'अंगों' को स्वरूपोपकारी कहते हैं। इन स्वरूपोपकारी अंगों को ही मीमांसक विद्वान् 'सन्निपत्योपकारक' अंग कहते हैं।

और जो 'अंग', 'अङ्गोसेजन्य फल' की उत्पत्ति में उपकारक होते हैं, उन अङ्गों को 'फलोपकारी' अंग कहते हैं। इन फलोपकारी अंगों को ही मीमांसकविद्वान् 'आरादुपकारक' अंग कहते हैं। वेदान्तशास्त्र का जो 'श्रवण' है, वह 'प्रमाणविचार-रूप है, और उसका साक्षात् फल—'ब्रह्मज्ञान' है। अतः फलसाधन के रूप में उपर्युक्त वाक्य ने 'दर्शन' के उद्देश्य से मनन, निदिध्यासनरूप फलोपकारी दो अंगों के सहित 'श्रवण' का विधान किया है। उसकारण 'श्रवण' तो 'अंगी' है।

उस 'श्रवणरूपअंगी' के समीप विधानकिये हुए 'विवेकादि' गुरूपसदनान्त जो चार साधन हैं, उनका ज्ञानातिरिक्त कोई अन्य फल, नहीं बताया गया है। उसकारण वे 'विवेकादि चार साधन', उस 'श्रवणरूप अंगी' के स्वरूप की उत्पत्ति में उपकारक होते हैं, इसलिये उन विवेकादि चार साधनों को 'स्वरुपोपकारी अंग' (सन्निपत्योपकारक अंग) कहाजाता है।

उस 'श्रवण' रूप अंगी के समीप ही फलरहित 'मनन, निदिध्यासन' का विधान किया गया है। उसकारण वे 'मनन, निदिध्यासन'—दोनों, 'श्रवण' रूप अंगी के 'ब्रह्मसाक्षात्कार' रूप फल को उत्पत्ति में उपकारक होजाते हैं। अतः मनन, निदिध्यासन-दोनों को फलोपकारी अंग' (आरादुपकारकअंग) कहागया है।

एवंच 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'—इस वचन से 'मनन, निदिध्यासन' रूप फलोपकारी अंगोंसहित 'श्रवण' रूप अंगी का विधान किया गया है। अर्थात् ब्रह्मसाक्षात्कार प्राप्त करने के लिये साधनचतुष्टयसम्पन्न संन्यासी, 'मनन, निदिध्यासनरूप अंगों' के सहित 'श्रवण' रूप अंगी का सम्पादन अवश्य करे।

शंका—भाष्यकार ने कहा है कि आत्मज्ञान के विषय में श्रुति द्वारा प्रयुक्त भी विधि कुण्ठित हो जाती है क्योंकि वह ऐसा विषय नहीं है कि, उसमें किसी को विधि से प्रेरित किया जाये। अर्थात् 'श्रोतव्यः मन्तव्यः' वाक्य में किसी नियोज्य **(अधिकारी पुरुष) का निर्देश न रहने से लिङादि, तव्यत् आदि को विधायक शक्ति कुण्ठित हो गई है। तब आत्मश्रवण की विधि, आचार्य कैसे मानते हैं ?**

श्रूयमाणा[1] लिङादयोऽनियोज्यविषयत्वात्कुण्ठीभवन्तीत्यादिना भाष्यकृता निराकृतत्वात्कथं श्रवणविधिरिति वाच्यम्, ज्ञानविधिरेव तत्र निराकृतः नतु श्रवणादिविधिस्तत्र प्रवृत्त्यभावप्रसङ्गात् ।

नच फलेच्छया तत्र प्रवृत्तिरिति वाच्यम् । द्वैतात्मविचारे पुराणादिविचारे च प्रवृत्तिप्रसङ्गेनाद्वैतविचारे वेदान्त-विचारे च नियमेन मुमुक्षोः प्रवृत्त्यभावप्रसङ्गात् । तस्माच्छ्रवणादिविधिरपेक्षितः । तदुक्तम् भगवता सूत्रकारेण "सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतोविध्यादिवदि"ति । नच सहकारिध्यानविधिरेव तत्र स्वीकृतः न श्रवणादिविधिरिति वाच्यम् । प्रधानविध्यभावे सहकारिविध्ययोगात् । तस्माच्छ्रवणं विधेयमेव ।

पुरुषप्रवर्त्तको विधिः । स च द्विविधः—अभिधानविधिरभिधेयविधिश्चेति । लिङादिघटितं[3] वाक्यमभिधानविधिः । स चतुर्विधः—उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति । तत्र कर्म्मस्वरूपबोधको विधिरुत्पत्तिविधिः । स यथा "अग्निहोत्रं जुहोति" "सोमेन यजेते"त्यादिः । श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्यानामन्यतमसहायेनाङ्गताबोधको विधि-विनियोगविधिः । स यथा "दध्ना जुहोति" "पशुना यजेते"त्यादिः । उत्पन्नस्य कर्मणः फलसम्बन्धबोधको विधिरधिकारविधिः । स यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" "ज्योतिष्टोमेन स्वर्गकामो यजेते"त्यादिः । साङ्गे कर्मणि अनुष्ठापको विधिः प्रयोगविधिः । स यथा "पौर्णमास्यां पौर्णमास्या यजेत" "अमावस्यायाम् अमावास्यया यजेते"त्यादिः । एवं प्रकृतेऽपि "तस्माद् ब्राह्मणः पाण्डित्यं

●

समा०—भाष्यकार ने वहाँपर ज्ञानविधि का ही निराकरण किया है । श्रवणादि विधि का नहीं । अन्यथा श्रवण में किसी की प्रवृत्ति ही नहीं होगी ।

शंका—फल के प्रति अनुराग रहने से (फल की इच्छा से) श्रवणादिकों में प्रवृत्ति होजायेगी ।

समा०—द्वैतविचार में और पुराणादि के विचार में प्रवृत्ति का प्रसंग रहने से अद्वैतविचार में और वेदान्तविचार में मुमुक्षु की प्रवृत्ति नियमतः (निश्चितरूप से) होना कठिन है । इसलिये 'श्रवण' का विधान अपेक्षित है । भगवान् सूत्रकार ने इसी तथ्य का निर्देश "सहकार्यन्तरविधिः" सूत्र से किया है ।

शंका—'आत्मावाऽरे०' इस वाक्य में ध्यानादि सहकारियों का विधान किया गया है, 'श्रवणादिकों का नहीं, ऐसा क्यों न कहें ?

समा०—प्रधान का विधान न रहनेपर 'सहकारी' का विधान कैसे होगा ? अतः 'श्रवण' को ही विधेय कहना चाहिये ।

'पुरुषप्रवर्तको विधिः'—पुरुष को प्रेरित करनेवाला (प्रवर्तक), 'विधि' ही होता है । वह दो प्रकार का होता है—(१) अभिधानविधि, (२) अभिधेयविधि । लिङादिघटित वाक्य को 'अभिधानविधि' कहते हैं । वह चारप्रकार का होता है—(१) उत्पत्तिविधि, (२) विनियोगविधि, (३) अधिकारविधि, (४) प्रयोगविधि । उनमें से (१) कर्मस्वरूप का बोधन करनेवाले विधि को 'उत्पत्तिविधि' कहते हैं । जैसे—'अग्निहोत्रं जुहोति', 'सोमेनयजेत' इत्यादि । (२) अङ्गत्वबोधक श्रुति, लिङ्गादिकों में से किसी एक प्रमाण (अन्यतम प्रमाण) की सहायता से अङ्गता के बोधक विधि को 'विनियोगविधि' कहते हैं । जैसे—'दध्नाजुहोति', 'पशुना यजेत' इत्यादि । (३) विहित कर्म के साथ फलसम्बन्ध बताने वाले विधि को 'अधिकारविधि' कहते हैं । जैसे—'अग्निहोत्रं जुहुयात् स्वर्गकामः', 'ज्योतिष्टोमेन स्वर्गकामो यजेत'—इत्यादि । (४) सांग कर्म के अनुष्ठान का बोध कराने वाला विधि, 'प्रयोगविधि' कहलाता है । जैसे—'पौर्णमास्यां यजेत', 'अमावास्यायां यजेत' इत्यादि ।

इसी प्रकार प्रकृत में भी 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य' इत्यादि वाक्य को 'उत्पत्तिविधि' जानना चाहिये, और 'मन्तव्य' इत्यादि को 'विनियोगविधि और 'तद्विजिज्ञासस्व' को 'अधिकारविधि' समझना चाहिये । तथाहि—'सन्' प्रत्ययवाच्य 'इच्छा' का प्रकृत्यर्थ जो 'ज्ञान' है, उसको करना शक्य न होने से 'सन्' प्रत्यय के अन्तर्निहित जो 'विचार' है, उसे लक्षित करके और 'प्रकृति' के फलीभूत 'ज्ञान' को लक्षित करके 'अद्वितीय ब्रह्मज्ञान' के लिये उसकी 'कर्तव्यता' का विधान किया जा रहा है । अर्थात् 'ब्रह्मसाक्षात्कारकामो वेदान्तश्रवणं कुर्यात्' । इस प्रकार से 'श्रवण' का विधान किया गया है ।

---

१. लिङादय इति ।

२. श्रवणं विधेयमेवेति पठनीयम् ।

३. लिङादिघटितमिति स्यात् ।

तस्य च दृष्टफलत्वान्नापूर्वविधिः, अप्राप्तार्थविधायको ह्यपूर्वविधिः । किन्तु नियमविधि र्वा परिसंख्याविधि र्वा । पक्षप्राप्तस्याप्राप्तांशपूरको विधिर्नियमविधिः । "यथा—व्रीहीनवहन्यादि"त्यवघातविधिः । उभयप्राप्तावितरव्यावृत्तिबोधको विधिः परिसङ्ख्याविधिः । यथा "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति गर्दभरशनाग्रहणव्यावृत्तिविधिः । एवं प्रकृतेऽपि जिज्ञासुर्वेदान्तश्रवणमेव कुर्य्यादिति नियमविधिः । वेदान्तश्रवणव्यतिरिक्तं न कुर्य्यादिति परिसंख्याविधिर्वा ।

●

निर्विद्ये"त्यादिरुत्पत्तिविधिः, "मन्तव्य" इत्यादिर्विनियोगविधिः, "तद्विजिज्ञासस्वे"त्यधिकारविधिः । तथाहि—सन्प्रत्ययवाच्याया इच्छायाः प्रकृत्यर्थज्ञानस्य च कर्त्तुमशक्यतया सन्प्रत्ययेनान्तर्णीतं विचारं लक्षयित्वा प्रकृत्या फलीभूतं ज्ञानं च लक्षयित्वाऽद्वितीय-ब्रह्मज्ञानाय तत्कर्त्तव्यता विधीयते—ब्रह्मसाक्षात्कारकामो वेदान्तश्रवणं कुर्य्यादिति । अतोऽयमधिकारविधिः । साधनचतुष्टय-सम्पन्नोऽधिकारी जिज्ञासुस्संन्यासी साङ्गवेदान्तश्रवणं कुर्य्यादिति प्रयोगविधिः कल्प्यः । कृतिसाध्यत्वे सतीष्टसाधनत्वमभिधेय-विधिरयमेव लिङाद्यर्थः[1], नतु भावना विनियोगो वा प्रमाणाभावादिति भावः ।

ननु श्रोतव्य इत्यादि वाक्ये श्रवणं विधीयत इत्युक्तम्, किमयं व्रीहीन्प्रोक्षतीति प्रोक्षणविधिवत् श्रवणविधिरपूर्व-विधिराहोस्विद्व्रीहीनवहन्तीत्यवघातविधिवन्नियमविधिरथवा "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति गर्दभरशना-ग्रहण-व्यावृत्तिविधिवत्परिसंख्याविधिर्वा ? नाद्यः । श्रवणस्य दृष्टफलकत्वेन तदयोगात् । अन्वयव्यतिरेकाभ्यां श्रवणस्य तत्त्वज्ञान-साधनत्वावगमेन दृष्टफलत्वम् । अप्राप्तार्थबोधकस्यैवापूर्वविधित्वेन श्रवणादेस्तथात्वाभावात् । न द्वितीयः । अवघातनियमादृष्ट-

●

अतः यह 'अधिकारविधि' है । और 'साधनचतुष्टयसम्पन्न अधिकारी जिज्ञासु संन्यासी साङ्ग (मनन, निदिध्यासनरुप अंगों सहित) वेदान्तश्रवण करे—यह प्रयोगविधि है । एवंच 'कृतिसाध्यत्वे सति इष्टसाधनत्वमभिधेयविधिः' यही लिङर्थ है । 'भावना अथवा विनियोग' को लिङर्थ मानने में कोई प्रमाण नहीं है ।

शंका—'श्रोतव्यः' इत्यादि वाक्य में जो 'श्रवण' का विधि, कहा गया है, क्या वह (श्रवणविधि) 'व्रीहीन् प्रोक्षति' वाक्य से बताये गये 'प्रोक्षणविधि' के समान 'अपूर्वविधि' है ? अथवा 'व्रीहीन् अवहन्ति' वाक्य से बताये गये 'अवघातविधि' के समान 'नियमविधि' है ? अथवा 'इमामगृभ्णन् रशनामृतस्य इति अश्वाभिधानीम् आधत्ते'—इस वाक्य से बताये गये 'गर्दभरशनाग्रहणव्यावृत्तिविधि' के समान 'परिसंख्याविधि' है ?

समा०—उक्त 'श्रवण विधि' को 'अपूर्व विधि' तो कह नहीं सकते, क्योंकि वह (श्रवण) दृष्टफलक है। अर्थात् 'श्रवण' में 'अन्वय-व्यतिरेक' के द्वारा 'तत्त्वज्ञानसाधनता' का बोध हो रहा है, अतः श्रवण में दृष्टफलकता स्पष्ट हो रही है। 'अपूर्व विधि' तो अप्राप्तार्थबोधक ही होता है। 'श्रवण' में वैसी अप्राप्तार्थबोधकता न होने से उसे 'अपूर्वविधि' नहीं कह सकते । एवं च 'श्रवण' में 'ब्रह्मसाक्षात्कार' की कारणता पूर्वोक्त अन्वय-व्यतिरेक से ही सिद्ध है, उस कारण 'श्रवण' का विधान करनेवाला 'श्रोतव्यः'—यह विधि 'अपूर्वविधिरुप' नहीं है ।

'श्रोतव्यः' को नियमविधि भी नहीं कह सकते । क्योंकि 'अवघातनियमादृष्टसाध्यपरमापूर्व' की तरह श्रवणनियमादृष्ट से होनेवाला कोई साध्य नहीं है ।

शंका—'ज्ञान' को ही श्रवणनियमादृष्ट का साध्य मान लिया जाय ।

समा०—अन्यत्र वैसा कहीं दिखाई नहीं देता ।

शंका—तो तृतीय अर्थात् परिसंख्या विधि मान लेवें ।

समा०—वह भी नहीं मान सकते क्योंकि ब्रह्म केवल उपनिषत् से समधिगम्य होने के कारण कोई अन्य साधन प्राप्त ही नहीं है जिसकी निवृत्ति इस विधि से की जाये । कथंचित् प्राप्त हो जाये और परिसंख्या मानें तो वेदान्त श्रवण का परित्याग दोषावह नहीं रह पायेगा, जैसे पंचनख खाना छोड़ना दोषावह नहीं है, जबकि वेदान्त विचार से रहित संन्यासियों को मारकर जंगली कुत्तों को खिला दिया—इत्यादि वेदवाक्य श्रवणपरित्याग को दोषकारी बताते हैं ।

शंका०—यदि श्रवणादि में कोई विधि न दी हो ?

---

१. स श्रवणं विधीयत इति पाठः ।

साध्यपरमापूर्ववच्छ्रवणनियमादृष्टसाध्यस्याभावात् । न च ज्ञानमेव तत्साध्यमस्त्विति वाच्यम् । अन्यत्र तथाऽदृष्टत्वात् । न तृतीयः । उपनिषदेकगम्यतया ब्रह्मणस्तत्त्वज्ञानं प्रत्युभयप्राप्त्यभावात् । भावे वा प्रत्यवायाभावप्रसङ्गात् । नहि पञ्चनखभक्षणाभावे प्रत्यवायो हि श्रूयते; श्रूयते च प्रकृते प्रत्यवायः—"अरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छमि"ति । मास्तु श्रवणादौ विधिरिति चेत्तर्हि तत्र प्रवृत्त्यभावप्रसङ्गात् । तस्मात् कोऽयमत्रविधिर्विवक्षितः ? इत्याशङ्क्य प्राप्तत्वेनापूर्वविध्यसम्भवं वदन्नियमादिकमाह—**तस्येति** । श्रवणादेरित्यर्थः । **दृष्टेति** । अन्वयव्यतिरेकसिद्धफलत्वादित्यर्थः । तथाप्यपूर्वविधिः कुतो न सम्भवतीत्याशङ्क्य तल्लक्षणलक्षितत्वाभावादिति तदसम्भवं वक्तुमपूर्वविधेर्लक्षणमाह—**अप्राप्तेति** । मानान्तरेणाप्राप्तस्यार्थस्य विधायकः कर्त्तव्यत्वेन बोधकोऽपूर्वविधिः । कर्त्तव्यत्वेन बोधको विधिरपूर्वविधिरित्युक्ते नियमादिविधावतिव्याप्तिरत उक्तं **मानान्तराप्राप्तेति** । तर्हि कोऽसौ विधिर्विवक्षित इति पृच्छति—**किन्त्विति** । उत्तरमाह—**नियमेति** । नियमविधेर्लक्षणमाह—**पक्षेति** । तुषनिवृत्तिं प्रति एकस्मिन् पक्षेऽवघातः प्राप्त एकस्मिन् पक्षे नखविदलनादिः । यदा नखविदलनादिः प्राप्तस्तदाऽवघातो न प्राप्तस्ततश्च तुषनिवृत्तिं प्रति पक्षप्राप्तस्यावघातादेरप्राप्तांशं पूरयति "व्रीहीनवहन्ती"ति वाक्यम् अवघातेनैव तुषनिवृत्तिः सम्पादनीयेति । तत्रार्थान्नखविदलनादिव्यावृत्तिः । अप्राप्तांशपूरकोविधिर्नियमविधिरित्युक्ते अपूर्वविधावतिव्याप्तिस्तद्वारणायोक्तं **पक्षप्राप्तेति** । तत्रोदाहरणमाह—**यथेति** । परिसङ्ख्याविधेर्लक्षणमाह—**उभयेति** । यथा "पञ्च पञ्चनखा भक्ष्या" इत्यत्र रागतः पञ्चनखाऽपञ्चनखभक्षणयोरुभयोः प्राप्तौ

●

समा०—तब श्रवणादि में प्रवृत्ति नहीं हो पायेगी। शास्त्रीय व्यक्ति मोक्ष का शास्त्रीय उपाय ही ढूँढता है, विषय सौन्दर्य से ही मुग्ध होकर उस ओर चल नहीं पड़ता।

प्रश्न—तब इस संदर्भ में कौन विधि है ?

उत्तर—क्योंकि श्रवण का तत्त्वज्ञानरूप फल दृष्ट है, अन्वय-व्यतिरेक से विधि के बिना भी समझ में आ जाता है। इसलिये श्रवणविधि अपूर्वविधि नहीं है। अपूर्व उसी विधि को कहते हैं जो प्रमाणान्तर से अप्राप्त (अज्ञात) कार्य को करना बतावे।

प्रश्न—अपूर्व नहीं तो कौन विधि है ?

उत्तर—श्रवण के विषय में नियम अथवा परिसंख्या विधि है। विधि के बिना भी जो करना प्राप्त हो सके, उसे न करके व्यक्ति द्वारा उस कार्य को कराने के लिये जो विधि होती है वह नियम है। जैसे धान कूटो—इत्यादि में कूटने की विधि।

दो कार्य प्राप्त होने पर उनमें से अमुक न करो—इतना ही बताने वाली विधि परिसंख्या विधि है। जैसे गदर्भ व अश्व दोनों की रास मन्त्रविशेष पूर्वक पकड़ना प्राप्त होने पर गधे की रास मत पकड़ो इस तात्पर्य वाली घोड़े की रास पकड़ो—यह विधि है।

इस प्रकार प्रकृत में भी वेदान्तश्रवण ही करना चाहिये यह नियम विधि है। वेदान्तश्रवण से अतिरिक्त कुछ न करे—यह परिसंख्या विधि है।

नियम विधि का स्वरूप यह है—व्रीहीनवहन्यात्,—धान कूटो—यह विधि है। यज्ञ में उपयोगी जो व्रीहि हैं, उनके तुषों की निवृत्ति दो उपायों से होती है (१) अवघातरूप उपाय है और (२) नखविदलनरूप उपाय है। उनमें मूसल से व्रीहियों के कूटने का नाम 'अवघात' है, और नखों से तुषों की निवृत्ति करने का नाम 'नखविदलन' है। जिस पक्ष में 'नखविदलन' की प्राप्ति होती है, उस समय में 'अवघात' की प्राप्ति नहीं होती। अतः पक्ष में प्राप्त अवघात के 'अप्राप्त अंश' का 'व्रीहीन् अवहन्यात्' यह वाक्य 'पूरण' करता है। अर्थात् 'अवघात' करके ही व्रीहियों के तुषों की निवृत्ति करनी चाहिये। यह कहने से 'नखविदलनरूप उपाय' की 'निवृत्ति' अर्थात् (अपने आप=स्वतः एव) सिद्ध हो जाती है। अतः 'श्रोतव्यः' को नियमविधि भी नहीं कह सकते।

एक ही समय में दो पदार्थों के प्राप्त होने पर एक पदार्थ की व्यावृत्ति का बोधक जो विधि है, उसे 'परिसंख्याविधि' कहते हैं। जैसे—'इमामगृभ्णन् रशनामृतस्य'—इस मंत्र से यज्ञ में अश्व और गर्दभ दोनों के रशनाग्रहण की प्राप्ति होनेपर 'अश्वाभिधानीमादत्ते'—इस वचन से 'गर्दभरशनाग्रहण' की व्यावृत्ति का विधान किया जाता है। उक्त वाक्य 'अश्वरनाग्रहण' का विधान नहीं कर रहा है। क्योंकि 'अश्वरशनाग्रहण' तो 'इमामगृभ्णन्'—इस मंत्र से ही प्राप्त है। उस कारण 'अश्वाभिधानीमादत्ते'—यह वचन, 'परिसंख्या' का विधान कर रहा है।

अपञ्चनखभक्षणव्यावृत्तिं बोधयति "पञ्च पञ्चनखा भक्ष्या" इति वाक्यं, नतु पञ्चनखभक्षणं कर्त्तव्यत्वेन बोधयति, तस्य रागतः प्राप्तत्वाद् । इतरव्यावृत्तिबोधको विधिः परिसङ्ख्याविधिरित्युक्ते "न कलञ्जं भक्षयेदि"त्यादिनिषेधवाक्येऽतिव्याप्तिरतस्तद्वारणायोक्त-मुभयप्राप्ताविति । वैदिकोदाहरणमाह—यथेति । अत्र मन्त्रलिङ्गेन गर्दभरशनाऽश्वरशनयोरुभयोर्ग्रहणप्राप्तौ "अश्वाभिधानीमादत्त" इति गर्दभरशनाग्रहणव्यावृत्तिर्विधीयते, न त्वश्वरशनाग्रहणं विधीयते, तस्य मन्त्रलिङ्गप्राप्तत्वादतः परिसङ्ख्याविधिः । एतत्सर्वमभि-प्रेत्योक्तं भट्टपादैः—

"विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते" ॥ इति ।

नन्वस्त्वेवमन्यत्र, प्रकृते किमायातमित्याशंक्याह—एवमिति । एवमुक्तरीत्या प्रकृते व्यवहारभूमौ । ननु पक्षे साधन-द्वयप्राप्तौ पक्षप्राप्तस्याप्राप्तांशपूरको विधिर्नियमविधिरित्युक्तत्वाद्ब्रह्मणो मानान्तरागोचरत्वेन शास्त्रैकगम्यतया तज्ज्ञानं प्रति वेदान्तव्यतिरिक्तसाधनान्तराप्राप्तेः कथं नियमविधिः श्रवणादौ ? नच ब्रह्मज्ञानं प्रति पक्षे पुराणादिश्रवणस्य साधनतया प्राप्तौ नियमो युक्त इति वाच्यम् । अध्यात्मपुराणस्य वेदान्तमूलतया तच्छ्रवणस्य साधनान्तरत्वाभावात् । नच पक्षे रागिगीतादिश्रवणस्य साधनत्वप्राप्तौ नियमो युक्त इति वाच्यम् । तस्य वचनान्तरेण वारितत्वात् । नच द्वैतशास्त्रश्रवणस्य पक्षे साधनत्वप्राप्तौ स युक्त

●

शंका—नियमविधि और परिसंख्याविधि दोनों में 'इतरनिवृत्ति' तो समान ही है, तब दोनों में अन्तर (भेद) क्या है ?

समा०—यद्यपि नियमविधि और परिसंख्याविधि दोनों में 'इतरनिवृत्ति' का होना समान है, तथापि नियमविधि में 'इतर की निवृत्ति', **आर्थिकी** है, और परिसंख्याविधि में 'इतर की निवृत्ति', **विधेय** हुआ करती है। यही दोनों में अन्तर (भेद) है।

उक्त परिसंख्याविधि दो प्रकार से होता है—(१) अंगिपरिसंख्या और (२) अंगपरिसंख्या। उपर्युक्त 'रशनाग्रहण' का उदाहरण 'अंगिपरिसंख्या का दिया है, क्योंकि रशनारूप दो अंगियों में 'मन्त्ररूप एक अंग' की प्राप्ति होनेपर दो रशनारूप अंगियों में से 'एक रशनारूप अंगी' की निवृत्ति बताई गई है।

अंगपरिसंख्या का उदाहरण 'पञ्च-पञ्चनखा भक्ष्याः' है। यहाँपर पञ्चनख और अपञ्चनख दोनों प्रकार के प्राणियों का भक्षण, रागतः ही मांसभक्षी को प्राप्त है। इस स्थिति में 'अपञ्चनख' प्राणियों के भक्षण की निवृत्ति का 'विधान' परिसंख्याविधि से किया जाता है। पञ्चनख प्राणियों के भक्षण का विधान नहीं किया गया है। क्योंकि वह रागतः एव प्राप्त है। प्राप्त का विधान, नहीं हुआ करता है। अतएव 'उभयप्राप्तौ इतरव्यावृत्तिबोधको विधिः परिसंख्याविधिः'—यह लक्षण 'परिसंख्याविधि का किया गया है। यदि हम इतना बड़ा लक्षण न बनाकर केवल—'इतरव्यावृत्तिबोधकोविधिः—परिसंख्याविधिः', इतना ही लक्षण रखें तो '**न कलञ्जं भक्षयेत्**'—इस निषेधक वाक्य में उक्त लक्षण की 'अतिव्याप्ति' होने लगेगी। उस अतिव्याप्ति के निवारणार्थ 'उभय-प्राप्तौ कहना आवश्यक है।

शंका—इस सम्पूर्ण चर्चा से क्या लाभ हुआ ? क्या प्रस्तुत प्रसंग में भी 'श्रोतव्यः' को नियम विधि' मानना चाहिये ? अर्थात् साधनचतुष्टयसम्पन्न जिज्ञासु संन्यासी वेदान्तशास्त्र का ही श्रवण करे। अथवा वह जिज्ञासु संन्यासी, वेदान्त-शास्त्र के अतिरिक्त अन्य शास्त्र का श्रवण न करे—इस प्रकार परिसंख्याविधि मानना चाहिये ? जिस स्थल में दो पाक्षिक साधन प्राप्त रहते हैं, वहीं पर किसी एक पक्ष में अप्राप्त अंश को पूरण करनेवाला नियमविधि स्वीकार किया जाता है, यह पहिले बता चुके हैं। किन्तु उक्त नियमविधि का लक्षण, इस 'श्रवण विधि' में उपपन्न नहीं हो रहा है। क्योंकि वह 'ब्रह्म', वेदान्तशास्त्र के अतिरिक्त किसी अन्य प्रमाण का विषय नहीं है। वह तो केवल एकमात्र वेदान्तशास्त्र का ही विषय है।

यदि कदाचित् 'ब्रह्मसाक्षात्कार' में वेदान्त श्रवण के अतिरिक्त और भी कोई अन्य साधन होता तो 'श्रवण' में नियमविधि की संभावना की जा सकती थी। किन्तु वेदान्तश्रवण के अतिरिक्त, अन्य कोई साधन, 'ब्रह्मसाक्षात्कार' के प्रति नहीं है, ऐसी स्थिति में 'श्रवण' को नियमविधि का विषय कैसे कह सकते हैं ?

यदि यह कहें कि ब्रह्मसाक्षात्कार के प्रति जैसे—'श्रुति' को साधन माना जाता है, वैसे ही 'ब्रह्मसाक्षात्कार' के प्रति 'पुराण श्रवण' को भी साधन के रूप में कहा जाता है। अतः उस पुराण श्रवणरूप साधन की निवृत्ति करने के लिये 'वेदान्त-श्रवण' में 'नियमविधि' की संभावना की जा सकती है।

तदुक्तम्

"नियमः परिसङ्ख्या वा विध्यर्थो हि भवेद्यतः।
अनात्मादर्शनेनैव परात्मानमुपास्महे" ॥ इति ॥२५॥

●

इति वाच्यम्। तस्य विरुद्धत्वेनाद्वितीयब्रह्मज्ञानं प्रति साधनत्वायोगात्। "यतो वाचो निवर्त्तन्ते" "यन्मनसा न मनुते" इत्यादि श्रुत्या ब्रह्मणो वेदान्तव्यतिरिक्तवाङ्मनसयोरविषयत्वेन तज्ज्ञानं प्रति प्रत्यक्षादीनां साधनत्वाप्राप्तेश्च। अतएव न परिसङ्ख्याविधिः। तस्मान्नियमः परिसङ्ख्यावेति विकल्पाश्रयणमनुपपन्नमिति।

मैवम्। वेदान्तश्रवणवद्भ्रान्त्या पुराणादिश्रवणस्यापि ब्रह्मज्ञानं प्रति स्वातन्त्र्येण साधनत्वप्राप्तौ श्रवणादौ नियमविधिरभ्युपगम्यते। नचापूर्वविधिरेवास्तु किमनेन क्लेशेनेति वाच्यम्। श्रवणादेर्दृष्टफलत्वेन तदसम्भवस्योक्तत्वात्। नन्वन्यत्र-नियमादृष्टस्य परमापूर्वोपयोगदर्शनात् प्रकृते तदभावात् तस्य कुत्रोपयोग इति? शृणु, तत्त्वज्ञाने तस्योपयोगः। नच प्रमाणपरतन्त्रस्य कथमदृष्टसाध्यत्वमिति वाच्यम्। साक्षात् तदभावेऽपि प्रतिबन्धकनिवृत्तिद्वारा तदुपपत्तेः। किञ्चात्यल्पमिदमुच्यते, सर्वादृष्टसाध्यत्वाद्ब्रह्मसाक्षात्कारस्य। नच तत्र प्रमाणाभावः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा-

●

किन्तु उक्त कथन उचित नहीं है। क्योंकि 'आत्मपुराण' में वेदान्तमूलकता रहने से वह 'पुराण श्रवण' भी 'वेदान्त-श्रवण' से भिन्न नहीं है। अध्यात्मपुराण का श्रवण भी 'वेदान्त' का ही श्रवण है। वेदान्त श्रवण से भिन्न 'अध्यात्मपुराणश्रवण' नहीं है। अपितु दोनों एक ही हैं।

यदि यह कहें कि ब्रह्मसाक्षात्कार के प्रति 'गीतश्रवण' को भी साधन कहा जाता है, जो वेदान्त श्रवण से भिन्न साधन है। उसके निवृत्त्यर्थं वेदान्त श्रवण को नियमविधि का विषय मान सकते हैं।

किन्तु यह कहना भी उचित नहीं है। क्योंकि मुमुक्षुजनों के लिये गीतश्रवण का निषेध, अन्यान्य वचनों के द्वारा किया गया है।

यदि कहें कि ब्रह्मसाक्षात्कार के प्रति अद्वैत वेदान्त श्रवण के समान ही 'द्वैतशास्त्र' के श्रवण को भी साधनरूप में कुछ लोग मानते हैं।

अतः द्वैतशास्त्र श्रवण के निरासार्थ 'वेदान्तशास्त्र श्रवण' में नियमविधि की संभावना की जा सकती है।

किन्तु यह कहना भी उचित नहीं है। क्योंकि 'द्वैतशास्त्र' तो 'अद्वैतशास्त्र' का विरोधी है। अद्वैतशास्त्र का विरोधी होने से, वह 'अद्वैत ब्रह्मसाक्षात्कार' का साधन कैसे हो सकेगा?

किञ्च—'श्रुतियों ने स्पष्ट कह दिया है कि वेदान्त शास्त्र से भिन्न जो चक्षु, वाक् और मन हैं, उनका भी विषय, 'ब्रह्म' कभी नहीं होता है। उसकारण प्रत्यक्षादिक भी ब्रह्मसाक्षात्कार के साधन नहीं हुआ करते। एवंच ब्रह्मसाक्षात्कार में सभी साधनों का अभाव रहने से किस साधन की निवृत्ति करने के लिये 'परिसंख्याविधि मानी जायगी? अतः 'श्रवण' में नियम, परिसंख्या वा यह विकल्प करना अनुपपन्न है।

समा०—यद्यपि वेदान्त के अतिरिक्त जो पुराण आदि हैं, वे ब्रह्मसाक्षात्कार के साधन नहीं है, तथापि वेदान्तशास्त्र के श्रवण के समान पुराणादि ग्रन्थों का श्रवण भी स्वतन्त्ररूप से ब्रह्मसाक्षात्कार का साधन हो सकता है—इस प्रकार की भ्रान्ति से पुराणश्रवण में भी ब्रह्मसाक्षात्कार के प्रति स्वतन्त्र साधनता प्राप्त हो सकती है, उसके निवारणार्थ 'श्रवण' में नियमविधि का स्वीकार तथा परिसंख्याविधि का अंगीकार किया जा सकता है।

शंका—'श्रवण' में अपूर्वविधि को ही क्यों नहीं मान लेते, नियमविधि मानने का क्लेश क्यों कर रहे हैं?

समा०—'श्रवण'—दृष्टफलक होने से 'अपूर्वविधि' का यहां मानना संभव नहीं हो सकता।

शंका—जहां-जहां नियमादृष्ट माना जाता है, वहां-वहां उसका 'परमापूर्व' में उपयोग दिखाई देता है, किन्तु प्रकृत में नियमादृष्ट का उपयोग कहाँ होगा?

समा०—'तत्त्वज्ञान' में उस नियमादृष्ट का उपयोग होता है।

ऽनाशकेन" "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तत" इत्यादि श्रुतिस्मृत्योः सत्त्वात्। तस्माज्जिज्ञासुर्वेदान्तश्रवणमेव कुर्य्यादिति नियमविधिरिति निरवद्यम्। अत एव जिज्ञासु-र्वेदान्तश्रवणव्यतिरिक्तं न कुर्य्यादिति परिसङ्ख्याविधिरपि सम्भवति। नच नियमपरिसङ्ख्याविध्योः को विशेष उभयत्रेतरव्यावृत्तेरविशेषादिति वाच्यम्। नियमविधावितरव्यावृत्तिरार्थिकी, परिसङ्ख्याविधौ विधेयेति विशेषः।

उक्तार्थे सम्मतिमाह—**तदुक्तमिति। अनात्मादर्शनेना**नात्मदर्शनंव्यावृत्त्याहंब्रह्मास्मीति परमात्मान**मुपास्महे** ध्यायाम इत्यर्थः। वस्तुतस्तु श्रवणादौ नियमविधिरेव[1], परिसङ्ख्याविधिर्वेत्यभ्युपगमवाद इतरथाऽकरणे प्रत्यवायश्रवणविरोध-प्रसङ्गादिति द्रष्टव्यम् ॥२५॥

ननु श्रवणं विधीयत इत्युक्तं, तत्किं काम्यमुत नित्यम् आहो नैमित्तिकं प्रायश्चित्तं वा? नाद्यः "स्वर्गकामो यजेते"ति वद्विध्युद्देशे फलाश्रवणात्। नच रात्रिसत्रन्यायेन तत्कल्प्यमिति वाच्यम्। गृहस्थादीनां ब्रह्मज्ञानकामनाया असम्भवात्, प्रत्युत ब्रह्मज्ञानादुद्वेगदर्शनात्। अतएव रागिगीतमपि श्लोकमुदाहरन्ति।

"अपि वृन्दावने शून्ये शृगालत्वं स इच्छति। नतु निर्विषयं मोक्षं कदाचिदपि गौतम" ॥इति॥

किञ्च, "वेदानिमं लोकममुञ्च परित्यज्यात्मानमन्विच्छेदि"त्यादिश्रुत्या साधनचतुष्टयसम्पन्नस्य जिज्ञासोः संन्यासिनः श्रवणादिकर्त्तव्यतावगमेन गृहस्थादीनां तत्रानधिकारात्। अस्तु तर्हि संन्यासिनामेतत्काम्यमिति चेन्न। श्रवणादि-

●

शंका—'तत्त्वज्ञान' तो 'प्रमाणपरतन्त्र' है, उसे 'अदृष्टसाध्य' कैसे कह रहे हैं ?

समा०—साक्षात् 'अदृष्टसाध्य' न रहने पर भी 'प्रतिबन्धकनिवृत्ति' द्वारा उसका 'तत्त्वज्ञान' में उपयोग होता है।

किञ्च—उपर्युक्त कथन तो हमने बहुत स्वल्प में कहा है। 'ब्रह्मसाक्षात्कार' तो 'सर्वादृष्टसाध्य' है।

शंका—उसे सर्वादृष्टसाध्य कहने में प्रमाण क्या है ?

समा०—श्रुति-स्मृति के अनेक वचनों को प्रमाणरूप में दिया जा सकता है। इसलिये जिज्ञासु संन्यासी 'वेदान्त-शास्त्र का ही श्रवण किया करे'—यह नियम विधि तथा 'उसके व्यतिरिक्त अन्य कुछ भी श्रवण न करे'—इस प्रकार परिसंख्या-विधि भी हो सकता है। अभिप्राय यह है कि जिज्ञासु अधिकारी पुरुष, 'श्रोत्रिय ब्रह्मनिष्ठ' गुरु के मुख से ही वेदान्तशास्त्र का श्रवण करे। गुरु के विना स्वतंत्र केवल अपनी बुद्धि से वेदान्त शास्त्र का 'विचारात्मक श्रवण' नहीं करना चाहिये। **इसी तथ्य को पूर्ववर्ती वृद्ध पुरुषों ने कहा है—'श्रोतव्यः' इस विधि वाक्य का 'नियम' अथवा 'परिसंख्या' ही अर्थ है, अन्यथा प्रत्यवाय-श्रवण के विरोध-का प्रसंग प्राप्त होगा। उस कारण हम लोग अनात्मवस्तुओं के चिन्तन का परित्याग करके केवल परमात्मा का ही चिन्तन कर रहे हैं ॥२५॥**

शंका—यह बताया जा रहा है कि 'श्रोतव्यः' इस विधि वाक्य में 'श्रवण' का विधान किया गया है, तब श्रुति एवं स्मृति में प्रतिपादित—(१) काम्य, (२) नित्य, (३) नैमित्तिक, (४) प्रायश्चित्त—इन चतुर्विध कर्मों में से पूर्वोक्त विहित 'श्रवण' कर्म, किस प्रकार का कर्म है ? प्रथम 'काम्यपक्ष' का स्वीकार यहाँ कर नहीं सकते। क्योंकि 'स्वर्गकामो यजेत' इस वचन में जैसे स्वर्गरूप फल को उद्देश्य कर 'याग' का विधान किया गया है, वैसे यहाँ पर किसी 'फल' को उद्देश्य कर 'श्रवण' का विधान नहीं किया जा रहा है। यदि यह कहें कि जैसे 'रात्रिसत्र' संज्ञक याग के विधायक वाक्य में 'फल श्रवण' न रहनेपर भी उस रात्रिसत्रयाग में पुरुष की प्रवृत्ति कराने के लिये उक्त याग के आर्थवादिक 'फल' की कल्पना की जाती है, वैसे ही यहाँ पर भी विहित श्रवण के 'ब्रह्मज्ञान' रूप फल की कल्पना कर सकते हैं। किन्तु यह संभव नहीं है, क्योंकि 'गृहस्थियों' को ब्रह्मज्ञान की कामना होना असंभव है, प्रत्युत (उलटे) गृहस्थियों को ब्रह्मज्ञान से उद्वेग का होना ही दिखाई देता है। अतएव रागी विलासी लोगों के अभिप्राय का बोधक एक पद्य भी लोग कहा करते हैं, जिसका अर्थ है—हे गौतम! रागी-विलासी लोग उस शून्य वृन्दावन में शृंगाल बनने की तो इच्छा करते हैं, किन्तु निर्विषय मोक्ष प्राप्ति की इच्छा वे कदाचिदपि नहीं करते।

१. प्रकटार्थकृतोऽपूर्वमाचार्या नियमं विधिम्। परिसंख्यां सुरेशाद्या आहुर्मिश्रा विधिं न हि॥ तस्मादेवकारः स्वरुचिबोधकः सिद्धान्ते सर्वपक्षाङ्गीकारादितिज्ञेयम्।

तच्च श्रवणं संन्यासिनां नित्यम् ।

"नित्यं कर्म्म परित्यज्य वेदान्तश्रवणं विना । वर्तमानस्तु संन्यासी पतत्येव न संशयः" ॥

इत्यकरणे प्रत्यवायश्रवणात्, "आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तये"ति स्मृत्या "यावज्जीवमग्निहोत्रं जुहुयादि" त्यादि श्रुत्या जीवनं निमित्तीकृत्याग्निहोत्रादिविधानवद् जीवनं निमित्तीकृत्य श्रवणादिविधानात् ।

●

रहितस्य संन्यासिनः प्रत्यवायाभावप्रसङ्गात् । नचेष्टापत्तिः "अरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छं", "नित्यं कर्म्म परित्यज्ये"-त्यादि श्रुतिस्मृतिविरोधप्रसङ्गात् । तस्मान्नश्रवणादि काम्यम् ।

न द्वितीयः, अग्निहोत्रादिवच्छ्रुत्या जीवनं निमित्तीकृत्याविधानात् । न तृतीयः गृहदाहादिवन्निमित्ताऽश्रवणात् । न चरमः, पापनिवृत्तिमुद्दिश्याविधानात् । "तरति ब्रह्महत्यां योऽश्वमेधेन यजते यउचैनमेवं वेदे"त्यादिवत् तस्याश्रवणात् । तस्माच्छ्रवणादिविधानमनुपपन्नमित्याशङ्क्य तस्य नित्यत्वकाम्यत्वयोः सम्भवाद्विधिरुपपद्यते इत्यभिप्रेत्याह—**तच्चेति** । यथा चतुर्णामाश्रमाणामुपकुर्वाणस्य ब्रह्मचारिणः काम्यत्वेऽपि गृहस्थाश्रमं प्राप्तस्याकरणे प्रत्यवायश्रवणात् जीवनं निमित्तीकृत्य विधानाच्च अग्निहोत्रसोमयागसन्ध्यावन्दनादि नित्यं, एवं स्वीकृतसंन्यासाश्रमस्य परमहंसस्य विविदिषोरपि (श्रवणादिनित्यं) "अरुन्मुखान्

●

किञ्च—श्रुति से साधनचतुष्टयसम्पन्न जिज्ञासु संन्यासी के लिये ही 'श्रवण आदि' की कर्तव्यता (अनुष्ठेयता) का बोध हो रहा है, अतः उन श्रवणादिकों में तो गृहस्थियों का अधिकार ही नहीं है ।

शंका—यदि यह कहें कि संन्यासियों के लिये ही उक्त 'श्रवण' को 'काम्यकर्म' मान लिया जाय । किन्तु वह भी संभव नहीं है । क्योंकि संन्यासी के प्रति 'श्रवण' के न करने पर भी संन्यासी को 'प्रत्यवाय' की प्राप्ति नहीं होगी । सभी लोग अच्छी तरह से जानते हैं कि काम्यकर्म के न करने पर 'प्रत्यवाय' नहीं लगा करता ।

संन्यासी के लिये प्रत्यवायाभाव के प्रसंग को 'इष्टापत्ति' भी नहीं कह सकते, क्योंकि श्रुति-स्मृति के साथ विरोध प्राप्ति का प्रसंग आवेगा । अतः 'श्रवण' को काम्यकर्म नहीं मान सकते ।

अब 'श्रवण' को 'नित्यकर्म' (द्वितीय पक्ष) भी नहीं कह सकते । क्योंकि जिस प्रकार गृहस्थ के लिये यावज्जीव अर्थात् जीवनकाल पर्यन्त 'अग्निहोत्र रूप नित्यकर्म' का विधान किया है, उस प्रकार से मुमुक्षु के लिये जीवन काल पर्यन्त अर्थात् जीवन को निमित्त करके 'श्रवण' का विधान किसी वचन ने किया नहीं है । अतः 'श्रवण' को 'नित्यकर्म' भी नहीं मान सकते ।

अब 'श्रवण' को नैमित्तिक कर्म' (तृतीय पक्ष) भी नहीं कह सकते । क्योंकि जैसे आहिताग्नि पुरुष के गृह का दाह होने पर अर्थात् 'गृहदाह' को निमित्त मानकर श्रुति ने 'क्षामवती इष्टि' का विधान किया है । वैसा यहाँ पर किसी निमित्त को बताकर 'श्रवण' का विधान नहीं किया है, जिस कारण 'श्रवण' को नैमित्तिक कह सकें ।

अब 'श्रवण' को 'प्रायश्चित्त कर्म' (चतुर्थ पक्ष) भी नहीं कह सकते । क्योंकि 'तरति ब्रह्महत्यां योऽश्वमेधेन यजते'—इस वचन से 'ब्रह्महत्या रूप पाप की निवृत्ति के लिये 'अश्वमेध यज्ञ' रूप प्रायश्चित्त कर्म का विधान किया है । वैसा किसी श्रुतिवचन के द्वारा किसी पाप की निवृत्ति के लिये 'श्रवण' का विधान यहाँ पर नहीं किया गया है । उसकारण 'श्रवण' को प्रायश्चित्त कर्म भी नहीं कह सकते । एवंच 'वेदान्तश्रवण में किसी प्रकार का कोई विधि, नहीं बन पारहा है, यह पूर्वपक्षी का कहना है ।

समा०—'विविदिषा संन्यास' के प्रति 'श्रवण', नित्यकर्मरूप है, और 'गृहस्थियों' के प्रति 'श्रवण', काम्यकर्मरूप है । जैसे गृहस्थपुरुष के लिये 'अग्निहोत्र' 'सन्ध्योपासन' आदि 'नित्यकर्मों' के न करनेपर श्रुति-स्मृति के वचनों ने प्रत्यवाय की प्राप्ति बताई है । 'यावज्जीवमग्निहोत्रं जुहुयात्'—इस वचन ने जीवत्कालपर्यन्त 'अग्निहोत्र' का नित्यकर्म के रूप में विधान किया है । उसीप्रकार विविदिषासंन्यासी केलिये भी 'वेदान्तश्रवण' न करने पर 'प्रत्यवाय' की प्राप्ति, तथा जीवत्कालपर्यन्त वेदान्तश्रवण करते रहना श्रुति-स्मृत्ति ने बताया है । उसकारण जैसे गृहस्थ के लिये अग्निहोत्र सन्ध्योपासन आदि 'नित्यकर्मरूप' है, वैसे ही **विविदिषा संन्यासी के प्रति भी 'वेदान्तश्रवण' आदि नित्यकर्मरूप है ।** इस सन्दर्भ में श्रुतिवचन उपलब्ध होता है—**वेदान्तविचार (श्रवण) न करनेवाले संन्यासियों को मारकर मैने (इन्द्र ने) उन्हें, श्वानों (कुतों) के लिये डाल दिया । यह**

"त्वं पदार्थविवेकाय संन्यासः सर्वकर्म्मणाम् । श्रुत्याभिधीयते यस्मात्तत्त्यागी पतितो भवेत्" ॥

"कारकस्य करणेन तत्क्षणाद् भिक्षुरेव पतितो यथा भवेत् ।
व्यञ्जकस्य परिवर्जनादसौ सद्य एव पतितो न संशयः" ॥

इति वार्त्तिकाचार्य्यसंक्षेपशारीरकाचार्य्याभ्यां श्रवणादिरहितस्य संन्यासिनः पातित्याभिधानाच्च । गृहस्थादीनां श्रवणादि काम्यम् ॥

●

यतीन् शालावृकेभ्यः प्रायच्छम्" "श्रवणायापि बहुभिर्यो न लभ्यः" "नित्यं कर्म्म परित्यज्य वेदान्तश्रवणं विने"त्यादि श्रुतिस्मृतिषु संन्यासिनां श्रवणाद्यकरणे प्रत्यवायश्रवणात्, "आसुप्ते"रित्यादिस्मृतिषु जीवनं निमित्तीकृत्य श्रवणादिविधानाच्च श्रवणादि नित्यम् । न"चासुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तये"त्यादिस्मृतावेव जीवनं निमित्तीकृत्य श्रवणं विधीयते न श्रुताविति वाच्यम् । तद्बलेन तत्रापि तत्कल्पनासम्भवात् । न केवलं प्रत्यवायश्रवणजीवननिमित्तविधिबलाभ्यामस्माभिरेव श्रवणनित्यत्वमभ्युपगम्यते, किन्त्वाचार्य्यैरङ्गीकृतं श्रवणादिरहितस्य पातित्याभिधानादित्याह—**त्वंपदार्थेति** । "तत्त्वमसी"त्यत्र त्वंपदस्य योऽयं वाच्यार्थः अन्तःकरणविशिष्टचैतन्यं तद्विवेकायान्तःकरणपरित्यागेन तदेकदेशलक्ष्यार्थप्रत्यक्चैतन्यज्ञानायेत्यर्थः । **सर्वकर्मणां** नित्यादीनां विहिताना"मेतमेवे"त्यादिश्रुत्या । **तत्त्यागी** श्रवणादित्यागी । **व्यञ्जकस्येति** श्रवणादेरित्यर्थः । **असौ** संन्यासी । ननु विवरणाचार्य्यतत्त्वदीपनाचार्य्याभ्यां श्रवणविधेः काम्यत्वमुक्तम् "कः पुनरस्य प्रसङ्ग" इत्याक्षिप्य समाधानावसरे, तत्कथमुपपद्यत इत्याशङ्क्य; तस्य गृहस्थादिविषयत्वान्नकाप्यनुपपत्तिरित्याह—**गृहस्थादीनामिति** ।

●

सन्दर्भ, 'आत्मपुराण' के द्वितीय अध्याय में 'इन्द्र-प्रतर्दन संवाद' के प्रसंग में उपलब्ध होता है । **स्मृति भी कहती है कि अग्निहोत्र, सन्ध्योपासनादि नित्यकर्मों का परित्याग करके जो विविदिषा संन्यासी, वेदान्तश्रवण' बिना किये ही जीवित रहता है, वह संन्यासी 'पतित' ही समझाजाता है ।** इस प्रकार से श्रुति-स्मृतियों ने वेदान्तश्रवणरहित उस विविदिषा संन्यासी के लिये 'प्रत्यवाय' बताया है । और भी—यह विविदिषा संन्यासी प्रातः जगने से लेकर रात्रि में सोने तक और ब्रह्मनिष्ठ गुरु के समीप पहुँचने से लेकर मृत्युतक के समय को ब्रह्मचिन्तन में ही व्यतीत करे । अपने मन में काम-क्रोधादिकविकारों को आनेका किञ्चिन्मात्र भी अवसर न दे—इस स्मृति ने तथा इसकी मूलभूत श्रुति ने विविदिषा संन्यासी के लिये आजीवन वेदान्तश्रवण करते रहने की आज्ञा दी है । एवंच विविदिषा संन्यासी के लिये 'वेदान्तश्रवण' करना उसका नित्यकर्म ही सिद्ध होता है ।

श्रुति-स्मृतियों के बलपर संन्यासी के लिये वेदान्तश्रवण की नित्यकर्मता केवल हम ही नहीं बतारहे हैं, अपितु पूर्ववर्ती आचार्यों ने भी बताई है—

'तत्त्वमसि'—इस महावाक्य में स्थित जो 'त्वम्' पद है, उसका 'वाच्य अर्थ'—जो 'अन्तःकरणविशिष्ट चैतन्य' है, उसके 'अन्तःकरण' रूप उपाधि का परित्याग करके 'लक्ष्य अर्थ'—जो 'प्रत्यक्-चैतन्य' है, उस 'प्रत्यक् चैतन्य' को 'ब्रह्म' के—रूप में जानना—यही 'त्वम्' पदार्थविवेक है । उस 'त्वम्' पदार्थ का विवेक प्राप्त करने के लिये ही भगवती श्रुति ने 'अग्निहोत्र—सन्ध्योपासनादि' सम्पूर्ण कर्मों के संन्यास का विधान किया है । अतः जो मुमुक्षुपुरुष, संन्यासग्रहण करके 'त्वम्' पदार्थ के विवेक को नहीं करता, वह 'संन्यासी'—पतित होजाता है—इसप्रकार से वार्तिककार श्रीसुरेश्वराचार्य ने वेदान्तश्रवण से रहित रहनेवाले संन्यासी को 'पतित—बताया है ।

तथा संक्षेपशारीरककार सर्वज्ञमहामुनिने भी कहा है—

यज्ञादिकर्मों के करने से जैसे यह सन्यासी तत्काल शीघ्रही पतित होजाता है, वैसे ही वेदान्त श्रवण के न करने से भी वह शीघ्र ही पतित होता है ॥

इससे निष्कर्ष यह निकला कि विविदिषा संन्यासी के लिये 'वेदान्तश्रवण'—उसका अपना नित्यकर्म है । अतः 'श्रोतव्यः'—यह 'नित्यकर्म है और गृहस्थ के लिये वह 'वेदान्तश्रवण'—काम्यकर्म है ।

जिस कर्म के करने से 'फल' की प्राप्ति होती है, और उसके न करने से 'प्रत्यवाय' की प्राप्ति नहीं होती, उस कर्म को 'काम्यकर्म कहते हैं । जैसे—जिस व्यक्ति को स्वर्ग प्राप्ति की इच्छा हो, वह व्यक्ति 'ज्योतिष्टोमयाग करे'—

"दिने दिने तु वेदान्त-श्रवणाद्भक्तिसंयुतात्। गुरुशुश्रूषया लब्धात् कृच्छ्राशीति फलं लभेत्"॥
इति फलश्रवणात्।

●

ननु गृहस्थादीनां साधनचतुष्टयसम्पत्त्यभावाद्ब्रह्मजिज्ञासा न सम्भवतीत्युक्तम्? सत्यमुक्तम्, अत्यन्तबहिर्मुखानाम-सम्भवेऽपि केषाञ्चित् परमेश्वरानुगृहीतानां फलासक्तिरहितकर्म्मानुष्ठायिनां साधनसम्पत्त्या ब्रह्मजिज्ञासा सम्भवत्येव। निमित्तान्तर-प्रतिबन्धेन संन्यासाश्रमस्वीकाराभावेऽपि श्रवणादौ प्रवृत्तिरुपपद्यते। तेषां श्रवणविधिः काम्योऽन्यथागृहस्थाश्रमादावुत्पन्नब्रह्म-साक्षात्काराणां जीवन्मुक्तिमुद्दिश्य विद्वत्संन्यासविधानं कथं स्यात्। नच विद्वत्संन्यास एव नास्तीति वक्तुं शक्यं; प्रमाणबलेन विविदिषा-विद्वत्संन्यासयोर्निरुपितत्वात्। किञ्च विविदिषासंन्यासे जिज्ञासुरधिकारी उत्पन्नसाक्षात्कारोविद्वत्संन्यासे। यथा विविदिषा-संन्यासस्य तत्त्वज्ञानं फलं तथा विद्वत्संन्यासस्य जीवन्मुक्तिः। यथा तत्त्वज्ञानसाधनं श्रवणादिर्विविदिषासंन्यासिनानुष्ठेयः तथा

●

"ज्योतिष्टोमेन—स्वर्गकामो यजेत" इति। उक्त याग करने से स्वर्ग की प्राप्ति हो जाती है। किन्तु जिस व्यक्ति को स्वर्ग-प्राप्ति की इच्छा न हो, वह व्यक्ति, ज्योत्तिष्टोम याग को नहीं करता। उसके न करने से उसको प्रत्यवाय की प्राप्ति भी नहीं होती। अतः 'ज्योतिष्टोम याग' को 'काम्य कर्म कहाजाता है।

उसी प्रकार जिस गृहस्थ पुरुष को 'ब्रह्मज्ञान' की इच्छा हो, वह गृहस्थ तो 'वेदान्तशास्त्र का श्रवण' करे। उसके श्रवण करने से उस गृहस्थ पुरुष को 'ब्रह्मज्ञान' की प्राप्ति हो जाती है; किन्तु जिस गृहस्थ, को ब्रह्मज्ञान की इच्छा नहीं होती, वह गृहस्थ 'वेदान्त श्रवण' नहीं करता। किन्तु 'श्रवण' न करने से उस गृहस्थ को किसी प्रत्यवाय को प्राप्ति नहीं होती। उस कारण गृहस्थों के लिये 'वेदान्तश्रवण'—काम्य-कर्मरूप है।

शंका—विवेकादिसाधनचतुष्टयसम्पन्न पुरुष को ही 'ब्रह्मजिज्ञासा हुआ करनी है। 'ब्रह्म' के जानने की इच्छा को 'ब्रह्मजिज्ञासा' कहते हैं, और गृहस्थों का साधनचतुष्टयसम्पन्न होना संभव नहीं है। उस कारण ब्रह्मजिज्ञासा के न होने से गृहस्थों के लिये 'वेदान्नश्रवण' को काम्यकर्म कहना भी संभव नहीं है।

समा०—नितान्त बहिर्मुख गृहस्थों में विवेकादिसाधनसम्पत्ति का संभव न होने से 'ब्रह्मजिज्ञासा' का न हो-पाना स्वाभाविक है। तथापि जो भाग्यशाली गृहस्थ, परमेश्वर के अनुग्रहपात्र हैं तथा फलेच्छा का परित्याग कर कृष्णार्पण-बुद्धि से निष्कामकर्म एवं नित्य—नैमित्तिक कर्म करते रहते हैं, उस कारण जिनके हृदय कल्मषरहित निर्मल हो गये हैं, एवं गुरुचरणारविन्दों में तथा भगवत्पादारविन्द में जो पूर्णश्रद्धा रखते हैं, उन भाग्यशाली गृहस्थों के पवित्र मन में विवेकादिसाधन-सम्पत्ति के कारण 'ब्रह्मजिज्ञासा' का होना निश्चित रूप से संभव है। वे गृहस्थ यदि किसी प्रतिबन्धक के कारण संन्यासाश्रम का ग्रहण न भी कर पाये हों तो भी वेदान्तश्रवण में उनकी प्रवृत्ति का होना नितान्त संभव है। उन साधन सम्पन्न गृहस्थों के लिये ही 'वेदान्तश्रवणविधि' काम्य बताया गया है। उन गृहस्थों की भी यदि ब्रह्मजिज्ञासापूर्वक 'श्रवण' में प्रवृत्ति न स्वीकार की जाय तो गृहस्थाश्रम में रहते हुए ही जिनको तत्त्वसाक्षात्कार हो गया है, उन तत्त्ववेत्ता पुरुषों की जीवन्मुक्ति के लिये श्रुति-स्मृति ने जो 'विद्वत्संन्यास' का विधान किया है वह व्यर्थ होजाएगा।

शंका—विविदिषा' संन्यास जो पूर्व बताचुके हैं, उससे भिन्न कोई संन्यास नहीं है, जिसे 'विद्वत्संन्यास' कहा जाय।

समा०—'विद्वत्संन्यास' को श्रुति-स्मृति ने ही 'विविदिषासंन्यास' से भिन्न बतादिया है, तो उसे एक ही कैसे समझाजाय।

किञ्च—अधिकारी, फल, साधन—इन तीनों के भेद से भी 'विद्वत्संन्यास' की 'विविदिषासंन्यास' से भिन्नता सिद्ध होरही है।

'विविदिषासंन्यास' में अधिकारी—'जिज्ञासु' होता है। और 'विद्वत्संन्यास' में अधिकारी—'तत्त्ववेत्ता' होता है। तथा विविदिषा संन्यास का फल—'तत्त्वज्ञान' होता है, और 'विद्वत्संन्यास' का फल—'जीवन्मुक्ति' होती है। तथा 'विविदिषा-संन्यासी', तो 'तत्त्वज्ञान' रूप फलप्राप्ति के लिये 'वेदान्तश्रवण' आदि साधनों का अनुष्ठान करता है, और विद्वत्संन्यासी,

जीवन्मुक्तिसाधनं वासनाक्षयाद्यभ्यासः विद्वत्संन्यासिनेत्यधिकारिफलानुष्ठेयानां भेदात् विविदिषाविद्वत्संन्यासयोर्महान् भेदोऽस्त्येव। नच जीवन्मुक्तिरेव नास्ति प्रमाणाभावादिति वाच्यम्। स्वानुभवश्रुतिस्मृतीतिहासपुराणानां सत्वात् पुनश्चोत्तरत्र व्युत्पादयिष्यति। उक्तञ्च—

"जीवन्मुक्तिस्तावदस्ति प्रतीतेर्द्वैतच्छाया तत्र चास्ति प्रतीतेः।
द्वैतच्छायारक्षणायास्तिलेशोऽस्मिन्नर्थे[1] स्वानुभूतिः प्रमाणमिति" ॥

तस्माद्गृहाश्रमादावुत्पन्नतत्त्वसाक्षात्कारिणां विद्वत्संन्यासविधानानुरोधेन गृहस्थादीनामेव श्रवणविधिः काम्य इति विवरणाचार्य्यतत्त्वदीपनाचार्य्ययोस्तात्पर्य्यं द्रष्टव्यम्।

गृहस्थादीनां श्रवणविधेः काम्यत्वे गमकमाह—**दिने दिने इति।** ननु विवरणाचार्य्यैस्तृतीयवर्णके संन्यासस्य श्रवणाङ्गत्वमभिधीयते, तथाच वार्त्तिकाचार्य्यैरपि।

●

जीवन्मुक्तिरूपफल की प्राप्ति के लिये 'मनोनाश, वासनाक्षय'—आदि साधनों का अनुष्ठान करता है। एवंच अधिकारी, फल, और साधन के भेद से इस 'विद्वत्संन्यास', को 'विविदिषासंन्यास से भिन्न ही मानना चाहिये।

शंका—'जीवन्मुक्ति' नाम की कोई मुक्ति ही नहीं है, क्योंकि उसके मानने में कोई प्रमाण नहीं है।

समा०—'जीवन्मुक्ति' के होने में 'स्वानुभव', श्रुति, स्मृति, इतिहास और पुराण—ये सभी प्रमाण हैं। इतने प्रमाणों के रहते जीवन्मुक्ति को कैसे न मानाजाय? इसके विषय में आगे पुनः बताएँगे।

एवं च गृहस्थाश्रम में रहते हुए ही जिनको तत्त्वसाक्षात्कार हो गया है, उनके लिए विद्वत्संन्यास का विधान किया गया है, उसी के अनुरोध से 'श्रवणविधि' को काम्य कहा गया है--यह विवरणाचार्य और तत्त्वदीपनाचार्य दोनों का मत है। क्योंकि 'विद्वत्संन्यास' की सार्थकता तभी होगी, जब गृहस्थों को वेदान्तश्रवण में अधिकार, तथा श्रवण से ब्रह्मज्ञान की प्राप्ति मानी जाय। इस विवेचन से स्पष्ट है कि गृहस्थों के लिये 'वेदान्तश्रवण', काम्यकर्म रूप है।

गृहस्थों के लिये यह श्रवण विधि काम्य है, इस तथ्य का पोषक गमक बताते हैं—**गृहस्थों को वेदान्तश्रवण से महान् पुण्यप्राप्ति का होना भी शास्त्र बता रहा है—**

ब्रह्मनिष्ठ गुरुपादारविन्दसेवन से प्राप्त होने वाला, और गुरु तथा ईश्वर भक्ति से ओत-प्रोत भरा हुआ जो वेदान्त श्रवण है, उसका श्रवण प्रतिदिन करने से अधिकारी गृहस्थ पुरुष को अस्सी कृच्छ्र का फल प्राप्त होता है।

यद्यपि वेदान्तश्रवण न करने वाले गृहस्थ को प्रत्यवाय की प्राप्ति नहीं होती, तथापि श्रवण न करने से वह आत्मज्ञान से शून्य रहता है, अर्थात् आत्मज्ञान न हो पाना—यही उसकी महान् हानि है। अतः गृहस्थों को भी वेदान्तश्रवण करके आत्मज्ञान का सम्पादन अवश्य करना चाहिये। श्रुति कह रही है—नचेदिहावेदिर्महती विनष्टिः—मानवशरीर को पाकर भी यदि मनुष्य 'आत्मा' को न जान पाया तो उसकी महान् हानि होती है। एक अन्य श्रुति भी है—कि हे गार्गि! जो मनुष्य इस अक्षर परमात्मा को न जानकर इस लोक से परलोक को जाता है वह अज्ञानी पुरुष सचमुच कृपण है। जैसे संसार में प्राप्त हुए धन का उपभोग न लेनेवाले को मनुष्य को कृपण कहा जाता है, उसी प्रकार नित्य प्राप्त 'आत्मरूप धन' के साक्षात्कार रूप उपभोग न करने वाले अज्ञानी मनुष्य को भी कृपण ही समझना चाहिये। हे गार्गि! जो इस अक्षर परमात्मा का साक्षात्कार करके इस शरीर को त्यागता है उस तत्त्ववेत्ता पुरुष को ब्राह्मण जानना चाहिये एक अन्य श्रुति भी है—जो पुरुष, आत्मरूप लोक को 'अहं ब्रह्मास्मि'—इस प्रकार से न जानकर इस स्थूलशरीररूप लोक से मृत्यु को प्राप्त होता है, तब वह अज्ञात-आत्मलोक, शोक-मोहादि दोषों की निवृत्ति न करते हुए उस अज्ञानी पुरुष का पालन नहीं करता।

स्मृति भी बताती है—'अन्यथा सन्तमात्मानं योऽन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चोरेणात्मापहारिणा' ॥

उत्तर—वह तो तुम्हें भी मानना ही है, क्योंकि 'अभाव प्रमा' के लिए तुम भी आवश्यक मानते हो कि प्रतियोगी की उपलब्धि न हो । अतः 'अनुपलब्धि' को कारण मानना हमारे पक्ष में कुछ अधिक नहीं है । एवं च लाघव से 'अनुपलब्धि' ही अभावप्रमाण है, न कि 'इन्द्रिय' ।

प्रश्न—केवल लाघव ही प्रमाण है या अन्य भी युक्ति है ?

उत्तर—यह अनुमान भी समझ लो—इन्द्रिय, अभाव को ग्रहण नहीं करती, अभाव से सम्बद्ध न होने के कारण, जो जिससे सम्बद्ध नहीं होता वह उसे ग्रहण नहीं करता, जैसे गन्ध से असम्बद्ध 'चक्षु' गन्ध को ग्रहण नहीं करती ।

प्रश्न—किन्तु सम्बद्ध नहीं है—यह कैसे कहा ? सम्बद्ध तो हमने बताया था ।

उत्तर—बताने से क्या होगा ? उसका हमने खण्डन भी तो कर दिया था ।

प्रश्न—फिर भी 'भावग्राहकता उपाधि' का क्या परिहार है ?

उत्तर—भावग्राहकता यहाँ उपाधि है ही नहीं । घटादि में देखा गया है कि उसमें 'अग्रहण' तो है (उसे अभाव का ज्ञान नहीं होता) किन्तु भावग्राहकता नहीं है—भाववस्तु का भी वह ज्ञान नहीं करता । अतः तुम्हारी 'उपाधि' साध्य की अव्यापक है । ऐसे ही इन्द्रिय में अभाव से असन्निकर्षरूप हेतु के रहते भावग्राहकता भी है, भूतल को वह ग्रहण करती है । अतः 'उपाधि' साधन की व्यापक हो गयी । इस प्रकार 'भावग्राहकता' उपाधि क्योंकर हो सकेगी ?

इसलिए व्यर्थ की कल्पनाएँ छोड़कर 'अनुपलब्धि' को ही अभावप्रमा का कारण स्वीकारना उचित है ॥३७॥

अब अवसरप्राप्त 'करण' का लक्षण कह रहे हैं—

जिस कार्य का जो असाधारण कारण हो, वही उस कार्य का 'करण' कहा जाता है ।

जैसे—'प्रत्यक्ष प्रमा' के 'चक्षुरादि इन्द्रिय' असाधारण कारण हैं, उस कारण वह 'प्रत्यक्षप्रमा' के 'करण' हैं । उसी तरह 'अभावप्रमा' का 'योग्यानुपलब्धि' असाधारण कारण होने से वह भी 'अभावप्रमा' की 'करण' है । इसी प्रकार अनुमानादिकों में भी 'करण' को समझना चाहिए ।

तद्विविधम्—उपादानकारणं, निमित्तकारणञ्चेति । कार्य्यान्वितं कारणमुपादानम्, यथा घटादेर्मृदादि । कार्यानुकूल-

●

ननु करणस्य कारणविशेषत्वात् कारणसामान्यग्रहं विना तद्विशेषो दुर्ग्रह इत्याशङ्क्य तत्सामान्यं लक्षयति—**नियमेति ।** नियतत्वमवश्यं भावित्वम् । कार्य्योत्पत्तेः प्राक्कालाधिकरणत्वं पूर्ववर्त्तित्वं न तु प्रागभावोपलक्षितसमयत्वं प्रागभावस्यानङ्गीकारात् । इदं कारणसामान्यलक्षणम् । नच पारिमाण्डल्यपरिमाणे गगनपरिमाणादौ चातिव्याप्तिस्तेषां कुत्राप्यहेतुत्वादिति वाच्यम् । प्रागेव परमाणुवादस्य निरस्तत्वेन पारिमाण्डल्यासिद्धेः । गगनादेः कार्य्यतया निरूपितत्वेन तत्परिमाणस्यापि कारणत्वसम्भवात् । कालस्याविद्यासम्बन्धातिरिक्तत्वे मानाभावात्[1] तत्परिमाणं नास्त्येव । अस्तु वातिरिक्तः कालस्तथापि तस्येश्वरात्मकतया तद्भिन्नत्वे मानाभावात् । तेनैव सर्वव्यवहारोपपत्तेस्तत्परिमाणस्यापि कारणत्वमस्त्येव । दिशोऽप्याकाशात्मतया न तत्परिमाणेऽतिव्याप्तिः । मनसोऽप्यणुत्वे विभुत्वे मानाभावात्, बाधकसद्भावात्, श्रुतिस्मृतिविरोधाच्च श्रुत्या तस्य कार्य्यत्वावगमेनान्तःकरणपरिमाणस्यापि कारणत्वमस्त्येवेति न कुत्राप्यतिव्याप्तिः । विशेषलक्षणं त्वनन्यथासिद्धनियतपूर्ववर्त्तित्वं तच्चास्ति घटादिकं प्रति मृदादेः । अनन्यथासिद्धत्वं नाम अन्वयव्यतिरेकानुपजीव्यान्वयव्यतिरेकप्रतियोगित्वम् । अलमतिविस्तरेण ॥ ३८ ॥

कारणं विभजते— **तदिति ।** नच समवायिकारणमसमवायिकारणंनिमित्तकारणञ्चेति त्रैविध्ये वक्तव्ये कथं द्वैविध्योक्तिरिति वाच्यम्, एतादृशपरिभाषाया अप्रामाणिकत्वात् । समवायस्य पूर्वं निरस्तत्वेन समवायिकारणासिद्ध्या तत्प्रत्यासन्नरूपा-

●

करण के लक्षण में यदि 'असाधारण' पद न रखें तो 'कार्यमात्र' के प्रति 'साधारणकारण' रूप जो 'अदृष्ट, देश, काल आदि हैं, उनमें लक्षण की अतिव्याप्ति हो जायगी। उसके निवारणार्थ लक्षण में 'असाधारण' पद रखना आवश्यक है।

शङ्का—कारणविशेष को ही 'करण' कहते हैं। किन्तु 'कारणसामान्य' का ज्ञान हुए विना उसके विशेष का ज्ञान होना कदापि सम्भव नहीं है।

समा०—कारणविशेष के ज्ञानार्थ ही 'कारणसामान्य' को बताते हैं—

जो पदार्थ, जिस कार्य की उत्पत्ति के पूर्व, नियमतः (अवश्य) रहता है, वह पदार्थ, उस कार्य के प्रति 'कारण' कहा जाता है।

जैसे—घटरूप कार्य की उत्पत्ति के पूर्व, 'मृत्तिका, कुलाल, दण्ड, चक्र, चीवर आदि पदार्थ, नियमतः रहते हैं, उस कारण वे मृत्तिका आदि, उस घटरूपकार्य के प्रति 'कारण' कहलाते हैं। 'नियतत्व' का अर्थ है—'अवश्यंभावित्व', न कि प्रागभावोपलक्षितसमयत्व। क्योंकि 'प्रागभाव' को हमारे सिद्धान्त में नहीं माना है। यह कारणसामान्य का लक्षण है।

शङ्का—पारिमाण्डल्यपरिमाण में और गगनपरिमाण आदि में उक्त लक्षण की अतिव्याप्ति होगी। उनमें कार्योत्पत्तिप्राक्कालाधिकरणत्वरूप पूर्ववर्तित्व है ही, किन्तु वे किसी भी कार्य के प्रति 'हेतु' (कारण) नहीं कहलाते।

समा०—वेदान्तियों ने परमाणुवाद का खण्डन कर दिया है, उस कारण 'पारिमाण्डल्य' ही असिद्ध है। वेदान्तसिद्धान्त में 'गगन' आदि पदार्थ, स्वयं ही कार्यरूप हैं, तब उसका 'परिमाण', कारण कैसे कहलायेगा ? तथा अविद्यासम्बन्ध के अतिरिक्त 'काल' के होने में कोई प्रमाण नहीं है। अतः उसका कोई 'परिमाण' ही नहीं है। अर्थात् अविद्यासम्बन्ध ही 'काल' है।

यदि 'काल' को अतिरिक्त पदार्थ भी कहें, तो वह 'ईश्वरात्मक' होने से, उससे भिन्न नहीं है। क्योंकि भिन्न मानने में कोई प्रमाण नहीं है। उसी से सम्पूर्ण व्यवहार की उपपत्ति हो जाती है। अतः उसके परिमाण को भी 'कारण' कह सकते हैं। तथा 'दिक्' भी आकाशात्मक होने से उसके परिमाण में भी अतिव्याप्ति नहीं है। 'मन' के अणुत्व में या विभुत्व में कोई प्रमाण नहीं है, प्रत्युत 'बाधक' विद्यमान होने से तथा श्रुति-स्मृति का विरोध रहने से और श्रुति के द्वारा उसमें कार्यत्व का बोध होने से 'अन्तःकरण-परिमाण' में 'कारणत्व' तो है ही। अतः कहीं भी अतिव्याप्ति नहीं है। इस प्रकार 'कारण' का सामान्य-लक्षण बताने के पश्चात् 'कारण का विशेषलक्षण' यह होगा—अन्यथासिद्ध न होते हुए नियमतः पहले रहना—यह लक्षण, घट रूप कार्य के प्रति कारण कहे जाने वाले 'मृतिका आदि' में घटित हो जाता है ॥३८॥

अब 'कारण' का विभाग करते हैं—

(१) उपादान कारण और (२) निमित्तकारण के भेद से वह (कारण) दो प्रकार का है। इनमें से कार्य में अन्वित

---

१. कालस्त्वविद्यैव तस्या एव सर्वाधारत्वादिति सिद्धान्तबिन्दुकृतः (श्लो० ८), 'कालो मायात्मसम्बन्ध', इति सूतसंहितायाम् ।

व्यापारवन्निमित्तं यथा घटादेः कुलालादि। ब्रह्म तु मायोपहितं सत्प्रपञ्चस्योपाधिप्राधान्येनोपादानं, स्वप्राधान्येन निमित्तं च

●

समवायिकारणस्य सुतरामसिद्धेः तस्य द्वैविध्योक्तिरुचितेति भावः। उपादानकारणं लक्षयति—**कार्य्येति।** कार्य्यतादात्म्यापन्नं कार्य्यान्वितम्। अनन्यथासिद्धनियतपश्चाद्भाविकार्य्यम्। निमित्तकारणेऽतिव्याप्तिवारणायादिविशेषणं, रूपादावतिव्याप्तिवारणाय द्वितीयम्। तत्रोदाहरणमाह—**यथेति।** निमित्तकारणं लक्षयति—**कार्य्यानुकूलेति।** नच जगदुपादाने ब्रह्मण्यतिव्याप्तिरिति वाच्यम्, तस्याभिन्ननिमित्तोपादानत्वस्य विवक्षितत्वेन लक्षितत्वात्। नचादृष्टादावव्याप्तिरिति वाच्यम्, तत्राप्युद्बोधस्य कार्य्यानुकूलव्यापारस्य सत्त्वात् न कोऽपि दोष इति भावः।

ननु ब्रह्मणश्चेतनतया कार्य्यप्रपञ्चस्य जड़तयेतरेतरविलक्षणत्वात्कथं ब्रह्मणो जगदुपादानत्वम्? नच श्रुत्यैवसमधिगम्यतया धर्म्माधर्म्मवद्ब्रह्मणो नातिशङ्कनीयत्वान्नोक्तदोष इति वाच्यम्, उपपत्तिविरोधे श्रुत्यर्थनिर्णयायोगात्, अन्यथा मीमांसानारम्भप्रसङ्गात्। नच निमित्तमपि तत्सम्भवति असङ्गत्वादिश्रुतिविरोधप्रसङ्गात्। तस्माज्जडस्य जडमेवोपादानं वक्तव्यं; न ब्रह्म। नच श्रुतिविरोधः, स्मृतिन्यायविरोधे श्रुतेरर्थान्तरत्वोपपत्तेरिति वदन्तं साङ्ख्यं प्रत्याह—**ब्रह्मेति।** चेतनात् पुरुषादचेतनस्य केशादेरचेतनगोमयादेश्चेतनस्य वृश्चिकादेरुत्पत्तेर्दृष्टत्वाद्विलक्षणत्वहेतोरप्रयोजकत्वात् "सोऽकामयते"त्यादिश्रुत्या ब्रह्मण उपादानत्वावगमेन श्रुतिविरोधे केवलोपपत्तेरप्रमाणतया मीमांसारम्भोपपत्तेः श्रुत्यनुकूलन्यायस्यैव प्रमाणत्वाद्ब्रह्मैव जगदुपादानं न प्रधानं, तस्याचेतनस्य स्वातन्त्र्येण प्रवृत्त्याद्यनुपपत्तेः। चेतनाधिष्ठितस्य शकटादेः प्रवृत्तेर्लोके दृष्टत्वात्, दृष्टानुरोधेनादृष्टकल्पनाया न्याय्यत्वात्, मन्वादिस्मृतिसमूलतया तद्विरोधे निर्मूलकापिलादिस्मृतेरप्रमाणत्वाच्च प्रधानादिकल्पनानुपपत्तेः।

●

(तादात्म्यभाव) हुए कारण को 'उपादान-कारण' कहते हैं। जैसे—'घटरूप कार्य' में अन्वित हुई 'मृत्तिका', उस 'घट' का उपादान कारण है, तथा 'घटरूप कार्य' में 'अन्वित-तन्तु', उस घट के उपादान कारण हैं।

उक्त लक्षण में 'कार्यान्वितम्' पद यदि न रखते तो 'धटकार्य' के निमित्तकारणरूप कुलालादिकों में लक्षण की अतिव्याप्ति हो जाती। उसके निवारणार्थ लक्षण में 'कार्यान्वितम्' पद को रखा गया है। कुलालादिक जो 'घट' के निमित्तकारण हैं, वे 'घटरूपकार्य' में 'अन्वित' नहीं रहते। उस कारण उनमें अतिव्याप्ति नहीं होती।

यदि लक्षण में 'कारणम्' पद न रखते तो 'घटरूप कार्य' में अन्वित जो 'रूप' आदि हैं, उनमें लक्षण की अतिव्याप्ति हो जाती। उसके निवारणार्थ 'कारणम्' पद को लक्षण में रखा गया है। वे रूपादिक उस 'घट' के कारण नहीं हैं। अतः उनमें लक्षण की अतिव्याप्ति नहीं हो रही है।

अब 'निमित्तकारण' का लक्षण बताते हैं—

कार्य की उत्पत्ति के अनुकूल व्यापार करनेवाले को निमित्तकारण' कहते हैं। जैसे—घटरूपकार्य की उत्पत्ति के अनुकूल व्यापार करनेवाले कुलालआदि, उस 'घटरूप कार्य' के निमित्तकारण कहलाते हैं।

किन्तु 'ब्रह्म' तो, इस जगत् रूप कार्य का 'उपादान' कारण, और 'निमित्तकारण' दोनों है। इसलिये—'ब्रह्म' में 'निमित्तकारण' के लक्षण की तथा 'उपादानकारण' के लक्षण की अतिव्याप्ति नहीं हो पाती।

शङ्का—'ब्रह्म' को प्रपञ्च का उपादान-कारण कहना उचित नहीं है, क्योंकि समान स्वभाववाले 'मृत्तिका' और 'घटादिकों' का ही 'परस्पर उपादानोपादेयभाव' लोक में देखा गया है। विलक्षण स्वभाव वाले पदार्थों का 'उपादानोपादेयभाव' *कहीं देखा नहीं है।* 'ब्रह्म' तो 'चेतनरूप' है, और 'कार्य-प्रपञ्च' जडरुप है, उसकारण दोनों परस्पर विलक्षण हैं। अतः उस 'विलक्षण ब्रह्म' को उस 'विलक्षण प्रपञ्च' का उपादानकारण कहना उचित नहीं है।

किञ्च—यदि यह कहें कि अतीन्द्रिय (इन्द्रियों के अगोचर) 'धर्माधर्म' में 'श्रुतिवचन' को ही जैसे प्रमाण माना जाता है, वैसे 'अतीन्द्रिय ब्रह्म' में भी 'श्रुति' ही प्रमाण है। 'यतो वा इमानि भूतानि जायन्ते' इत्यादि श्रुतिवचन के द्वारा 'जगत्' की उत्पत्ति, स्थिति, और लय का होना बताया गया है। इसलिये 'ब्रह्म' ही 'जगत्' का 'उपादानकारण' अवगत हो रहा है। श्रुतिसिद्ध अर्थ के लिये 'युक्ति' के प्रदर्शन की आवश्यकता नहीं होती है—यह कहना उचित नहीं है। क्योंकि 'युक्ति' का विरोध रहने पर 'श्रुति' के अर्थ का 'निर्णय' नहीं किया जा सकता।

भवति। तदैक्षत बहु स्यां प्रजायेये"त्यादि श्रुतेः। "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादि"ति सूत्राच्च ॥ ३९ ॥

●

न चैवमप्यसङ्गस्य ब्रह्मणः कथं जगदुपादानत्वमिति वाच्यम्, अनिर्वचनीयमायोपहितं ब्रह्मोपाधिप्राधान्येनोपादानं ज्ञानशक्तिमदुपहितस्वरूपप्राधान्येन निमित्तं चेत्यभ्युपगमादविरोधः। तदिदमुक्तम्—**उपाधिप्राधान्येनेति**। आवरणादिशक्तिमन्मायोपाधिप्राधान्येनेत्यर्थः। **स्वेति**। ज्ञानशक्तिमन्मायोपहितप्राधान्येनेत्यर्थः। ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणमाह—**तदिति। ऐक्षतेत्यनेन** निमित्तत्वमवगम्यते **बहुस्यामिति**। बहुभवनश्रवणेनोपादानत्वमन्यस्य तदनुपपत्तेः। प्रधानादेरीक्षणाद्यसम्भवेनाशब्दतयाऽप्रामाणिकत्वेन न जगत्कारणत्वम् "ईक्षतेर्नाशब्दमि"ति न्यायाच्चेति भावः।

●

यदि 'युक्ति' का विरोध रहने पर भी 'श्रुति' के अर्थ का निर्णय हो सकता हो तो 'उत्तरमीमांसा (वेदान्त) का आरम्भ करना ही व्यर्थ हो जायगा। अतः युक्ति के विरुद्ध, 'श्रुत्यर्थ' होने से ही 'चेतन ब्रह्म' को 'जडजगत्' का 'उपादान कारण' कहना संभव नहीं है। उसी तरह 'ब्रह्म' को 'जगत्' का 'निमित्तकारण' कहना भी संभव नहीं है। क्योंकि लोक में हम देखते हैं कि 'घटादिकार्यों' के निमित्तकारण' जो कुलालादि हैं, उनका दूसरों के साथ 'संग' (सम्बन्ध) रहता है। किन्तु 'ब्रह्म' को तो श्रुति ने 'असंग' बताया है, 'अकर्ता' बताया है। इसलिये 'असंग, अकर्ता' ब्रह्म, 'जगत्' का निमित्तकारण कैसे हो सकेगा ?

अतः 'जड प्रपञ्च' का उपादान कारण 'जड प्रधान' को ही मानना चाहिये। 'चेतन ब्रह्म' को 'जड प्रपञ्च' का उपादान-कारण कहना उचित नहीं है। कपिल स्मृति भी 'जड प्रधान' को ही 'जगत्' का उपादानकारण बता रही है।

किञ्च—पूर्वोक्त युक्ति के साथ तथा कापिल स्मृति के साथ विरोध होने के कारण ही 'श्रुति' ने भी 'प्रधान' को 'जगत्' का उपादानकारण कहा है। अतः 'जड प्रधान' ही 'जड प्रपञ्च' का उपादान कारण है।

समा०—'माया' से उपहित हुआ 'ब्रह्म' ही उपाधि की प्रधानता से 'जड प्रपञ्च' का उपादानकारण तथा स्वयं (खुद) की प्रधानता से 'निमित्तकारण' है।

'विलक्षणपदार्थों' का 'कार्य-कारणभाव' नहीं हुआ करता, यह जो सांख्यवादियों ने कहा था, वह भी असंगत है। क्योंकि लोक में दिखाई देता है कि 'चेतन पुरुष' से जड (अचेतन) 'केश—नख' आदि की उत्पत्ति हुआ करती है। तथा अचेतन (जड) 'गोमय' से 'चेतन वृश्चिक' आदि की उत्पत्ति हुआ करती है। अतः 'विलक्षण पदार्थों' का भी 'कार्य-कारणभाव' लोक-प्रसिद्ध है। उस कारण 'चेतन ब्रह्म' से 'अचेतन प्रपञ्च' की उत्पत्ति का होना असंभव नहीं है।

किञ्च—'सोऽकामयत बहु स्याम्'—इत्यादि श्रुति ने 'ब्रह्म' को ही 'जगत्' का उपादानकारण बताया है। एवञ्च 'श्रुति' का विरोध रहने पर 'केवल युक्ति' को 'अप्रमाण'माना जाता है। अत एव 'उत्तरमीमांसा' (वेदान्त) का आरम्भ करना भी सुसंगत है। 'श्रुत्यनुकूल युक्ति' को ही प्रमाण माना जाता है। 'श्रुतिविरुद्ध केवल युक्ति' को प्रमाण नहीं माना जाता। अतः प्रवल-प्रमाणरूप श्रुति के बल पर 'ब्रह्म' ही जगत्' का उपादानकारण सिद्ध हो रहा है।

सांख्यवादियों के द्वारा प्रतिपादित जो 'प्रधान' है, उसे 'जगत्' का उपादानकारण नहीं मान सकते। क्योंकि 'प्रधान' स्वयं अचेतन (जड) है। 'अचेतन वस्तु' की 'स्वतः प्रवृत्ति' नहीं हुआ करती। क्योंकि 'अचेतन रथ' आदि जड वस्तुओं की प्रवृत्ति, 'चेतन पुरुष' के अधीन ही दिखाई देती है। अतः 'दृष्ट अर्थ' के अनुसार ही 'अदृष्ट अर्थ' की कल्पना की जाती है। उस कारण 'प्रधान' को 'जगत्' का 'उपादानकारण' कहना उचित नहीं है।

किञ्च—मन्वादिस्मृतियाँ 'श्रुतिमूलक' हैं, वैसे 'कापिलस्मृति' श्रुतिमूलक नहीं है, अतः वह 'अप्रमाण' है। 'श्रुतिमूलक स्मृति' को ही प्रमाण माना जाता है। इस कारण उसके बल पर भी 'प्रधान' को 'जगत्' का उपादानकारण नहीं कह सकते।

शङ्का—वेदान्ती के मत में भी 'असंग ब्रह्म', 'जड जगत्' का उपादानकारण कैसे हो पायगा ? क्योंकि वेदान्ती तो 'ब्रह्म' को 'असंग' मानता है।

समा०—वेदान्ती कहता है कि हमारे मत में 'असंग, निर्विकार, विशुद्ध ब्रह्म', 'जगत्' का कारण नहीं है, किन्तु 'अनिर्वचनीय मायोपहित ब्रह्म' ही 'जगत्' का उपादानकारण तथा निमित्तकारण है। 'आवरणशक्तिविशिष्ट मायारूप उपाधि' की 'प्रधानता' से तो वह 'ब्रह्म', 'जगत्' का उपादानकारण है और 'ज्ञानशक्तिविशिष्टमाया' से उपहित अपने स्वरूप' की 'प्रधानता' से वही 'ब्रह्म', 'जगत्' का 'निमित्तकारण' है। अतः हमारे मत के अनुसार मानने में कोई विरोध नहीं है। श्रुति कह

तच्चकारणं द्विविधम्, साधारणासाधारणभेदात्। कार्य्यमात्रोत्पादकं साधारणकारणं यथाऽदृष्टादि। कार्य्यविशेषो-

•

ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे व्याससूत्रं संवादयति—**प्रकृतिश्चेति**। समन्वये चतुर्थपादे स्थितं—"जन्माद्यस्य यत" इत्यस्मिन्नधिकरणे ब्रह्मणस्तटस्थलक्षणं जगत्कारणत्वं निर्णीतम्। तत्किन्निमित्तत्वमात्रमुतोपादानत्वमपीति विशये "स ईक्षां चक्रे" इत्यादिना ब्रह्मणः कर्तृत्वावगमात् लोके मृदादिभिन्नस्य कुलालादेर्घटादिकर्तृत्वदर्शनाच्च ब्रह्म जगतो निमित्तमेव, अन्यदेवो-पादानमिति प्राप्तेऽभिधीयते—ब्रह्म जगतः प्रकृतिरुपादानं निमित्तं च भवति। कुतः ? प्रतिज्ञादृष्टान्तानुपरोधात्। "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात"मित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय "यथासोम्यैकेन मृत्पिण्डेने"त्यादिदृष्टान्तैः ब्रह्मणोऽभिन्न-निमित्तोपादानत्वेऽनयोरनुपरोधो भवति। अन्यथा तद्विरोधः स्यात्। "तदैक्षत बहुस्यामित्यादि श्रुत्या तत्प्रतिपादनाच्च। आगम-गम्येऽर्थे लौकिककुलालादिदृष्टान्तन्यायस्यानवताराच्च। तस्माद्ब्रह्मैव जगतः प्रकृतिर्निमित्तञ्चेति ॥३९॥

कारणरूपं निर्णेतुं कारणं प्रकारान्तरेण विभजते—**तच्चेति**। **कार्य्येति**। कार्य्यतावच्छेदकावच्छिन्नकार्य्यानुत्पादकत्वे सति कार्य्यविशेषोत्पादकमसाधारणमित्यर्थः[१]। अस्त्वेवं कारणलक्षणं प्रकृते किमायातमित्याशङ्क्याह—**तथाचेति**।

•

रही है—'तदैक्षत बहु स्यां प्रजायेय'—**उस मायोपहित ब्रह्म ने सृष्टि से पूर्व, भावी प्रपञ्चविषयक ज्ञानरूप ईक्षण किया अर्थात् विचार किया कि मैं (परमेश्वर) बहुत रूपों से उत्पन्न होऊँ**"—उक्त श्रुति में 'तदैक्षत' कहकर जगत् की उत्पत्ति करने के पूर्व 'ब्रह्म' में 'ईक्षणकर्तृत्व' को बताया है। उस कारण 'ब्रह्म' में जगत्' की 'निमित्तकारणता' सिद्ध की गई है। जैसे 'घट' की उत्पत्ति के पूर्व उस घट की उत्पत्ति के अनुकूल ज्ञानसम्पन्न कुलालादिकों में उस घट के प्रति निमित्तकारणता ही मानी जाती है। और 'बहुस्यां प्रजायेय'—कहकर उसका (ब्रह्म का) अनेकरूप (बहुतरूप) होना बताया गया है। उससे 'ब्रह्म' में जगत् की उपादान करणता सिद्ध की गई है। जैसे—'घट-शराव' आदि अनेकरूप होनेवाली मृत्तिका में उन घट-शरावादि कार्यों के प्रति उपादानकारणता मानी जाती है।

किञ्च—ब्रह्मसूत्रकार व्यास भगवान् ने भी उस मायोपहित 'ब्रह्म' को ही जगत् का उपादानकारण तथा निमित्तकारण दोनों बताया है। 'ब्रह्म' के अतिरिक्त अन्य किसी में भी जगत् का उपादानकारणत्व और निमित्तकारणत्व उपपन्न नहीं हो सकता। **"ईक्षतेर्नाशब्दम्"** अर्थात् 'प्रधान', (प्रकृति) कभी भी 'जगत्' का कारण नहीं है, क्योंकि वह 'अशब्द' है (श्रुति से अप्रतिपादित है), क्योंकि 'तदैक्षत'—श्रुति ने ईक्षणकर्ता को जगत्कारण कहा है। 'जड प्रधान' में ईक्षण करने की शक्ति नहीं है। 'ईक्षण-श्रवणात् वेदशब्दाऽवाच्यम् अशब्दं प्रधानम्। अशब्दत्वात् न कारणमिति'—यह रत्नप्रभा में कहा गया है।

भगवान् व्यास ने ब्रह्मसूत्र के प्रथमाध्याय—चतुर्थपाद के सप्तमाधिकरण, तेईसवें सूत्र के द्वारा स्पष्ट कहा है—कि मायोपहित ब्रह्म ही 'जगत्' का उपादानकारण तथा निमित्तकारण है। इस कथन से ही श्रुत्युक्त प्रतिज्ञा तथा दृष्टान्त की उपपत्ति हो पाती है। श्रुति ने प्रतिज्ञा की है कि 'सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मय विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'—हे सोम्य ! जैसे एक मृत्पिण्ड से सम्पूर्ण मृद्विकारों का ज्ञान हो जाता है, विकार नाममात्र है, जिसका आरंभ केवल वाणी से होता है, 'मृत्तिका' ही सत्य है। उसी प्रकार 'एक ब्रह्म' के ज्ञात होने पर सम्पूर्ण प्रपञ्च का ज्ञान हो जाता है,—यह श्रुति की **प्रतिज्ञा है**। और 'एक मृत्तिका के ज्ञान से 'घट' शरावादिकों का ज्ञान हो जाता है—यह कथन **'दृष्टान्त'** है। एवंच उक्त प्रतिज्ञा तथा 'दृष्टान्त' तभी संभव हो सकेगा, जब कि 'ब्रह्म' को सम्पूर्ण प्रपञ्च का कारण मानेंगे। क्योंकि 'उपादानकारण' के ज्ञान से ही 'कार्य' का ज्ञान होता है। निष्कर्ष यह है कि उक्त सूत्र से भी 'ब्रह्म' में जगत् की अभिन्न निमित्तोपादनकारणता ही सिद्ध होती है ॥ ३९ ॥

अब 'कारण' के स्वरूप का निर्णय करने के लिये प्रकारान्तर से 'कारण' का विभाग करते हैं—**'उक्त कारण', (१) साधारण और (२) असाधारण के भेद से दो प्रकार का होता है। 'कार्यमात्र' का उत्पादक जो कारण हो, उसे 'साधारणकारण' कहते है। जैसे—कार्यमात्र के जनक (उत्पादक) 'अदृष्ट', 'देश', 'काल' आदि हैं।**

---

१. येषां कारणानां कार्यतावच्छेदको धर्मः कर्यत्वं तानि साधारणकारणानि। येषां पुनरसौ कार्यत्वव्याप्यो घटत्वादिः तान्यसाधारणानीति विधिवादभूमिकायां बदरीनाथशुक्लाः।

त्पादकमसाधारणकारणं। यथा चाक्षुषादिप्रमायां चक्षुरादि। तथा च घटाद्यभावप्रमायां घटाद्यनुपलब्धिरसाधारणं कारणं तदेव करणम् ॥ ४० ॥

यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन तद्वदुपलभ्येतेति प्रसञ्जितोपलब्धिरूपः प्रतियोगी यस्याः सा

●

ननु क्लृप्तेन्द्रियस्यैवाभावप्रमाकरणत्वोपपत्तावनुपलब्धेः किमर्थं करणत्वं कल्पनीयमित्याशङ्क्याह—**तदेवेति**। असाधारणकारणमनुपलब्धिरित्यर्थः। इन्द्रियस्याधिकरणज्ञानकरणत्वेनान्यथासिद्धत्वात् न तत्र करणत्वं सम्भवति। न चाधिकरणज्ञानस्यावान्तरव्यापारतया नेन्द्रियस्यान्यथासिद्धिरिति वाच्यम्, तर्हि कुलालपितुरपि घटं प्रति कारणत्वप्रसंगात्। उक्तन्यायेन कुलालस्यावान्तरव्यापारत्वसम्भवेन कुलालपितुरन्यथासिद्ध्यभावस्य वक्तुं शक्यत्वात्। तस्मादिन्द्रियस्याभावप्रमाकरणत्वस्यासङ्गतत्वेन तत्रानुपलब्धिरेव करणमिति भावः ॥४०॥

नन्वेवमनुपलब्धेरभावग्राहकत्वे आत्मनि धर्म्माधर्म्मानुपलब्ध्या भूतले घटाभाववत्तदभावो गृह्येत। न च योग्यानुपलब्धेरेवाभावग्राहकत्वाभ्युपगमेन धर्म्माधर्म्मयोरयोग्यतया तदनुपलब्ध्या तदभावो न गृह्येतेति वाच्यम्, अनुपलब्धेर्योग्यताया अनिर्वचनात्। तथाहि—किं योग्यस्य प्रतियोगिनोऽनुपलब्धिर्योग्यानुपलब्धिः, किं वा योग्येऽधिकरणेऽनुपलब्धिः? नाद्यः, स्तम्भे पिशाचान्योन्याभावस्यानुपलब्धिगम्यत्वं न स्यात्प्रतियोगिनोऽयोग्यत्वात्। न द्वितीयः, आत्मनि धर्म्माधर्म्माद्यभावस्यानुपलब्धिगम्यत्वप्रसंगात्। नचेष्टापत्तिः, अतीन्द्रियाऽभावस्याऽनुमानगम्यत्वाभ्युपगमात्। तस्मात् योग्यताया निर्वक्तुमशक्यत्वेन योग्यानुपलब्ध्या तत्सहकृतप्रत्यक्षेण वाभावो गृह्यत इत्यसङ्गतमेव। कथं तर्हि अभावग्रहः? न कथमपि, केवलाधिकरणव्यति-

●

उसी तरह कार्य विशेष के उत्पादक कारण को 'असाधारण कारण' कहते हैं। जैसे—'चाक्षुषादि प्रमा' में 'चक्षुरादि' असाधारण कारण होते हैं। उसी प्रकार 'घटाभावविषयक प्रमा' में उक्त 'घटानुपलब्धि' को असाधारण कारण ही मानना चाहिये। असाधारणकारण होने से 'अनुपलब्धि' को ही 'अभावप्रमा' के प्रति 'करण' कहा गया है। अभावप्रमा के प्रति 'इन्द्रिय' को 'करण' नहीं कह सकते, क्योंकि उससे तो भूतलरूप अधिकरण का ज्ञान होता है। अतः अन्यथा सिद्ध होने से वह अभावप्रमा के के प्रति 'करण' नहीं है।

शंका—अधिकरणज्ञान को अवान्तरव्यापार मान लिया जाय, तब 'इन्द्रिय' में अन्यथासिद्धत्व नहीं होगा।

समा०—तब तो कुलालपिता को भी 'घट' के प्रति कारण कहना होगा। क्योंकि कुलाल को भी अवान्तर व्यापार मानकर कुलालपिता में भी अन्यथासिद्धि का अभाव कहा जा सकेगा। अतः इन्द्रिय को अभावप्रमा के प्रति 'करण' कहना नितान्त असंगत है। इसलिये अभावप्रमा के प्रति 'अनुपलब्धि' को ही 'करण' कहना युक्तियुक्त प्रतीत होता है ॥ ४० ॥

शंका—'अनुपलब्धि' को 'अभावप्रमा' का ग्राहक मानने पर 'आत्मा' में धर्माधर्म की उपलब्धि न होने से 'भूतले घटाऽभावः' के समान 'आत्मा' में धर्माधर्म के भी अभाव का ग्रहण हो जायगा।

यदि यह कहें कि 'अभावप्रमा' की ग्राहक केवल अनुपलब्धि नहीं है, अपितु 'योग्यानुपलब्धि को माना गया है। उस कारण धर्माधर्म में 'योग्यता' के न रहने से उनकी अनुपलब्धिमात्र से उनका 'अभाव' नहीं समझा जायगा।

किन्तु यह समाधन नहीं हो सकता। क्योंकि अनुपलब्धि की 'योग्यता' का अभी तक कोई निर्वचन नहीं किया गया है। तथाहि—'किं योग्यस्य प्रतियोगिनः अनुपलब्धिः' योग्यानुपलब्धिः? किं वा 'योग्ये अधिकरणे अनुपलब्धिः' योग्यानुपलब्धिः? अर्थात् योग्य प्रतियोगी की अनुपलब्धि को 'योग्यानुपलब्धि' समझना है, अथवा योग्य अधिकरण में अनुपलब्धि को 'योग्यानुपलब्धि' समझना है?

किन्तु प्रथमपक्ष का स्वीकार करना ठीक नहीं होगा, क्योंकि 'स्तंभ में पिशाच है'—यहाँ पर 'अन्योन्याभाव' का ज्ञान, अनुपलब्धि से नहीं हो सकेगा, क्योंकि 'प्रतियोगी जो पिशाच' है, वह अयोग्य (प्रत्यक्षयोग्य नहीं) है।

उसी तरह द्वितीय पक्ष का भी स्वीकार करना भी ठीक नहीं होगा। क्योंकि 'आत्मा' में धर्माधर्मादि के अभाव को अनुपलब्धि से जानने का प्रसंग प्राप्त होगा।

यदि उसे इष्टापत्ति कहें तो भी ठीक नहीं होगा, क्योंकि 'अतीन्द्रिय अभाव' का ज्ञान 'अनुमान' से करने के लिये कहा गया है। इसलिये 'योग्यता' का निर्वचन करना शक्य न होने से यह कहना कि 'योग्यानुपलब्धि' से अथवा 'तत्सहकृत प्रत्यक्ष' से 'अभाव-

योग्यानुपलब्धिस्तयाऽभावो गृह्यते । नञर्थोल्लिखितधीविषयोऽभावः ॥ ४१ ॥

●

रेकेणाभावस्याभावात् । तच्च प्रत्यक्षेणैवानुभूयते इति योग्यानुपलब्धिकरणिकाभावप्रमेत्युक्तमनुपपन्नमिति वदन्तं प्रभाकरं निराकर्तुं तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वमनुपलब्धेर्योग्यत्वमित्यभिप्रेत्य तन्निर्वचनस्यार्थं वदन् तयाऽभावो गृह्यत इत्याह—**यदीत्यादिना ।** तथा च यदि स्तम्भे पिशाचत्वं स्यात्तर्हि स्तम्भत्ववदुपलभ्येतेति तर्कितेन प्रतियोगिरूपपिशाचत्वसत्त्वेन तदुपलब्धेः प्रसञ्जनसम्भवात् । योग्यवृत्तिजातेर्योग्यत्वात् । अतो योग्यानुपलब्ध्या स्तम्भे पिशाचान्योन्याभावस्य ग्रहणं सम्भवत्येव । आत्मनि धर्म्माधर्म्माद्यापादनेन तदुपलब्धेरापादयितुमशक्यत्वात्तत्र तदभावो नानुपलब्धिगम्यः किन्त्वनुमानगम्यः । न च केवलाधिकरणव्यतिरेकेणाभाव एव नास्तीति वक्तुं शक्यम्, घटाद्यनुपलब्ध्या भूतले घटो नास्तीत्याधाराधेयभावानुभवस्य सार्वजनीनत्वात् । न हि तदेव तस्याधिकरणं भवति । तस्मादधिकरणातिरिक्तोऽभावोस्त्येव । स च योग्यानुपलब्ध्या गृह्यते इति तत्करणिकाभावप्रमेत्युक्तं सुसङ्गतमिति भावः ।

नन्वेवमपि ज्ञातानुपलब्ध्याऽभावो गृह्यते वाऽज्ञातानुपलब्ध्या वा ? नाद्यः, अनवस्थाप्रसङ्गात् । न द्वितीयः, सर्वदाऽभावग्रहणप्रसङ्गात् अतोनुपलब्धिकरणकत्वमभावप्रमाया न सङ्गतमिति चेन्न, ज्ञातानुपलब्धेरेऽत्राभावप्रमाकरणत्वात् । न चानवस्था, उपलब्ध्यभावस्य प्रमातृनिष्ठतया तज्ज्ञानस्य स्वप्रकाशसाक्षिरूपत्वेन तदयोगात् । तस्मादभावप्रमाया अनुपलब्धिरेव करणम् ।

●

प्रमा' का ग्रहण (ज्ञान) होता है—नितान्त असंगत ही है । 'अभाव' का ज्ञान तो किसी प्रकार से भी नहीं हो सकता । क्योंकि केवल 'अधिकरण' के व्यतिरिक्त 'अभाव' नामक कोई पदार्थ है ही नहीं । और 'अधिकरण' का ज्ञान 'प्रत्यक्ष' से ही हो जाता है । अतः यह जो कहा था कि 'योग्यानुपलब्धिकरणिका अभावप्रमा'—उसे अनुपपन्न बताने वाले प्रभाकर का निराकरण करने के लिये कहते हैं कि **यदि यहाँ घड़ा होता—इस प्रकार प्रतियोगी की विद्यमानता के आरोप से, प्राप्त करायी गयी उपलब्धि है प्रतियोगी जिसकी, वह 'योग्य अनुपलब्धि' होती है । उससे अभाव को प्रमा होती है ।**

यदि अत्र घटः स्यात्'—इस प्रकार से 'तर्कितप्रतियोगिसत्त्वप्रसंजितप्रतियोगिकत्व' ही 'अनुपलब्धि' की 'योग्यता' समझनी चाहिये । इसी अभिप्राय से योग्यानुपलब्धि का निर्वचन करके उसके द्वारा 'अभावप्रमा' का ज्ञान हो पाता है । तथाच 'यदि स्तंभे पिशाचसत्त्वं स्यात् तर्हि स्तंभत्ववत् उपलभ्येत'—इस प्रकार तर्कित प्रतियोगिरूप पिशाचत्व का सत्त्व रहने से उसकी उपलब्धि का होना संभव हो सकता है । योग्य पर रहने वाली जाति को ही 'योग्यत्व कहते हैं । अतः योग्यानुपलब्धि से स्तंभ में पिशाच के अन्योन्याभाव का ग्रहण हो सकता है । और 'आत्मा' में धर्माधर्मादि के आपादन से उनके अभाव का आपादन करना शक्य नहीं है । उस कारण आत्मा में धर्माधर्म के अभाव का ज्ञान अनुपलब्धि से नहीं होता, अपितु 'अनुमान' से होता है । यह भी नहीं कह सकते कि केवल अधिकरण के अतिरिक्त 'अभाव' नाम की कोई वस्तु ही नहीं है । क्योंकि 'घट' को अनुपब्धि से 'भूतले घटो नास्ति'—इस प्रकार से ''आधाराधेयभाव' का अनुभव, सभी को होता रहता है । स्वयं ही स्वयं का अधिकरण तो हो नहीं सकता । अतः अधिकरण से अतिरिक्त 'अभाव' पदार्थ को मानना ही होगा । उस अभाव का ग्रहण 'योग्यानुपलब्धि' से होता है । एवं च 'योग्यानुपलब्धिकरणिका अभावप्रमा'—यह जो कहा है, वह सुसंगत ही है ।

योग्यानुपलब्धि से अभाव का ग्रहण सिद्ध होने पर भी पुनः जिज्ञासा होती है कि 'ज्ञात अनुपलब्धि' से 'अभाव' का ग्रहण होता है, किंवा 'अज्ञात अनुपलब्धि' से ?

प्रथम पक्ष का यदि स्वीकार करते हैं तो 'अनवस्था' होगी । द्वितीय पक्ष का स्वीकार करने पर 'सर्वदा ही अभाव का ज्ञान (ग्रहण) होते रहने का प्रसंग आवेगा । अतः 'अभावप्रमा' में 'अनुपलब्धि' को करण कहना असंगत सा ही प्रतीत हो रहा है ।

किन्तु उक्त आशंका उचित नहीं है । 'अभावप्रमा' के होने में 'ज्ञात अनुपलब्धि' ही करण है । उसके करण होने से 'अनवस्था' की आशंका नहीं करनी चाहिये । क्योंकि 'उपलब्धि का अभाव', 'प्रमातृनिष्ठ' है और उसका ज्ञान, स्वप्रकाशसाक्षिरूप है । अतः अनवस्था नहीं हो सकती । एवं च 'अनुपलब्धि' ही अभावप्रमा के प्रति करण है ।

शंका—यह 'अभाव' नामक कौन-सा पदार्थ है ? उसे द्रव्यादि षट् का अन्योन्याभावरूप नहीं कह सकते, क्योंकि विशेषादि पदार्थ को स्वीकार नहीं किया गया है । उसे भावपदार्थ से भिन्न भी नहीं कह सकते, क्योंकि अन्योन्याश्रय का प्रसंग प्राप्त होगा । अभाव का निरूपण न हो सकने के कारण 'अनुपलब्धि' को स्वतन्त्र पृथक् प्रमाण मानना संभव भी नहीं है ।

सचाऽत्यन्ताभाव एक एव, भेदे प्रमाणाभावात्। तथाहि "सदेव सोम्येदमग्र आसीत्" "सत्त्वाच्चापरस्ये"ति[1]

ननु कोऽयमभावः ? न तावद्‌द्रव्यादिषट्‌कान्योन्याभावः सः, विशेषादेरनङ्गीकारात्। नापि भावभिन्नः सः, परस्पराश्रयप्रसङ्गात्। अतोऽभावस्यानिरूपणात् अनुपलब्धेर्मानान्तरत्वमनुपपन्नमित्याशङ्क्याह—**नञर्थेति।** नञो नशब्दस्यार्थमुल्लिखति विषयीकरोति नञर्थोल्लिखिता, सा चासौ धीश्च नञर्थोल्लिखितधीस्तस्या विषयोऽभावो, नास्तीतिप्रत्ययवेद्योऽभावः ॥४१॥

ये तु घटादेरेकैकस्य पदार्थस्य प्रागभावादिभेदेन चतुर्विधाभावमाचक्षते तान्प्रत्याह—**स चेति।** एकप्रतियोगिकोऽभावोऽत्यन्ताभाव एक एव। नहि सर्वेषां घटादीनामेक एवाभावो वक्तुं शक्यः, प्रतियोगिभेदेनाभावभेदस्य सर्वसम्मतत्वात्। तथा चैकस्य प्रतियोगिनः प्रागभावादिभेदेनाभावभेदोऽनुपपन्नः। तथाहि—प्रतियोगिभेदेनाऽभावभेदो वाच्यः प्रतियोगिनोऽभावनिरूपकत्वेन तद्भेदमन्तरेणाभावभेदायोगात्।

ननु प्रतियोगिभेदाभावेऽपि प्रतियोगितावच्छेदकभेदेनाभावभेदोऽस्तु, प्रतियोगिवत्प्रतियोगितावच्छेदकस्यापि तन्निरूपकत्वात्। न च प्रतियोगितावच्छेदकस्यापि घटत्वस्यैक्यात्कथं तद्भेदेनाभावभेद इति वाच्यम् ? तस्य वस्तुत एकत्वेऽपि विशिष्टाविशिष्टरूपेण तद्भेदसम्भवात्। तथाहि—भविष्यत्कालसम्बन्धिघटत्वं प्रागभावस्य प्रतियोगितावच्छेदकं, भूतकालविशिष्टं घटत्वं ध्वंसस्य, भूतभविष्यद्वर्त्तमानकालावच्छिन्नघटत्वमत्यन्ताभावस्य, केवलघटत्वमन्योन्याभावस्येति प्रतियोगितावच्छेदकभेदेन प्रतियोग्यैक्येऽप्यभावभेदः सम्भवत्येवेति चेत् ?

न। प्रतियोगितावच्छेदकभेदेनाभावभेदकल्पनायामनन्ताभावकल्पनाप्रसङ्गात्। तथाहि—यथा प्रतियोगिन एकत्वेऽपि भविष्यदादिकालभेदेन प्रागभावादिभेदः, एवं प्रमेयत्वद्रव्यत्वपृथिवीत्वादिप्रतियोगितावच्छेदकभेदेनापि घटाभावः सिध्येत। इह घटोनास्तीत्यनुभववत्पृथिवी; घटो नास्ति, द्रव्यं; घटोनास्तीत्याद्यनुभवस्यापि सम्भवात्। न चैवमभ्युपगम्यते। तस्मात्प्रतियोगितावच्छेदकभेदेनाभावभेदो दुर्निरूप्य इति प्रतियोगिभेदेनैवाभावभेदो वाच्यः। ततश्च घटस्य प्रतियोगिन एकत्वात् तत्प्रतियोगिकाऽभावभेदो नास्त्येवेति। तदत्यन्ताभाव एक एवेति सिद्धम्।

●

समा०—उक्त आशंका के समाधानार्थ कह रहे हैं—**'नञ्' शब्द के अर्थ को विषय करनेवाली जो 'नास्ति' इत्याकारक प्रतीति है, उस प्रतीति के विषय को 'अभाव' शब्द से कहा जाता है।** जैसे 'भूतले घटो नास्ति'—इत्याकारकप्रतीति का विषय 'भूतल में घट का अभाव' है ॥ ४१ ॥

वह **'अभाव'; 'अत्यन्ताभावरूप एक' ही है। प्रागभावादिभेद से 'चार अभाव' मानने में कोई प्रमाण नहीं है।** नैयायिकविद्वानों ने जो कहा है कि 'घटादि एक-एक पदार्थ' के 'प्रागभावादिभेद' से चार प्रकार का अभाव होता है—यह कहना उचित नहीं है।

नैयायिक विद्वान् अपने विचारों को इस प्रकार व्यक्त करते हैं—(१) प्रागभाव, (२) प्रध्वंसाभाव, (३) अत्यन्ताभाव, (४) अन्योन्याभाव—इन भेदों से 'अभाव' के चार प्रकार होते हैं। उनमें से 'घट' की उत्पत्ति से पूर्व उस घट के अवयवरूप कपालों में 'घटो भविष्यति' इत्याकारक प्रतीति होती है। उस प्रतीति के बलपर उन कपालों में घट का प्रागभाव सिद्ध होता है।

मुद्‌गरादिकों के प्रहार करने पर वह घट भग्न हो जाता है। तब उसके अवयवभूत कपालों में—'घटो ध्वस्तः'—इत्याकारक प्रतीति होती है। उस प्रतीति के बल पर उन कपालों में उस घट के प्रध्वंसाभाव' की सिद्धि होती है।

घट के अविद्यमान काल में 'भूतले घटो नास्ति'—इत्याकारक प्रतीति होती है। उस प्रतीति के बलपर उस भूतल पर उस घट का अत्यन्ताभाव सिद्ध होता है।

भूतल पर 'घट' के विद्यमान रहने पर भी 'भूतलं न घटः'—इत्याकारक प्रतीति होती है। उस प्रतीति के बल पर 'घट' का भेदरूप अन्योन्याभाव सिद्ध होता है। इन विलक्षण प्रतीतियों के बल से उस एक ही घट के चार प्रकार के अभाव सिद्ध होते हैं।

१. अवरस्येति सूत्रपाठः। इह तु कौस्तुभेऽपि अपरस्येति गृहीत्वा व्याख्यातम्।

ननु घटो भविष्यति, घटो ध्वस्तः, घटो नास्ति, घटो भूतलं नेति प्रतीतिवैलक्षण्येन घटाभावविषयवैलक्षण्यस्यावश्यकत्वादतः प्रमाणबलेन प्रागभावादयोऽवश्यमभ्युपगन्तव्याः। प्रमाणसिद्धेऽर्थे युक्तीनामनवतारात् ता आभासीभवन्ति। अन्यथा कुत्रापि प्रमाणेन वस्तुनिर्णयो न स्यात्। तदुक्तम्—

"स्वानुभूताविश्वासे तर्कस्याप्यनवस्थितेः। कथं वा तार्किकम्मन्यस्तत्त्वनिश्चयमाप्नुयादि"ति॥

तस्मात्प्रतियोग्यैक्येऽपि प्रमाणबलेन प्रागभावादिभेदसिद्धिरित्यत आह—भेद इति। अभावभेद इत्यर्थः। नच भविष्यतीत्यादि प्रमाणस्योपन्यस्तत्वात्कथं तदभाव इति वाच्यम्? न हि घटो भविष्यतीत्यादिप्रतीत्याऽभावोऽनुभूयते, तत्र नञर्थानुल्लेखनात्। किं तर्हि? घटस्य भविष्यत्कालसत्तासम्बन्धः। न चैवं पूर्वकाले तस्याभावः, असत्त्वप्रसङ्गात्। न चेष्टापत्तिः, असतः शशविषाणादेरुत्पत्तेरदर्शनेन तदुत्पत्त्यनुपपत्तेः। सतो वा कथं तर्ह्युत्पत्तिः? कारकव्यापारवैयर्थ्यादिति चेन्न, कारणात्मना विद्यमानस्याभिव्यञ्जकत्वमात्रेण कारकव्यापारस्यार्थवत्त्वोपपत्तेः। एतेन प्रागसतः सता योगो वा आद्यक्षणसम्बन्धो वोत्पत्तिरिति

•

इन अभावों में से 'अनादिः सान्तः प्रागभावः' अर्थात् यह 'प्रागभाव'—अनादि होता है, किन्तु नाशवान् है। और 'प्रध्वंसाभाव'—'सादिः अनन्तः प्रध्वंसः'—अर्थात् 'प्रध्वंसाभाव'—उत्पत्तिमान् है, किन्तु नाशवान् नहीं है। और 'अत्यन्ताभाव'—'त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकः अत्यन्ताभावः'। तथा 'अन्योन्याभाव'—'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः अन्योन्याभावः' ये दोनों अभाव, उत्पत्ति-विनाश से रहित होने के कारण 'नित्य' होते हैं।

किन्तु यह विभाजन असंगत है कारण कि एक प्रतियोगी वाला अभाव एक ही हो सकता है, एक ही प्रतियोगी के अनेक अभाव हो नहीं सकते। घड़े आदि सभी वस्तुओं का एक ही अभाव तो कहा नहीं जा सकता क्योंकि प्रतियोगी के भेद से अभाव में सभी भेद मानते हैं। इसलिये एक ही प्रतियोगी का अभाव प्रागभावादि भेद से चार प्रकार का कहना गलत है। प्रतियोगी ही जब अभाव का निरूपक है तो उसके एक रहते अभाव को अनेक कहोगे कैसे?

प्रश्न—प्रतियोगितावच्छेदक के भेद से कह देंगे, क्योंकि जैसे प्रतियोगी वैसे प्रतियोगितावच्छेदक भी अभाव का निरूपक है।

उत्तर—किन्तु घटत्वरूप प्रतियोगितावच्छेदक भी तो एक ही है।

प्रश्न—वस्तुदृष्ट्या भले ही एक हो, विशिष्ट और अविशिष्ट रूप से तो उसमें भेद हो जायेगा। भविष्यत्कालसम्बन्धि घटत्व को प्रागभाव की प्रतियोगिता का अवच्छेदक मानेंगे, भूतकालविशिष्ट को ध्वंस के लिये, तीनों कालों से विशिष्ट को अत्यन्ताभाव के लिये और केवल घटत्व को भेद के लिये प्रतियोगितावच्छेदक मान लेंगे। इस प्रकार अभावभेद उपपन्न है।

उत्तर—ऐसा कहना अनुचित है। ऐसा हो तो अनन्त अभाव मानने पड़ेंगे। प्रमेयत्व, द्रव्यत्व आदि बहुतेरे प्रतियोगितावच्छेदक उपस्थित हैं जिनके भेद से असंख्य अभाव सिद्ध होने लगेंगे। अनुभव तो जैसे यहाँ घट नहीं है—यह होता है वैसे पृथ्वी घट नहीं है, द्रव्य घट नहीं है—यह भी होता है। अतः उनकी प्रतियोगितावच्छेदकता मना नहीं की जा सकती और अभावों की अनन्तता अर्थात् अपलाप नहीं किया जा सकता तुम्हें भी स्वीकार्य तो नहीं है, केवल चातुर्विध्य ही स्वीकार्य है। अतः अनुभवानुरोध से प्रतियोगी की विभिन्नता को ही अभावभेद का नियामक मानना उचित होने से उक्त चातुर्विध्य असंगत है।

प्रश्न—किन्तु घट बनेगा, घट फूट गया, घड़ा नहीं है, भूतल घड़ा नहीं है—इन विभिन्न प्रतीतियों के कारण विभिन्न अभावों को मानना होगा अन्यथा ज्ञान की आकस्मिकता या साकारता होने लगेगी, जो किसी को इष्ट नहीं। अतः हम युक्ति से सिद्ध भले ही न कर पायें, तथापि अबाधित अनुभव के आधार पर तो विभिन्न अभाव मानने ही होंगे। यदि अनुभूति पर अविश्वास हो तब तो कभी निश्चय हो ही नहीं सकेगा क्योंकि तर्क तो अनवस्थित ही हुआ करता है। एवं च प्रामाणिक अभाव के चातुर्विध्य को आप क्यों नहीं स्वीकार करते?

उत्तर—उक्त मन्तव्य उचित नहीं है। क्योंकि 'घटो भविष्यति'—इस प्रतीति में 'अभाववाचक नञ्' शब्द नहीं है। उस कारण उक्त प्रतीति, 'प्रागभाव' को विषय नहीं कर रही है। किन्तु आगे चलकर भविष्यत्काल में होनेवाले 'घट' का 'सत्ता' के साथ जो 'सम्बन्ध' है, उसी को उक्त प्रतीति, विषय करती है। अतः 'घटोभविष्यति'—इस प्रतीति के बलपर घट का 'प्रागभाव' सिद्ध नहीं किया जा सकता।

किञ्च—'घट' की उत्पत्ति के पूर्व 'प्रागभाव' मानने पर तो उत्पत्ति के पूर्व 'घट' के 'असत्' रहने से उस घट की तो उत्पत्ति ही नहीं हो सकेगी।

प्रत्युक्तम्। तद्भविष्यतीति प्रतीतेरन्यविषयत्वात्प्रागभावो दुर्निरूपइत्यभ्युपगम्य तदभ्युपगमे श्रुतिसूत्रविरोधमाह—**तथाहीति।** **इदं** दृश्यमानं सर्वं कार्य्यजात**मग्रे** सृष्टेः पूर्वं **सदेवासीदिति** कारणात्मना सत्त्वमवधार्य्यते कार्य्यस्य। **तथापरस्य** कार्य्यस्य प्रागुत्पत्तेः कारणात्मना **सत्त्वाद्वर्त्त**मानकालेऽपि परमकारणादनन्यत्वं तद्व्यतिरेकेणाभाव इति सूत्रेण प्रतिपाद्यते। प्रागभावश्चेत् स्वीक्रियते तर्हि श्रुतिसूत्रविरोधः स्यात। तस्मात्स दुर्निरूप इत्यर्थः।

एतेन सर्वं कार्यं स्वसमवायिकारणनिष्ठाभावप्रतियोगि कार्य्यत्वाद्व्यतिरेकेणाकाशवदिति प्रत्युक्तम्। श्रुतिसूत्राभ्यां हेतोर्बाधितविषयत्वादसत्कार्य्यवादस्याप्रामाणिकत्वेनासदुत्पत्तेर्निराकृतत्वेन चानुमानानुपपत्तेश्च। प्रागभावेन विनानुपपत्तेरभावाच्च न तत्सिद्धिरिति।

अतएव ध्वंसो दुर्निरूप इत्याह—**प्रागिति।** ब्रह्मसाक्षात्कारः[1]। उत्पत्तेः पूर्वं सृष्टिप्रलययोर्बीजाङ्कुरवत्प्रवाहस्या-

•

यदि 'असत्' की भी उत्पत्ति होती हो तो 'असत्' शशविषाण, वन्ध्यापुत्र आदि की भी उत्पत्ति होनी चाहिये। किन्तु उनकी उत्पत्ति कभी भी नहीं होती, क्योंकि वे 'असत्' हैं।

शङ्का—जैसे 'असत्' की उत्पत्ति का होना असंभव है, वैसे ही 'सत्' की उत्पत्ति का होना भी सम्भव नहीं है। क्योंकि जिस घट की उत्पत्ति के होने में कुलाल, दण्ड, चक्र, चीवर आदि कारणों का व्यापार अपेक्षित रहता है, वह 'घट' तो तुम्हारे मत में (सत् की उत्पत्ति माननेवालों के मत में) अपनी उत्पत्ति होने के पूर्व से ही 'सिद्ध' है। उस कारण तदर्थ कारण व्यापार का होना व्यर्थ ही कहा जायगा।

समा०—यद्यपि वह घट, अपनी उत्पत्ति होने के पूर्व, मृत्तिकादिकारणरूप से विद्यमान है ही, तथापि उसकी अभिव्यक्ति, 'कारण व्यापार' के बिना नहीं हो पाती। कारण व्यापार के होने पर ही उस 'घट' की अभिव्यक्ति हुआ करती है। उस कारण वह कारण व्यापार 'घट' का अभिव्यञ्जक मात्र है। अभिव्यञ्जक होने से उसे व्यर्थ नहीं कह सकते।

किञ्च—उत्पत्ति के पूर्व 'कार्य' की कारण के रूप में जो 'सत्ता' बताई गई है, उसमें केवल 'युक्ति' ही नहीं, अपितु श्रुति तथा सूत्र का भी पूर्णतया समर्थन है। श्रुति कहती है—"सदेव सोम्येदमग्र आसीत्" अर्थात् हे **प्रियदर्शन श्वेतकेतो!** **यह दृश्यमान कार्यरूप जगत् अपनी उत्पत्ति के पूर्व 'सत्' ही था, अर्थात् 'परमकारण परमात्मा के रूप से 'सत्' ही था।**

ब्रह्मसूत्र 'सत्त्वाच्चाऽवरस्य'—(ब्र० सू० २।१।६।१६) इस सूत्र से भी अवगत हो रहा है कि 'यह सम्पूर्ण जगत् अपनी उत्पत्ति के पूर्व, ब्रह्मरूप ही था'—इस श्रुतिवचन से प्रतीत होता है कि उत्पत्ति के पहले कार्य की सत्ता है, अतः स्पष्ट है कि कार्य की सत्ता 'कारण' से पृथक् नहीं है।

एवं च प्रपञ्चरूप कार्य का, अपनी उत्पत्ति के पूर्व कारणरूप से 'सत्त्व' होने के कारण इस वर्तमान काल में भी उस परम कारण परमात्मा से इसका अनन्यत्व (अभिन्नत्व) ही है। अर्थात् उस परम कारण रूप परमात्मा से इसकी भिन्नता नहीं है।

यदि 'प्रागभाव' का स्वीकार करते हैं, तो श्रुति और सूत्र के साथ विरोध प्राप्त होगा। एवञ्च श्रुति तथा सूत्र के विरुद्ध होने के कारण 'प्रागभाव' को मानना उचित नहीं है।

तथा प्रागभाव के समान ही 'प्रध्वंसाभाव' के मानने में भी कोई प्रमाण नहीं है। क्योंकि 'ब्रह्मसाक्षात्कार के पूर्व', इस 'कार्यप्रपञ्च' का अत्यन्त नाश नहीं होता। किन्तु बीजाङ्कुर के समान 'सृष्टि-प्रलय' की प्रवाहरूप से अनादिता ही है। अर्थात् जैसे बीज से अङ्कुर और उस अंकुर से पुनः बीज होता रहता है, अर्थात् यह क्रम निरन्तर चलता है। उसी तरह सृष्टि के अनन्तर प्रलय, और प्रलय के अनन्तर पुनः सृष्टि—यह क्रम भी अविच्छिन्न (अखण्ड) चलता रहता है। एवञ्च यह सृष्टि-प्रलय का प्रवाह, अनादिकाल से चल रहा है। प्रलयकाल में भी इस कार्यरूप प्रपञ्च का अत्यन्त नाश नहीं होता, किन्तु अपने कारण में तिरोभूत होकर रहता है। उसी प्रकार वर्तमानकाल में भी भग्न (ध्वस्त) हुए घटादि कार्य भी, अपने कपालादि-रूप कारणों में तिरोभूत हुए रहते हैं। 'घटोध्वस्तः'—यह प्रतीति, उस तिरोभाव की अवस्था को ही विषय करती है। एवञ्च **'घटो ध्वस्तः' इस प्रतीति के बल पर 'घट' के 'प्रध्वंसाभाव' की सिद्धि नहीं कर सकते।**

---

१. ब्रह्मसाक्षात्कारोत्पत्तेः पूर्वमिति पाठः स्यात्।

श्रुतिसूत्राभ्यां प्रागुत्पत्तेः कार्य्यस्य कारणात्मना सत्त्वप्रतिपादनेन प्रागभावस्य दुर्निरूप्यत्वात्। प्रागात्मज्ञानात्कार्यस्य निरन्वयनाशानङ्गीकारेण ध्वंसस्यापि दुर्निरूप्यत्वात्॥ ४२॥

अनादिनित्यत्रैकालिकात्यन्ताभावान्योन्याभावसत्त्वेऽद्वैतश्रुतिविरोधापत्तेः। अतोऽत्यन्ताभाव एक एव॥ ४३॥

●

नादित्वेन "सदेव सोम्येदमग्रआसीत्" "ब्रह्म वा इदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" "नासतो विद्यते भावः" इत्यादिश्रुतिस्मृतिवाक्यशतैः सृष्टेः पूर्वं प्रलीनस्य जगतः कारणात्मना सत्त्वप्रतिपादनेन कार्यस्य निरन्वयनाशाङ्गीकारे तद्विरोधप्रसङ्गात् ध्वंसो दुर्निरूपः। नच घटो ध्वस्त इति प्रतीतेः का गतिरिति वाच्यम्, तस्यास्तिरोभावमात्रविषयत्वोपपत्तेः श्रुत्यादिबाधेनानुमानादिप्रमाणान्तरानवताराच्च, तत्रेतरस्य भ्रममूलत्वोपपत्तेश्चेति भावः॥४२॥

ननु श्रुतिस्मृतिविरोधेन युक्तिविरोधेन च प्रागभावध्वंसयोरनङ्गीकारेऽप्यत्यन्ताभावान्योन्याभावावश्यमभ्युपगन्तव्यौ। नच तत्र प्रमाणाभावः। भूतले घटोनास्ति, वायौ रूपं नास्तीत्याद्यनुभवः, नाहमीश्वरः, त्वमहं न, भूतलं घटो न इत्याद्यनुभवश्च तत्र प्रमाणम्। उत्पत्तिविनाशकारणानिरूपणात्तावनादो नित्यौ च, अत एव त्रैकालिकौ। नचाद्वैतश्रुतिविरोधः, तस्या भावाद्वैतपरत्वोपपत्तेः, अन्यथा प्रत्यक्षादिप्रमाणविरोधप्रसङ्गात्। तस्मादत्यन्ताभावान्योन्याभावावभ्युपगन्तव्यावित्याशङ्क्याह—**अनादीति**। किं तौ पारमार्थिकौ उत मिथ्याभूतौ। नाद्य इत्याह—**अद्वैतेति**। नच श्रुतेर्भावाद्वैतपरत्वमस्तीति वाच्यम्, सङ्कोचे मानाभावात्। किञ्चाभावस्य प्रतियोगिनिरूपणाधीननिरूपणत्वेन तत्सत्तासमसत्ताकतया पारमार्थिकत्वं न सम्भवत्येव।

•

किञ्च—प्रलयकाल में 'कार्यरूपप्रपञ्च' का यदि अत्यन्त नाश मानेंगे तो श्रुति-स्मृतिवचनों के द्वारा सृष्टि के पूर्वलीन हुए कार्य का कारण के रूप में सत्त्व जो प्रतिपादित किया है, वह असंगत होगा। अतः 'प्रध्वंसाभाव' भी श्रुति-स्मृति के विरुद्ध होने से उसे भी स्वीकार करना उचित नहीं है।

किञ्च—नैयायिकों ने 'अत्यन्ताभाव' और 'अन्योन्याभाव' को 'उत्पत्ति-विनाष' से रहित होने के कारण जो उन्हें 'नित्य' बताया है, वह भी असंगत है। क्योंकि 'एकमेवाद्वितीयम् ब्रह्म'—यह श्रुति 'ब्रह्म' को सम्पूर्ण द्वैतप्रपञ्च से रहित बताती है, और 'नेह नानास्तिकिञ्चन'—यह श्रुति, उस 'ब्रह्म' में सम्पूर्ण द्वैतप्रपञ्च का 'निषेध' करती है। तथा 'अतोऽन्यदार्तम्'—यह श्रुति, उस ब्रह्म से भिन्न, सम्पूर्णप्रपञ्च को 'मिथ्या' कहती है।

यदि उस अत्यन्ताभाव को तथा अन्योन्याभाव को 'नित्य' मानते हैं, तो उक्त सभी श्रुतियों से विरोध होगा। उस कारण उन दोनों अभावों को भी 'अनित्य' ही मानना चाहिए।

किञ्च—अभाव के साथ चक्षुरादि इन्द्रियों का किसी प्रकार का कोई सम्बन्ध भी नहीं बन सकता। उस कारण 'भूतले घटो नास्ति'—इस प्रत्यक्षप्रतीति के बल पर उस 'नित्य अत्यन्ताभाव' को सिद्ध कर पाना भी सम्भव नहीं है।

तथा 'घटःपटो न'—यह प्रतीति, उस 'अन्योन्याभाव' को विषय नहीं करती। किन्तु घट और पट दोनों के अभेद का जो 'अत्यन्ताभाव' है, उसी को वह विषय करती है। उस कारण उक्त प्रतीति के बल पर 'अन्योन्याभाव' की भी सिद्धि नहीं हो पा रही है। एवञ्च 'प्रागभाव, प्रध्वंसाभाव, अन्योन्याभाव'—इन तीनों अभावों का निरूपण न हो सकने के कारण केवल एक 'अत्यन्ताभाव' को ही मानना चाहिए।

इस पर यदि यह शंका हो कि 'घटोध्वस्तः' यह प्रतीति कैसे उत्पन्न होगी ? तो उसका समाधान यह है कि श्रुति आदि का बाध होने से अनुमानादि किसी प्रमाण का उदय न हो पाने से उक्त प्रतीति को भ्रममूलक समझने से उपपत्ति हो जायगी। अथवा 'घटो ध्वस्तः' इस प्रतीति को 'तिरोभावमात्रविषयक' मानकर उपपत्ति हो सकती है॥४२॥

शंका—श्रुति-स्मृति और युक्ति तीनों का विरोध होने से 'प्रागभाव और ध्वंस' का स्वीकार न कर सकने पर भी अत्यन्ताभाव और अन्योन्याभाव' का स्वीकार करलेने में क्या हानि है ? अतः उन्हें स्वीकार कर लेना चाहिए। यदि यह कहें कि उन्हें स्वीकार करने में कोई प्रमाण नहीं है, किन्तु यह कहना उचित न होगा। क्योंकि 'भूतले घटो नास्ति, वायौ रूपं नास्ति'— इत्यादि अनुभव सभी को होता है। और 'नाहम् ईश्वरः, त्वम् अहं न, भूतलं घटो न'—यह अनुभव भी सभी को होता है। अतः उक्त दोनों अभावों को मान लेने में 'अनुभव' ही प्रमाण है। उनके 'उत्पत्ति-विनाश' के 'कारण' भी कोई नहीं हैं, जिनसे

१. दुर्निरूप्य इति पाठः। २. श्रुतिर्भावाद्वैतपराऽस्त्विति।

नच प्रतियोगिनः सत्यत्वमस्ति। तस्य ब्रह्माज्ञानेन कल्पितत्वेन रज्जुसर्पवन्मिथ्यात्वस्योपपादितत्वात्। न च प्रतियोगिमिथ्यात्वे तत्सत्ताधीनसत्ताकस्य वास्तवत्वं सम्भवत्यतो द्वितीयः परिशिष्यते।

अत एवाभावस्य त्रैकालिकत्वं प्रत्युक्तं, कल्पितस्य ज्ञाननिवर्त्यत्वेन तदयोगात्। नच वाय्वादौ भूतभविष्यद्वर्तमानकालेषु रूपानुपलब्ध्या तदभावस्य त्रैकालिकत्वमिति वाच्यम्, तस्यापि कल्पितत्वेन ज्ञाननिवर्त्यत्वेन तदनुपपत्तेः। "यत्र तु अस्य सर्वमात्मैवाभूदिति" श्रुत्या मुक्तिकाले सर्वस्यात्ममात्रत्वप्रतिपादनाच्च। नच कालस्याविद्यासम्बन्धरूपत्वेन मुक्तौ सर्वव्यवहाराऽभावेन सोपाधिककालस्यापि मुक्तावभावेन व्यवहारकाले त्रैकालिकत्वं रूपाद्यभावस्य वाय्वादौ विवक्षितमिति वाच्यम्, इष्टापत्तेः।

अन्योन्याभावस्तूभयथापि नास्त्येव। तथाहि—न तावद्वास्तवः स च सम्भवति, उक्तन्यायेन वास्तवत्वासम्भवात्। नापि कल्पितोऽन्योन्याभावः सम्भवति, प्रमाणप्रतियोगिनोरभावात्। तथाहि—न तावदत्र प्रत्यक्षं प्रमाणमिन्द्रियाणां तदसन्निकृष्टत्वेन तैस्तद्ग्रहणायोगात्। नच विशेषणतैव सन्निकर्षोऽस्त्विति वाच्यम्, प्रागेव निरस्तत्वात्, सम्बन्धान्तरानिरूपणाच्च। नाप्यनुमानं तत्र प्रमाणं, साध्यस्याप्रसिद्धत्वेन तदयोगात्। भूतलं घटो नेत्यादि प्रतीतेर्वक्ष्यमाणविधयाऽन्यथाप्युपपत्तेः। अत एवोपमानादयोऽपि न तत्र प्रमाणम्।

•

उनकी उत्पत्ति तथा विनाश कहा जाय। अतः वे दोनों अभाव 'अनादि और नित्य' भी हैं। अतएव वे त्रैकालिक भी हैं। उनको मान लेने में 'अद्वैतश्रुति' के साथ कोई विरोध भी नहीं है। क्योंकि उस श्रुति को 'भावाद्वैतपरक लगाने से उसकी उपपत्ति लग जायगी। अन्यथा प्रत्यक्षादिप्रमाणों के साथ विरोध उपस्थित होगा। इसलिए 'अत्यन्ताभाव और अन्योन्याभाव' दोनों को स्वीकार कर लेना चाहिए।

समा०—अनादि, नित्य, त्रैकालिक 'अत्यन्ताभाव तथा अन्योन्याभाव' को स्वीकार कर लेने पर 'अद्वैतप्रतिपादक श्रुति' के साथ विरोध उपस्थित होगा।

शंका—उक्त दोनों अभाव, क्या 'पारमार्थिक' हैं या 'मिथ्या' हैं?

समा०—यदि प्रथम पक्ष स्वीकार करते हैं तो अद्वैतश्रुति के साथ विरोध होता है। उस श्रुति को 'भावाद्वैतपरक' कहना भी उचित नहीं होगा, क्योंकि 'संकोच' करने में कोई प्रमाण नहीं हैं।

किञ्च—उन अभावों को 'पारमार्थिक' न मानने का एक अन्य कारण यह भी है कि 'अभाव' का निरूपण, 'प्रतियोगी' के निरूपणाधीन होता है। अतः 'तत्सत्तासमसत्ताकं' होने से उक्त अभावों में 'पारमार्थिकत्व' की सम्भावना नहीं की जा सकती। उसी तरह 'प्रतियोगी' को भी सत्य (पारमार्थिक) नहीं कह सकते। क्योंकि 'ब्रह्म' में 'अज्ञान के द्वारा उस प्रतियोगी की कल्पनामात्र की गई है, अतः वह कल्पित है। इसलिए 'रज्जु-सर्प' के समान उसमें मिथ्यात्व बताया जाता है। एवञ्च 'प्रतियोगी' के मिथ्या होने पर तत्सत्ताधीन वाले अभाव की वास्तविकता (पारमार्थिकता) कभी नहीं हो सकती। उसका वास्तविक (पारमार्थिक) होना कभी सम्भव ही नहीं है।

अब अवशिष्ट रहा दूसरा 'मिथ्यात्व' पक्ष। अतएव अभाव के मिथ्या होने से ही उसके 'त्रैकालिकत्व' का भी खण्डन हो जाता है। क्योंकि 'कल्पित पदार्थ' की 'ज्ञान' से निवृत्ति हो जाती हैं। अतः 'अभाव' को त्रैकालिक भी नहीं कह सकते।

शङ्का—भूत-भविष्यत्-वर्तमानकालों में 'वायु' आदि के रूप की उपलब्धि न होने से 'रूपाभाव' आदि को त्रैकालिक क्यों नहीं कह सकते?

समा०—उस 'त्रिकाल' के भी 'कल्पित' रहने से उसकी भी ज्ञान के द्वारा निवृत्ति होती है। एवञ्च 'ज्ञाननिवर्त्य' होने से 'अभाव' को 'त्रैकालिक' कैसे कह सकते हैं? 'अस्य सर्वमात्मैवाभूत्'—यह श्रुति बता रही है कि 'मुक्ति' में सम्पूर्ण व्यवहारमात्र का अभाव हो जाता है। सभी कुछ 'आत्मरूप' हो जाता है।

'काल', 'अविद्यासम्बन्धरूप' है। मुक्तिदशा में समस्त व्यवहारमात्र का अभाव हो जाता है। मुक्तिदशा में 'सोपाधिककाल' का भी अभाव हो जाता है। किन्तु व्यवहारदशा में 'त्रैकालिकत्व', 'वायु' आदि में 'रूप' आदि का अभाव कहा जाता है।

स च द्विविधः पारमार्थिको व्यावहारिकश्चेति। "नेह नानास्ति किञ्चने"त्यादिश्रुतिप्रतिपादितः प्रपञ्चात्यन्ताभावः

●

नापि प्रतियोगी तस्य निरूपयितुं शक्यते। तथाहि—न तावद्घटः प्रतियोगी तस्य तदविरोधित्वेन तदयोगात्। नापि तादात्म्यं तत्प्रतियोगी, तस्य घटस्वरूपत्वे तद्भिन्नत्वे वा तदयोगात्। तथाहि—नच तद्घटस्वरूपमेव, उक्तदोषानपायात्। नापि घटस्वरूपातिरिक्तं तत्, तर्हि तदन्योन्याभावस्य घटान्योन्याभावत्वायोगात्। नापि भिन्नत्वे सत्यभिन्नत्वं तत्, अन्योन्याश्रयापत्तेः। नाप्यभिन्नत्वमात्रं तत्, तर्ह्यभेदात्यन्ताभावो भेद इत्यापतेत्; न स घटाभावः, न ह्यन्यप्रतियोगिकोऽन्याभावो भवति। तस्मात् प्रमाणप्रतियोग्यनिरूपणाद्वास्तवत्वाऽवास्तवत्वाभ्यामन्योन्याभावश्च दुर्निरूप इत्यभिप्रेत्य परिशेषादत्यन्ताभाव एक एवेत्याह—**अत इति**। यतः प्रागभावध्वंसाभावान्योन्याभावा दुर्निरूपा **अतः** कारणादित्यर्थः ॥४३॥

तं विभजते—**स चेति**। आद्यं व्युत्पादयति—**नेति**।। इह प्रत्यगभिन्ने परमात्मनि **नाना** द्वैतजातं जीवेश्वरजगद्रूपं **नास्ति**, दृश्यमानस्य मायामयत्वेन मिथ्यारूपत्वादिति भावः। ज्ञानानन्दादिगुणकं ब्रह्मेति परे मेनिरे, तदपि नास्तीत्याह—**किञ्चनेति**। गुणगुण्यादिलक्षणं द्वैतमपि नास्तीत्यर्थः। **आदिशब्देन** "अथात आदेशो नेति नेति" "स एष नेत्यात्मा" इति श्रुतयो गृह्यन्ते।

●

समा०—यह तो हमें इष्ट ही है। इससे हमें कोई विरोध नहीं है, किन्तु 'अन्योन्याभाव' तो उभयथापि स्वीकारार्ह नहीं है। अर्थात् वह, न पारमार्थिक है और न मिथ्या है। तथाहि—उसे 'वास्तविक' कहना भी सम्भव नहीं है। क्योंकि उक्त न्याय से उसमें 'वास्तवत्व' का होना असम्भव है। इस 'अन्योन्याभाव' को 'कल्पित' कहना भी सम्भव नहीं है। इसे कल्पित कहने में न कोई प्रमाण है और न इसका कोई 'प्रतियोगी' ही है। तथाहि—'अन्योन्याभाव' के होने में 'प्रत्यक्ष' प्रमाण भी नहीं कह सकते। क्योंकि इन्द्रियाँ उसके सन्निकृष्ट न होने से उन इन्द्रियों से उसका ग्रहण नहीं हो सकता। 'विशेषणता' को ही सन्निकर्ष मानकर उससे उसका ग्रहण कहें, तो वह भी ठीक नहीं है, 'विशेषणता सन्निकर्ष' का निरसन तो पहले ही किया जा चुका है। और अन्य कोई 'सम्बन्धान्तर' नहीं है, जिससे उसका ग्रहण हो सके। उसके ग्रहण में 'अनुमानप्रमाण' भी समर्थ नहीं है, क्योंकि 'साध्य' की अप्रसिद्धि है। 'भूतलं घटो न' इत्यादि प्रतीति की उपपत्ति का प्रकार आगे बतायेंगे। एवञ्च उक्त प्रतीति की अन्य प्रकार से (अन्यथा) उपपत्ति लग जाती है।

अत एव 'उपमानादि' प्रमाणों से भी, 'अन्योन्याभाव' का ग्रहण करना संभव नहीं है।

अन्योन्याभाव के 'प्रतियोगी' का निरूपण करना भी शक्य नहीं है। तथाहि—'भूतलं घटो न'—इस अन्योन्याभाव में 'घट' को उसका प्रतियोगी नहीं कर सकते, क्योंकि उक्त अभाव के साथ 'घट' का कोई विरोध नहीं है। एवं च अविरोधी रहने से वह उस अभाव का प्रतियोगी नहीं कहा जा सकता। 'तादात्म्य' को भी उक्त अभाव का प्रतियोगी नहीं कह सकते। क्योंकि उस 'तादात्म्य' को 'घटस्वरूप' अथवा 'घटभिन्न' मानने पर वह उसका प्रतियोगी नहीं कहा जा सकता। तथा हि—'तादात्म्य' को घटस्वरूप कहने पर उक्त दोष से मुक्ति नहीं मिलेगी। उसे 'घटस्वरूप से अतिरिक्त' भी नहीं कह सकते। क्योंकि अन्योऽन्याभाव 'घटान्योन्याभाव' रूप नहीं होगा। उसे भिन्न भी नहीं कह सकते, क्योंकि भिन्न होने पर तादात्म्य में अभिन्नता नहीं रहेगी। अन्यथा अन्योन्याश्रय का प्रसंग आवेगा।

तादात्म्य को केवल अभिन्न मात्र भी नहीं कह सकते। अन्यथा 'अभेदात्यन्ताभावो भेदः' कहना होगा। वह घटाभाव, भी नहीं कहलायेगा, क्योंकि 'अन्यप्रतियोगिक अन्याभाव नहीं हुआ करता। अतः प्रमाण के न होने से, प्रतियोगी को न बतापाने से, अन्योन्याभाव को 'वास्तव या अवास्तव' कुछ भी नहीं कह सकते। अर्थात् 'अन्योन्याभाव' दुर्निरूपणीय है। एवं च परिशेषात् 'अत्यन्ताभाव' एक ही अभाव है। क्योंकि प्रागभाव, ध्वंसाभाव, अन्योन्याभाव तीनों ही दुर्निरूपणीय हैं। अतः परिशेषात् एक ही अभाव है, जिसे 'अत्यन्ताभाव' कहते हैं ॥४३॥

'अत्यन्ताभाव' के (१) परमार्थिक, (२) व्यावहारिक भेद से दो प्रकार होते हैं। उनमें से पहले भेद को 'नेह नानास्ति किञ्चन'—इस श्रुति ने 'प्रत्यक् अभिन्न ब्रह्म' में, जीव-ईश्वर-जगत्' रूप द्वैत प्रपञ्च के 'अत्यन्ताभाव' को बताया है। दृश्यमान प्रपञ्च, 'मायामय' होने से 'मिथ्यारूप' है। इस 'अत्यन्ताभाव' को 'पारमार्थिक' कहते हैं।

पारमार्थिकः, स चाधिष्ठानस्वरूपः अधिष्ठानातिरिक्त इति केचित् । घटाद्यत्यन्ताभावो व्यावहारिकः । अयमेवाभेदप्रतियोगिकः ।

•

ननु श्रुतिप्रतिपादितप्रपञ्चात्यन्ताभावस्य कथं पारमार्थिकत्वम्? प्रतियोगिनः प्रपञ्चस्य कल्पितत्वेन प्रतियोगिसत्ताधीनसत्ताकस्य तदयोगात्, ब्रह्मव्यतिरिक्तस्य पारमार्थिकत्वेऽद्वैतश्रुत्या विरोधापत्तेश्चेत्याशङ्क्यारोपितात्यन्ताभावस्याधिष्ठानमात्रत्वेन पारमार्थिकत्वमुपपद्यत इत्याह—**स चेति ।** नचारोपितात्यन्ताभावस्याधिष्ठानमात्रत्वाभ्युपगमेऽनुपलब्धिप्रमाणाभ्युपगमविरोधः स्यादिति वाच्यम् । न हि वयं भूतले घटो नास्तीत्यनुभूयमानस्यात्यन्ताभावस्याधिष्ठानमात्रत्वमभ्युपगच्छामः । तस्य घटादिसमानसत्ताकस्य व्यावहारिकत्वेन भूतलादिवदधिष्ठानविलक्षणत्वात् । किन्तु जगदधिष्ठाने ब्रह्मणि "ने"त्यादिश्रुत्या प्रतिपादितप्रपञ्चात्यन्ताभावस्याधिष्ठानमात्रत्वं प्रतिपादयामः । न चैतावतानुपलब्धिप्रमाणाभ्युपगमविरोधोऽस्ति । तस्या भूतलादौ घटाद्यत्यन्ताभावग्राहकत्वेन प्रामाण्योपपत्तेर्न कोपि दोष इति भावः ।

मतान्तरमाह—**अधिष्ठानेति ।** निषेधश्रुत्या गम्यमानः प्रपञ्चात्यन्ताभावोऽधिष्ठानब्रह्मस्वरूपापेक्षयातिरिक्त एव । न चाद्वैतश्रुतिविरोधस्तस्या भावाद्वैतपरत्वादिति तात्पर्यम् । अत्रेदं चिन्त्यम्, श्रुतिसङ्कोचे मानाभावादधिष्ठानातिरिक्ताभावस्य प्रतियोगिसत्तासमसत्ताकतया प्रतियोगिनः कल्पितत्वेन तदधीनाभावस्यापि कल्पितत्वस्यैव वक्तव्यतया वास्तवत्वस्य दुर्निरूपत्वात्, तस्माद्यत्किञ्चिदेतत् ।

•

कुछ लोग 'ज्ञानानन्दादिगुणकं ब्रह्म'—मानते हैं । किन्तु वह ठीक नहीं है, इसे श्रुति 'किञ्चन' से बता रही है । अर्थात् 'गणगुण्यादिलक्षण द्वैत भी नहीं है ।

शङ्का—उपर्युक्त 'अत्यन्ताभाव' को पारमार्थिक कहना सम्भव नहीं है । क्योंकि 'प्रतियोगी की 'सत्ता' के अधीन ही 'अभाव' की 'सत्ता' होती है । और 'प्रपञ्च' रूप प्रतियोगी कल्पित है, उस कारण उस प्रपञ्च का अत्यन्ताभाव भी कल्पित ही होगा ।

किञ्च—दृश्यमान प्रपञ्च के अत्यन्ताभाव को यदि 'पारमार्थिक' कहें तो 'ब्रह्म' को 'अद्वितीय' कहनेवाली 'एकमेवाद्वितीयं ब्रह्म' श्रुति से विरोध भी होगा ।

समा०—कल्पित वस्तु का 'अभाव', 'अधिष्ठानरूप' ही होता है । अधिष्ठान से भिन्न नहीं होता । उस कारण 'कल्पित प्रपञ्च' का अत्यन्ताभाव भी अधिष्ठान रूप (ब्रह्मरूप) ही है । उस अधिष्ठान से भिन्न नहीं है । उस अधिष्ठानभूत 'ब्रह्म' की पारमार्थिकता का प्रतिपादन, श्रुति-स्मृतियों ने किया है । अधिष्ठानरूपता के कारण वह अत्यन्ताभाव उस 'अधिष्ठान भूत ब्रह्म' से भिन्न नहीं है । उस कारण अद्वैत बोधक श्रुति से भी विरोध नहीं होता ।

शङ्का—'अत्यन्ताभाव' को यदि अधिष्ठानरूप मानते हैं, तो 'अधिष्ठान' का ज्ञान 'अनुपलब्धि' प्रमाण से होना कभी सम्भव नहीं है । तब 'अनुपलब्धि प्रमाण' का मानना ही व्यर्थ होगा ।

समा०—वेदान्ती कहता है कि 'भूतल पर' जो घट आदि का 'अत्यन्ताभाव' है, उसे 'अधिष्ठानरूप' नहीं मानते । व्यावहारिक घटादिकों का जो व्यावहारिक 'अत्यन्ताभाव' है, वह तो 'अधिष्ठान' से भिन्न ही माना जाता है । उस व्यावहारिक अत्यन्ताभाव के ज्ञानार्थ ही 'अनुपलब्धि प्रमाण' का स्वीकार हमने किया है । 'अनुपलब्धि प्रमाण' का स्वीकार करना व्यर्थ नहीं है ।

कुछ ग्रंथकारों का कहना है कि 'नेह नानास्ति किञ्चन' इस श्रुति से प्रतिपादित 'ब्रह्म' में 'प्रपञ्च' का जो -पारमार्थिक अत्यन्ताभाव' है, वह उस अधिष्ठानभूत ब्रह्म से 'भिन्न' ही है, अधिष्ठानस्वरूप नहीं है । **क्योंकि 'भाव' और 'अभाव' की एकता का होना कभी सम्भव नहीं है ।**

और 'एकमेवाद्वितीयं ब्रह्म'—इस श्रुति का तात्पर्य 'भावाद्वैत' में है । अर्थात् 'ब्रह्म' से भिन्न, दूसरा कोई 'भाव' पदार्थ नहीं है । अतः 'ब्रह्म' से भिन्न 'अत्यन्ताभाव' के विद्यमान रहने पर भी अद्वैतश्रुति के साथ कोई विरोध नहीं होता ।

किन्तु यह मत उचित नहीं है । क्योंकि 'एकमेवाऽद्वितीयं ब्रह्म'—यह श्रुति तो 'ब्रह्म' को सम्पूर्ण भावाऽभाव रूप द्वैत-प्रपञ्च से रहित बताती है । उस श्रुति का संकोच करके केवल 'भावाऽद्वैतपरता' मानने में कोई प्रमाण नहीं है । और 'प्रपञ्चा-

भूतलं घटो नेत्यादिप्रतीतिविषयो भेद इत्युच्यते। घटोनास्तीत्यादिप्रतीतिविषयोऽत्यन्ताभाव इत्युच्यते वादिभिः। सर्वोऽप्यनित्य एव सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात् ॥४४॥

•

द्वितीयं व्युत्पादयति—**घटेति। अयं** व्यावहारिकात्यन्ताभावः पूर्वोक्तयोग्यानुपलब्ध्या गृह्यत इत्यनुपलब्धिर्मानान्तरमिति भावः।

नन्वभावैक्याङ्गीकारे भूतले घटो नास्ति, भूतलं घटो नेति प्रतीतिवैलक्षण्यं कथं स्यात्? ताभ्यां प्रमेयवैलक्षण्यस्यावश्यकत्वात्। अन्यथा विलक्षणप्रतीतेराकस्मिकत्वापत्तेरित्यत आह—**अयमेवेति। अयमत्यन्ताभाव** एव इत्यर्थः। **वादिभिरिति** नैयायिकादिभिरित्यर्थः। अतो न प्रतीतिवैलक्षण्यस्य आकस्मिकत्वापत्तिरिति भावः। भूतलादावनुभूयमानं घटात्यन्ताभावं नित्यं **नैयायिकादयो** वदन्ति जीवेश्वरभेदञ्च श्रुतितात्पर्य्यज्ञानशून्यास्तान्निराकरोति—**सर्वोऽपीति।** जीवेश्वरादिभेदरूपो घटात्यन्ताभावश्च सर्वोपीत्यर्थः। अनित्यत्वं नाम ध्वंसप्रतियोगित्वं वा बाध्यत्वं वा? बाधः पूर्वमेव निरूपितः। तत्र युक्तिं वक्ति—**सर्वस्येति।** ब्रह्मव्यतिरिक्तस्य भावाभावात्मकस्य प्रपञ्चस्याविद्याविलसितत्वेन वाक्योत्थब्रह्मसाक्षात्कारेण तन्निवृत्तावुपादाननाशे सत्युपादेयनाशस्यावश्यकत्वेन ज्ञाननिवर्त्यत्वमुपपद्यत इति भावः ॥४४॥

•

त्यन्ताभाव' को यदि अधिष्ठानभूत ब्रह्म से भिन्न मानते हैं तो 'अत्यन्ताभाव' में 'पारमार्थिकता' नहीं बन पायगी। क्योंकि यह नियम है कि अधिष्ठान से भिन्न रहनेवाला जो अभाव हो, उसकी 'सत्ता', अपने प्रतियोगी की सत्ता के समान होती है। यहाँ स्थिति यह है कि 'प्रपञ्चरूपप्रतियोगी', कल्पित है। उस कारण उस कल्पित प्रपञ्च का अत्यन्ताभाव भी कल्पित ही होगा। एवञ्च उसका 'वास्तविकत्व' दुर्निरूपणीय ही है। अतः यह पक्ष ठीक नहीं है।

अब अत्यन्ताभाव के दूसरे व्यावहारिक पक्ष का निरूपण करते हैं—**भूतल में घटदिपदार्थों का जो अत्यन्ताभाव है, उसे 'भूतले घटो नास्ति'—यह प्रतीति, विषय करती है। इस अत्यन्ताभाव को 'व्यावहारिक अत्यन्ताभाव** कहते हैं। **इस व्यावहारिक अत्यन्ताभाव का ही पूर्वोक्त 'योग्यानुपलब्धि' से ग्रहण किया जाता है।** उस कारण 'योग्यानुपलब्धि' को पृथक् स्वतन्त्र प्रमाण माना गया है।

शंका—अभाव का ऐक्य स्वीकार करने पर 'भूतले घटो नास्ति' और 'भूतलं घटो न'—इसप्रकार जो प्रतीति होती है, उसका वैलक्षण्य कैसे होगा? क्योंकि प्रतीतिवैलक्षण्य में प्रमेय का 'वैलक्षण्य' होना आवश्यक है। अन्यथा 'विलक्षण प्रतीति' को 'आकस्मिक' कहना होगा।

समा०—यह 'अत्यन्ताभाव' ही 'अभेदप्रतियोगिक' होता है। भूतल में घट के अभेद का जो अत्यन्ताभाव है, उस अत्यन्ताऽभाव को ही नैयायिकों ने 'भूतलं घटो न'—इस प्रतीति का विषय 'भेद' कहा है, तथा उसे 'अन्योन्याभाव' के नाम से कहा है। उस कारण वह भेदरूप अन्योन्याभाव, उस अत्यन्ताभाव से भिन्न नहीं है। एवं च 'भूतलं घटो न'—इस प्रतीति का विषय 'अत्यन्ताभाव' होता है—यह नैयायिकादिवादियों का कहना है। अतः प्रतीति के विलक्षण होने में 'आकस्मिकता' बताना उचित नहीं है। भूतल में अनुभूयमान 'घटात्यन्ताभाव' को नैयायिक विद्वान् 'नित्य' कहते हैं।

श्रुतितात्पर्यज्ञानशून्य नैयायिकों ने 'जीव' और 'ईश्वर' का जो 'भेद' बताया है, उसका निराकरण करते हैं—

जीवेश्वरादिभेदरूप और घटादिपदार्थों का अत्यन्ताभाव—ये सब अभाव अनित्य ही हैं। अर्थात् नैयायिकों ने जीव, ईश्वर आदि का जो 'भेद' माना है, तथा भूतलादि पर घट आदि पदार्थों का जो अत्यन्ताभाव माना है—ये सभी अभाव 'अनित्य' ही हैं। कोई भी अभाव 'नित्य' नहीं है। क्योंकि 'ब्रह्म' से भिन्न यच्च यावत् भाव-अभावरूप जगत् (प्रपञ्च) है, वह सब, 'अविद्या' का 'कार्य' हैं। और 'तत्त्वमसि' आदि महावाक्यजन्य ब्रह्मसाक्षात्कार से उस अविद्या का नाश हो जाता है। उस अविद्या का नाश होनेपर अविद्या के कार्यरूप प्रप्रञ्च का भी नाश हो जाता है। उस अविद्या का नाश होने पर अविद्या के कार्यरूप प्रपञ्च का भी नाश हो जाता है। क्योंकि 'उपादान' के नष्ट होने पर 'उपादेय' का नाश भी अवश्य होता है। इस प्रकार सम्पूर्ण अनात्मप्रपञ्च, 'आत्मज्ञान' से निवृत्त हो जाने के कारण उस 'अभाव' की अनित्यता ही सिद्ध होती है ॥ ४४ ॥

अन्ये[1] **तु लौकिकतन्त्रान्तरबुद्धिमनुसरन्तोऽभावभेदं स्वीचक्रुः। तथाहि—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति भेदाच्चतुर्विधोऽभावः। उत्पत्तेः प्राक्कारणे कार्य्याभावः। यथामृदादौ घटाद्यभावः। उत्पन्नस्य कार्य्यस्य कारणेऽभावो ध्वंसाभावः। यथा मुद्गरादिप्रहरणानन्तरं कपालादौ घटाद्यभावः। प्रतियोग्यसमानाधिकरणाभावोऽत्यन्ताभावः।**

•

मतान्तरमाह—**अन्येत्विति**। तन्त्रान्तरं न्यायशास्त्रादिप्रतिज्ञातार्थमुपपादयति—**तथाहीति**। प्रागभावं व्युत्पादयति—**उत्पत्तेरिति**। अनादिप्रतियोगिजनकः प्रागभाव इति निष्कर्षः। अथवा विनाश्यभावोवा स इति द्रष्टव्यम्। ध्वंसं व्युत्पादयति—**उत्पन्नेति**। जन्याभावो ध्वंस इत्यर्थः। अत्यन्ताभावं लक्षयति—**प्रतियोगीति**। प्रतियोग्यसमानाधिकरणत्वं नाम प्रतियोग्यनधिकरणाधिकरणत्वं प्रतियोग्यधिकरणानधिकरणत्वं वा प्रतियोग्यधिकरणभिन्नाधिकरणत्वं वा ? न चैवं प्रागभावादावतिव्याप्तिरिति वाच्यम्, तृतीये तदभावात् तदेव विवक्षितमित्यर्थः। अन्योन्याभावं लक्षयति—**प्रतियोगीति**। प्रतियोगिसमानाधिकरणत्वं नाम तदधिकरणाधिकरणत्वम्। न चाकाशस्य विभुत्वेन निरधिकरणत्वात्तदन्योन्याभावस्य प्रतियोगिसमानाधिकरणत्वाभावादव्याप्तिरिति वाच्यम्।

•

अन्य कुछ लोग भी नैयायिकों के मत का अनुसरण करके 'अभाव' को (१) प्रागभाव (२) प्रध्वंसाभाव, (३) अत्यन्ताभाव (४) अन्योन्याभाव के भेद से चार प्रकार का बताते हैं। उन चारों अभावों का लक्षण क्रमशः बता रहे हैं—अपनी उत्पत्ति के पूर्व कार्य का अपने उपादान कारण में जो अभाव, उसे 'प्रागभाव' कहते हैं। जैसे घटादि कार्यों का अपनी उत्पत्ति के पूर्व, अपने उपादानकारण रूप मृत्तिकादि में प्रागभाव रहता है।

अर्थात् जो अभाव अनादि होता है, तथा अपने प्रतियोगी का जनक रहता है, उस अभाव को 'प्रागभाव' कहते हैं। अथवा 'विनाशाऽभावो वा प्रागभावः'—अर्थात् जो 'अभाव' अनादि होता है तथा नाशवान् रहता है, उस अभाव को 'प्रागभाव' कहा करते हैं।

अब ध्वंसाभाव को बताते हैं—**उत्पन्न हुए कार्य का अपने उपादानकारण में जो अभाव है, उसे प्रध्वंसाभाव कहते हैं।** यह उत्पत्तिमान् तथा अन्तरहित होता है।

जैसे मुद्गर आदि के प्रहार से अपने कपालादिरूप कारण में घटादि कार्य का अभाव रहता है, उसी को प्रध्वंसाभाव कहा करते हैं।

अब अत्यन्ताभाव को बताते हैं—**अपने प्रतियोगी के असमानाधिकरण जो अभाव होता है उसे अत्यन्ताभाव कहते हैं। जैसे—भूतल में घट आदि पदार्थों का अत्यन्ताभाव कहा जाता है।** प्रतियोगी के अनधिकरणरूप अधिकरण को 'प्रतियोग्यसामानाधिकरण' कहते हैं।

अब अन्योन्याभाव को बताते हैं—**जो अभाव, अपने प्रतियोगी के समानाधिकरण होता है, अथवा जिस अभाव का 'तादात्म्य' ही प्रतियोगी होता है, उस अभाव को अन्योन्याभाव कहते हैं। इसी अन्योन्याभाव को 'भेद' भी कहते हैं। जैसे—भूतल में घट का अन्योन्याभावरूप 'भेद' है। यह अन्योन्याभाव, भूतल में 'घट' के विद्यमानकाल में भी रहता है। उस कारण यह 'अन्योन्याभाव'—प्रतियोगिसमानाधिकरण कहलाता है।**

प्रतियोगी का अधिकरण हो जिस अभाव का अधिकरण हो, उसे प्रतियोगिसमानाधिकरण कहा है।

शंका—आकाश तो विभु (व्यापक) है, अतः वह निरधिकरण है, तब उसका जो अन्योन्याभाव होगा, वह प्रतियोगिसमानाधिकरण नहीं हो सकेगा, तब अव्याप्ति होगी।

समा०—अव्याप्ति नहीं होगी। आकाश की उत्पत्ति बताई गई है, अतः वह 'कार्यद्रव्य' है, उस कारण वह 'सावयव' है। इसलिये घट के समान उसका अन्योन्याभाव, 'प्रतियोगिसमानाधिकरण हो सकता है। तब अव्याप्ति कैसे हो सकेगी ? अर्थात् आकाश का अवयव 'माया' ही है। अतः कोई दोष नहीं है।

---

१. तन्त्रान्तरभाषया सिद्धान्तग्रन्थेष्वपि विषयनिरूपणाच्छिष्याणां तदवबोधसौकर्याय सापि भाषा बोधनीयेत्येषामाशयः। मा चात्रादरो भूदिति ग्रन्थकारोऽन्यमततया पुरस्करोतीति द्रष्टव्यम्।

यथा भूतलादौ घटाद्यभावः। प्रतियोगिसमानाधिकरणाभावोऽन्योन्याभावः। यथा भूतलादौ घटादिभेदः। सर्वेऽप्यभावा अनित्याश्च एवमभावप्रमा निरूपिता ॥४५॥

एवं षड्विधप्रमया सावरणमज्ञानं निवर्त्तते। तत्र परोक्षप्रमयाऽसत्त्वापादकमौढ्याज्ञाननिवृत्तिः। अपरोक्षप्रमयाऽ-

●

आकाशोत्पत्तेः प्राक् साधितत्वेन कार्य्यद्रव्यतयाकाशस्य सावयवत्वाद् घटादिवत्तदन्योन्याभावस्य प्रतियोगिसमानाधिकरणत्व-सम्भवान्न तत्राव्याप्तिः। आकाशावयवौ मायेवेति न कोऽपि दोष इति भावः। सर्वेषामभावानां प्रतियोगिसमानसत्ताकत्वेन मायाकार्य्यत्वाद्ब्रह्मज्ञानबाध्यत्वेनानित्यत्वमेव। न तत्रान्तरवत् केषाञ्चिन्नित्यत्वं केषाञ्चिदनित्यत्वमित्याह—**सर्वे इति**। नच ध्वंसस्यानित्यत्वे प्रतियोग्युन्मज्जनप्रसङ्ग इति वाच्यम्, प्रागभावध्वंसस्य घटस्यानित्यत्वस्य त्वयैवाभ्युपगतत्वादतो नोक्तदोष इति भावः। अभावप्रमानिरूपणं निगमयति—**एवमिति**। ॥४५॥

नन्वेवं प्रमानिरुपणमस्तु किं तव तेनेत्यत आह—**एवमिति**। उक्तप्रकारेण। **षड्विधेति**। प्रत्यक्षानुमित्युपमितिशब्दार्था-पत्त्यभावप्रमितिभेदाद्भिन्नयेत्यर्थः। आवरणेन सहितं **सावरणं**। आवरणं नामावरणशक्तिः। साच निरूपिता, ततश्च षड्विध-प्रमाभिः प्रत्यक्षादिभिर्विषयावारकमज्ञानं नश्यतीत्यर्थः।

नन्वेवं सति परोक्षस्थले वह्न्यादेरपि प्रत्यक्षतापत्तिः। तदावरकाज्ञानस्य तद्गोचरप्रमया निवृत्तत्वात्। यदि न निवृत्तं तदावरकाज्ञानं, तर्ह्यनुमित्यादिनिरूपणमनर्थकं स्यात्। न चानुमित्यादिनिरूपणस्य स्वगोचरव्यवहारजनकत्वेनार्थवत्त्वमिति वाच्यम्, स्वगोचरवह्न्याद्यावरकाज्ञाननिवृत्त्यभावेन तदयोगात्। अन्यथा प्रत्यक्षप्रमया निवृत्तेऽप्यज्ञाने विषयस्यापरोक्षाभावप्रसङ्गात्। तस्मा'दुभयतः पाशारज्जुरि'त्याशंक्य तद्व्यवस्थामाह **तत्रेति**। षड्विधप्रमास्वित्यर्थः। अज्ञानेन स्वगोचरे द्विविधो व्यवहार उत्पाद्यते विषयोनास्तीत्यसत्त्वव्यवहारो विषयो न प्रकाशत इति अप्रकाशव्यवहारश्चेति। तत्रासत्त्वव्यवहारकारणमसत्त्वावरण-मित्युच्यते। अप्रकाशव्यवहारकारणमभानावरणमित्युच्यते। एवञ्च परोक्षप्रमयाऽसत्त्वावरणशक्तियुक्तं मौढ्याज्ञानशब्दवाच्यं निवर्त्तते। अत एवानुमित्यादिप्रमोत्पत्त्यनन्तरं न कश्चिदपि विषयो नास्तीत्यनुभवति। किन्तु वह्न्यादिरस्तीत्येव प्रतिपद्यते। अन्यथा तत्र प्रवृत्त्यनुपपत्तेर्वह्न्याद्यर्थिनाम्। अपरोक्षप्रमया तु द्विविधावरणशक्तिमदज्ञानं निवर्त्तते। अत एव घटः स्फुरति घटं पश्यामीत्याद्यनु-भवः। तदिदमाह—**परोक्षेत्यादिना**। **असत्त्वेति** विषयस्यासत्त्वमापादयति असत्त्वव्यवहारं जनयतीत्यसत्त्वापादकं, नास्तीति व्यवहारकारणं। तच्च तन्मौढ्याज्ञानञ्चेति, तथाऽसत्त्वावरणशक्तियुक्तमौढ्याज्ञाननिवृत्तिरित्यर्थः। मौढ्यं नाम विषयसत्ता-व्यवहारशून्यत्वं। ततश्च षड्विधप्रमानिरूपणमर्थवदिति भावः।

●

निष्कर्ष यह है कि सभी अभाव, 'प्रतियोगिसमानसत्ता' वाले हैं, क्योंकि 'माया' के ये सब 'कार्य' हैं। अतः ब्रह्मज्ञान से ये सब बाध (निवृत्त) होने योग्य हैं (बाध्य हैं)। इसलिये—**ये सभी अनित्य हैं**। नैयायिकों के समान अत्यन्ताभाव और अन्योन्याभाव—इन दो अभावों को 'नित्य' कहना, और 'प्रागभाव तथा प्रध्वंसाभाव को 'अनित्य' कहना कदापि उचित नहीं है। क्योंकि सम्पूर्ण प्रपञ्च का निषेध करनेवाली श्रुति से विरोध होता है। अतः सभी अभाव 'अनित्य' हैं।

शंका—ध्वंसाभाव को अनित्य कहने पर प्रतियोगी का उन्मज्जन प्रसंग हो सकता है।

समा०—प्रागभाव—ध्वंसाभाववाले घट की अनित्यता को तुमने ही स्वीकार किया है, अतः कोई दोष नहीं है।

इस प्रकार अभाव प्रमा का निरूपण किया गया ॥ ४५ ॥

प्रश्न—प्रमा का निरूपण किया गया, किन्तु उससे प्रस्तुत में क्या लाभ हुआ ?

उत्तर—इस प्रकार निरूपित जो (१) प्रत्यक्षप्रमा, (२) अनुमितिप्रमा, (३) उपमिति प्रमा, (४) शाब्दप्रमा, (५) अर्था-पत्तिप्रमा, (६) अभावप्रमा—यह जो छह प्रकार की प्रमा है, इन छह प्रकार की प्रमाओं से 'आवरण' शक्तिसहित 'अज्ञान' की ही निवृत्ति होती है, उनमें भी 'अनुमिति' आदि 'परोक्षप्रमा' से तो असत्त्वापादक आवरणशक्ति से विशिष्ट 'अज्ञान' की निवृत्ति होती है और अपरोक्षप्रमा से अभानापादक आवरणशक्तिविशिष्ट अज्ञान की निवृत्ति होती है। उस आवरण शक्ति विशिष्ट अज्ञान की निवृत्ति होने पर 'घटादिपदार्थों का (घटादि विषयों का) भान होता है। इस प्रकार 'तत्त्वमसि' आदि महावाक्यजन्य 'अहं ब्रह्मास्मि' इत्याकारक अपरोक्षप्रमा से 'ब्रह्म' के आवरक 'मूलाज्ञान' की निवृत्ति होती है। तब अधिकारी पुरुष को 'ब्रह्मसाक्षात्कार' होता है।

सत्त्वाभानापादकाज्ञाननिवृत्तिः ॥४६॥

॥ इति द्वितीयः परिच्छेदः समाप्तः ॥

●

ननु यथा प्रत्यक्षस्थले प्रत्यक्षप्रमानन्तरं घटः स्फुरतीत्यनुभवाद् यथा घटादिस्फुरणं तथा परोक्षस्थलेऽप्यनुमित्यादि-प्रमानन्तरं वह्न्यादिः स्फुरतीत्यनुभवात् वह्न्यादिस्फुरणमस्त्येव। तथा च कथं यथोक्तव्यवस्थासिद्धिरिति ? अत्रोच्यते—परोक्ष स्थले वह्निसत्तामात्रस्फुरणम्, प्रत्यक्षस्थले तु रूपादिविशिष्टत्वेन तत्स्फुरणमिति व्यवस्थासम्भवति।

नन्वपरोक्षस्थले घटादीनां वृत्तिसम्बन्ध इव परोक्षस्थले वह्न्यादीनां वृत्तिसम्बन्धोऽस्ति न वा ? नाद्यः, तत्र वह्नीन्द्रिय-सन्निकर्षाभावेनान्तःकरणस्य वहिर्निर्गमनाभावेन तदयोगात्। अन्यथा प्रत्यक्षस्थलेऽप्यन्तःकरणस्य बहिर्निर्गमनं विना वृत्तिविषय-सम्बन्धप्रसङ्गात्। न द्वितीयः, वह्न्यादिस्फुरणमेव न स्यात्। नच तत्र वृत्तिविषययोः संयोगसम्बन्धाभावेऽपि सम्बन्धान्तरेण तत् स्फुरणमस्त्विति वाच्यम्, सम्बन्धान्तरानिरूपणात्। तथाहि—न तावद्वृत्तिविषययोः स्वरूपसम्बन्धेन तत्, स्वरूपसम्बन्धस्या-प्रामाणिकत्वात्। किञ्च स्वरूपसम्बन्धाभ्युपगमे तेनैव सर्वत्र वा विशिष्टव्यवहारोपपत्तौ सम्बन्धान्तरं न सिध्येत्।

किञ्च ज्ञानस्वरूपं वा विषयस्वरूपं वा उभयं वा सम्बन्धः ? नाद्यः, घटज्ञानदशायां पटप्रतीत्यापत्तेः। न द्वितीयः, अन्धकारस्थघटस्यापि प्रतीत्यापत्तेः। न तृतीयः, पूर्वोक्तदोषापरिहारात्, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाच्च। नापि विषय-विषयिभावः सम्बन्धः। तयोः संयोगसम्बन्धमन्तरेण तदयोगात्, अन्यथा अतिप्रसङ्गात्। तस्मात् कथं व्यवस्थोपपत्तिरिति ?

●

प्रश्न—उक्त प्रक्रिया से तो परोक्षस्थल में 'वह्नि' का भी प्रत्यक्ष होना चाहिये। क्योंकि वह्निविषयकप्रमा से वह्नि के आवरक अज्ञान की भी निवृत्ति हुई है। यदि उसके आवरक अज्ञान की निवृत्ति नहीं हुई तो अनुमिति आदि प्रमाओं का निरूपण जो किया गया है, उसे व्यर्थ कहना होगा।

यदि यह कहें कि अनुमिति आदि प्रमाओं का निरूपण-स्व-विषयक व्यवहारजनक होने से सार्थक है। किन्तु यह कहना भी संगत नहीं होगा। क्योंकि स्वगोचर (स्वविषयक) वह्न्याद्यावरक अज्ञान की निवृत्ति न हो पाने से स्वविषयकव्यवहारजनक-होना उसमें संभव नहीं है। अन्यथा प्रत्यक्षप्रमा से अज्ञान के निवृत्त होने पर भी विषय का अपरोक्षाभाव होने का प्रसंग आवेगा। अर्थात् विषय का प्रत्यक्ष नहीं होगा। तस्मात् 'उभयतः पाशारज्जुः'।

उत्तर—उक्त षड्विध प्रमाओं में—'परोक्षप्रमा से असत्त्वापादक मौढ्य अज्ञान की निवृत्ति होती है। और अपरोक्ष-प्रमा से असत्त्वाभानापादक अज्ञान की निवृत्ति होती है।

निष्कर्ष यह है कि अज्ञान से अपने विषय में दो प्रकार का व्यवहार उत्पन्न होता है। असत्त्वव्यवहार और अप्रकाश-व्यवहार—यह द्विविध व्यवहार उत्पन्न होता है। उनमें असत्त्वव्यवहारकारण को 'असत्त्वावरण' कहते हैं। और अप्रकाशव्यवहार-कारण को 'अभानावरण' कहते हैं। एवं च 'परोक्ष प्रमा' से असत्त्वावरणशक्तियुक्त मौढ्याज्ञानशब्दवाच्य अज्ञान की निवृत्ति होती है। अतएव अनुमितिआदि—प्रमा की उत्पत्ति होने पर कोई भी पुरुष, 'विषयो नास्ति' यह अनुभव नहीं करता। किन्तु 'वह्नि' है ही, यही अनुभव करता है। अन्यथा वह्न्यर्थी पुरुष की वहाँ प्रवृत्ति ही नहीं होगी। और अपरोक्षप्रमा से द्विविधावरणशक्ति-विशिष्ट अज्ञान की निवृत्ति होती है। अतएव 'घटः स्फुरति', घटं पश्यामि'—यह अनुभव सभी को होता है।

प्रश्न—जैसे प्रत्यक्षस्थल में प्रत्यक्षप्रमा के होने पर 'घटः स्फुरति'—यह अनुभव होता है। अतः जैसे घट स्फुरण होता है, वैसे ही परोक्षस्थल में भी अनुमिति आदि की प्रमा होने पर 'वह्निःस्फुरति' इस अनुभव से 'वह्नि स्फुरण' भी होता ही है। तथा च यथोक्त व्यवस्था कैसे संगत होगी ?

उत्तर—परोक्षस्थल में 'वह्निसत्तामात्र' का स्फुरण होता है और प्रत्यक्षस्थल में तो रूपादिविशिष्टत्वेन वह्नि का स्फुरण होता है। इस प्रकार से यथोक्त व्यवस्था सङ्गत होगी।

प्रश्न—अपरोक्षस्थल में जैसे घटादिपदार्थों का 'वृत्ति' के साथ सम्बन्ध होता है, वैसे ही परोक्षस्थल में भी वह्नि आदि पदार्थों का 'वृत्ति' के साथ सम्बन्ध होता है या नहीं ?

उक्त दो पक्षों में से प्रथम पक्ष का स्वीकार इसलिये नहीं कर सकते कि परोक्षस्थल में 'वह्नि' का इन्द्रिय के साथ सम्बन्ध न रहने से 'अन्तःकरण' का बहिर्निर्गमन नहीं हो पाता, उसकारण 'वृत्ति' के साथ सम्बन्ध होने का अवसर ही कहाँ है ? अर्थात् वृत्ति के साथ 'वह्नि' का सम्बन्ध नहीं होता। अन्यथा प्रत्यक्षस्थल म भी अन्तःकरण के बहिर्गमन की आवश्यकता ही नहीं होगी। बहिर्गमन के विना भी 'वृत्ति' के साथ 'विषय' के सम्बन्ध होने का प्रसङ्ग प्राप्त होगा।

मेवं। परोक्षस्थले विषयेन्द्रियसन्निकर्षाभावेनान्तःकरणबहिर्निर्गमनाभावेन विषयाधिष्ठानचैतन्यस्य प्रमातृचैतन्येनैक्याभावेऽपि लिङ्गज्ञानेन वह्न्याद्याकारवृत्तौ सत्यां प्रमातृचैतन्यविषयचैतन्ययोर्वास्तवैक्यस्य विद्यमानत्वाद्वह्न्यादेर्भानमुपपद्यते। नचातिप्रसङ्ग इति वाच्यम्, तत्तदाकारवृत्तेस्तद्विषयभाने नियामकत्वात्। अत एव वह्न्यादेः परोक्षत्वेन भानम्। अपरोक्षस्थलेत्विन्द्रियार्थसन्निकर्षे बहिर्निर्गतान्तःकरणवृत्त्या विषयस्य संयोगसम्भवात्, वृत्त्या सावरणाऽज्ञानस्य निवृत्तत्वाच्च। विषयप्रमाणप्रमातृसाक्षिचैतन्यानामेकोपाध्याक्रान्ततयैक्यसम्भवेन घटादिविषयस्य सुखादिवत्साक्षिण्यध्यस्ततयानावृतसंवित्तादात्म्याद् घटः स्फुरति, घटं साक्षात्करोमीति ज्ञानविषयापरोक्षानुभवादपरोक्षतया विषयस्फुरणम्। परोक्षस्थले तु तद्वैपरीत्यात् तल्लिङ्गज्ञानेन तदाकारवृत्त्याऽसत्त्वापादकमौढ्याज्ञानस्य निवृत्तत्वाद्विषयप्रमाण-चैतन्ययोर्भेदाच्च परोक्षतया वह्न्यादेःसत्तामात्रेणस्फुरणमिति व्यवस्था सम्भवत्येव।

●

यदि द्वितीय पक्ष (वृत्ति के साथ सम्बन्ध नहीं होता) स्वीकार करें तो वह भी सङ्गत नहीं होगा। क्योंकि सम्बन्धाभाव पक्ष में विषयावरण दूर न हो पाने के कारण 'वह्नि' का स्फुरण ही नहीं होगा।

यदि यह कहें कि वहाँ 'वृत्ति' और 'विषय' का संयोग सम्बन्ध न होने पर भी किसी अन्य सम्बन्ध से 'विषय स्फुरण' हो जायगा। किन्तु यह कहना भी ठीक नहीं है। क्योंकि ऐसा अन्य सम्बन्ध (सम्बन्धान्तर) किसी ने बताया नहीं है। तथाहि— वृत्ति और विषय दोनों का 'स्वरूप सम्बन्ध' भी नहीं हो सकता, जिससे 'वह्नि का स्फुरण' हो सके, क्योंकि 'स्वरूप सम्बन्ध' के होने में कोई प्रमाण नहीं है।

किञ्च—'स्वरूप सम्बन्ध' को मान लेने पर उसी से सर्वत्र 'विशिष्ट व्यवहार को उपपत्ति हो जायगी, अतः अन्य किसी सम्बन्धान्तर की आवश्यकता ही नहीं होगी।

किञ्च—'ज्ञानस्वरूप', अथवा 'विषयस्वरूप, अथवा दोनों (उभय) को सम्बन्ध के रूप में मान लें, तो वह भी ठीक नहीं है। क्योंकि 'ज्ञानस्वरूप' को सम्बन्ध मान लें तो 'घटज्ञान' को दशा में 'पट' की भी प्रतीति हो सकेगी। यदि 'विषयस्वरूप' को सम्बन्ध मान लें तो 'अन्धकार' में स्थित घट की भी प्रतीति होने लगेगी। उभय सम्बन्ध यदि मान लें तो पूर्वोक्त दोषों का परिहार नहीं हो सकेगा। और अनन्तस्वरूपों की सम्बन्ध कल्पना करने में गौरव भी होगा। यदि 'विषय-विषयिभाव' सम्बन्ध मान लें तो 'संयोगसम्बन्ध' के विना 'विषय-विषयिभावसम्बन्ध' नहीं हो सकता। अन्यथा अतिप्रसङ्ग होगा। तस्मात् 'व्यवस्था' कैसे हो सकती है ?

उत्तर—उक्त शंकाओं का समाधान यह है कि 'परोक्षस्थल' में विषयेन्द्रियसन्निकर्ष न हो पाने से अन्तःकरण का बहिर्निर्गमन होना सम्भव नहीं है, उस कारण 'विषयाधिष्ठानभूत चैतन्य' का 'प्रमातृचैतन्य' के साथ 'ऐक्य' न हो पाने पर भी 'लिङ्ग' ज्ञान से 'वह्न्याकारवृत्ति' के होने पर 'प्रमातृचैतन्य' और 'विषयचैतन्य' दोनों का वस्तुतः ऐक्य, विद्यमान रहने से 'वह्नि' का मान होना असंभव नहीं है, अर्थात् वह्नि का भान हो सकता है।

प्रश्न—इस रीति से तो अतिप्रसङ्ग होने का सम्भव है।

उत्तर—अतिप्रसङ्ग नहीं होगा। क्योंकि तत्तद् विषय का भान कराने में 'तत्तदाकारवृत्ति' ही नियामक रहेगी। अत एव 'वह्नि' का परोक्षत्वेन भान होता है। किन्तु अपरोक्षस्थल में (प्रत्यक्षस्थल में) इन्द्रियार्थसन्निकर्ष होने पर बहिर्निर्गत 'अन्तःकरणवृत्ति' के साथ 'विषय' का संयोग होना सम्भव है और 'वृत्ति' के द्वारा 'सावरण अज्ञान' की निवृत्ति हो जाती है। उस कारण 'विषय चैतन्य' 'प्रमाण चैतन्य', और 'प्रमातृ चैतन्य' ये तीनों एकोपाध्याक्रान्त रहने से उनका ऐक्य होना सम्भव हो जाता है। सुख आदि के समान 'घटादिविषय', 'साक्षी' में अध्यस्त रहने के कारण उक्त चैतन्यों का विषय के साथ 'अनावृतसंवित्तादात्म्य' हो जाता है। उससे 'घटः स्फुरति', 'घटं साक्षात्करोमि' इस प्रकार से 'ज्ञानविषय' का अपरोक्षानुभव होने के कारण अपरोक्षतया 'विषयस्फुरण' होता है।

किन्तु परोक्षस्थल में उसके विपरीत स्थिति रहने से 'लिङ्ग' ज्ञान से तदाकार वृत्ति हो जाती है, उससे 'असत्त्वापादक मौढ्यअज्ञान की निवृत्ति होती है। और 'विषयचैतन्य' तथा 'प्रमाणचैतन्य' दोनों का भेद (दोनों भिन्न) रहता है, उस कारण परोक्षत्वेन 'वह्नि' का सत्ता मात्रेण स्फुरण होता है। यह व्यवस्था हो ही सकती है। तस्मात् षड्विध प्रमा से सावरण अज्ञान

तस्मात् षड्विधया प्रमया सावरणाज्ञाननिवृत्त्या तद्विषयभानं सम्भवति। "तत्त्वमस्या"दिवाक्यजन्यापरोक्षप्रमया ब्रह्मावरकमूलाज्ञानविवृत्त्या तत्साक्षात्कारः सम्भवत्येव। अतः प्रमानिरूपणमर्थवत्। तस्माद्बोधेद्धावृत्तिर्वृत्तीद्धो बोधो वा प्रमेति प्रमानिरूपणं सिद्धम् ॥ ४६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवन्महादेवानन्दसरस्वतीविरचिते तत्त्वानुसन्धानव्याख्यानेऽद्वैतचिन्ताकौस्तुभनाम्नि **द्वितीयः परिच्छेदः** ॥

•

की निवृत्ति हो जाने के कारण 'विषयभान' का होना संभव हो जाता है। "तत्त्वमसि" आदि महावाक्यजन्य अपरोक्षप्रमा से ब्रह्मावरक 'मूल अज्ञान' की निवृत्ति होती है। अतः ब्रह्मसाक्षात्कार के होने में कोई बाधक नहीं है। ब्रह्मसाक्षात्कार अवश्य ही (निश्चितरूप से) हो जाता है।

अतः प्रमानिरूपण करना व्यर्थ नहीं है, अपितु सार्थक है। तस्मात् प्रमा का लक्षण यही है कि 'बोधेद्धावृत्तिः' अथवा 'वृत्तीद्धः बोधः' प्रमा। अर्थात् ज्ञान से प्रदीप्त वृत्ति, अथवा वृत्ति से प्रदीप्त ज्ञान—हो 'प्रमा' है। इस प्रकार से प्रस्तुत द्वितीय परिच्छेद में 'प्रमा' का निरूपण किया गया है, उसे सार्थक समझना चाहिये ॥४६॥

॥ इति साक्षात्कारनाम्नी हिन्दो व्याख्या में द्वितीय परिच्छेद समाप्त ॥

•

अथ तृतीयः परिच्छेदः

प्रमाभिन्नं ज्ञानमप्रमा। साच द्विविधा—स्मृतिरनुभूतिश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। सापि द्विविधा—

•

चराऽचराणामनिशं सुखाय यस्यावतारो भवतीति सन्तः।
वदन्ति योनिं जगतामनन्तं तं कृष्णमाद्यं शरणं प्रपद्ये ॥ १ ॥

वृत्तिर्द्विविधा प्रमाऽप्रमाभेदादित्यत्र प्रमा निरूपिता। तत्राऽप्रतिबन्धायाः प्रमायाः अज्ञाननिवर्त्तकत्वेन प्रतिबन्ध-तन्निवृत्त्युपायौ निरूपणीयौ। तत्रासम्भावनादिः प्रतिबन्धः। तदुक्तम् पराशरेण—

"भावना विपरीता या या चाऽसम्भावना शुक। कुरुते प्रतिबन्धं सा तत्त्वज्ञानस्य नापरमि"ति ॥

तन्निवृत्त्युपायः श्रवणादिः "श्रोतव्ये"त्यादि श्रुतेः। यद्यप्यस्य ज्ञानसाधनत्वमवगम्यते तथाप्यप्रमाणत्वेन साक्षात्तदनुपपत्त्या प्रतिबन्धादिनिवृत्तिद्वारा महावाक्यात्प्रमोत्पत्तावस्योपयोग इति ज्ञानसाधनत्वमुपपद्यते। ततश्च प्रतिबन्धस्यासम्भावनादेरप्रमायामन्तर्भावादवश्यमप्रमानिरूपणीयेत्यतः क्रमप्राप्तामप्रमां निरूपयति—**प्रमेति।** प्रमात्वावच्छिन्नप्रमाभिन्नं ज्ञानमप्रमेति निष्कर्षः। तेन घटप्रमाभिन्नघटज्ञानेऽतिव्याप्तिर्निरस्ता। प्रमात्वं नामानधिगताबाधितार्थविषयज्ञानत्वम्। घटोऽयं घटोऽयमिति धारावाहिक-

•

अथ तृतीयः परिच्छेदः

पूर्व निरुपित परिच्छेद में 'प्रमा' और 'अप्रमा' के भेद से 'वृत्ति' के दो प्रकार बताये थे। उनमें से प्रथम प्रकार की 'प्रमावृत्ति' का सप्रमाण और प्रयोजन सहित निरूपण द्वितीय परिच्छेद में किया गया।

अब इस तृतीय परिच्छेद में दूसरे प्रकार की 'अप्रमावृत्ति' का सविस्तर निरूपण कर रहे हैं।

शंका—'अहं ब्रह्मास्मि'—इत्याकारक 'प्रमावृत्ति' तो 'अज्ञान' का नाश करके अधिकारी पुरुष को 'ब्रह्मभाव' की प्राप्ति कराती है। उस कारण उस 'प्रमावृत्ति' का निरूपण करना तो उचित था। किन्तु अब निरूपण कीजाने वाली 'अप्रमावृत्ति' से अधिकारी पुरुष का कोई प्रयोजन सिद्ध नहीं होता। इसलिए 'अप्रमावृत्ति' का निरूपण करना निष्फल (व्यर्थ) है।

समा०—अज्ञान का 'निवर्तक' प्रमा वही होती है, जो (प्रमा), 'प्रतिबन्ध' से रहित हो। इसलिये 'प्रतिबन्ध' तथा उसकी (प्रतिबन्ध की) निर्वृत्ति का उपाय जानना अधिकारी पुरुष के लिये आवश्यक है।

प्रश्न—प्रतिबन्ध और उसकी निवृत्ति के उपाय क्या हैं?

उत्तर—'असम्भावना', 'विपरीत भावना', 'सन्दिग्ध भावना'—इन्हें 'प्रतिबन्ध' कहते हैं। तथा 'श्रवण, मनन, और 'निदिध्यासन'—ये तीनों, 'प्रतिबन्धनिवृत्ति' के 'उपाय' कहलाते हैं। यह पराशर मुनि ने भी कहा है—ये भावनाएँ ही आत्मज्ञान की प्रतिबन्धक हुआ करती हैं। तथा 'श्रवण, मनन, निदिध्यासन'—ये, उन प्रतिबन्धों की निवृत्ति के उपाय कहलाते हैं। इन उपायों से उक्त 'असम्भावना, विपरीत भावना, सन्दिग्ध भावना'—रूप प्रतिबन्धों की निवृत्ति किये जाने पर ही 'आत्मसाक्षत्कार' हो पाता है। अन्यथा नहीं। कहा भी है—'श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः'।

शङ्का—'आत्मावाऽरेद्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इस श्रुति से तो 'श्रवणादिकों' में 'ज्ञानसाधनता' प्रतीत होती है, तब इन्हें 'प्रतिबन्धनिवर्तक' कैसे कहा जा रहा है?

समा०—'श्रवणादिकों' को साक्षात् ज्ञान-साधन कहने में किसी प्रमाण के न होने से उक्त कथन उपपन्न नहीं होता। 'प्रतिबन्धादि' निवृत्ति के द्वारा ही महावाक्यजन्य प्रमा की उत्पत्ति में श्रवणादिकों का उपयोग रहने से श्रवणादिकों को ज्ञान-साधन कहने में भी कोई अनुपपत्ति नहीं है। निष्कर्ष यह है कि श्रवणादिकों में आत्मज्ञान की जो साधनता है, वह भी 'प्रतिबन्ध' की निवृत्ति के द्वारा ही है, साक्षात् नहीं है। असंभावना—विपरीत भावना आदि 'प्रतिबन्ध' का अन्तर्भाव, 'अप्रमाज्ञान' में ही होता है, यह आगे बताया जायगा। अतः 'अप्रमावृत्ति' का निरूपण भी अवश्य करने योग्य है, इसी अभिप्राय को ध्यान में रखकर

यथार्थाऽयथार्थभेदात् । यथार्थस्मृतिरपि द्विविधा—अनात्मस्मृतिरात्मस्मृतिश्चेति ॥१॥

•

ज्ञानस्थले विरोधिपटाकारवृत्त्युत्पत्तिपर्य्यन्तं यावद् घटस्फुरणं तावद् घटाकारवृत्तिरेकैवेति नाव्याप्तिः । नच सर्वं ज्ञानं धर्मिण्यभ्रान्तं, प्रकारे तु विपर्ययं' इति न्यायेन भ्रमादेर्धर्म्यंशे प्रमारूपत्वेन प्रमाभिन्नत्वाऽभावादव्याप्तिरिति वाच्यम्, धर्म्यंशज्ञानस्यान्तःकरणवृत्तिरूपत्वेन भ्रमस्याविद्यावृत्तिरूपस्य तद्भिन्नत्वान्नाव्याप्तिरिति भावः ।

तां विभजते—**सा चेति** । स्मृतेर्लक्षणमाह—**संस्कारेति** । प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेत्युक्तं, तस्याः संस्कारसहितेन्द्रियजन्यत्वेन तन्मात्रजन्यत्वाभावान्नातिव्याप्तिः । संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमित्युक्तम् । संस्कारस्त्रिविधः—वेगो भावना स्थितिस्थापकश्चेति । क्रियाजन्यः क्रियाहेतुर्वेगः[१] । **सत्त्वेष्वदृष्टनिष्ठो**ऽनुभवजन्यस्मृतिहेतुर्भावनासंस्कारः । स चान्तः-

•

इस तृतोय परिच्छेद में क्रम प्राप्त 'अप्रमावृत्ति' का निरूपण कर रहे हैं—**द्वितीय परिच्छेद में निरूपित जो 'प्रमा' है, उससे भिन्न जो 'ज्ञान', उसे 'अप्रमा' कहते हैं ।** जैसे—'शुक्तौ इदं रजतम्'—इत्याकारक जो 'ज्ञान' है, वह 'प्रमाज्ञान' से भिन्न होने के कारण 'अप्रमा' रूप है ।

'प्रमाभिन्नं ज्ञानमप्रमा'—इस लक्षण में 'प्रमाभिन्न' पद यदि न रखें, तो 'ज्ञानमप्रमा'—इतना ही लक्षण शेष रहेगा तब उतने ही शेष लक्षण की 'प्रमाज्ञान' में अतिव्याप्ति होगी । उसके निरसनार्थ लक्षण में 'प्रमाभिन्नम्' पद रखना आवश्यक है । तब 'प्रमाज्ञान' में 'प्रमा से भिन्नता' न होने के कारण 'प्रमाज्ञान' में लक्षण की अतिव्याप्ति नहीं हो पाती । अब यदि 'प्रमाभिन्नमप्रमा' इतना ही लक्षण रखें, लक्षण में 'ज्ञानम्' पद न रखें तो 'प्रमाज्ञान से भिन्न जो 'घटादि' पदार्थ हैं, उनमें लक्षण की अतिव्याप्ति होगी । उस अतिव्याप्ति के निरासार्थ लक्षण में 'ज्ञानम्' पद का निवेश करना आवश्यक है । तब 'घटादि' पदार्थ, 'ज्ञानरूप' नहीं हैं । उस कारण 'घटादिपदार्थों' में अप्रमा के लक्षण की अतिव्याप्ति नहीं हो पाती ।

किसी भी प्रमाणान्तर से अज्ञात रहने वाले और अबाधित अर्थ को विषय करने वाले 'ज्ञान' को 'प्रमा' कहते हैं ।

शंका—'घटोऽयं घटोऽयं'—इत्याकारक धारावाहिकज्ञान में द्वितीय-तृतीयादि सभी ज्ञान, अधिगत रहने से 'प्रमात्व' की 'अव्याप्ति' हो रही है । उस कारण उसे 'प्रमा' रूप कैसे कहा जायगा ?

समा०—धारावाहिक ज्ञान स्थल में विरोधी 'पटाकार वृत्ति' की उत्पत्ति तक जो 'घटस्फुरण' जब तक होता रहता है, तब तक 'घटाकारवृत्ति' एक ही रहती है । तद्विषयक दूसरी वृत्ति के न होने से 'अधिगत' होने का अवसर ही नहीं है । अतः 'अव्याप्ति' नहीं है । एवं च 'प्रमात्व' के घटित हो जाने से 'धारावाहिकज्ञान' प्रमारूप ही हैं ।

शंका—सभी ज्ञान विशेष्यदृष्ट्या यथार्थ (सही) होते हैं । अयथार्थता तो ज्ञान के प्रकाश में अर्थात् विशेषणदृष्ट्या होती है । 'ज्ञानं धर्मिणि अभ्रान्तं प्रकारे तु विपर्ययः'—इस नियम के अनुसार 'भ्रमादि' ज्ञान, 'धर्मी' के अंश में अर्थात् धर्मी की दृष्टि से देखने पर 'प्रमा' रूप ही है, किन्तु उसमें 'प्रमाभिन्नत्व' नहीं है । उस कारण 'प्रमारूप भ्रमज्ञान' में अव्याप्ति हो रही है ।

समा०—उक्त आशंका ठीक नहीं है । क्योंकि धर्मीरूप अंश का ज्ञान, तो 'अन्तःकरणवृत्ति' रूप है, और 'भ्रमज्ञान' अविद्या वृत्तिरूप है । अतः 'धर्म्यंश' के ज्ञान से 'भ्रमज्ञान' भिन्न ही है । क्योंकि अन्तःकरणवृत्तिरूप प्रमाज्ञान से, अविद्यावृत्तिरूप भ्रमज्ञान, भिन्न होने से 'भ्रमज्ञान' में अप्रमा का लक्षण घट जाता है, अतः अव्याप्ति नहीं है ।

अप्रमावृत्ति का विभाग प्रदर्शित करते हैं—**वह 'अप्रमावृत्ति' (१) स्मृति, (२) अनुभूति के भेद से दो प्रकार की होती है । केवल संस्कारमात्र से जन्य होने वाले 'ज्ञान' को 'स्मृति' कहते हैं ।** जसे—'सा मे माता, स मे पिता'—इत्यादिज्ञान, 'संस्कारमात्रजन्य' होने से 'स्मृति' शब्द से कहा जाता है । उक्त लक्षण में यदि 'मात्र' पद न रखते तो 'सोऽयं देवदत्तः'—यह 'प्रत्यभिज्ञा प्रत्यक्ष' भी 'संस्कार' से उत्पन्न होता है । अतः समागत अतिव्याप्ति दोष के निवारणार्थ लक्षण में 'मात्र' पद देना आवश्यक है । उसके रखने पर प्रतीत होता है कि 'प्रत्यभिज्ञाप्रत्यक्ष', केवल संस्कार से जन्य नहीं है, अपितु 'संस्कार-सहकृत इन्द्रिय' से जन्य होता है । अतः 'प्रत्यभिज्ञा प्रत्यक्ष' में लक्षण की अतिव्याप्ति नहीं होती ।

---

१. सत्त्वेष्वादिष्टेत्याद्यपि पाठान्तरमङ्कितम् । सत्त्वनिष्ठइत्येवास्तु 'सत्त्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयो'रित्याद्यभिधानाच्चित्तनिष्ठ इत्यर्थः ।

तत्र व्यावहारिकप्रपञ्चो मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवदित्यनुमानसिद्धमिथ्यात्वानुसन्धानं

•

करणनिष्ठोऽस्मन्मते। न्यायमते त्वात्मनिष्ठः। अस्मदभिमताहंकारस्यैव नैयायिकादीनामात्मत्वात्। स्थितिस्थापकसंस्कारो धनुरादिनिष्ठः। यद्यपि वेगस्थितिस्थापकयोः क्रियाहेतुत्वमेव तथापि भावनासंस्कारस्य ज्ञानहेतुत्वात्तन्मात्रजन्यं ज्ञानं स्मृतिरितिलक्षणमुपपद्यते। स्मृतिं विभजते—**सापीति**। यथोद्देशं यथार्थस्मृतिं विभागपूर्वकं निरूपयति—**यथार्थेति** ॥ १ ॥

यथार्थानात्मस्मृतिं निरूपयति—**तत्र व्यावहारिकेति**। तयोर्मध्य इत्यर्थः। पक्षस्य वा पक्षसमस्य वा दृष्टान्तत्वासम्भवेन तत्र व्याप्तिग्रहायोगात् पक्षं विशिनष्टि——**व्यावहारिकेति**। अज्ञातसत्ताकत्वं व्यावहारिकत्वम्। शुक्तिरजतादेः प्रतीयमानसत्ताकत्वेन प्रातीतिकत्वात् दृष्टान्त उपपद्यते।

ननु वादिप्रतिवादिनोः सम्प्रतिपत्तिविषयो दृष्टान्तो वक्तव्यः, प्रतिवादिभिः शुक्तिरजतस्यानङ्गीकारेण कथं स दृष्टान्त इति चेन्न। अन्यथाख्यात्यादीनां पूर्वमेव निराकृतत्वेन शुक्तिरजतस्य साधितत्वात् दृष्टान्तोपपत्तेः। ततश्च तत्र हेतुसाध्ययोर्दृश्यत्वमिथ्यात्वयोर्व्याप्तिग्रहसम्भवेन पक्षेऽपि दृश्यत्वहेतुना मिथ्यात्वं साधयितुं शक्यते। व्यावहारिकेति पक्षो न विशिष्यते चेत्तदा शुक्तिरजतस्य प्रपञ्चान्तर्गतत्वेन पक्षकुक्षिनिक्षिप्तत्वादनुपसंहारिहेत्वाभासः स्याद् दृश्यत्वे[1] हेतुरतः पक्षविशेषणमर्थवदिति भावः। एवञ्चानेनानुभानेन प्रपञ्चस्याकाशादेर्मिथ्यात्वसिद्धौ सत्यां तस्य सिद्धस्य मिथ्यात्वस्य पुनः पुनरनुसन्धानं यथार्थाऽनात्मस्मरणम्।

•

अब लक्षण में यदि 'ज्ञान' पद न रखें तो 'संस्कार रूप प्रतियोगी से जन्य जो 'संस्कारध्वंस' है, उसमें लक्षण को अतिव्याप्ति होगी।

उस अतिव्याप्ति को दूर करने के लिए लक्षण में 'ज्ञानम्' पद का देना आवश्यक है। तब 'ध्वंस' में ज्ञानरूपता के न रहने से उसमें स्मृति के लक्षण की अतिव्याप्ति नहीं होगी।

'संस्कार पदार्थ'—(१) वेग, (२) भावना, (३) स्थिति-स्थापक भेद से तीन प्रकार का होता है। 'जो संस्कार', 'क्रिया' से जन्य होकर 'अन्य क्रिया' का जनक हो, उसे 'वेगाख्य संस्कार' (वेग नामक संस्कार) कहते हैं। यह 'वेगाख्य-संस्कार', 'बाण' आदि में रहता है।

जो 'संस्कार', 'अनुभवात्मकज्ञान' से जन्य होकर 'स्मृतिज्ञान' का जनक हो, उसे 'भावनाख्य संस्कार' (भावना-नामक संस्कार) कहते हैं। यह 'भावनाख्यसंस्कार', वेदान्त-सिद्धान्त के अनुसार 'अन्तःकरण' में ही रहता है, और नैयायिकों के मतानुसार 'आत्मा' में रहता है। वेदान्तियों के मत में जो 'अहंकार' पदार्थ है, उसी को ये नैयायिक 'आत्मा', मानते हैं।

अन्यथा किये हुए वस्तु की पूर्व की तरह स्थिति कराने वाला जो 'संस्कार' हो, उसे 'स्थितिस्थापक संस्कार' कहते हैं। यह 'स्थितिस्थापक' नाम का संस्कार 'धनुष', 'वृक्ष की शाखा' 'चटाई' आदि में रहता है।

इन तीन प्रकार के संस्कारों में से 'वेग' और 'स्थितिस्थापक'—ये दो संस्कार, यद्यपि 'क्रिया' के ही जनक होते हैं, तथापि 'भावनाख्यसंस्कार', केवल 'ज्ञान' का ही जनक होता है। उसकारण 'स्मृति के लक्षण' में 'संस्कार' शब्द से 'भावनाख्य-संस्कार' की ही विवक्षा की गई है। अतः 'संस्कारमात्रजन्यं ज्ञानं स्मृतिः'—यह स्मृतिलक्षण, समीचीन है।

अब स्मृति का विभाग करते हैं—**यह 'स्मृति', (१) यथार्थ और (२) अयथार्थ के भेद से दो प्रकार की होती है।** उनमें से 'यथार्थानुभवजन्यसंस्कार' से उत्पन्न होनेवाली 'स्मृति' को 'यथार्थस्मृति' कहते हैं। तथा 'अयथार्थानुभवजन्यसंस्कार' से उत्पन्न होनेवाली 'स्मृति' को अयथार्थस्मृति कहते हैं।

यह 'यथार्थस्मृति' भी (१) अनात्मस्मृति, और (२) 'आत्मस्मृति' के भेद से दो प्रकार की होती है ॥ १ ॥

उनमें से 'व्यावहारिक प्रपंच मिथ्या है दृश्य होने से शुक्तिरूप्य की तरह'—इस अनुमान से जन्य 'प्रपञ्च' के मिथ्यात्व का जो अनुभव होता है, उस अनुभवजन्य 'संस्कार' से अधिकारी पुरुष को उत्पन्न होनेवाली प्रपञ्च के मिथ्यात्व की जो स्मृति होती है, उस 'स्मृति' को 'यथार्थ अनात्मस्मृति' कहते हैं।

पक्ष अथवा पक्षसम में दृष्टान्तत्व-असंभव रहने से वहाँ व्याप्तिग्रह नहीं हो पाता। इसलिये पक्ष में 'व्यावहारिक' विशेषण दिया है। उस कारण 'अज्ञातसत्ताकत्वं व्यावहारिकत्वम्'। शुक्ति-रजतादि में प्रतीयमान-सत्ताकत्व होने से प्रातीतिकत्व है। अतः दृष्टान्त उपपन्न होता है।

---

१. दृश्यत्वम् इति स्यात्। हेतुः सन् हेत्वाभासो मा भूदित्यतः पक्षविशेषणमित्यर्थः।

यथार्थानात्मस्मरणम् ॥२॥

•

ननु मिथ्यात्वं प्रपञ्चनिष्ठं न वा ? आद्ये मायामयप्रपञ्चनिष्ठस्य कथं याथार्थ्यं ? याथार्थ्यस्य वस्तुधर्म्मत्वात्प्रपञ्चस्यावस्तुत्वाभ्युपगमादवस्तुधर्म्मस्य मिथ्यात्वस्यावस्तुत्वावश्यंभावेन याथार्थ्यानुपपत्तेः। द्वितीयेऽपि पक्षे साध्याभावेनानुमानस्य बाध एव स्यात्। तस्मान्मिथ्यात्वानुसन्धानं यथार्थानात्मस्मरणमित्यनुपपन्नमिति ? नैषदोषः। मिथ्यात्वं प्रपञ्चनिष्ठमेव। न चावस्तुधर्म्मस्यावस्तुत्वात्तदनुसन्धानस्य कथं याथार्थ्यं ज्ञानगतयाथार्थ्यस्य विषयप्रयुक्तत्वादिति वाच्यम्, ज्ञानस्य याथार्थ्यं नाम—मानान्तराबाध्यत्वं, तदपि विषयकृतमेव स्वरूपेण ज्ञानस्य बाधाबाधयोरयोगाद्विषयबाधाबाधाभ्यां ज्ञानस्य बाध्यत्वव्यपदेशात्। एवञ्च प्रपञ्चस्य मिथ्यात्वं नामाधिष्ठानसत्तातिरिक्तसत्ताशून्यत्वमेव। तस्य केनापि प्रमाणेन बाधाभावात् प्रत्यक्षादीनां "वाचारम्भणं विकारो नामधेयमि"त्यादि श्रुतिविरोधेनाप्रामाण्योपपत्तेर्मिथ्यात्वस्याबाधेन याथार्थ्यात्तदनुसन्धानस्यापि याथार्थ्यं सम्भवत्येवेत्यनुमानसिद्धमिथ्यात्वानुसन्धानं यथार्थानात्मस्मरणमिति सम्यगुपपन्नमिति भावः ॥ २ ॥

•

शंका—वादी-प्रतिवादी दोनों को सम्मत विषय जो हो उसे ही 'दृष्टान्त' के रूप में देना चाहिये। प्रतिवादी को 'शुक्ति-रजत' स्वीकार न रहने से उसे दृष्टान्त के रूप में कहना उचित नहीं है।

समा०—उक्त कथन ठीक नहीं है। क्योंकि 'अन्यथा-ख्याति' का निराकरण हम पहले ही कर चुके हैं। उस कारण 'शुक्ति-रजत' की सिद्धि हो जाने से उसे दृष्टान्त में रखा जा सकता है। अतः 'दृश्यत्व-मिथ्यात्व' इन हेतु-साध्य का व्याप्तिग्रह होना संभव है। इसलिये पक्ष में भी 'दृश्यत्व' हेतु से 'मिथ्यात्व' की सिद्धि की जा सकती है।

'पक्ष' में 'व्यावहारिक'—यह विशेषण न देने पर 'शुक्ति-रजत' भी प्रपञ्च के अन्तर्गत हो जाने से अर्थात् पक्षकुक्षिनिक्षिप्त होने से 'दृश्यत्वहेतु', 'अनुपसंहारी' नाम का हेत्वाभास हो जायगा। अतः पक्ष में विशेषण देना सार्थक है!

एवञ्च उक्त अनुमान से आकाशादि प्रपञ्च में 'मिथ्यात्व' सिद्ध हो जाने पर उस सिद्ध किये गये मिथ्यात्व का पुनः पुनः अनुसन्धान करना ही 'यथार्थअनात्मस्मरण' है।

शंका—उक्त 'मिथ्यात्व' क्या 'प्रपञ्चनिष्ठ' है ? अथवा प्रपञ्चनिष्ठ नहीं है ? यदि 'मिथ्यात्व' को 'प्रपञ्चनिष्ठ' कहते हैं तो 'मायामय प्रपञ्चनिष्ठ मिथ्यात्व' का 'याथार्थ्य' कैसे कहा जायगा ? क्योंकि 'याथार्थ्य' तो 'वस्तुधर्म' होता है। 'प्रपञ्च' को 'अवस्तु' माना गया है। अतः 'अवस्तु' का धर्म जो 'मिथ्यात्व' है, वह भी 'अवस्तु' ही होगा, तब उसमें 'याथार्थ्य' का होना कैसे संभव हो सकता है ?

अब द्वितीय पक्ष (मिथ्यात्व, 'प्रपञ्चनिष्ठ' नहीं है) को यदि मानते हैं, तो 'साध्य' का अभाव रहने से 'अनुमान' का बाध ही होगा। अतः 'मिथ्यात्व' के अनुसन्धान को 'यथार्थ अनात्मस्मरण' कहना उपपन्न नहीं होगा। तब प्रपञ्चनिष्ठ न रहने वाले 'मिथ्यात्व' को 'यथार्थ अनात्मस्मरण कैसे कहा जा रहा है ?

समा०—शंका करने वाले ने जो दोष प्रदर्शन किया है वह ठीक नहीं है। 'मिथ्यात्व'—प्रपञ्चनिष्ठ ही है। शंकाकार ने जो कहा है कि 'अवस्तु' का धर्म भी अवस्तुरूप होने से उसके अनुसन्धान को 'यथार्थ' कैसे कहा जायगा, क्योंकि 'ज्ञानगत-याथार्थ्य' तो 'विषय प्रयुक्त' होता है। किन्तु शंकाकार का उक्त कथन उचित नहीं है। 'ज्ञान के यथार्थ' होने का तात्पर्य यह है कि—'मानान्तराबाध्यत्व' रहना, अर्थात् किसी प्रमाण से उसका बाध, न हो पाना। वह 'मानान्तराबाध्यत्व' भी 'विषयकृत' ही है। क्योंकि 'ज्ञान' का 'बाध' या 'अबाध', स्वरूपतः नहीं हुआ करता। 'विषय' के हो 'बाध' या 'अबाध' से 'ज्ञान' के 'बाध्य' या 'अबाध्य' का व्यवहार किया जाता है।

एवञ्च 'प्रपञ्च' को 'मिथ्या' कहने का तात्पर्य यही है कि 'अधिष्ठानसत्तातिरिक्तसत्ताशून्य'—रहना। उसका किसी भी प्रमाण से बाध नहीं होता। 'प्रत्यक्षादि' प्रमाणों का 'अप्रामाण्य', 'वाचारम्भणं विकारो नामधेयम्'—इत्यादि श्रुतियों के साथ 'विरोध' रहने के कारण माना जाता है। अतः 'मिथ्यात्व' का 'बाध' न हो सकने से उसका (मिथ्यात्व का) याथार्थ्य है, और उसके 'अनुसन्धान' का भी याथार्थ्य है। उस कारण अनुमानसिद्ध मिथ्यात्व के 'अनुसन्धान' को 'यथार्थ अनात्मस्मरण' कहना उचित ही है ॥ २ ॥

तत्त्वमस्यादिवाक्यार्थानुसन्धानं यथार्थात्मस्मरणम्। अयथार्थस्मृतिरपि द्विधा पूर्ववत्। प्रपञ्चस्य सत्यत्वानुसन्धान-

●

यथार्थात्मस्मरणं दर्शयति—**तत्त्वमिति**। तत्त्वमस्यादिवाक्यार्थस्त्वंपदलक्ष्यस्य ब्रह्मत्वं तदनुसन्धानं यथार्थात्मस्मरण-मित्यर्थः। यथोद्देशं यथार्थस्मृतिं निरूप्य क्रमप्राप्तामयथार्थस्मृतिं विभज्य निरूपयति—**अयथार्थेति**। **पूर्ववदिति**। यथार्थस्मृति-वदनात्मस्मृतिरात्मस्मृतिश्चेति द्विधेत्यर्थः। अयथार्थानात्मस्मृतिं दर्शयति—**प्रपञ्चस्येति**। ननु घटः सन् पटः सन्निति प्रत्यक्षेण "प्राणा वै सत्यमि"ति श्रुत्या प्रपञ्चस्य सत्यत्वावगमात्प्रमाणसिद्धस्य ब्रह्मवद्यथार्थत्वात्कथं तत्स्मरणस्यायथार्थत्वमन्यथा ब्रह्मानुसन्धानस्याप्ययथार्थत्वापत्तेरित्याशङ्क्याह—**मिथ्येति**। प्रपञ्चस्य "वाचारम्भणं विकारो नामधेयं" "सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय" "भेदश्च तस्याज्ञानकृतो भवेदि"तिश्रुतिस्मृतिशतैरारम्भणाधिकरणन्यायेन ब्रह्मभिन्नस्य मिथ्यात्वस्य निश्चितत्वाद् घटः सन्नित्यादिप्रत्यक्षादेर्बाधेनाधिष्ठानसत्त्वविषयत्वोपपत्तेः। नच "प्राणा वै सत्यमि"त्यादि श्रुत्येतरश्रुत्यादिबाधः किन्नस्यादिति वाच्यम्, प्राणादीनामुत्पत्तिविनाशश्रवणेन कालत्रयाबाध्यत्वरूपसत्यत्वायोगात्। न्यायशून्यत्वाच्च, "प्राणा वै सत्यमि"त्यादि श्रुतेर्व्यावहारिकसत्यत्वविषयत्वोपपत्तेस्तयेतरश्रुतिबाधायोगात्। प्रत्युत 'वाचारम्भणा"दिश्रुतेर्न्यायमूलत्वेन तयैव प्राणसत्यत्वश्रुतेर्बाधः। तस्मात्प्रपञ्चस्य मिथ्यात्वात् सत्यत्वानुसन्धानमयथार्थानात्मस्मरणमिति युक्तमेवोक्तमिति भावः।

द्वितीयं निरूपयति—**अहङ्कारेति**। अहमिति कृतिः करणं यस्य सोऽहङ्कारः स आदिर्येषां तेऽहङ्कारादयस्तेष्विति यावत्।

●

'तत्त्वमसि' इत्यादि महावाक्य से जन्य—'अहं ब्रह्मास्मि'—इत्याकारक जो अनुभव होता है, उससे जन्य संस्कार से अधिकारी पुरुष को उत्पन्न होनेवाली जो प्रत्यक्-अभिन्न 'ब्रह्म' की जो 'स्मृति' होती है, उसे 'यथार्थ आत्मस्मृति' कहते हैं।

इसी प्रकार दूसरी 'अयथार्थस्मृति' भी (१) अनात्मस्मृति, और (२) आत्म-स्मृति के भेद से दो प्रकार की होती है।

श्रुतियों से तथा पूर्वोक्त अनुमान से 'प्रपञ्च' का 'मिथ्यात्व' हो सिद्ध होता है। ऐसे मिथ्या प्रपञ्च में जो 'सत्यता' का अनुभव होता है, वह 'भ्रमरूप' ही है। इस अयथार्थ अनुभवजन्य संस्कार से उत्पन्न होने वाली 'प्रपञ्च' की सत्यता की जो 'स्मृति' होती है, उसे 'अयथार्थ अनात्मस्मृति' कहते हैं।

'अहंकार से लेकर 'स्थूल देह' तक सभी अनात्मपदार्थ, 'आत्मभाव' से रहित हैं। उस कारण उन अहंकारादिकों में जो 'आत्मत्व' बुद्धि है—वह अयथार्थानुभव ही है। उस अयथार्थानुभवजन्य संस्कार से उत्पन्न होनेवाली जो 'अहंकारादिकों' में 'आत्मत्व' की स्मृति है, उसे 'अयथार्थ आत्मस्मृति' कहते हैं। आत्मा को कर्तारूप से याद करना भी अयथार्थ आत्मस्मृति है।

शंका—'घटः सन्, पटः सन्'—इस प्रकार 'प्रत्यक्ष प्रमाण' से तथा 'प्राणा वै सत्यम्'—इस श्रुतिप्रमाण से 'प्रपञ्च' की 'सत्यत्वेन' प्रतीति होती है। अतः प्रमाणसिद्ध 'ब्रह्म' के समान प्रपञ्च को भी यथार्थता सिद्ध होने से, उसके स्मरण को 'अयथार्थ' क्यों कहा जा रहा है? अन्यथा 'ब्रह्मानुसन्धान' को भी 'अयथार्थ' कहना होगा।

समा०—ब्रह्मभिन्न प्रपञ्च का मिथ्यत्व, सैकड़ों श्रुति-स्मृतिवचनों से तथा 'आरम्भणाधिकरणन्याय' से निश्चित किया गया है।

यह जो कहा गया था कि 'घटःसन्', 'पटःसन्' इत्याकारक प्रत्यक्षप्रमाण से 'प्रपञ्च' की सत्यता सिद्ध होती है वह भी ठीक नहीं है। क्योंकि 'घटःसन्'—इत्याकारक प्रत्यक्ष का बाध हो जाता है, उस कारण उसमें 'अधिष्ठानसत्त्वविषयता' ही रहती है।

शङ्का—'प्राणा वै सत्यम्'—इत्यादि श्रुति से अन्य विपरीत श्रुतियों का बाध क्यों नहीं किया जाता?

समा०—प्राण आदि की उत्पत्ति और विनाश का होना श्रुत है, उस कारण 'कालत्रयाऽबाध्यत्वरूप सत्यत्व' की प्रतीति उनमें नहीं हो पाती। तथा 'प्राणादिकों' के 'सत्यत्व' का समर्थक कोई 'न्याय' भी नहीं है, और 'प्राणा वै सत्यम्'—इत्यादि श्रुति की उपपत्ति भी, 'व्यावहारिकसत्यत्वविषयत्व' को मानकर हो जाती है। उस कारण उक्त श्रुति, से अन्य श्रुतियों का बाध नहीं हो सकता, प्रत्युत 'वाचारम्भण' श्रुति, न्यायमूलक होने से उसी से 'प्राणसत्यत्व' श्रुति का बाध हो जाता है। एवञ्च 'प्रपञ्च' में मिथ्यात्व ही है। अतः उसका सत्यत्वेनरूपेण अनुसन्धान करना 'अयथार्थ अनात्मस्मरण ही है।

दूसरी 'अयथार्थ आत्मस्मृति' को 'अहङ्कारादिषु, ग्रन्थ से बताया गया है। 'अहंकार शब्द का अर्थ है—'अहम्' इति कृतिः करणं यस्य सः—अहंकारः, अर्थात् 'अहम्' है 'करण' जिसका उसे अहंकार कहते हैं। सः आदिः येषां ते अहंकारादयः—

मयाथार्थनात्मस्मरणम् मिथ्यावस्तुत्वात्तस्य अहङ्कारादिष्वात्मत्वानुसन्धानम् आत्मनि कर्त्तृत्वानुसन्धानं वा अयथार्थात्मस्मरणम्

●

ननु सर्वेषां परीक्षकाणामहमनुभवविषयस्यैवात्मत्वेनाभिमतत्वात्कथं तस्यात्मानुसन्धानमयथार्थात्मरणमिति चेत् ? शृणोतु भवान्—देहाद्यज्ञानसाक्ष्यन्ताः सर्वेऽहमनुभवविषयाः। तत्र कोऽयमात्मा तव ? न तावद्देह आत्मा, उत्पत्तिविनाशवत्त्वाद्रूपादिमत्वाज्जडत्वाच्च घटवत्। नचाप्रयोजकत्वं कृतहानाकृताभ्यागमदोषप्रसङ्गात्। "तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तरात्मा प्राणमय" इति श्रुतेश्च। नापीन्द्रियाणामात्मत्वं करणत्वाद्वास्यादिवत्, वनवद्बहुसमुदायत्वाच्च, घटवद्भौतिकत्वाच्च। नचप्रयोजकं करणस्य ज्ञातृत्वायोगात्। न हि वास्यादेः करणस्य ज्ञातृत्वं दृष्टं, जानामीत्यात्मनो ज्ञातृत्वस्यानुभवसिद्धत्वात्। बहुसमुदायस्यात्मत्वे विरुद्धाभिप्रायतया सद्यः शरीरपातप्रसङ्गाच्च। नच 'वरगोष्ठी'न्यायेन बहूनामात्मत्वमविरुद्धमिति वाच्यम्। योऽहं पश्यामि सोऽहं स्पृशामीत्यभेदप्रत्यभिज्ञाविरोधप्रसङ्गाच्च। भौतिकस्यात्मत्वे पूर्वोक्तदोषानपायात्। अतो नेन्द्रियाणामात्मत्वं, नापि प्राणः आत्मा, वायुविकारत्वाद् बाह्यवायुवत् "तस्माद्वा एतस्मात् प्राणमयादन्योऽन्तरात्मा मनोमय" इति श्रुतेश्च। नापि मन आत्मा करणवदिन्द्रियवत्। नच मनसः करणस्य निराकृतत्वात्ततस्तस्यानात्मत्वं कथमिति वाच्यम्; मिश्रमतानुसारेण न्यायमतानुसारेण वा तदुपपत्तेः। अस्मन्मते तूत्पत्तिविनाशवत्त्वादिति हेतुर्द्रष्टव्यः। "तस्माद्वा एतस्मान्मनोमयादन्योऽन्तरात्मा विज्ञानमय" इति श्रुतेश्च। नाप्यहङ्कार आत्मा दृश्यत्वात् घटवत्। नचाप्रयोजकत्वं विपक्षहेतूच्छित्तेरेव बाधकत्वात्। नचेष्टापत्तिः, अन्यैस्तस्य दृग्रूपत्वानङ्गीकारात्। अस्मन्मते कार्य्यत्वेन तदयोगात्। एतेन बुद्धिचित्तयोरात्मत्वं प्रत्युक्तम्, "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरात्मानन्दमय" इति श्रुतेश्च। नाप्यानन्दमयशब्दवाच्यमज्ञानमात्मा जडत्वात् ज्ञाननिवर्त्यत्वाच्च। "अत्रायं पुरुषः स्वयंज्योतिर्भवति" "अजो नित्यः शाश्वतोऽयं पुराणः" "आकाशवत्सर्वगतश्च नित्यः" "क्षेत्रं क्षेत्री तथाकृत्स्नं प्रकाशयति भारत" "नित्यस्सर्वगतः स्थाणु" रित्यादि श्रुतिस्मृतिभिरात्मनश्चेतनत्वनित्यत्वावगमात् तद्वैपरीत्यानुभवादज्ञानमनात्मैव। एतेन शून्यमात्मेति प्रत्युक्तं तस्यापि साक्षिभास्यत्वात्।

●

तेषु 'अहङ्कारादिषु'। वह अहङ्कार है आदि में जिनके, उन अहङ्कारादिकों में 'आत्मत्व' का अनुसन्धान करना, अर्थात् अहङ्कारादिकों को 'आत्मा समझना'—यही है 'अयथार्थ आत्मस्मृति।

शंका—संसार में व्यवहार करनेवाले सभी लोग 'अहम्' इत्याकारक अनुभव के विषय होने वाले को ही 'आत्मा' समझते हैं। अतः उसके अनुसन्धान को 'अयथार्थ आत्मस्मरण' क्यों कहा जा रहा है ?

समा०—वह इसलिए कहा जा रहा है—सुनिये। हम बताते हैं—स्थूल देह से लेकर अज्ञान तथा साक्षी तक सभी, 'अनुभव' के विषय होते हैं। तब उनमें से तुम्हारा अभिप्रेत 'आत्मा' कौन-सा है ? 'देह' को तो 'आत्मा' कह नहीं सकते, क्योंकि 'देह' तो उत्पत्ति-विनाशशाली है, 'रूपवान्' भी है, और 'जड़' भी है, 'घट' के समान। उसे अप्रयोजक भी नहीं कह सकते, अन्यथा 'कृतहान' और अकृताभ्यागम का दोष प्राप्त होगा। श्रुति से भी 'देह' का 'आत्मत्व' नहीं कह सकते, क्योंकि श्रुति ने अन्नमयकोष से प्राणमयकोश को भीतरी आत्मा कहा है। अतः 'देह'—आत्मशब्दवाच्य नहीं है।

इन्द्रियों' को भी 'आत्मा' नहीं कह सकते। क्योंकि 'वास्या' आदि की तरह 'इन्द्रियाँ' तो 'करण' हैं। और 'वन' की तरह बहुसमुदायरूप वे हैं, तथा 'घट' की तरह भौतिक हैं। करण में 'ज्ञातृत्व' न रहने से उसे अप्रयोजक भी नहीं कह सकते। वास्या आदि करणों में 'ज्ञातृत्व' का होना किसी ने भी देखा नहीं है, किन्तु 'जानामि'—इस प्रकार से 'आत्मा' में 'ज्ञातृत्व' का अनुभव सभी को होता है। 'बहुसमुदाय' को आत्मा मानने पर उनके अभिप्राय परस्पर एक-दूसरे के विरुद्ध होने से तत्काल शरीरपात का प्रसंग प्राप्त होगा।

यदि यह कहें कि 'वरगोष्ठी' न्याय से बहुतों में आत्मत्व का होना विरुद्ध नहीं है। किन्तु यह कहना भी असंगत ही होगा। क्योंकि 'योऽहं पश्यामि, सोऽहं स्पृशामि'—इस 'अभेदप्रत्यभिज्ञा' के साथ विरोध होगा। भौतिक को आत्मा मानने पर पूर्वोक्त दोष दूर नहीं हो पायेंगे। इसलिए इन्द्रियों को 'आत्मा' कहना असंगत है।

'प्राण' को भी 'आत्मा' नहीं कह सकते। क्योंकि बाह्य वायु की तरह 'प्राण' तो 'वायुविकार' ही है। 'प्राण' में 'आत्मत्व' के न होने का प्रतिपादन श्रुति ने भी किया है और उससे भीतरी आत्मा, मनोमयकोश को कहा है। इसलिए 'प्राण' भी 'आत्म' शब्दवाच्य नहीं है।

स्वप्नस्त्वनुभव एव न स्मृतिरिति वक्ष्यते ॥३॥

•

कथं पुनर्देहादीनामहमनुभवविषयत्वादनात्मत्वमित्युच्यते ? देहादीनां चिदात्मनश्चान्योन्याध्यासाद्देहादीनामहमनुभवविषयत्वं, मृतदेहे तददर्शनात्। अन्यथान्यत्रापि तत्प्रसङ्गात्। तस्मादहङ्कारादिष्वात्मत्वानुसन्धानमयथार्थात्मस्मरणमिति निरवद्यम्।

कस्तर्ह्यात्मेति चेद् ? अज्ञानतत्कार्य्याणि सर्वाणि यो निजसत्तया प्रत्यक्षतया भासयति ममाज्ञानं ममाहङ्कारो मम बुद्ध्यादिरिति, स एवात्मा। तस्य स्वप्रकाशचिद्रूपत्वात् स्मरणास्मरणे न सम्भवतः। न हि नित्यस्य स्वप्रकाशानुभवस्य स्वात्मनः स्मरणं वा विस्मरणं भवति। तथा च श्रुतिः—

"त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः॥

"साक्षी चेताः केवलोनिर्गुणश्च"त्याद्या देहाद्यज्ञानान्तविलक्षणं स्वप्रकाशं चिद्रूपं साक्षिणं दर्शयन्ति[1]। उक्तञ्च—

"अज्ञानतत्कार्य्यतदीयभेदानध्यक्षयन्ती निजसत्तयैव।
स्मर्तुं च विस्मर्तुमहो न शक्या सुप्त्यादिषु स्वप्रभयास्मि सा चित्॥" इति।

•

इन्द्रिय की तरह 'मन' को भी 'आत्मा' नहीं कह सकते। यदि यह कहें कि 'मन' के 'करणत्व' (इन्द्रियत्व) का तो निराकरण हो चुका है। अतः उसे 'अनात्मा' क्यों कहा जा रहा है ? यह प्रश्न करना ठीक नहीं है। क्योंकि श्रीवाचस्पतिमिश्र के अनुसार तथा न्यायमत के अनुसार उसके इन्द्रियत्व की उपपत्ति हो सकती है। हमारे सिद्धान्त के (वेदान्तियों के मत के) अनुसार 'मन' को 'आत्मा' न कहने में 'उत्पत्ति-विनाशवत्त्वाद्' हेतु है। 'मन' के आत्मा न होने में श्रुति का भी समर्थन प्राप्त है। इससे भीतरी आत्मा विज्ञानमय कहा गया है।

'अहङ्कार' को भी 'आत्मा' नहीं कह सकते, क्योंकि वह भी 'घट' की तरह 'दृश्य' है। उसके 'अनात्मत्व' में 'दृश्यत्व' को 'अप्रयोजक' नहीं कह सकते, क्योंकि विपक्षहेतूच्छिति' ही बाधक है। उसे 'दृष्टापत्ति' कह कर टाल नहीं सकते क्योंकि विपक्षियों ने उसे 'दृक्रूप' नहीं माना है। हमारे मत में तो 'अहङ्कार' को 'कार्य' माना जाता है, अतः वह 'दृक्रूप' नहीं है। यह कहने से 'बुद्धि' और 'चित्त' के भी 'आत्मत्व' का खण्डन हो जाता है। श्रुति ने भी हमारे मत का ही समर्थन किया है।

आनन्दमय शब्दवाच्य 'अज्ञान' भी 'आत्मा' नहीं है। क्योंकि 'अज्ञान' भी 'जड' है, और 'ज्ञान' से उसकी 'निवृत्ति' होती है। श्रुति-स्मृतियों के वचनों से 'आत्मा' का चेतनत्व, तथा 'नित्यत्व' प्रतीत हो रहा है। 'अज्ञान' में उसके वैपरीत्य का अनुभव होने से उस (अज्ञान) में 'अनात्मत्व' ही सिद्ध हो रहा है। इस कथन से 'शून्यम् आत्मा'—इस बौद्धसिद्धान्त का भी खण्डन हो जाता है। क्योंकि वह 'शून्य' भी 'साक्षिभास्य' है।

शङ्का—'देह' आदि तो 'अहम्'—इत्यकारक अनुभव के विषय होते हैं। तब उन्हें 'अनात्मा' कैसे कहा जा रहा है ?

समा०—'देह' आदि 'अनात्म पदार्थों का और 'चिदात्मा' दोनों का 'अन्योऽन्याध्यास' होता रहता है। उसका कारण 'देह' आदि अनात्मपदार्थ, 'अहम्'—इत्याकारक अनुभव के विषय होते हैं। क्योंकि 'मृत देह' में अन्योन्याध्यास न होने से उसमें 'अहम्' इत्याकारक अनुभव की विषयता नहीं होती है। अन्यथा 'अन्यत्र' भी वह प्रसंग प्राप्त होगा। इसलिए 'अहङ्कारादिकों' में जो 'आत्मत्वानुसन्धान' होता है, वह 'अयथार्थ आत्मस्मरण' ही है, इसमें किसी प्रकार का सन्देह नहीं है।

प्रश्न—तब 'आत्मा' कौन है ?

उत्तर—'अज्ञान' और उसके 'समस्त कार्यों' को जो 'अपनी सत्ता' से प्रत्यक्षतया भासित करता है—अर्थात् 'मम अज्ञानम्', 'मम अहङ्कारः', 'मम बुद्ध्यादिः'—इस प्रकार से ज्ञान कराता है, 'वही' आत्मा है। वह 'स्वप्रकाश' तथा 'चिद्रूप' होने से उसका 'स्मरण' या 'विस्मरण' होना कभी सम्भव नहीं है। क्योंकि 'नित्य स्वप्रकाश, अनुभवरूप अपने आत्मा' का स्मरण अथवा 'विस्मरण' नहीं हुआ करता। अनेक शास्त्रवचन, 'देह' से लेकर 'अज्ञान' तक के पदार्थों से विलक्षण (भिन्न) 'स्वप्रकाश चिद्रूप साक्षी' को बता रहे हैं। अतएव वह (आत्मा) अकर्ता है।

---

१. दर्शयति—इति स्यात्।

स चात्माऽसङ्गः "असङ्गोऽयं पुरुषः" "असङ्गो न हि सज्जत" इत्यादि श्रुतेः। अत एवाकर्त्ता सः। तदुक्तम् भगवता—

"प्रकृत्यैव च कर्म्माणि क्रियमाणानि सर्वशः। यः पश्यति तथात्मानमकर्त्तारं स पश्यती"ति॥
"अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते"॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते। सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत"॥

इति च। तस्मादात्माऽसङ्गश्चिद्रूपः स्वप्रकाशोऽकर्ता।

कस्तर्हि कर्त्तेति चेद् ? अहङ्कार इति वदामः। साभासान्तःकरणमहङ्कारः। कस्तर्ह्यात्मनोऽहङ्करोमीति कर्त्तृत्वानुभवः ? अहङ्कारचिदात्मनोरितरेतराविवेकेनान्योन्याध्यासात्सः।

तस्मादात्मनि कर्त्तृत्वाद्यनुसन्धानमयथार्थात्मस्मरणमित्याह—**आत्मनीति**। न च "कर्त्ता शास्त्रार्थवत्त्वादि"ति सूत्रकारेणात्मनः कर्त्तृत्वप्रतिपादनात् तस्मिन् कर्त्तृत्वानुसन्धानस्य कथमयाथार्थ्यमिति वाच्यम्, तत्र सोपाधिकात्मन एव कर्त्तृत्वप्रतिपादनात्। "यथा च तक्षोभयथे' त्युत्तराधिकरणे तेनैव शुद्धस्यात्मनः कर्त्तृत्वापवादादन्यथा "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवदि"त्युत्तरसूत्रविरोधापत्तेः। न चात्मनः कर्त्तृत्वं प्रतिपाद्य पुनस्तदपवादे सूत्रकारस्य किम्प्रयोजनं "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वर"मिति न्यायादिति वाच्यम्, आत्मनः सोपाधिकं कर्त्तृत्वमपि नास्तीति वदतः साङ्ख्यस्य निराकरणार्थं तदात्मनोऽस्तीति प्रसाध्य, तच्च कर्त्तृत्वमात्मनः पारमार्थिकमिति वदतो नैयायिकादेर्निराकरणार्थमुत्तरसूत्रे कर्त्तृत्वमपोद्यते। अन्यथा स्ववाक्यविरोधः श्रुतिस्मृतिविरोधश्च प्रसज्येत। तस्मादात्मनः कर्त्तृत्वप्रतिपादनं तदपवादश्चेति द्वयमर्थवदेव। तस्मादात्मनि कर्त्तृत्वाद्यनुसन्धानस्यायथार्थत्वमुपपन्नमेवेति भावः।

•

शास्त्र-वचनों से स्पष्ट हो रहा है कि 'आत्मा', असङ्ग है, चिद्रूप है, स्वप्रकाश है, और अकर्ता है।

प्रश्न—तब 'कर्ता' कौन है ?

उत्तर—'अहङ्कार' ही कर्ता है।

प्रश्न—'अहङ्कार' कौन है ?

उत्तर—'साभास अन्तःकरण' ही अहङ्कार है।

प्रश्न—'आत्मा' को 'अहं करोमि' इत्याकारक जो 'कर्तृत्वानुभव' होता है, वह क्या है ?

उत्तर—परस्पर के अविवेकवश 'अहंकार' और 'चिदात्मा' का जो 'अन्योऽन्याध्यास' होता है, 'वही', उसका 'कर्तृत्वानुभव' कहा जाता है। वस्तुतः 'कर्तृत्व' धर्म से रहित 'आत्मा' में 'कर्तृत्वबुद्धि' रूप अयथार्थ अनुभवजन्य संस्कार' से उत्पन्न होनेवाली जो 'कर्तृत्व' की स्मृति होती है, उसी को 'अयथार्थ आत्मस्मृति' कहते हैं।

शङ्का—'कर्ता शास्त्रार्थवत्त्वात्'—(ब्र० सू० २।३।१४।३३) कर्त्रधिकरण में उक्त सूत्र से 'आत्मा' ही कर्ता है, 'बुद्धि' कर्त्री नहीं है, क्योंकि कर्ता के अपेक्षित उपायों का बोध करनेवाला विधिशास्त्र सार्थक है। यदि 'बुद्धि' कर्त्री है, और 'फल' का भोग करनेवाला 'आत्मा' है—ऐसा कहा जाय, तो तथोक्त विधिशास्त्र निरर्थक हो जायगा। इसलिए 'बुद्धि'; कर्त्री नहीं है, किन्तु 'आत्मा' कर्ता है।

अभिप्राय यह है कि 'बुद्धि' परिणामिनी है। उस कारण क्रियावेशात्मक कर्तृत्व, उसमें हो सकता है। 'आत्मा' तो असंग है। अतः उक्त कर्तृत्व की उसमें सम्भावना नहीं की जा सकती, इस प्रकार जो सांख्यवादियों ने कहा है, वह असंगत है, क्योंकि करणत्वेन प्रसिद्ध 'बुद्धि' में कर्तृत्वशक्ति की कल्पना करना उचित नहीं है। क्योंकि कुठार आदि में ऐसा नहीं देखा जाता है। 'बुद्धि' को कर्त्री माना जाय तो अन्यकरण की कल्पना करनी होगी, तब 'कर्ता' ही न मानो—यह कहना भी उचित न होगा। क्योंकि कर्मकाण्ड में याग आदि व्यापार और वेदान्त में श्रवणादिव्यापार तथा लोक में कृषि आदि व्यापार सर्वदा 'कर्ता' की अपेक्षा करते हैं। इसलिये 'जीवात्मा' कर्ता है, यह स्वीकार करना चाहिये। इस प्रकार सूत्रकार ने 'आत्मा' में कर्तृत्व का प्रतिपादन किया है। एवं च उसके कर्तृत्व के अनुसन्धान को 'अयथार्थ' कैसे कहा जा रहा है ?

समा०—उक्त आशंका ठीक नहीं है, क्योंकि सूत्रकार ने सोपाधिक आत्मा का ही 'कर्तृत्व' प्रतिपादन किया है। सूत्रकार ने अग्रिम तक्षाधिकरण में बताया है कि जैसे लोक में 'बढ़ई', बसूला आदि साधनों की अपेक्षा करके 'कर्ता' होता हुआ दुःखी होता है, और उनकी अपेक्षा न करके स्वरूपतः अकर्ता तथा सुखी होता है, वैसे ही 'आत्मा' भी 'बुद्धि' आदि करणों की

स्मृतिभिन्नं ज्ञानमनुभूतिः। सा च द्विविधा—यथार्थाऽयथार्था चेति। यथार्थानुभूतिः प्रमा सा निरूपिता ॥४॥

●

ननु स्वप्नस्याप्ययथार्थस्मृतित्वात्कुतो न गृह्यत इत्यत आह—**स्वप्नस्त्विति**। रथं पश्यामीत्यनुभवादिति भावः। **न स्मृतिरिति** तथोल्लेखाभावादिति भावः ॥ ३ ॥

स्मृतिं निरूप्य क्रमप्राप्तामनुभूतिं लक्षयति—**स्मृतीति**। स्मृतित्वावच्छिन्नं स्मृतिभिन्नज्ञानमनुभूतिरनुभव इत्यर्थः। स्मृतावतिव्याप्तिवारणाय **स्मृतिभिन्न**मित्युक्तम्, घटादावतिव्याप्तिवारणाय **ज्ञानमिति**। तां विभजते—**सा चेति**। प्रथमां व्युत्पादयति—**यथार्थेति**। यथार्था चासावनुभूतिश्चेति कर्म्मधारयः। तस्या याथार्थ्यं नामाबाधितार्थविषयत्वं, तद्वति तत्प्रकारकत्वं वा। न च निर्विकल्पकज्ञानस्य निष्प्रकारत्वादव्याप्तिरिति वाच्यम्, अशाब्दनिष्प्रकारकस्य तस्याप्रमाणिकत्वेनानङ्गीकारात्।

●

अपेक्षा करके 'कर्ता' एवं 'संसारी' होता है। और उनकी अपेक्षा न करके स्वभावतः अकर्ता, परमानन्दघन ही है। विधिशास्त्र तो कर्तृत्व के विना उपपन्न न होकर कर्तृत्व को सिद्ध करता है। परन्तु कर्तृत्व की स्वाभाविकता को सिद्ध नहीं करता। इससे सिद्ध हुआ कि आत्मा के कर्तृत्व से 'असंगत्व' श्रुति का विरोध नहीं है। निष्कर्ष यह है—पूर्वपक्षी का कहना है कि पूर्वाधिकरण में सिद्ध किया हुआ 'कर्तृत्व', आत्मा में वास्तविक है, कल्पित नहीं है। उसपर सिद्धान्ती कहता है—'असङ्गोह्ययं पुरुषः'—श्रुति से आत्मा में 'कर्तृत्व' धर्म का सम्बन्ध बाधित ज्ञात होता है। एवं च जैसे जपाकुसुम के सान्निध्य से स्फटिक में 'रक्तत्व' का अध्यास होता है, वैसे ही अन्तःकरण की सन्निधि से 'आत्मा' में 'कर्तृत्व' अध्यस्त है, वास्तविक नहीं है। इस प्रकार इस उत्तराधिकरण में उसी सूत्रकार ने शुद्ध आत्मा के कर्तृत्व का बाध बताया है। अन्यथा इस अधिकरण के साथ विरोध होगा—'अनुज्ञापरिहाराधिकरण' में (ब्र० सू० २।३।१७।४८) 'मित्रं सेव्यम्'—मित्र का सेवन करना चाहिये, 'शत्रवः परिहर्तव्याः'—शत्रुओं से दूर रहना चाहिये, इस प्रकार के विधि, निषेध सर्वत्र 'आत्मा' के अखण्डैकरस होने पर भी 'देह' के साथ तादात्म्य-सम्बन्ध से संगत होते हैं। जैसे अग्नि के एक होने पर भी श्मशान को 'अग्नि' परिहरणीय है, अन्य अग्नियाँ परिहरणीय नहीं हैं। वैसे ही यहाँ पर भी है।

शंका—पहले तो 'आत्मा' के कर्तृत्व को बताया, तदनन्तर उसका बाध (अपवाद = निषेध) करने में सूत्रकार का क्या प्रयोजन (उद्देश्य) है ? एक लौकिक नियम है—'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्'—इस नियम के विरुद्ध आचरण सूत्रकार ने किया।

समा०—आत्मा में सोपाधिक कर्तृत्व भी नहीं है—इस प्रकार कहने वाले सांख्यवादी के निराकरणार्थ, 'आत्मा' में सोपाधिक कर्तृत्व है—इसे सिद्ध किया। तदनन्तर वह 'कर्तृत्व', आत्मा में पारमार्थिक (वास्तविक) है—यह कहने वाले नैयायिकों के निराकरणार्थ अगले सूत्र से उक्त कर्तृत्व का निषेध कर दिया है। अन्यथा 'स्ववाक्यविरोध और श्रुति-स्मृतिविरोध' भी प्रसक्त होगा। अतः आत्मा के 'कर्तृत्व' का प्रतिपादन और उसका निषेध (अपवाद) दोनों ही सार्थक हैं, व्यर्थ नहीं है। तस्मात् आत्मा में किया जाने वाला जो कर्तृत्वादि का अनुसन्धान है, उसकी 'अयथार्थता को उपपन्न करना ही चाहिये।

शंका—स्वप्न में जो 'पदार्थज्ञान' होता है, वह भी 'अयथार्थ-स्मृति' रूप ही है। तब उस स्वाप्नज्ञान को 'अयथार्थ-स्मृति' के रूप में क्यों नहीं कहा ?

समा०—स्वप्न में होने वाला ज्ञान (स्वाप्नज्ञान) 'स्मृति' रूप नहीं है, अपितु 'अनुभव' रूप ही है। क्योंकि 'स्वाप्नज्ञान' यदि—'स्मृति' रूप होता, तो स्वप्न में लोगों को 'स रथः'—वह रथ है—इस प्रकार से ही 'रथादि' पदार्थों का ज्ञान होता, किन्तु वैसा ज्ञान किसी को होता नहीं है। अपितु मैं रथ को देखता हूँ—इस प्रकार का ही अनुभव लोगों को स्वप्न में होता है। उस कारण 'स्वप्नज्ञान' अनुभवरूप ही है, स्मृतिरूप नहीं है। इस रीति से स्मृति का निरूपण यहाँ तक किया गया ॥३॥

अब क्रमप्राप्त 'अनुभूति' को बताते हैं—

पूर्वोक्त स्मृतिज्ञान से भिन्न जो ज्ञान है, उसे 'अनुभूति' कहते हैं, और इसी अनुभूति को 'अनुभव' भी कहते हैं। जैसे 'अयं घटः'—'इदं रजतम्'—इत्यादि 'ज्ञान', उस 'स्मृतिज्ञान' से भिन्न होने के कारण 'अनुभव' रूप हैं।

यदि 'ज्ञानमनुभूतिः'—इतना ही लक्षण करें तो 'स्मृतिज्ञान' में 'अनुभवलक्षण की अतिव्याप्ति हो जायगी। उस अतिव्याप्ति के निवारणार्थ 'अनुभूतिलक्षण' में 'स्मृतिभिन्नम्'—पद का रखना आवश्यक है। यदि 'स्मृतिभिन्नमनुभूतिः'—इतना ही

नन्वभिनवोत्पन्न-घटाद्यसविकल्पकस्य जन्यविशेषणज्ञानजन्यत्वस्य वक्तव्यत्वेन निर्विकल्पकत्वसिद्धिरिति चेन्न, विशेषण-सन्निकर्षादेव तदुपपत्तेः। अन्यथातिप्रसङ्गाद्विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वे मानाभावाच्च। न च दण्डीति ज्ञाने विशेषणज्ञानस्य विशिष्टज्ञानत्वावच्छेदेनान्वयव्यतिरेकाभ्यां कारणत्वस्य क्लृप्ततयान्यत्रापि तदस्त्विति वाच्यम्, दण्डीति ज्ञानस्य विशिष्टवैशिष्ट्या-वगाहिज्ञानत्वेन तत्र विशेषणतावच्छेदकप्रकारकज्ञानस्यैव कारणतयाऽन्वयव्यतिरेकयोरन्यथाऽसिद्धत्वेन विशेषणज्ञानस्य तत्त्वे मानाभावात्। तस्मादशाब्दनिष्प्रकारकज्ञानमप्रामाणिकमेवेति न काप्यव्याप्तिः। न च शाब्दनिष्प्रकारकप्रमायामव्याप्तिरिति वाच्यम्, अस्य व्यावहारिकप्रमालक्षणत्वेन तस्यालक्ष्यनिष्प्रकारकप्रमात्वाद्[1]। अतो यथार्थानुभूतिः प्रमेति निरवद्यम्। आद्यव्याख्याने सर्वसाधारणम्[2]।

तर्हि सा प्रमा निरूपणीयेत्याकाङ्क्षायामाह—सेति। द्वितीयपरिच्छेद इति शेषः॥ ४॥

•

'अनुभूति का लक्षण' करें तो 'स्मृतिज्ञान' से भिन्न जो 'घट' आदि पदार्थ हैं, उनमें 'अनुभूतिलक्षण' की अतिव्याप्ति होगी। उसके निवारणार्थ 'अनुभूतिलक्षण' में 'ज्ञानम्' पद रखा गया है।

अब उस 'अनुभूति' का विभाग बताते हैं—**वह 'अनुभूति', (१) यथार्थ, और (२) अयथार्थ के भेद से दो प्रकार की होती है।** अनुभूति का याथार्थ्य यही है कि 'अबाधितार्थविषयत्व' होना। अर्थात् **अबाधित अर्थ को विषय करनेवाली जो 'प्रमा' है, उसे, 'यथार्थानुभूति' कहते हैं।** अथवा 'तद्वति तत्प्रकारकत्व' होना भी 'याथार्थ्य' कह सकते हैं। अत एव अन्नंभट्ट ने 'तद्वति तत्प्रकारकोऽनुभवो यथार्थः, सैव प्रमा इत्युच्यते'—कहा है। 'तद्वति' इस सप्तम्यन्त विभक्ति में 'सप्तमी' का अर्थ, 'विशेष्यत्व' है, और 'तत्' शब्द का अर्थ, 'प्रकारीभूत धर्म' समझना चाहिये। तथा च 'तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं यथार्था-नुभवस्य लक्षणम्—यह निष्पन्न हुआ। अभिप्राय यह है कि सभी सविकल्पक ज्ञानों में एक 'विशेष्य' होता है, और एक 'प्रकार' होता है। 'प्रकार' को ही 'विशेषण' कहते हैं। जैसे 'अयं घटः'—इस ज्ञान में जो 'घटांश' है, उसमें 'घटत्व' तो 'प्रकार' है, और 'घट'—'विशेष्य' है। एवं च उक्त ज्ञान 'घटत्वप्रकारक घट विशेष्यक' है। 'घटत्वं प्रकारः, यस्मिन् ज्ञाने, तज्ज्ञानं घटत्वप्रकारकं भवति। यहाँ बहुव्रीहिसमास के कारण 'क' प्रत्यय हुआ है। इसी प्रकार 'घटो विशेष्यो तस्मिन् ज्ञाने, तज्ज्ञानं, घटविशेष्यकं भवति।

निष्कर्ष यह है कि तत्प्रकारक ज्ञान में जो 'विशेष्य' है, वह यदि 'तद्वत्' हो अर्थात् उस 'प्रकार' का 'अधिकरण' हो, तो वह ज्ञान, 'यथार्थ होगा। और 'विशेष्य' यदि 'तद्वत्' न हो तो वह ज्ञान 'अयथार्थ' कहलायगा। ग्रन्थकार ने **'अबाधितार्थ को विषय करनेवाली 'प्रमा' को 'यथार्थ अनुभूति' कहा है।**

शंका—'निर्विकल्पज्ञान' तो निष्प्रकारक होता है। अतः उसमें लक्षण को अव्याप्ति होगी।

समा०—'अशाब्द निष्प्रकारक निर्विकल्पक ज्ञान', 'अप्रामाणिक' रहने से वह स्वीकार नहीं है।

शंका—'अभिनव उत्पन्न घट' तो 'सविकल्प' नहीं है। क्योंकि 'सविकल्पक' तो 'जन्यविशेषणज्ञानजन्य' होता है। अतः 'निर्विकल्पकत्व' की स्वयं ही सिद्धि हो जाती है।

समा०—ऐसी बात नहीं है। 'विशेषण-सन्निकर्ष' से ही 'निर्विकल्पक' की उपपत्ति हो जाती है। अन्यथा अतिप्रसङ्ग होगा, और 'विशेषणज्ञान' को 'विशिष्टज्ञान' के प्रति 'हेतु' मानने में कोई प्रमाण नहीं है।

शंका—'दण्डी'—इस 'विशेषण ज्ञान' में 'विशिष्टज्ञानत्वावच्छेदेन' अन्वय-व्यतिरेक के बलपर 'कारणता' सुनिश्चित रहने से, अन्यत्र भी वैसा ही मानना चाहिये।

समा०—'दण्डी'—यह ज्ञान, 'विशिष्ट-वैशिष्ट्यावगाही' ज्ञान है। उसमें 'विशेषणतावच्छेदक प्रकारज्ञान' ही कारण रहने से 'अन्वय-व्यतिरेक' तो अन्यथासिद्ध है। अतः 'विशेषण ज्ञान' को 'विशिष्ट ज्ञान' के प्रति हेतु मानने में कोई प्रमाण नहीं है। एवं च 'अशाब्द निष्प्रकारक ज्ञान' को अप्रामाणिक ही कहना उचित है। अतः कहीं भी 'अव्याप्ति' नहीं हो रही है।

शंका—शाब्द निष्प्रकारक प्रमा में अव्याप्ति होगी।

समा०—ऐसी शंका मत करो। यह लक्षण, 'व्यावहारिक प्रमा' का है। 'निष्प्रकारक प्रमा', उसका लक्ष्य ही नहीं है। अतः उसमें लक्षण के अव्याप्त होने का प्रश्न ही नहीं है। एवं च 'यथार्थानुभूतिः प्रमा'—यह लक्षण, निर्दुष्ट है। अतः उस 'प्रमा' का निरूपण करना चाहिये, यह आकांक्षा होने पर कहते हैं—**उसे तो द्वितीय परिच्छेद में बता चुके हैं॥ ४॥**

---

१. तस्या अलक्ष्यत्वात्—इति पाठः कल्प्यते। २. याथार्थ्यमिति शेषः।

बाधितविषयानुभूतिरयथार्था। सापि द्विविधा—संशयो निश्चयश्चेति। एकस्मिन् धर्म्मिणि भासमाने[1] विरुद्धनाना-कोटिकज्ञानं संशयः एकस्मिन् धर्म्मिणि स्वाकारविरुद्धधर्म्मद्वयवैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं संशय इति केचित्।

स च द्विविधः—प्रमाणसंशयः प्रमेयसंशयश्चेति। तत्र प्रमाणगतासम्भावनाप्रमाणसंशयः। यथाऽनभ्यासदशायां

•

द्वितीयाया लक्षणमाह—**बाधितेति**। विषयाभावप्रमा बाधस्तद्विषयो बाधितः स विषयो यस्याः सा तथा। प्रमायामति-व्याप्तिवारणायाद्यविशेषणमयथार्थस्मृतावतिव्याप्तिवारणाय द्वितीयम्, तां विभजते—**सापीति**। संशयं लक्षयति—**एकस्मिन्निति**। एकैकस्मिन्धर्म्मिणीत्यर्थः। अन्यथैते आम्रा वा पनसा वेति समूहालम्बनसंशयेऽव्याप्तिः स्यात्। स्थाणुपुरुषाविति समूहालम्बनभ्रमेऽति-व्याप्तिवारणाय भासमानेत्युक्तम्। समूहालम्बनप्रमायामतिव्याप्तिवारणाय विरुद्धेत्युक्तम्। ननूक्तलक्षणसंशयस्य धर्म्यंशमायामतिव्याप्ति रित्याशङ्क्य मतान्तरेण लक्षणमाह—**एकेति**। एकैकस्मिन्विशेष्ये स्वस्य संशयत्वेनाभिमतस्य योऽयमाकारः स्थाणुत्वादिस्तद्विरुद्धो योऽयमाकारः पुरुषत्वादिस्तदुभयवैशिष्ट्यावगाहि यज्ज्ञानं स्थाणुर्वा पुरुषो वेत्यादि विरुद्ध[2] ज्ञानं संशय इत्यर्थः। अस्मिन् पक्षे एककोटिकज्ञानमपि क्वचित्संशयाभिमतमिति **केचिन् नृसिंहाश्रमश्रीचरणाः**। संशयं विभजते—**स चेति**। प्रमाणसंशयं व्युत्पादयति—

•

अब दूसरे प्रकार की अनुभूति अर्थात् 'अयथार्थानुभूति' का निरूपण करते हैं—**बाधित अर्थ है विषय जिसका ऐसी जो 'अनुभूति', उसे 'अयथार्थानुभूति' कहते हैं।** विषय के 'अभाव' को जो प्रमा (ज्ञान), उसे 'बाध' कहते हैं। उस बाध का जो विषय होता है, उसे 'बाधित' कहते हैं। वह बाधित अर्थ है विषय जिसका ऐसी जो अनुभूति, उसे 'अयथार्थ अनुभूति' कहते हैं।

अयथार्थानुभूति के लक्षण में 'यदि बाधितार्थ विषय' पद को न रखा जाय तो 'प्रमाज्ञान' में अतिव्याप्ति होगी। उसके निरासार्थ, लक्षण में 'बाधितार्थविषय' पद को रखा गया है। अब यदि लक्षण में से 'अनुभूति' पद को हटा दें तो 'अयथार्थस्मृति' में लक्षण की अतिव्याप्ति होगी। क्योंकि 'अयथार्थस्मृति', 'बाधित अर्थ' को विषय करती है। अतः 'बाधितार्थविषयानुभूतिः अयथार्थानुभूतिः'—यह लक्षण, निर्दुष्ट है। इसका उदाहरण—जैसे, 'नेदं रजतम्'—इस बाधज्ञान के विषय होने से 'शुक्ति-रजतादि' पदार्थ, बाधित होता है। उस बाधित अर्थ (पदार्थ) को विषय करनेवाली 'इदं रजतम्' इत्यादि अनुभूति को 'अयथार्था-नुभूति' कहा गया है।

उस अयथार्थ अनुभूति के भी (१) संशय, और (२) निश्चय के भेद से दो प्रकार होते हैं। उनमें से 'संशय' को बताते हैं—एक ही 'धर्मी' में भासमान जो परस्पर विरुद्ध नाना कोटियाँ हैं, उनको विषय करने वाले ज्ञान को 'संशय' कहते हैं। एक ही का अर्थ है प्रत्येक। अन्यथा 'एते आम्रा वा पनसा वा'—इस समूहालम्बन संशय में अव्याप्ति होगी। 'स्थाणु-पुरुषौ'—इस समूहालम्बन भ्रम में अव्याप्ति के वारणार्थ लक्षण में 'भासमान' कहा गया है। 'समूहालम्बन प्रमा' में अतिव्याप्ति के वारणार्थ 'विरुद्ध' कहा गया है।

उक्त संशय-लक्षण की 'धर्म्यंशप्रमा' में अतिव्याप्ति होगी। अतः मतान्तर के अनुसार लक्षण करते हैं—**एक-एक विशेष्य में संशय के रूप में अभिमत जो अपना यह 'स्थाणुत्वादि' आकार है, उसके विरुद्ध जो 'पुरुषत्वादि' आकार है, उन दोनों का अर्थात् उभय वैशिष्ट्यावगाहि 'ज्ञान'—'स्थाणुर्वा पुरुषो वा' इत्यकारक जो विरुद्ध ज्ञान—को 'संशय' कहते हैं—ऐसा कुछ लोगों का कहना है।** इस पक्ष में 'एक—कोटिक ज्ञान' भी क्वचित् 'संशय' माना जा सकता है—ऐसा श्री नृसिंहाश्रमश्रीचरणों का कहना है।

इस उक्त संशय के भेद को बताते हैं—यह संशय भी (१) प्रमाणसंशय और (२) प्रमेयसंशय के भेद से दो प्रकार का होता है। 'प्रमाण' के प्रति रहनेवाली 'असम्भावना' को 'प्रमाणसंशय' कहते हैं, और 'प्रमेय' के प्रति रहनेवाली असंभावना को 'प्रमेयसंशय' कहते हैं।

'प्रमाणसंशय' भी **(१) प्रमासंशय, (२) 'करणसंशय'** के भेद से दो प्रकार का होता है। प्रमाण से जन्य 'प्रमाज्ञान' में जो संशय होता है, उसे 'प्रमासंशय' कहते हैं, और 'प्रमाण के स्वरूप' में जो संशय होता है, उसे 'करण संशय' कहते हैं। **पहले न देखे हुए किसी स्थान में स्थित 'जल' के साथ चक्षुरिन्द्रिय का सम्बन्ध होने पर (जल को देखकर) 'इदं जलम्—इत्याकारक प्रमा ज्ञान, मनुष्य को होता है। परन्तु उस मनुष्य ने उस स्थान में पहिले कभी 'जल' देखा नहीं था। उस कारण**

---

१. भासमानविरुद्धः इत्यपि पाठः।   २. अविरुद्धम् इति पाठेन भाव्यम्।

ममोत्पन्नं जलज्ञानं प्रमाणं नवेति संशयः । स च प्रमाणनिश्चयात् निवर्त्तते ।।५।।

प्रामाण्यनिश्चयस्तु स्वत एव । प्रामाण्यं नाम तद्वति तत्प्रकारकत्वम् । तस्य स्वतस्त्वं नाम—यावत् स्वाश्रयग्राहक-

●

तत्रेति । तयोर्मध्य इत्यर्थः । प्रमाणसंशयो द्विविधः प्रमाणसंशयः करणसंशयश्च । तत्राद्यमाह—**यथेति ।** प्रमाणसंशयः कस्मान्निवर्त्तत इत्याशङ्क्याह—**स चेति** ॥ ५ ॥

ननु प्रमाणस्य भावः प्रामाण्यं तदत्र प्रमात्वमेव किं जातिरुपाधिर्वा ? नाद्यः, अव्याप्यवृत्तित्वात् । न द्वितीयः, तस्या-निर्वचनादित्याशङ्क्य प्रामाण्यलक्षणं वक्तुं—प्रामाण्यं परतो गृह्यते इति नैयायिकाः । स्वतो गृह्यत इति मीमांसकाः । तत्र परमतं दूषयितुं स्वमतमाह—**प्रामाण्येति ।** एवकारेण प्रामाण्यस्य परतोग्राह्यत्वं प्रतिषिध्यते । तल्लक्षणमाह—**प्रामाण्यं नामेति ।** प्रामाण्यनिश्चयस्तु स्वत एवेत्युक्तम् । तत्र प्रामाण्यस्वरूपं निरूप्य स्वतस्त्वं निर्वक्ति—**तस्येति ।** प्रामाण्यस्येत्यर्थः । स्वशब्देन प्रामाण्यमुच्यते तस्याश्रयो ज्ञानं तद्ग्राहिका यावती सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्यक्षरयोजना ।

अत्र भट्टा एवं योजयन्ति—प्रथममयं घट इति ज्ञानं जायतेऽनन्तरं मया घटो ज्ञात इति घटस्य ज्ञातत्वं प्रतिसन्धीयते तया ज्ञाततया ज्ञानमनुमीयते । तथाहि—घटो ज्ञानविषयः ज्ञाततावत्त्वात् सुखादिवदित्यनेन प्रकारेण ज्ञाततालिङ्गकानुमित्या घटज्ञानं तन्निष्ठं घटत्ववति घटत्वप्रकारकं प्रामाण्यं च गृह्यते । ततश्च स्वाश्रयस्य घटज्ञानस्य ग्राहिका यावती सामग्री ज्ञाततालिङ्ग-कानुमितिरूपा तद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमिति ।

तच्चिन्त्यम्, ज्ञानविषयतातिरिक्तज्ञाततायां प्रमाणाभावात् । ज्ञातो घट इति प्रतीते-र्ज्ञानविषयत्वेनाप्युपपत्तेः । अन्यथा दृष्टो घटो ध्वस्तोघट इति प्रतीत्या दृष्टत्वादिकमपि सिध्येत । किञ्चातीतो घटो ज्ञात इत्यनुसन्धानेन तत्रापि ज्ञातता सिध्येत् । न चेष्टापत्तिर्निराश्रयधर्म्मासम्भवात् । किञ्च[1] ज्ञातताया अपि ज्ञानविषयतया तत्रापि ज्ञातता स्यात् तथानवस्थाप्रसङ्गः ।

●

जैसे 'जलज्ञान' होने पर भी यह 'ज्ञान, प्रमा है या नहीं'—इस प्रकार से उस जल ज्ञान के 'प्रमात्व' को तथा 'प्रमात्व के अभाव' को विषय करनेवाला 'संशय' उत्पन्न होता है—इस संशय को 'प्रमासंशय' कहते हैं। इस 'प्रमासंशय' की निवृत्ति 'प्रमाज्ञान के प्रमात्व के निश्चय' से ही होती है।

'तद्वति तत्प्रकारकत्वं प्रमात्वम्'—ज्ञाननिष्ठ उस धर्म वाले पदार्थ में जो तद्धर्मविषयकत्व है—वही 'प्रमात्व' है। जैसे 'अयं घटः'—इस ज्ञान मे 'घटत्वधर्मवाले घट' में जो 'घटत्वधर्मविषयकत्व' है—वही प्रमात्व है। इसी 'प्रमात्व' को 'प्रामाण्य' भी कहते हैं ॥ ५ ॥

शंका—'प्रमाणस्य भावः प्रामाण्य'—प्रमाण के धर्म को प्रामाण्य कहते हैं। वह 'प्रमाणत्व'—जातिरूप धर्म है या उपाधिरूप धर्म है ? जातिरूप धर्म उसे कह नहीं सकते, क्योंकि वह 'अव्याप्यवृत्ति' है। उसे उपाधिरूप धर्म भी नहीं कह सकते, क्योंकि उसका निर्वचन नहीं किया जा सकता।

समा०—प्रामाण्य का लक्षण बताने के लिये नैयायिकों का कहना है—'प्रामाण्य' परतोग्राह्य है। किन्तु मीमांसकों का कहना है—'प्रामाण्य' स्वतोग्राह्य है। वेदान्ती भी 'प्रामाण्य' को स्वतोग्राह्य कहते हैं। उसी तरह प्रमाज्ञाननिष्ठ 'प्रमात्व' को नैयायिकों ने परतोग्राह्य कहा है, और मीमांसक तथा वेदान्तियों ने 'प्रमात्व' को स्वतोग्राह्य कहा है। प्रमात्व को स्वतोग्राह्यता में भी मीमांसकों के अनेक मत हैं।

अन्यान्य दर्शनकारों का मत खण्डन करने के लिये अपना मत बता रहे हैं—**प्रमाणों का 'प्रामाण्य निश्चय' तो स्वतः ही है, परतः नहीं है।** 'एव' कारका प्रयोग करके 'प्रामाण्य' के 'परतोग्राह्यत्व' का प्रतिषेध बताया है। अब प्रामाण्य के स्वरूप को बता रहे हैं—**प्रामाण्य का स्वरूप तो 'तद्वति तत्प्रकारकत्वम्' है। अब उसके 'स्वतस्त्व' का निर्वचन करते हैं—प्रामाण्य का 'स्वतस्त्व' यह है—'यावत्स्वाश्रयग्राहकग्राह्यत्वम्'—यहाँ 'स्व' शब्द से 'प्रामाण्य' का ग्रहण करना चाहिये। उस प्रामाण्य का आश्रयभूत जो 'ज्ञान', उस ज्ञान को ग्राहिका जितनी भी सामग्री है, उससे 'ग्राह्यत्व' अर्थात् ग्रहण किया जाना ही 'स्वतस्त्व' है।** इस विषय को भाट्टानुयायी विद्वान् इस रीति से बताते हैं—प्रथमतः 'अयं घटः'—यह ज्ञान होता है। तदनन्तर 'मया घटो-ज्ञातः'—इस प्रकार से 'घट' का 'ज्ञातत्व' प्रतीत होता है। उस प्रतीयमान 'ज्ञातत्व' से (ज्ञातता से) 'ज्ञान' का अनुमान किया जाता है। अतः 'ज्ञान' को भाट्टविद्वान् 'अनुमेय' मानते हैं। 'घटो ज्ञानविषयः ज्ञाततावत्त्वात् सुखादिवत्'—इस रीति से 'ज्ञातता-

१. ग, घ, तस्मादिति सा० ।

ग्राह्यत्वम् स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिचैतन्यं ते तन्निष्ठं प्रामाण्यं गृह्यत इति स्वतः प्रामाण्यम् ॥६॥

●

तस्माद् ज्ञाततया अप्रामाणिकत्वात्तल्लिङ्गकानुमित्या ज्ञानं प्रामाण्यञ्च गृह्यत इत्यसङ्गतमेतदिति मन्यमानाः प्रभाकरास्तु एवं वर्णयन्ति—घटमहं जानामीत्येवं रूपं ज्ञानं घटं कर्मतया भासयति, आत्मानमाश्रयत्वेन, स्वं स्वप्रकाशत्वेन। ततश्च स्वाश्रयज्ञानस्य ग्राहिका यावती सामग्री स्वप्रकाशज्ञानरूपतया स्वनिष्ठप्रामाण्यं गृह्यत इति प्रामाण्यस्य स्वतस्त्वम्।

तदपि न; जन्यज्ञानस्य स्वप्रकाशत्वे मानाभावात्। अन्यज्ञानेनान्यग्रहणेऽतिप्रसङ्गात् तदिदमप्यसङ्गतमितिमन्यमाना मुरारिमिश्रा एवं योजयन्ति—घटेन्द्रियसन्निकर्षानन्तरमयं घट इति ज्ञानं जायते, पश्चाद् घटमहं जानामीत्यनुव्यवसायेन व्यवसाय-ज्ञानं गृह्यते, विषय[1]-विषयज्ञानं व्यवसायः। विषयिविषयज्ञानमनुव्यवसायः। ततश्च स्वाश्रयस्य व्यवसायस्य ग्राहिका यावती सामग्री अनुव्यवसायादिरूपा तया व्यवसायनिष्ठं प्रामाण्यं गृह्यते। तेन तस्य पूर्वमुपस्थितत्वादिदमेव प्रामाण्यस्वतस्त्वमिति।

तत्तुच्छम्, अनुव्यवसायस्य प्रागेव निरस्तत्वात्तेन तद्ग्रहणायोगात्। मनसः प्रामाण्यस्य निराकृतत्वेनात्मनः संयोगा-सम्भवस्योक्तत्वाच्च ज्ञानस्य मानसप्रत्यक्षत्वायोगात्। तस्मादिदमसङ्गतमित्यभिप्रेत्य स्वपक्षे स्वतस्त्वलक्षणं योजयति—**स्वाश्रयेति**। ततश्च स्वाश्रयस्य ग्राहिका यावतीसामग्री साक्षिरूपा उद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमित्याह—**इति स्वतः प्रामाण्यमिति**।

●

लिङ्गक अनुमिति' से 'घटज्ञान' जाना जाता है। और उस ज्ञान में रहने वाले 'घटत्ववति घटत्वप्रकारक' 'प्रामाण्य' को जाना जाता है।

एवञ्च स्वाश्रय (प्रमाण्य के आश्रय) भूत 'घटज्ञान' ग्राहिका 'ज्ञाततालिंगक अनुमिति' रूप जो सामग्री; उससे ग्राह्य होना ही 'प्रामाण्य' का 'स्वतस्त्व' है। इस रीति से भाट्टमीमांसकों ने 'स्वतस्त्व' का निरूपण किया है।

किन्तु भाट्टमीमांसकों का उक्त कथन चिन्त्य प्रतीत हो रहा है। क्योंकि ज्ञानविषयता के अतिरिक्त 'ज्ञातता' के अस्तित्व में कोई प्रमाण नहीं है। 'ज्ञातो घटः'—यह प्रतीति तो उसे 'ज्ञानविषयत्व' मानकर भी उपपन्न हो सकती है। अन्यथा 'दृष्टो घटः, ध्वस्तो घटः'—इस प्रतीति से 'दृष्टत्व' (दृष्टता) आदि की सिद्धि भी की जा सकेगी।

किञ्च 'अतीतो घटो ज्ञातः'—इस अनुसन्धान से उस अतीत घट में भी, 'ज्ञातता' की सिद्धि की जा सकेगी। उसे यदि 'इष्टापत्ति' कहेंगे, तो वह नहीं चल सकेगा, क्योंकि कोई 'धर्म', निराश्रय नहीं रह सकता।

किञ्च—'ज्ञातता' भी 'ज्ञनविषयता' रूप होने से उस पर भी 'ज्ञातता' होगी, तब 'अनवस्था' प्रसंग प्राप्त होगा। उस-कारण 'ज्ञातता' के अप्रामाणिक रहने से 'ज्ञाततालिंगकअनुमिति' से 'ज्ञान' और उसका 'प्रामाण्य' दोनों का ग्रहण होता है।

उक्त विचार को असंगत कहने वाले प्राभाकरमीमांसकों का कहना यह है कि 'घटमहं जानामि'—इत्याकारक ज्ञान 'घट' को 'कर्मतया' (कर्मत्वेन रूपेण=कर्म के रूप में) प्रतीत कराता है, और 'आत्मा' को 'आश्रयत्वेन रूपेण' (आश्रय के रूप में) प्रतीत कराता है। और 'स्वं' को (अपने को) 'स्वप्रकाशत्वेन रूपेण' प्रतीत कराता है। एवञ्च स्वाश्रयज्ञान की ग्राहिका जितनी जो स्वप्रकाशज्ञानरूप सामग्री है, उसी से स्वनिष्ठ (ज्ञाननिष्ठ) प्रामाण्य का ग्रहण किया जाता है—यही 'प्रामाण्य' का 'स्वतस्त्व' है। इसप्रकार से प्रभाकर मीमांसक ने 'स्वतस्त्व' का निरूपण किया है।

किन्तु यह विचार भी असंगत ही है, क्योंकि 'जन्यज्ञान' को 'स्वप्रकाश' कहने में कोई प्रमाण नहीं है। तथा 'अन्य-ज्ञान' से 'अन्य का ग्रहण' (किसी भी ज्ञान से किसी का भी ग्रहण) मानने पर 'अतिप्रसंग' भी होगा

उस कारण उक्त विचार को मुरारिमिश्र ने असंगत मानकर वे अपने विचार के अनुसार 'स्वतस्त्व' का निरूपण करते हैं—'घट' के साथ 'इन्द्रिय' का सन्निकर्ष (सन्बन्ध) होने के अनन्तर 'अयं घटः' यह ज्ञान उत्पन्न होता है। पश्चात् 'घटमहं जानामि'—इस अनुव्यवसाय से 'व्यवसायज्ञान' का ग्रहण होता है। 'विषयविषयकज्ञानं व्यवसायः'—विषयविषयकज्ञान को 'व्यवसाय' कहते हैं और विषयिविषयक ज्ञान को 'अनुव्यवसाय' कहते हैं। एवञ्च—स्वाश्रयरूप व्यवसाय की ग्राहिका जो अनुव्यवसायरूप सामग्री, उससे व्यवसायज्ञान-निष्ठ प्रामाण्य का ग्रहण किया जाता है, क्योंकि वह सामग्री, पूर्व उपस्थित होती है—यही प्रामाण्य का 'स्वतस्त्व' है।

१. एकं विषयपदमधिकम्। विषयविषयकं ज्ञानमितिवार्थः।

नन्वेवं भवतामपि साक्षिणि किं प्रमाणम् ? न तावत्प्रत्यक्षं, रूपादिहीनत्वेन चक्षुराद्यगोचरत्वात्, मनसोऽनिन्द्रियत्वेनाप्रमाणत्वाच्च। नाप्यनुमानं, तद्व्याप्यलिङ्गाभावात्। नचाहङ्कारोऽनात्मा दृश्यत्वाद् घटवदित्यनुमानेन पक्षधर्म्मताबलात् साक्षिसिद्धिरिति वाच्यम्। पक्षतावच्छेदकानिर्वचनेनानुमानानवतारात्। अतएवाहङ्कारः स्वव्यतिरिक्तद्रष्टृको दृश्यत्वात् संमतवदिति परास्तम्। नाप्युपमानं, तस्य नियतविषयत्वात्। नाप्यागमस्तस्यार्थान्तिरपरत्वात्। नाप्यर्थापत्तिस्तेन विनातदनुपपत्तेरभावात्। नच सुखादिव्यवहारः स्वगोचरज्ञानं विनाऽनुपपन्नस्सन् तत्कल्पयति, तच्च साक्षिचैतन्यमेवेत्यर्थापत्त्या तत्सिद्धिरिति वाच्यम्। सुखादिव्यवहारस्यात्मसमवेतसुखादिविषयज्ञानेनोपपन्नत्वेनार्थापत्तेरन्यथोपपत्तेः। तस्मात् प्रमाणाभावस्य तवापि तुल्यत्वात् कथं प्रामाण्यस्य साक्षिग्राह्यत्वं स्वतस्त्वं वेत्यतः प्रामाण्यस्य परतस्त्वमभ्युपगन्तव्यम्।

परतस्त्वं नाम—यावत् स्वाश्रयग्राहकातिरिक्तग्राह्यत्वम्। तथाहि—प्रामाण्याश्रयव्यवसायज्ञानमनुव्यवसायेन गृह्यते। प्रामाण्यत्वं त्वनुमानेन गृह्यते। तथाहि—विवादगोचरापन्नं व्यवसायज्ञानं प्रमाणं भवितुमर्हति समर्थप्रवृत्तिजनकत्वाद्व्यतिरेकेणाप्रमाणज्ञानवदिति। अथवा प्रथमानुव्यवसायेन व्यवसायो गृह्यते। द्वितीयानुव्यवसायेन तन्निष्ठं प्रामाण्यम्। अन्यथा प्रथमोत्पन्नं जलज्ञानं प्रमाणमप्रमाणं वेति संशयो न स्यादनभ्यासदशायाम्। तस्मात्परत एव प्रामाण्यग्रह इति।

●

इस विचार को भी 'वेदान्ती' असंगत बता रहा है। क्योंकि 'अनुव्यवसाय' का निरसन, पहले ही कर चुके हैं। उस कारण उससे (अनुव्यवसाय से) व्यवसायज्ञाननिष्ठप्रामाण्य का ग्रहण होना असम्भव है। 'मन' के प्रामाण्य का भी निराकरण कर दिया गया है। उस कारण 'आत्मा' का उसके साथ संयोग होना सम्भव नहीं है; यह भी बता चुके हैं। अतः 'ज्ञान' का 'मानसप्रत्यक्ष' होना भी असम्भव है। एवञ्च मुरारिमिश्र का मत भी असंगत है।

अब वेदान्ती अपने मत के अनुसार 'स्वतस्त्व' के लक्षण को बता रहा है—प्रमात्वधर्म का आश्रयभूत जो 'प्रमाज्ञान' है, उस 'प्रमाज्ञान' के जितने भी ग्राहक हैं, उनसे उस 'प्रमा' में जो 'ग्राह्यता' है, उसी को 'प्रमा' की 'स्वतोग्राह्यता कहते हैं। जैसे—'प्रमात्व' धर्म का आश्रयभूत जो 'अयं घटः'—यह वृत्तिज्ञान है, उस वृत्तिज्ञान को ग्रहण करने वाला जो 'साक्षी चैतन्य' है, उस 'साक्षीचैतन्य' ने उस 'वृत्तिज्ञान' के समान ही उसके 'प्रमात्व' का भी ग्रहण किया है। यही 'प्रमात्व' में 'स्वतोग्राह्यता' है। इसी को ग्रन्थकार ने बताया है कि स्वाश्रय की ग्राहिका जितनी साक्षीरूप सामग्री है, उससे ग्राह्य होना ही 'प्रामाण्य' का 'स्वतस्त्व' है—यही 'स्वतः प्रामाण्य' है।

शंका—आपके अभिमत 'साक्षी' में भी 'क्या प्रमाण है ? उसके होने में 'प्रत्यक्षप्रमाण' का होना सम्भव नहीं है। क्योंकि वह 'साक्षी', रूपरहित रहने से 'चक्षुरादि इन्द्रिय' का विषय नहीं है। 'मानसप्रत्यक्ष' यदि कहें, तो वह भी सम्भव नहीं है। क्योंकि 'मन' की इन्द्रियता का खण्डन हो चुका है। अतः वह अनिन्द्रिय (इन्द्रिय नहीं) है, उस कारण वह अप्रमाण है। अनुमानप्रमाण से भी 'साक्षी' की सिद्धि नहीं हो सकेगी, क्योंकि उससे व्याप्य कोई लिंग नहीं है। यदि यह अनुमान करें कि 'अहंकारः अनात्मा दृश्यत्वात् घटवत्'—इस अनुमान से 'पक्षधर्मता' के बल पर 'साक्षी' की सिद्धि की जा सकती है। किन्तु यह कहना भी उचित न होगा, क्योंकि 'पक्षतावच्छेदक' का अभी निर्वचन न हो सकने से 'अनुमान'[1] ही नहीं किया जा सकता।

'उपमानप्रमाण' से भी 'साक्षी' की सिद्धि नहीं हो सकेगी, क्योंकि 'उपमान', में नियतविषयता रहती है। 'आगमप्रमाण' से भी उसकी सिद्धि नहीं हो सकती, क्योंकि वह 'आगम' अर्थान्तरपरक है। 'अर्थापत्तिप्रमाण' से भी उसकी सिद्धि नहीं होगी, क्योंकि उसके विना (साक्षी के विना) उसकी (ग्राह्यत्व की) अनुपपत्ति नहीं हो रही है। यदि यह कहें कि सुख-दुःखादि व्यवहार स्वविषयकज्ञान के विना अनुपपन्न होकर, उसकी (साक्षी की) कल्पना करा देगा—इस प्रकार अर्थापत्ति प्रमाण से 'साक्षी' की सिद्धि हो जायगी।

किन्तु यह कहना भी उचित नहीं है, क्योंकि 'सुख-दुःखादि' व्यवहार को उपपत्ति भी 'आत्मसमवेतसुखादिविषयकज्ञान' से ही हो सकती है, उस कारण 'अर्थापत्ति' की अन्य प्रकार से उपपत्ति लग जाती है। अतः 'प्रमाणाभाव' हमारे जैसा ही तुम्हें भी है। उस कारण वादी-प्रतिवादी दोनों की स्थिति तुल्य ही है। तब 'प्रामाण्य' का 'साक्षिग्राह्यत्व और स्वतस्त्व' कैसे हो सकता है ? अतः 'प्रामाण्य' का 'परतस्त्व' तुम्हें भी स्वीकार कर लेना चाहिये।

'परतस्त्व' का अर्थ है—स्वाश्रयग्राहकसामग्री के अतिरिक्त सामग्री से ग्राह्य होना। तथा हि—'प्रामाण्य' के आश्रयभूत 'व्यवसायज्ञान' को 'अनुव्यवसायज्ञान' से ग्रहण किया जाता है। किन्तु 'प्रामाण्य' को 'अनुमान' से ग्रहण किया जाता

१. अत एव 'अहङ्कारः स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात्'—यह खण्डित हो जाता है।

अत्रोच्यते "साक्षी चेता केवलो निर्गुणश्चेति" "वाचः साक्षी मनसः साक्षी" "एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः" "ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत" इत्यादिश्रुतिस्मृतिशतेभ्योऽज्ञानतत्कार्य्यावभासकः साक्षी चिदात्मावश्यमभ्युपगन्तव्योऽन्यथोदाहृतश्रुतिस्मृतीनामप्रामाण्यप्रसङ्गात्। न च तासामर्थान्तरपरत्वमिति वाच्यम्, उपक्रमादिलिङ्गैस्तत्रैव तात्पर्य्यस्य निश्चितत्वेन तदयोगात्।

तथानुमानादपि तत्सिद्धिः। तथाहि—अन्तःकरणतद्धर्म्मातिरिक्ताहमनुभवगोचरोऽहमनुभवे प्रकाशमानो वा स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वाद् घटवत्। न चाप्रयोजकत्वं निरुपाधिकत्वसहचारभङ्गप्रसङ्गात्। एवं सुखादिव्यवहारस्य स्वगोचरज्ञानं विनानुपपत्त्यासाक्षिसिद्धिः। न चात्मसमवेतसुखादिविषयज्ञानेन तद्व्यवहार इति वाच्यम्। जन्यज्ञानस्यात्मसमवेतत्वासिद्धेः। अन्यथा "ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे"ति श्रुतिविरोधप्रसङ्गात्। जीवात्मसमवेतस्य नित्यज्ञानस्य त्वयानङ्गीकराच्च। किञ्चात्मनः संयोगस्य सम्बन्धिनो निरवयवतया निराकृतत्वेनात्मनि ज्ञानोत्पत्तेरसम्भवेन ज्ञानस्यात्मसमवेतत्वासिद्धेश्च। तस्मादनन्यथासिद्धश्रुतिस्मृत्यनुमानार्थापत्तिस्वानुभवैः साक्षी सिद्ध इति तेन प्रामाण्यं गृह्यत इति स्वतस्त्वं प्रामाण्यस्य सम्भवति।

एतेन प्रामाण्यस्य परतोग्राह्यत्वं प्रत्युक्तम्। अनुव्यवसायस्य प्रागेव निरस्ततया तेन ज्ञानं गृह्यत इति दूरत एव; द्वितीयानुव्यवसायेन प्रामाण्यग्रहो दूरतरः। किञ्च निश्चितप्रामाण्येनानुव्यवसायेन प्रामाण्यं गृह्यत आहोस्विदनिश्चितेन वा? नाद्योऽन-

•

है। तथा हि—विवादविषयीभूत व्यवसायज्ञान, प्रमाण होने योग्य है, समर्थप्रवृत्ति का जनक होने से, व्यतिरेक से अप्रमाणज्ञान के समान[1]।

अथवा—'प्रथम अनुव्यवसाय' से 'व्यवसाय' का ग्रहण किया जाता है, और 'द्वितीय अनुव्यवसाय' से 'तन्निष्ठप्रामाण्य' का ग्रहण किया जाता है। अन्यथा अनभ्यास दशा में 'प्रथमोत्पन्न जलज्ञान' प्रमाण है या अप्रमाण है? यह संशय हो नहीं होगा। अतः प्रामाण्यग्रह 'परतः' ही होता है।

इस पर वेदान्ती कहता है—सैकड़ों श्रुति-स्मृतियों से 'अज्ञान', और उसके 'कार्य' के अवभासक 'साक्षीचिदात्मा' को अवश्य ही स्वीकार करना होगा। अन्यथा श्रुति-स्मृतियों को 'अप्रमाण' कहने का प्रसंग आवेगा। यदि श्रुति-स्मृतियों को अर्थान्तरपरक कहें, तो वह भी ठीक नहीं है। क्योंकि उपक्रमादिलिङ्गों से 'उसी में' उनके तात्पर्य का निश्चय किया गया है, उस कारण उन्हें अर्थान्तरपरक भी नहीं कह सकते।

उसी प्रकार [2]'अनुमान' से भी 'साक्षी' की सिद्धि होती है। तथाहि—अन्तःकरण, और उसके धर्मों से भिन्न 'अहम्' इत्याकारक अनुभव का विषय होनेवाला, अथवा 'अहम्'—इत्याकारक अनुभव में प्रकाशमान रहनेवाला, स्वव्यतिरिक्त द्रष्टा जिसका विषय है दृश्य होने से; घट के समान—इस अनुमान से 'साक्षी' की सिद्धि हो जाती है। इसे 'अप्रयोजक' भी नहीं कह सकते। अन्यथा 'निरूपाधिक' सहचार (व्याप्ति)का भंग होने का प्रसंग आवेगा।

इसी प्रकार स्वविषयक ज्ञान के विना 'सुखादिव्यवहार' की अनुपपत्ति से भी 'साक्षी' की सिद्धि होती है। यदि यह कहें कि 'आत्मसमवेत सुखादिविषयों' के ज्ञान से 'सुखादिव्यवहार' हो सकेगा—किन्तु यह कहना उचित नहीं होगा। क्योंकि 'जन्यज्ञान', 'आत्मसमवेत' नहीं हुआ करता। अन्यथा 'ह्रीधीर्भीरित्येतत्सर्वं मन एव'—इस श्रुति के साथ विरोध होगा, और नित्यज्ञान को 'जीवात्मसमवेत' तुमने नहीं माना है।

किञ्च—'आत्मा' के 'संयोग' का 'सम्बन्धी' निरवयव रहने से उसका निराकरण कर देने के कारण 'आत्मा' में 'ज्ञान' की उत्पत्ति का होना सम्भव नहीं है। उस कारण 'ज्ञान' का 'आत्मसमवेतत्व' सिद्ध नहीं हो रहा है। अतः अनन्यथासिद्ध श्रुति-स्मृति-अनुमान-अर्थापत्ति और स्वानुभव के आधार पर 'साक्षी' सिद्ध हो रहा है। उस 'साक्षी' से ही 'प्रामाण्य' का ग्रहण किया जाता है। इसलिए 'प्रामाण्य' का 'स्वतस्त्व' सम्भव हो जाता है। उस कारण 'प्रामाण्य' के परतोग्राह्यत्व' का खण्डन हो जाता है।

'अनुव्यवसाय', का निरसन पहिले ही कर देने के कारण, उससे 'ज्ञान' का ग्रहण होता है—यह कहना तो दूर ही है, और 'द्वितीय अनुव्यवसाय' से 'प्रामाण्य' का ग्रहण होता है—यह कहना तो और भी दूर है। अतः न 'अनुव्यवसाय' से 'ज्ञान' का ग्रहण होता है, और न 'द्वितीय अनुव्यवसाय' से 'प्रामाण्य' का ग्रहण होता है।

१. 'विवादगोचरापन्नं व्यवसायज्ञानं प्रमाणं भवितुमर्हति समर्थप्रवृत्तिजनकत्वात्, व्यतिरेकेण अप्रमाणज्ञानवदि'त्यनुमानप्रयोगः।

२. 'अन्तःकरणतद्धर्मातिरिक्ताहमनुभवगोचरः, अहमनुभवे प्रकाशमानो वा स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात् घटवदि'त्यनुमानप्रयोगः।

वस्थापत्तेः। तथाहि—अनुव्यवसायस्य स्वतः प्रामाण्यनिश्चयेऽपसिद्धान्तापत्तेः। अन्येन चेत्तस्यान्येन तस्याप्यन्येनेत्यनवस्थापत्तेः। न च विषयान्तरासञ्चारादनवस्थोपरम इति वाच्यम्। तर्ह्यनिश्चितप्रामाण्येनानुव्यवसायेन प्रामाण्यग्रह इत्यायातं ततश्चानुव्यवसायेनैव प्रमाणग्रहोऽस्तु। किं तेनापराद्धम्।

नन्वेवं ज्ञानग्राहकेणानुव्यवसायेनैव व्यवसायप्रामाण्यनिश्चये इदं ज्ञानं प्रमाणं न वेति संशयो न स्यादिति चेन्न। दोषवशेन तदुपपत्तेः। न च निश्चितेऽर्थे दोषवशेन कथं संशय इति वाच्यम्। दोषघटितसामग्र्यास्तादृशस्वभावत्वात्। अन्यथा प्राच्यां प्रतीचित्वभ्रमसंशयान्यतरानन्तरं सूर्योदयादिनेयं प्राचीति निश्चयानन्तरं पुनः संशयाद्यभावप्रसङ्गात्। नचेष्टापत्तिस्तयोरनुभवसिद्धत्वात्। तस्मादप्रामाण्यशङ्काशून्येनाद्येनैवानुव्यसायेन प्रामाण्यनिश्चयः। अन्यथा सर्वत्रानाश्वासप्रसङ्गात्।

एतेन द्वितीयो विकल्पः परास्तः। अनिश्चितस्य तद्ग्राहकत्वायोगात् अप्रामाण्यशङ्काशून्यस्यैव ज्ञानस्य विषयनिश्चायकत्वाच्च।

अतएवानुमानेन प्रामाण्यं गृह्यत इत्यपास्तमुक्तदोषसत्त्वात्। नन्वस्तु तर्ह्याद्येनैवानुव्यवसायेन प्रामाण्यग्रहः? न, तदसम्भवस्योक्तत्वात्। तस्मात्साक्षिणैव वृत्तिज्ञाननिष्ठं प्रामाण्यं गृह्यते ॥६॥

●

शंका—क्या 'निश्चित प्रामाण्य वाले अनुव्यवसाय' से 'प्रामाण्य' का ग्रहण किया जाता है, अथवा 'अनिश्चित प्रामाण्य-वाले अनुव्यवसाय' से 'प्रामाण्य' का ग्रहण किया जाता है?

समा०—यदि 'निश्चित प्रामाण्यवाले अनुव्यवसाय' से 'प्रामाण्यग्रह' होता है कहोगे, तो 'अनवस्था' होगी। तथाहि—'अनुव्यवसाय' का 'स्वतःप्रामाण्यनिश्चय' मानने पर 'अपसिद्धान्त' होगा। और 'अनुव्यवसाय' में 'परतः प्रामाण्यनिश्चय' मानने पर अर्थात् किसी 'अन्य' से प्रामाण्य का निश्चय होना स्वीकार करने पर उस 'अन्य' का भी किसी 'अन्य' से, उसका भी प्रामाण्य निश्चय किसी अन्य से—इस प्रकार की अनवस्था होगी।

यदि यह कहो कि 'विषयान्तर का सञ्चार' जहाँ रुक जायगा वहीं पर 'अनवस्था' का भी विश्राम हो जायगा। तब 'अनवस्था' नहीं रहेगी।

किन्तु यह कहना भी सङ्गत नहीं है। क्योंकि तुम्हारे कथन के अनुसार 'अनिश्चित प्रामाण्यवाले अनुव्यवसाय' से 'प्रामाण्यग्रह' होता है—यह प्रतीत हो रहा है। तब उसी से (अनुव्यवसाय से) 'प्रमाणग्रह' भी होता है, यह मान लीजिये, उसने क्या अपराध किया है?

शंका—इस प्रकार 'ज्ञानग्राहक अनुव्यवसाय' से ही 'व्यवसाय' (ज्ञान) के 'प्रामाण्य' का निश्चय मानने पर 'इदं ज्ञानं प्रमाणं न वा'—यह संशय नहीं हो सकेगा।

समा०—यह शंका ठीक नहीं है। 'दोषवशात्' संशय उपपन्न हो सकेगा।

शंका—'निश्चित अर्थ' में दोषवशात् 'संशय' कैसे हो सकेगा?

समा०—उक्त शंका ठीक नहीं है। क्योंकि 'दोषघटित सामग्री' में 'संशयोत्पादन' करने का स्वभाव होता है। अन्यथा 'प्राची' में 'प्रतीचित्व'—का भ्रम अथवा संशय दोनों में से किसी एक के होने पर 'सूर्योदय' आदि को देखकर 'इयं प्राची' यह निश्चय हो जाता है, तदनन्तर पुनः संशय या भ्रम न होने का प्रसङ्ग प्राप्त होगा। यदि संशयाभाव के प्रसङ्ग को 'इष्टापत्ति' कहोगे तो अनुभव विरोध होगा। क्योंकि पुनः पुनः संशय अथवा भ्रम का होना सर्वानुभवसिद्ध है। अतः 'अप्रामाण्य शंका' से रहित आद्य (प्रथम) अनुव्यवसाय से ही प्रामाण्य का निश्चय हो जाता है—यह मान लेना चाहिये। अन्यथा सर्वत्र अनाश्वास (अविश्वास) का प्रसङ्ग प्राप्त होगा।

इस कथन से द्वितीय विकल्प का भी खण्डन हो जाता है। क्योंकि अनिश्चित प्रामाण्यवाला अनुव्यवसाय, 'प्रामाण्य' का ग्राहक हो ही नहीं सकता। अप्रामाण्य से शंकारहित ज्ञान ही 'विषय' का निश्चायक होता है। अत एव 'अनुमान' से 'प्रामाण्य-ग्रह' होता है—इस कथन में उक्त दोषों के रहने से उसका भी खण्डन हो गया।

शंका—अच्छा, तो 'आद्य अनुव्यवसाय' से ही 'प्रामाण्यग्रह' को मान लीजिये।

समा०—वैसा नहीं मान सकते, क्योंकि हम पहले ही बता चुके हैं कि वह असम्भव है। अतः 'साक्षी' द्वारा ही 'वृत्तिज्ञाननिष्ठ प्रामाण्य' का ग्रहण होता है—यही निश्चय किया जा रहा है ॥ ६ ॥

अप्रामाण्यं तु परतो गृह्यते। तच्च तदभाववति तत्प्रकारकत्वम्। तदभाववत्त्वस्य वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यतया परत एवाप्रामाण्यं गृह्यते ॥७॥

•

नन्वेवं सत्यप्रमाण्यमपि स्वत एव गृह्यतामुक्तन्यायस्य तत्रापि तुल्यत्वादित्याशङ्क्याह—**अप्रामाण्यमिति**। किं तदप्रामाण्यमित्यत आह—**तच्चेति**। अस्ति च शुक्त्यादाविदं रजतमिति ज्ञाने रजताभाववति रजतप्रकारकत्वं, वस्तुतो रजतस्य तत्राभावात्। न च भूतले घट इति प्रमायामतिव्याप्तिरिति वाच्यम्। भूतलघटयोरेकचैतन्याध्यस्तत्वेन तद्वति तत्प्रकारकतया तत्प्रमायां तदभावात्, शुक्तौ तु तत्समानसत्ताकतया रजतस्य तत्रासत्त्वेन प्रातीतिकरजतसत्त्वेऽपि नातिव्याप्तिर्नत्वसम्भव इत्यर्थः। **वृत्तीति**। नेदं रजतं किन्तु शुक्तिरिति बाधात्मकाधिष्ठानतत्त्वतत्साक्षात्कारवृत्त्या तदभाववत्त्वस्यानुपस्थितत्वेन तत्साक्षिणा ग्रहीतुं न शक्यते, अन्यथातिप्रसङ्गात्। तस्मादप्रामाण्यं परत एव गृह्यते ज्ञानग्राहिकातिरिक्तसामग्र्येत्यर्थः।

तथाहि—ज्ञानानन्तरं प्रवृत्तिर्द्विधा संवादिप्रवृत्तिर्विसंवादिप्रवृत्तिश्चेति। आद्या फलपर्य्यन्ता। द्वितीया तच्छून्या। तत्र विसंवादिप्रवृत्त्याऽप्रामाण्यं ज्ञानस्यानुमीयते। तथाहि—विवादास्पदं शुक्तौ रजतज्ञानमप्रमाणं[1] भवितुमर्हति विसंवादिप्रवृत्तिजनकत्वाद्व्यतिरेकेण प्रमावदिति ज्ञानग्राहिकातिरिक्तेनानुमानेन ज्ञानस्याप्रामाण्यं निश्चीयते। ज्ञानं तु साक्षिणा गृह्यतेऽप्रामाण्यं पुनरनुमानेन, तस्मात्परत एवाप्रामाण्यं गृह्यत इति भावः।

•

शंका—जैसे 'प्रमाज्ञान' का 'प्रमात्व स्वतोग्राह्य है, वैसे ही 'इदं रजतम्'—इस 'अप्रमाज्ञान' का 'अप्रमात्व' भी 'स्वतोग्राह्य' क्यों नहीं है ?

समा०—'अप्रमात्व' धर्म तो 'परतः ग्राह्य ही होता है, वह 'स्वतोग्राह्य' नहीं है। 'ज्ञान' में जो उस धर्म के अभाव वाले 'वस्तु' में 'तद्धर्मविषयकत्व' है, उसे 'अप्रमा' कहते हैं। जैसे 'इदं रजतम्'—इस ज्ञान में वस्तुतः 'रजत के अभाववाली शुक्ति' में जो 'रजतविषयकत्व' है—यही 'अप्रमात्व' है। **'शुक्ति' में 'अप्रमात्व' के घटक रजत' का जो 'अभाव' है, उस 'अभाव' को 'वृत्तिज्ञान' अपना विषय नहीं बनाता है। उस कारण उस 'रजताभावघटित' अप्रमात्व को वह 'साक्षी चैतन्य' भी ग्रहण नहीं करता। वह 'साक्षी चैतन्य' केवल उस 'अप्रमात्वधर्म' के आश्रयभूत 'ज्ञान मात्र' को ही ग्रहण करता है। अतः अप्रामाण्य परतः ही ज्ञेय है।**

वह, 'साक्षी चैतन्य' यदि कदाचित् 'वृत्तिज्ञान' के अविषयभूत 'अर्थ' को भी प्रकाशित करता हो तो 'घटाकारवृत्ति' के समय 'पटादिकों' का भी 'साक्षी चैतन्य' से प्रकाश होना चाहिये था, किन्तु होता नहीं। अतः 'प्रमात्व' के समान वह 'अप्रमात्व' स्वतोग्राह्य नहीं है, अपितु 'परतोग्राह्य' ही है। 'अप्रमात्वधर्म' का आश्रयभूत जो 'अप्रमाज्ञान' है, उसकी 'ग्राहक सामग्री' से 'भिन्न सामग्री के द्वारा जिसमें ग्राह्यत्व होता है, वही 'अप्रमात्व' की [2]'परतो ग्राह्यता' कही जाती है। जैसे 'अप्रमात्वधर्म' का आश्रयभूत 'इदं रजतम्'—यह 'अप्रमाज्ञान' है। उस 'अप्रमाज्ञान' का ग्राहक तो 'साक्षी चैतन्य' है। वह 'साक्षी चैतन्य' उस 'अप्रमात्वधर्म' का ग्रहण नहीं करता, किन्तु 'साक्षी चैतन्य' से भिन्न जो 'अनुमानरूप सामग्री' हैं, उससे उस 'अप्रमात्व धर्म' का ग्रहण किया जाता है—यही उस 'अप्रमात्व' में 'परतोग्राह्यत्व' है।

शंका—किन्तु 'भूतले घटः'—इस प्रमा ज्ञान में अतिव्याप्ति होगी।

समा०—भूतल और घट दोनों 'एक ही चैतन्य' में अध्यस्त होने से 'तद्वति तत्प्रकारकत्व' ही उस प्रमाज्ञान में है, उस कारण 'भूतले घटः'—इस प्रमाज्ञान में 'तदभाववति तत्प्रकारकत्व' न होने से अतिव्याप्ति नहीं है। किन्तु 'शुक्ति' में तत्समानसत्ताकत्व' के रूप में 'रजत', उस शुक्ति में नहीं है, इसलिये वहाँ का 'रजतज्ञान' अप्रमाण है। उसमें 'प्रातीतिक रजत' के रहने पर भी न अतिव्याप्ति है और न असंभव ही है।

'नेदं रजतम्, किन्तु शुक्तिः'—इत्याकारक बाधात्मक अधिष्ठानतत्त्व का साक्षात्कार करनेवाली 'वृत्ति' के होने से 'तदभाववत्त्व' की अनुपस्थिति है। उसके अनुपस्थित होने से उसका ग्रहण 'साक्षी' से भी नहीं किया जा सकता, अन्यथा अतिप्रसंग होगा। इसलिये 'अप्रामाण्य' का ग्रहण 'परतः' ही होता है। अर्थात् ज्ञानग्राहक सामग्री के अतिरिक्त सामग्री से होता

१. अप्रमेत्येवास्तु।

२. स्वाश्रयग्राहकातिरिक्तसामग्रीग्राह्यत्वम्परतोग्राह्यत्वम्'।

प्रामाण्यस्वतस्त्वपक्षे संशयो दोषवशादुपपद्यते—इत्ययं प्रमाणसंशयः।

वेदान्ताऽद्वितीये ब्रह्मणि प्रमाणं न वेति संशयः करणगताऽसम्भावना। सा च श्रवणेन निवर्त्तते, तच्च निरूपितम्। तदपि श्रवणं शारीरकप्रथमाध्यायपठनेन निष्पद्यते।

●

एवं प्रमा स्वत एवोत्पद्यते च। स्वतस्त्वं नामोत्पत्तौ ज्ञानसामान्यसामग्रीमात्रप्रयोज्यत्वम्। नचाप्रमायामतिव्याप्तिस्तस्यास्तदतिरिक्तदोषजन्यत्वात्। न च प्रमायामपि दोषाभावजन्यतया परतस्त्वापत्तिरिति वाच्यम्। परमते गुणजन्यत्वस्यैवोत्पत्तौ परतस्त्वेन विवक्षितत्वात्। तस्यास्माभिरनङ्गीकारात्। प्रमामात्रेऽनुगतगुणस्यासम्भवेन तस्याप्रामाणिकतया च प्रमायास्तज्जन्यत्वानुपपत्तेः। किञ्च दोषाभावस्यापि न प्रमाहेतुत्वमभावमात्रस्य श्रुत्या करणत्वप्रतिषेधात्[1]। किन्तु दोषाभावस्य परमते दण्डत्वादिवदनुकूलमात्रत्वम्। अपि च दोषस्यान्वयव्यतिरेकाभ्यां प्रमोत्पत्तिप्रतिबन्धकत्वेन तदभावस्य कारणत्वं न सम्भवत्येव। प्रतिबन्धकाभावस्य कार्य्यानुत्पादकस्याग्रिमसमयसम्बन्धविघटकतयावाऽन्यथासिद्धत्वात्। तस्मात्स्वत एव ज्ञानसामान्यसामग्रीमात्रात्प्रमोत्पद्यत इति सिद्धम्।

अप्रमा तु परत एवोत्पद्यते[2]। ज्ञानसामान्यसामग्र्यतिरिक्तस्य दोषस्यान्वयव्यतिरेकाभ्यामप्रमां प्रति कारणत्वावधारणाच्च तस्मादुत्पत्तावपि परत एवाप्रामाण्यमिति सर्वमवदातम्॥ ७॥

ननु प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वाङ्गीकारेऽनभ्यासदशायामिदं जलज्ञानं प्रमाणमप्रमाणं वेति संशयः कथं स्यान्निश्चितेऽर्थे संशयायोगादत आह—**प्रामाण्येति। स्वत** इति ज्ञानग्राहकग्राह्यत्वपक्ष इत्यर्थः। **दोषेति**। दोषघटितसामग्र्याः बलवत्त्वादप्रामाण्यसंशय उपपद्यते इत्यर्थः। एवमुत्पत्तौ ज्ञप्तौ च प्रामाण्यस्य स्वतस्त्वस्य निश्चितत्वात् प्रामाण्यनिश्चयेन संशयनिवृत्तिरुत्पद्यत इत्यभिप्रेत्योक्तं प्रामाण्यसंसयमुपसंहरति—**इतीति**।

●

है। तथाहि—'ज्ञान' होने के बाद 'प्रवृत्ति' दो तरह की होती है—(१) संवादि-प्रवृत्ति और (२) विसंवादि-प्रवृत्ति। पहली प्रवृत्ति 'जलप्राप्ति' तक और दूसरी प्रवृत्ति 'जल की अप्राप्ति' तक। उनमें 'विसवादि प्रवृत्ति' से 'ज्ञान' के अप्रामाण्व का अनुमान[3] किया जाता है। अतः ज्ञानग्राहकातिरिक्त अनुमान से ज्ञान के अप्रामाण्य का निश्चय किया जाने से परतस्त्व है। 'ज्ञान' का ग्रहण 'साक्षी' से किया जाता है, और 'अप्रामाण्य' का ग्रहण 'अनुमान' से किया जाता है। तस्मात् 'अप्रामाण्य' परतः ही है।

एवं 'प्रमा' स्वत[4] एव उत्पन्न होती है अर्थात् ज्ञानसामान्य की सामग्री से ही प्रयुक्त होती है; तो उस सामग्री से अतिरिक्त दोषजन्य है। 'प्रमा' में भी दोषाभावजन्यता रहने से 'परतस्त्व' की शंका नहीं करनी चाहिये। क्योंकि पूर्वपक्षी के मत में 'गुणजन्यत्व' ही परतस्त्वेन विवक्षित है। किन्तु हम सिद्धान्ती उसे स्वीकार नहीं करते। प्रमामात्र में अनुगत गुण का संभव न रहने से और उसके अप्रामाणिक रहने से भी 'प्रमा' में तज्जन्यत्व अनुपपन्न है।

किञ्च—'दोषाभाव' में 'प्रमाहेतुत्व' नहीं है। क्योंकि श्रुति ने अभावमात्र में 'करणत्व' का निषेध किया है। किन्तु पूर्वपक्षी के मत में 'दण्डत्व' की तरह 'दोषाभाव' में अनुकूलमात्रत्व ही स्वीकृत है।

अपि च—अन्वय-व्यतिरेक के द्वारा 'दोष' तो 'प्रमोत्पत्ति' में प्रतिबन्धक होने से उसके 'अभाव' में 'करणत्व' का होना संभव ही नहीं है। कार्य का अनुत्पादक प्रतिबन्धकाभाव तो अग्रिम समय के सम्बन्ध का विघटक होने से अन्यथा-सिद्ध ही है। तस्मात् ज्ञानसामान्यसामग्रीमात्र से ही 'प्रमा' स्वत एव उत्पन्न होती है; किन्तु 'अप्रमा' 'परत एव' उत्पन्न होती है। क्योंकि ज्ञानसामान्यसामग्री से भिन्न अतिरिक्त-दोषसामग्री से उत्पन्न होने के कारण, अन्वय-व्यतिरेक के द्वारा अप्रमा के प्रति वह कारण होती है। इसलिये उत्पत्ति में भी परत एवं अप्रामाण्य है, यह निश्चित होता है॥ ७॥

शंका—प्रामाण्य की उत्पत्ति और ज्ञप्ति में 'स्वतस्त्व' स्वीकार करने पर अनभ्यासदशा में 'इदं जलज्ञानं प्रमाणम् अप्रमाणं वा'—यह संशय कैसे हो सकेगा? क्योंकि अर्थ के निश्चित रहने पर 'संशय' नहीं हुआ करता। इसी को ग्रन्थकार बता रहे हैं—**'स्वतस्त्व पक्ष में अर्थात् 'ज्ञानग्राहकग्राह्यत्वपक्ष' में दोषघटित-सामग्री प्रबल रहने से 'प्रामाण्यसंशय' हो सकता है।** एवं 'उत्पत्ति' और 'ज्ञप्ति' में 'प्रामाण्य का स्वतस्त्व' निश्चित रहने से प्रामाण्य का निश्चय रहता है। उस कारण 'संशय' की निवृत्ति हो सकती है।

---

१. कारणत्वप्रतिषेधादिति च शक्यं वक्तुम्। २. एतेन सांख्यसौगतयोर्निरासस्ताभ्यामप्रामाण्यस्वतस्त्वसमाश्रयणात्।

३. विवादास्पदं शुक्तौ रजतज्ञानमप्रमाणं भवितुमर्हति, विसंवादिप्रवृत्तिजनकत्वात् व्यतिरेकेण प्रमावत् इत्यनुमानप्रयोगः।

४. स्वतस्त्वं नाम उत्पत्तौ ज्ञानसामान्यसामग्रीमात्रप्रयोज्यत्वम्।

प्रमेयगताऽसम्भावना द्विविधा—अनात्मगतात्मगता चेति। स्थाणुर्वा पुरुषो वेत्यनात्मसंशयः। आत्मसंशयोऽनेकविधः। तथाहि—ब्रह्माद्वितीयं सद्वितीयं वा। अद्वितीयत्वेऽपि आनन्दगुणकं वानन्दस्वरूपं वा इत्यादि परमात्मगतसंशयः। आत्मा देहाद्यतिरिक्तो वा न वा, देहाद्यतिरिक्तत्वेऽपि कर्त्ता वाऽकर्त्ता वा, अकर्तृत्वेऽपि चिद्रूपोऽचिद्रूपो वा, चिद्रूपत्वेऽपि आनन्दात्मको

●

इदानीं करणसंशयं निरूपयति—**वेदान्तेति**। सा कस्मान्निवर्त्तते इत्यपेक्षयामाह—**सा चेति**। तर्हि श्रवणं निरूप्यतामित्याकाङ्क्षायामाह—**तच्चेति**। द्वितीयपरिच्छेदे तात्पर्यनिरूपणावसरे इति शेषः। तच्च श्रवणं कुतो निष्पद्यत इत्याशङ्क्याह—**शारीरक इति**।

प्रमाणगतासम्भावनां द्विप्रकारां निरूप्य प्रमेयगताऽसम्भावनां निरूपयितुं विभजते—**प्रमेयेति**। केयमनात्मगताऽसम्भावनेत्याकाङ्क्षायामाह—**स्थाणुर्वेति**। अयं साधारणदर्शनजो विशेषदर्शनेन निवर्त्तते इति द्रष्टव्यम्। विप्रतिपत्तिजन्यात्मसंशयोऽनेकप्रकार इत्याह—**आत्मेति**। विरुद्धार्थप्रतिपादकानेकवचनं विप्रतिपत्तिः। सा भाष्यकारेण निरूपिता—"देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता लोकायतिकाश्च प्रतिपन्नाः। इन्द्रियाण्यात्मेत्यपरे[१]। मन आत्मेत्यन्ये[२]। क्षणिकं[३] विज्ञानमात्मेत्यपरे। शून्यमात्मेत्यपरे[४]। देहेन्द्रियादिव्यतिरिक्तः[५] संसारी कर्त्ता भोक्तेत्यन्ये[६]। आत्मा तु केवलं भोक्ता न तु कर्त्तेत्येके[७]। तदन्यः[८] सर्वज्ञः सर्वशक्तिरीश्वर इति केचित्। आत्मा तु भोक्ता स इत्येके[९]। एवं बहवो विप्रतिपन्ना" इत्येवम्। विप्रतिपत्तिवशाज्जायमानमनेकप्रकारमात्मसंशयं दर्शयति—**तथाहीत्यादीति**।

●

अभिप्राय यह है कि 'प्रमात्व की उत्पत्ति में तथा ज्ञान में' यदि 'स्वतस्त्व' स्वीकार करोगे तो 'यह जलज्ञान 'प्रमा' है अथवा 'अप्रमारूप है? यह संशय नहीं होना चाहिये। क्योंकि 'स्वतस्त्ववादी' के अनुसार 'ज्ञान' का 'प्रमात्व' (प्रामाण्य), 'साक्षी-चैतन्य' से गृहीत होने के कारण निश्चित ही है, तब निश्चित अर्थ में संशय होना उचित नहीं है।

इस पर कह सकते हैं कि अनभ्यासदशा में संशय के उत्पादक जो असंभावना, विपरीत भावना आदि दोष हैं, उन दोषों से घटित रहने वाली संशयसामग्री, उस 'प्रमात्वग्राहकसामग्री से प्रबल है। उस कारण अनभ्यासदशापन्न जलज्ञान में 'प्रमात्व' का निश्चय नहीं हो पाता अर्थात् अनिश्चय रहता है। अतः प्रमात्व में संशय का होना संभव है। इस प्रमासंशय की निवृत्ति, 'प्रमात्व' की उत्पत्ति तथा ज्ञप्ति में 'स्वतस्त्व' का निश्चय होने से हो जाती है। **इस प्रकार यह प्रमाणसंशय समझाया गया।**

अब 'करणसंशय' निरूपण करते हैं—'तत्त्वमसि'—आदि वेदान्तवाक्यप्रतिपादित 'अद्वितीय ब्रह्म' के होने में कोई 'प्रमाण' है अथवा नहीं?—इस प्रकार की वेदान्तवाक्यरूप प्रमाण में जो 'असंभावना' होती है, इसी को 'करणसंशय' कहते हैं। यह 'करण-गत' 'असंभावना' (करणसंशय), किससे निवृत्त होती है? वह 'करणगत संशय; ब्रह्मनिष्ठगुरू के मुख से वेदान्तशास्त्र के श्रवण करनेपर निवृत्त हो जाता है।

शंका—यदि करणगत संशय की निवृत्ति, वेदान्तश्रवण से होती है, तो 'श्रवण' का निरूपण करना चाहिये।

समा०—'श्रवण' के स्वरूप को द्वितीय परिच्छेद में तात्पर्य निरूपण के प्रसंग से बता चुके हैं।

शंका—वेदान्त के श्रवण से 'करणगत संशय' की निवृत्ति होती है, यह कैसे ज्ञात हुआ?

समा०—शारीरक मीमांसा के प्रथम अध्याय के अध्ययन से वह ज्ञात होता है।

यहाँ तक 'प्रमाणगत असंभावना' के दो प्रकारों को बताया गया।

अब 'प्रमेयगत असंभावना' का निरूपण करने के लिये उसका विभाग बताते हैं—प्रमाणजन्य ज्ञान का जो 'विषय' होता है, उसे 'प्रमेय' कहते हैं। उस 'प्रमेय' में जो 'संशय' उत्पन्न होता है, उसे 'प्रमेयसंशय' कहते हैं। **वह 'प्रमेयगत संशय' भी (१) अनात्मगत संशय और (२) आत्मगतसंशय'—के भेद से दो प्रकार का होता है। इनमें से 'अनात्मरूप जो स्थाणु आदि हैं, उनको देखकर 'स्थाणुर्वा पुरुषो वा'—इत्याकारक जो 'संशय' होता है, उसे 'अनात्मगत संशय' कहते हैं।** यह 'अनात्मगत संशय', 'साधारण धर्म' के दर्शन से उत्पन्न होता है। जैसे—स्थाणु तथा पुरुष के साधारणधर्म (साढे तीन हाथ परिमाण को उँचाई) को देखकर यह संशय उत्पन्न होता है। किन्तु 'स्थाणु' आदि के 'असाधारण-धर्मज्ञानरूप विशेष दर्शन' से उस संशय को

---

१. इन्द्रियाण्येव चेतनान्यात्मेत्यपर इति भाष्यपाठः। २. भाष्येऽत्रात्मपदं न। ३. विज्ञानमात्रं क्षणिकमिति भाष्ये। ४. आत्मपदं नास्ति भाष्ये। ५. अस्तीति पदमधिकं भाष्ये। ६. अपर इति भाष्ये। ७. भोक्तैव केवलं न कर्तेत्येक इति भाष्ये। ८. अस्ति तद्व्यतिरिक्त ईश्वर इति भाष्ये। ९. आत्मा स भोक्तुरित्यपर इति भाष्यपाठः।

वा न वेत्यादि जीवगतः संशयः, जीवस्य सच्चिदानन्दरूपत्वेऽपि परमात्मना सहैक्यं सम्भवति न वा, ऐक्येऽपि तज्ज्ञानं मोक्षसाधनं न वा, मोक्षसाधनत्वेऽपि तज्ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा केवलज्ञानं वेत्यैक्यगतसंशयः। अयं सर्वोऽपि संशयो मननेन तर्कात्मकेन निवर्त्तते ॥८॥

•

"सलिल एको द्रष्टाऽद्वैत"इत्यादि श्रुत्याऽद्वैतात्मावगम्यते। स चोपाधिभेदाद्द्विविधः—परमात्मा जीवात्मा चेति। तत्र मायोपाधिकः परमात्मा। स्थूलसूक्ष्मकारणशरीरोपाधिको जीवात्मा, स एव कर्त्ता भोक्ता च उपाधिविवेके, न द्वयं किन्तु शुद्धोऽद्वैतो भवति। तदुक्तम्—

"जीवात्मा परमात्मा चेत्यात्मा द्विविध ईरितः। चित्तादात्म्यात्त्रिभिर्देहैर्जीवः सन् भोक्तृतां व्रजेत् ॥
परमात्मा सच्चिदानन्दस्तादात्म्यं नामरूपयोः। गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नोभयम्" ॥

•

'निवृत्ति' होती है। 'स्थाणु' की 'स्थाणुता' का निश्चय कराने वाले जो वक्र कोटरादिक हैं, वे 'स्थाणु' के 'असाधारणधर्म' हैं। और 'पुरुष' का निश्चय करानेवाले जो हाथ, पैर, शिर आदि अवयव हैं, वे 'पुरुष' के 'असाधारणधर्म' हैं। इन असाधारण धर्मों के ज्ञान से उक्त 'संशय' की निवृत्ति हो जाती है। यहांतक 'अनात्मगत संशय' और उसकी निवृत्ति के उपाय बता दिये।

अब 'आत्मगत संशय' को बताते हैं—**यह 'आत्मगत संशय' 'विप्रतिपत्तिजन्य' होता है। अतएव 'अनेक प्रकार' का होता है।** वादियों के परस्पर विरुद्ध अर्थ के प्रतिपादक वचनों को 'विप्रतिपत्ति' कहते हैं। इस विप्रतिपत्ति को भगवान् भाष्यकार के वर्णनानुसार ही बता रहे हैं। (१) प्राकृत और लोकायतिकों (चार्वाकों) का कहना है कि चैतन्यविशिष्ट जो यह स्थूलदेह है, वही 'आत्मा' है।

(२) कुछ अन्य लोगों का कहना है कि 'इन्द्रिय' ही 'आत्मा' है।
(३) कुछ अन्य लोग कहते हैं कि 'मन' ही 'आत्मा' है।
(४) कुछ लोगों का कहना है कि क्षणिक विज्ञान ही आत्मा है।
(५) इनके अतिरिक्त अन्य लोग कहते हैं कि 'शून्य' ही आत्मा है।
(६) कुछ अन्य लोग कहते हैं देह तथा इन्द्रियादिकों से भिन्न, संसारी, कर्ता, भोक्ता 'आत्मा' है।
(७) कुछ लोग कहते हैं कि 'आत्मा' केवल 'भोक्ता' ही है, 'कर्ता' नहीं है।
(८) कतिपय लोगों का कथन है कि कर्ता, भोक्ता से भिन्न सर्वज्ञ सर्वशक्तिमान् ईश्वर ही 'आत्मा' है।
(९) कुछ अन्य लोग कहते हैं कि 'उपाधि' के सम्बन्ध से कर्ता, भोक्ता रहने पर भी 'आत्मा' तो वस्तुतः सिद्ध ही है। इस प्रकार से विप्रतिपन्न विचार वाले कितने ही लोग, विप्रतिपत्तिवशात् आत्मा के विषय में अनेक प्रकार के संशयों से ग्रस्त हैं।

'सलिल एको द्रष्टाऽद्वैत' इत्यादि श्रुति से 'आत्मा', यद्यपि वास्तव में 'एक, अद्वितीय' है। तथापि 'उपाधि' के भेद से परमात्मा और (२) जीवात्मा के भेद से वह दो प्रकार का माना गया है। उनमें से 'मायोपाधिक परमात्मा है अर्थात् महावाक्य में स्थित 'तत्' पद की अर्थरूप 'माया' से उपहित जो 'ब्रह्म', उसी का नाम 'परमात्मा' है। उसी प्रकार—'स्थूल-सूक्ष्म-कारण शरीरोपाधिको जीवात्मा'—'त्वम्' पद के अर्थरूप जो तीन शरीर हैं, उनसे उपहित जो चैतन्य है, उसी का नाम 'जीवात्मा' है। वही, उपाधि के अविवेक से कर्ता भोक्ता दोनों है, तथापि वह शुद्ध, अद्वैत है। एवञ्च पूर्वोक्त 'परमात्मा', 'तत्' पद का अर्थ है। उस तत् पदार्थरूप परमात्मा में अनेक प्रकार के संशय प्रदर्शित करते हैं—**वह 'ब्रह्म', अद्वितीय है अथवा सद्वितीय है? अद्वितीय रहने पर भी वह 'ब्रह्म', 'आनन्दगुण' से युक्त है अथवा 'आनन्दस्वरूप' है? तथा वह 'ब्रह्म', 'ज्ञानगुण' से युक्त है, अथवा 'ज्ञानस्वरूप' है? तथा वह 'ब्रह्म', 'सत्ताजाति' से युक्त है, अथवा 'सत्तास्वरूप' है? तथा वह 'ब्रह्म', 'सगुण' है अथवा 'निर्गुण' है?—इत्यादि अनेक प्रकार के संशय, 'तत् पदार्थ ब्रह्म' में होते रहते हैं।**

अब 'त्वंपदार्थ जीवात्मा' में भी अनेक प्रकार के संशय दिखाते हैं—**यह 'आत्मा', 'देह' तथा 'इन्द्रियादिकों' से भिन्न है, अथवा नहीं? देहेन्द्रियादिकों से भिन्न रहने पर भी वह आत्मा, 'कर्ता' है अथवा 'अकर्ता' है? और 'अकर्ता' रहने पर भी वह आत्मा, 'चिद्रूप' है अथवा 'अचिद्रूप' है? और 'चिद्रूप' रहने पर भी वह 'आत्मा', 'आनन्दरूप' है अथवा नहीं?**

तर्को नामानिष्टप्रसङ्गः। व्याप्यारोपेण व्यापकापादानमिति यावत्। व्याप्त्याश्रयो व्याप्यं, व्याप्तिनिरूपकं व्यापकम्। तथा च यदि प्रपञ्चः सत्यस्स्यात्तर्हि अद्वितीयश्रुतिविरोधः स्यात्[1] ॥९॥

●

एवञ्च पूर्वोक्तः परमात्मा तत्पदार्थः। जीवस्त्वं पदार्थः। ततस्तत्पदार्थस्य परमात्मनः संशयमनेकप्रकारं दर्शयति—**ब्रह्मेति। आदिशब्देन** ज्ञानगुणकं वा ज्ञानस्वरूपं वा सत्ताजातिमद्वा सत्तास्वरूपं वा सगुणं वा निर्गुणं वेत्यादिसंशया **गृह्यन्ते।** त्वंपदार्थे संशयमनेकप्रकारं दर्शयति—**आत्मेति। आदिशब्देनेन्द्रियादयो गृह्यन्ते। अत्राप्यादिशब्देन** परिणामी **वा कूटस्थो वा** सत्ताजातिमान् वा सद्रूपो वेत्यादिसंशया गृह्यन्ते?

एवं पदार्थसंशयं प्रदर्श्य वाक्यार्थे संशयमाह—**जीवस्येति।**

इदानीं मोक्षसाधने संशयं दर्शयति—**ऐक्येऽपीति। ऐक्यगतेति।** ऐक्यगतस्तज्ज्ञानगतः संशयः। अयं संशयः **कस्मान्नि-वर्त्तत इत्याह—अयमिति** ॥ ८ ॥

ननु कोऽयं तर्को येन सर्वोऽपि संशयो निवर्त्तते? तत्राह—**तर्को नामेति। प्रसञ्जयतीति प्रसङ्गः, अनिष्टप्रसञ्जक इत्यर्थः।** तमेव विवृणोति—**व्याप्येति। व्यापकेति** व्यापकप्रसञ्जनमित्यर्थः। ननु किं तद्व्याप्यं, किं तद्व्यापकमित्याकाङ्क्षायां तदुभयं व्युत्पादयति—**व्याप्नोति** व्याप्तिं निरूपयति—**ज्ञापयतीति[2]। व्याप्तिनिरूपकं** व्याप्तिप्रतियोगीत्यर्थः। व्याप्तिः पूर्वमेव निरूपिता इति भावः।

एवं तर्कं निरूप्य **बहूंस्तर्कांस्तत्तत्संशयनिवर्त्तकानुदाहरति—तथाचेति।** प्रपञ्चस्य सत्यत्वे जडाजडयोरैक्यायोगात्पर-मात्मनोऽद्वितीयत्वसाधकं तर्कमुदाहरति—**यदीति।** नच भेदश्रुतिविरोधादद्वितीया[3] श्रुतेरन्यपरतया न तद्विरोध इति **वाच्यम्।**

●

आनन्दरूप रहने पर भी वह आत्मा, 'परिणामी' है अथवा 'कूटस्थ' है? और कूटस्थ रहने पर भी वह 'आत्मा' 'सत्ताजाति' से युक्त है अथवा 'सत्तारूप' है? इस प्रकार के अनेक संशय, 'तत्'—'त्वम्' पदार्थरूप 'आत्मा' और 'जीव' के विषय में होते हैं।

इस रीति से 'पदार्थ-संशय' को प्रदर्शित कर 'वाक्यार्थ' में भी संशय का प्रदर्शन करते हैं—**यह 'जीवात्मा'—'सत्-चित्-आनन्दरूप' होते हुए भी 'परमात्मा' के साथ इस 'जीवात्मा की 'एकता' सम्भव हो सकती है अथवा नहीं?**

अब 'मोक्षसाधन' में भी संशय दिखाते हैं—**'जीव-ब्रह्म' की एकता रहने पर भी वह 'एकता का ज्ञान' 'मोक्ष' का साधन है अथवा नहीं? और वह 'ऐक्यज्ञान' मोक्ष का साधन होने पर भी वह 'ज्ञान', 'कर्मसहित' होकर 'मोक्ष' का साधन है अथवा 'केवल ज्ञान', मोक्ष का साधन है? इत्यादि संशय, 'आत्मगतसंशय' कहलाते हैं। यह ऐक्यगत ज्ञानगत संशय है।**

यह संशय, किससे निवृत्त होता है। उसे बताते हैं—ये सभी आत्मगत संशय, 'तर्क' रूप मनन से निवृत्त होते हैं ॥ ८ ॥

शङ्का—यह 'तर्क' क्या है, जिससे सम्पूर्ण संशय निवृत्त होता है?

समा०—उस पर कहते हैं—**जो 'युक्ति' प्रतिवादी के अनिष्ट को सिद्ध करती है, उस युक्ति को 'तर्क' कहते हैं। अर्थात् 'व्याप्य' का आरोपण करके जो 'व्यापक' का आपादन करता है, उसे 'तर्क' कहते हैं। 'व्याप्ति' के आश्रय को 'व्याप्य' कहते हैं, और 'व्याप्ति' के 'निरूपक' को 'व्यापक' कहते हैं।** जैसे 'पर्वत' पर 'धूम' को देखकर भी जो प्रतिवादी उस 'पर्वत' पर 'अग्नि' को नहीं स्वीकार कर रहा है, उस प्रतिवादी के प्रति इस प्रकार का 'तर्क' किया जाता है। 'धूम' और 'वह्नि' का 'कार्य-कारणभाव' लोकप्रसिद्ध है। 'कारण' के बिना 'कार्य' नहीं होता—यह भी लोग जानते हैं। उस कारण 'पर्वते यदि वह्निर्न-स्यात् तर्हि धूमोऽपि न स्यात्'—पर्वत में यदि 'वह्नि' न हो तो वह्नि का कार्य धूम भी नहीं होगा—किन्तु 'पर्वत पर धूम का अभाव' प्रतिवादी को अनिष्ट है। प्रतिवादी के इस अनिष्ट की सिद्धि उक्त तर्क से की गई है। उक्त तर्क में 'वह्न्यभावरूप व्याप्य' का आरोप करके 'धूमाभावरूप व्यापक' का आपादन किया गया है।

इस प्रकार 'तर्क' को बताकर तत्तत्संशयनिवर्तक अनेक तर्कों के उदाहरणों को प्रस्तुत कर रहे हैं। पहले आत्मसंशय के निवर्कक तर्क को बता रहे हैं। उन तर्कों में भी प्रथम 'तत्पदार्थरूप परमात्मा के अद्वितीयत्व का साधक तर्क बता रहे हैं

१. एषां तर्काणां व्यवहितेन (अनु० ११) 'इत्यादिव्याप्यारोपेण' इत्यादिनान्वयः।

२. मूले कश्चन् पाठो भवेद्।

३. अद्वितीयबोधिका श्रुतिरप्यद्वितीया। अद्वितीयश्रुतेरिति पाठः स्यात्।

यदि परमात्मा जीवभिन्नः स्यात् तर्हि घटादिवदनात्मत्वेनानित्य एव स्यात् ॥१०॥

●

फलवत्यज्ञातेऽर्थे श्रुतेस्तात्पर्यनियमादद्वैतस्याज्ञातत्वेन तज्ज्ञानान्निरतिशयपुरुषार्थसम्भवेन वाऽद्वैते श्रुतितात्पर्यस्य युक्तत्वान्न तच्छ्रुतेरन्यपरत्वं, भेदस्य मानान्तरसिद्धत्वेन तत्प्रतिपादकश्रुतेरनुवादकतयाऽप्रामाण्यप्रसङ्गात् । "उदरमन्तरं कुरुतेऽथ तस्य भयम्भवती"ति भेददर्शिनोऽनर्थश्रवणात् । "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मी"ति ' न स वेद यथा पशुरि"ति भेदस्य निन्दितत्वाच्च श्रुतेस्तत्र तात्पर्यं न सम्भवत्येवातो अद्वैतश्रुतेरतत्परत्वेन दुर्बलत्वाद् अद्वैतश्रुतेस्तत्परत्वेन बलवत्त्वाद्बलवद्विरोधोऽनुपपन्न इति प्रपञ्चस्य सत्यत्वमनुपपन्नम् । एवञ्च ब्रह्मणः पारमार्थिकत्वमद्वितीयत्वमनेन तर्केण सिद्ध्यतीति भावः ॥ ९ ॥

जीवपरमात्मैक्यसंशयनिवर्त्तकं तर्कमुदाहरति—**यदि परमात्मेति ।** नच परमात्मैव नास्ति यस्यानित्यत्वमापद्येतेति वाच्यम् । श्रुतिस्मृतीतिहासपुराणैस्तस्यावश्यमभ्युपेयत्वात् । ननु "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामि"ति जैमिनिना कृत्स्नस्य वेदस्य विधिनिष्ठतया प्रामाण्यस्य प्रतिपादितत्वादीश्वरप्रतिपादकश्रुतीनां तद्विरुद्धतया स्वार्थे प्रामाण्यायोगात् कथं तद्वले-

●

यदि 'आकाशादि प्रपञ्च' को सत्य कहें तो 'ब्रह्म' को अद्वितीय बतानेवाली 'एकमेवाऽद्वितीयं ब्रह्म' श्रुति से विरोध होगा। अर्थात् सद्वितीय ब्रह्म को अद्वितीय कहने वाली वह श्रुति, मिथ्यावादी होने से अप्रमाण कहलाएगी । किन्तु आस्तिकवादी, श्रुति को कभी भी अप्रमाण नहीं कह सकता । श्रुति का अप्रामाण्य (अप्रमाणता) आस्तिकवादी की दृष्टि से अनिष्ट है । इसलिए प्रपञ्च को 'मिथ्या' ही मानना चाहिये । प्रपञ्च को मिथ्या मानने पर ही अद्वैतश्रुति से विरोध नहीं हो पाता ।

शङ्का—ब्रह्म को अद्वितीय मानने पर तो भेदप्रतिपादक श्रुतियों से विरोध होता है । अतः उन श्रुतियों के साथ विरोध होने के कारण वह 'अद्वैतश्रुति'—अद्वैत का प्रतिपादन नहीं कर रही है, अपितु किसी अन्य पदार्थ का ही प्रतिपादन कर रही है, यह मानने पर 'प्रपञ्च' की सत्यता स्वीकार करने में भी कोई किसी प्रकार का विरोध नहीं होगा ।

समा०—श्रुति का तात्पर्य उसी अर्थ में होता है, जो 'इष्टफल' का हेतु हो तथा प्रत्यक्षादि प्रमाणों से अज्ञात हो । इस नियम के अनुसार 'अद्वैत' अर्थ, 'प्रत्यक्षादिप्रमाणों' से 'अज्ञात' है, तथा उस 'अद्वैत ब्रह्म' के ज्ञान से अधिकारी पुरुष, 'ब्रह्मविद् ब्रह्मैव भवति', 'तरति शोकमात्मवित्'—इत्यादि श्रुतियों से प्रतिपादित निरतिशय मोक्षरूप पुरुषार्थ को भी प्राप्त होता है। अतः अन्य किसी अर्थ में श्रुति के तात्पर्य की कल्पना करना सम्भव नहीं है । और 'भेद' (द्वैत) रूप अर्थ, तो 'प्रत्यक्षादि' प्रमाण से 'ज्ञात' भी है, तथा 'भेदज्ञान' से किसी 'इष्टफल' की प्राप्ति भी नहीं होती । प्रत्युत श्रुतियों ने उस 'भेददर्शी पुरुष' को 'अनर्थ' की प्राप्ति होना बताया है । और भेददर्शी पुरुष को पशु के तुल्य बताकर 'भेद' की निन्दा की है । अतः 'भेद' रूप अर्थ में श्रुति के तात्पर्य की कल्पना करना सम्भव नहीं है ।

यदि उस श्रुति को भेदप्रतिपादक ही कहा जाय तो वह प्रत्यक्षप्रमाण से सिद्ध रहनेवाले 'भेद' की अनुवादक ही कहलाएगी, तब उस श्रुति को 'अप्रमाण' ही मानना होगा।

किञ्च—'अद्वैतार्थप्रतिपादक श्रुति' तो 'फलवान्, अज्ञात अर्थ' की बोधक होने से 'प्रबल' है, और फलशून्य-ज्ञात अर्थ को प्रतिपादक होने से 'द्वैतार्थ (भेद अर्थ) 'श्रुति', 'दुर्बल' है । व्यवहार में देखा करते हैं कि 'प्रबल' से ही 'दुर्बल' का बाध होता है, 'दुर्बल' से 'प्रबल' का बाध नहीं हुआ करता । अतः 'भेदश्रुति' के विरोध को देखकर अद्वैतश्रुति को अन्यपरक कहना नितान्त अनुचित होगा । प्रत्युत अद्वैतश्रुति के विरोध के कारण 'भेदश्रुति' को ही अन्यपरक बनाया जा सकता है । एवञ्च अद्वैतश्रुति के विरोध से 'प्रपञ्च' में सत्यता की कल्पना करना असम्भव है । इस प्रकार से 'ब्रह्म' का 'अद्वितीयत्व', तथा 'पारमार्थिकत्व', 'तर्क' के बलपर सिद्ध होता है । उस कारण 'ब्रह्म' अद्वितीय है अथवा सद्वितीय है इत्याकारक संशय की निवृत्ति 'तर्करूप मनन' से होती है ॥ ९ ॥

यदि 'तत्' पदार्थरूप परमात्मा को 'त्वम्' पदार्थरूप जीवात्मा से भिन्न कहें तो 'घट' आदि के समान अनात्मभाव (जड होने) के कारण उसे अनित्य कहना होगा । उसे अनित्य कहने पर परमात्मा के नित्यरूप का प्रतिपादन करने वालीं श्रुति-स्मृतियों से तथा पुराण—इतिहास के वचनों से विरोध प्राप्त होगा ।

किञ्च—जीव और ब्रह्म का भेद मानने पर जीव और ब्रह्म के अभेद-प्रतिपादक श्रुति-स्मृतियों के वचनों से विरोध होगा । किन्तु उनसे विरोध होना तो किसी को भी अभीष्ट नहीं है । अतः जीवात्मा को ब्रह्म (परमात्मा) से अभिन्न ही मानना

नैतदभ्युपगमः ? नचेश्वरप्रतिपादकश्रुतेरध्ययनविधिपरिगृहीतत्वेन कथमप्रामाण्यमिति वाच्यम् । कर्त्रादिस्तावकतया विध्यपेक्षित-देवतादिप्रकाशनपरत्वेन वा विधिपरत्वेन प्रामाण्योपपत्तेः । नच भिन्नप्रकरणनिष्ठानां कथं कर्मविधिपरत्वमिति वाच्यम् । तर्ह्युपासनाविधिपरत्वोपपत्तेः । न चोपासनाविधिशेषत्वेन परमात्मनः सिद्धत्वात्कथं तदभाव इति वाच्यम् । "असावादित्यो देवमधु"रित्यादिनादित्ये मधुत्वोपासनवज्जीवेऽविद्यमानारोप्योपासनोपपत्तेः । परमात्मप्रतिपादकश्रुतीनां तत्प्रतिपादने प्रवृत्ति-निवृत्त्योरसम्भवेन तत्र सङ्गतिग्रहायोगात् । परमात्मनः सिद्धवस्तुत्वेनापरिच्छिन्नतया हेयोपादेयशून्यतया च तत्प्रतिपादनफला-भावाच्च । तस्माद्वेदनमात्रस्य विधिपरत्वेन प्रामाण्यमभ्युपगन्तव्यम् । तस्मात्कथं श्रुत्यादिभिः परमात्माभ्युपगमोऽतो निर्विषयोऽयं तर्क इति ?

अत्रोच्यते—परमात्मावश्यमभ्युपगन्तव्यः । नच तत्र प्रमाणाभावः । श्रुतिस्मृतीतिहासपुराणानां सत्त्वात् । तथा हि

"सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्" "सत्यं ज्ञानमनन्तम्ब्रह्म" "विज्ञानमानन्दम्ब्रह्म" "यः सर्वज्ञः स सर्व-विद्यस्य ज्ञानमयं तपः" "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी" "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरोऽयं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरोऽयमयत्येष त आत्मान्तर्यम्यमृतः" "ब्रह्म वा इदम आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्"

"यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥"
"नारामणः परम्ब्रह्म तत्त्वं नारायणः परम् । नारायणः परं ज्योतिरात्मा नारायणः परम् ॥"
"ऋतं सत्यं परम्ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ॥"

●

चाहिये । 'यदि जीवात्मा, परमात्मनः अभिन्नो न स्यात् तर्हि श्रुति-स्मृत्यविरोधोऽपि न स्यात्'—इस तर्क से परमात्मा-जीवात्मा के भेदाभेद का संशय (जीव-परमात्मैक्यसंशय) निवृत्त हो जाता है ।

शङ्का—यदि दोनों में भेद मानने से परमात्मा में अनित्यत्वापत्ति होती है तो परमात्मा को ही न माना जाय । उसे न मानने पर अनित्यत्व का प्रश्न ही नहीं उठेगा ।

समा०—उक्त आशंका नितान्त अनुचित है, क्योंकि श्रुति-स्मृति-पुराण-इतिहास में उसकी अवश्य अभ्युपेयता बताई गई है ।

शङ्का—जैमिनिमुनि ने सम्पूर्ण वेद का प्रामाण्य, उसके विधिनिष्ठ होने के कारण बताया है । अतः उसके विरुद्ध रहने वाली ईश्वरप्रतिपादक श्रुतियों का स्वार्थ में प्रामाण्य कैसे माना जा सकेगा ? अतः श्रुति के बल पर ईश्वर का अभ्युपगम करना उचित नहीं है ।

यदि ईश्वरवादी यह कहे कि ईश्वरप्रतिपादक श्रुति का परिग्रह 'अध्ययनविधि' (स्वाध्यायोऽध्येतव्यः) के द्वारा किये जाने के कारण उस श्रुति को अप्रमाण कैसे कह सकेंगे ?

उसपर अनीश्वरवादी का उत्तर यह है कि ईश्वर-प्रतिपादकश्रुति का प्रामाण्य, उसे कर्ता आदि की स्तावक मानकर अथवा विध्यपेक्षित देवता आदि की प्रकाशनपरक मानकर विधिपरक होने से उपपन्न हो सकता है । अतः श्रुति के अप्रामाण्य का प्रसङ्ग नहीं है ।

इसपर ईश्वरवादी यदि यह कहे कि भिन्न प्रकरणगत श्रुति को कर्मविधिपरक कैसे कह सकेंगे ?

उसपर अनीश्वरवादी का उत्तर यह है कि उस श्रुति को उपासनाविधिपरक मानकर उसकी उपपत्ति की जा सकती है ।

इस पर ईश्वरवादी का कहना है कि परमात्मा तो उपासना विधि का शेष (अङ्ग) होने से उसका अभाव कैसे कहा जायगा ? उपासना में परमात्मा का अङ्गत्व तो सिद्ध ही है ।

उसपर अनीश्वरवादी का उत्तर है कि श्रुति से 'आदित्य' में 'मधुत्वोपासना के समान 'जीव' में अविद्यमान रहनेवाली आरोप्य उपासना मानकर उपपत्ति हो सकती है । परमात्मप्रतिपादक श्रुतियों से ईश्वर का प्रतिपादन करने पर किसी प्रकार की प्रवृत्ति-निवृत्ति का होना संभव नहीं है, उस कारण प्रवृत्तिःनिवृत्ति रूप क्रिया में उससे संगति-ग्रह (शक्तिज्ञान) का होना कदापि सम्भव नहीं है ।

किञ्च—परमात्मा तो एक सिद्ध वस्तु रूप है, और वह अपरिच्छिन्न भी है, उस कारण वह हेयोपादेय शून्य भी है, ऐसे परमात्मा का प्रतिपादन करने से कोई फल नहीं है, अर्थात् उसका प्रतिपादन करना निष्फल है । अतः उसके वेदन मात्र

"तमीश्वराणां परमं महेश्वरं तं देवानां[१] परमञ्च दैवतम् ।
पतिं पतीनां प्रथमं पुरस्ता[२]द्विदाम देवं भुवनेशमीड्यम् ॥"

"स एष इह प्रविष्ट आनखाग्रेभ्यः" "स ईक्षाञ्चक्रे" "एतद्वै सत्यकाम परञ्चापरम्ब्रह्म" हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु" "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवात्मा बुद्धिप्रकाशं[३] मुमुक्षुर्वै शरणमहं प्रपद्ये" ।

सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन् यदास्ते ।"

"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषःपरः ॥"
"समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तं य पश्यति स पश्यति ॥"
"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥"
"आकाशमेकं हि यथा घटादिषु पृथक् पृथक् । तथात्मैकोऽप्यनेकः स्यात् जलाधारेष्विवांशुमान् ॥"
"क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता । ममान्तरात्मा तव च ये चान्ये देहिसंज्ञकाः ॥"
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित् । विश्वमूर्द्धा विश्वभुजो विश्वनासाक्षिबाहुकः ॥
"एकश्चरति भूतेषु स्वैरचारी यथा सुखम् । यदक्षरं परम्ब्रह्म य ईश्वरः परः पुमान् ॥"
गुणोर्मिसृष्टिस्थितिकालसंलयः प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः ।स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥
ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तमः । हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ॥
ॐ नमोवासुदेवाय शुद्धज्ञानस्वभाविने ।
यस्याज्ञया जगत्स्रष्टा विरञ्चिः पालको हरिः । संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
अपुण्यपुण्योपरमोऽयंपुनर्भवनिर्भयाः । शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ॥"

●

(ज्ञानमात्र) को ही विधिपरक मानकर ही श्रुति का प्रामाण्य मान लेना उचित है । अतः श्रुति के बलपर 'परमात्मा' का स्वीकार कैसे किया जा सकेगा ? उस कारण आपका 'तर्क', विषयशून्य (निर्विषय) है ।

समा०—परमात्मा के स्वीकार करने में कोई प्रमाण नहीं है—यह कहना नितान्त अनुचित है, क्योंकि श्रुति-स्मृति-इतिहास पुराणों के सैकड़ों वचन उसके अस्तित्व को बता रहे हैं ।

श्रुति-स्मृति-इतिहास-पुराणों के सहस्रों वचन, उपक्रमोपसंहारादि षड्विध लिंगों के द्वारा नित्यशुद्धबुद्धमुक्तस्वभाव, सर्वशक्तिमान्, अनन्तकल्याणादिगुणों से सम्पन्न परमात्मा में ही अपने तात्पर्य का निश्चय करते हैं ।

किञ्च—उक्त वचनों का अर्थान्तर करना भी उचित नहीं है, अन्यथा श्रुतहानि—अश्रुतकल्पना का प्रसंग प्राप्त होगा । उक्त वचनों को भिन्न प्रकरणगत होने से कर्ता आदि का स्तावक भी नहीं कह सकते । उक्त वचनों को उपासनाविधिपरक भी नहीं कह सकते, क्योंकि उनमें उपासना के विधान का श्रवण नहीं हो रहा है । "आत्मावारे द्रष्टव्यः"—इस वचन को सुनकर उक्त वचनों को ज्ञानविधिपरक भी नहीं कह सकते, क्योंकि ज्ञान का प्रामाण्य, परतन्त्र रहने से उसमें 'कर्तुमकर्तुमन्यथाकर्तुम्' शक्ति को बताना संभव नहीं हो सकेगा । इसलिये उक्त वचनों को ज्ञानविधिपरक कहना उचित नहीं है ।

शंका—इस पर **अनीश्वरवादी** कह सकता है कि उक्त वचनों को विधिपरक न मानने पर प्रवृत्ति-निवृत्तिरूप क्रिया का होना संभव न रहने से सङ्गतिग्रह (शक्तिग्रह) न हो पाने के कारण श्रुति-स्मृत्यादि के वचनों में अप्रामाण्य प्राप्त होगा ।

समा०—ऐसी शंका नहीं करनी चाहिये । 'पुत्रस्तेजातः' यह वाक्य सुनने पर पिता के मुखमण्डल पर जो हर्षोल्लास चमकने लगता है, उसी से समीप स्थित भाषानभिज्ञों को अनुमान हो जाता है, और पुत्रादि शब्दों का संगतिग्रह जैसे हो जाता है, उसी तरह यहाँ भी उपपत्ति हो सकती है । अतः अप्रामाण्य की आपत्ति नहीं हो सकती ।

शंका—इस पर **अनीश्वरवादी** कह सकता है कि नदी किनारे पाँच फल हैं—की तरह वेदान्तवाक्यों को सिद्धार्थपरक मानने पर उनमें अप्रामाण्य होगा, और परमात्मा अपरिच्छिन्न होने से उसमें हेयोपादेयता के न रह सकने से आनर्थक्य भी होगा ।

समा०—परमात्मा का ज्ञान, किसी अन्य प्रमाण से न हो सकने से वह अज्ञात है । अज्ञात होने से उसका ज्ञान, वेदान्त-वाक्य करा देते हैं, उससे परमपुरुषार्थ की प्राप्ति होती है । अतः परमात्मप्रतिपादक वेदान्तवाक्यों का प्रामाण्य सिद्ध है । एवं च

---

१. देवतानामिति श्रुतौ श्रूयते । २. परमंपरस्तादिति दृश्यते । ३. देवमात्मबुद्धिप्रकाशमिति श्रुतौ वर्तते ।

इत्यादि श्रुतिस्मृतीतिहासपुराणवचनसहस्राणि नित्यशुद्धबुद्धमुक्तस्वभावं सर्वशक्तिमनन्तकल्याणगुणकं परमात्मानमुपक्रमोपसंहारादिलिङ्गनिश्चिततात्पर्य्याणि प्रतिपादयन्ति। न चैषामर्थान्तरता युक्ता श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। नचैषां कर्त्रादिस्तावकत्वं; भिन्नप्रकरणस्थत्वात्। नचोपासनाविधिपरत्वं तच्छ्रवणात्। नचा"त्मा वारे द्रष्टव्य" इत्यादिश्रवणात् ज्ञानविधिपरत्वं, ज्ञानस्य प्रमाणवस्तुपरतन्त्रतया कर्त्तुमकर्त्तुमन्यथा कर्त्तुमशक्यत्वेन विधेयत्वायोगात्।

न चैषां विधिपरत्वानङ्गीकारे प्रवृत्तिनिवृत्त्योरसम्भवेन सङ्गतिग्रहायोगादप्रामाण्यापत्तिरिति[1] वाच्यम्। 'पुत्रस्ते जात' इति वाक्यश्रवणानन्तरं हर्षादिनानुमानेन पुत्रादिपदानां सङ्गतिग्रहदर्शनात्। तथात्रापि तदुपपत्तेर्नाऽप्रामाण्यापत्तिः। न च नद्यास्तीरे पञ्च फलानि सन्तीत्यादिवद्वेदान्तानां सिद्धार्थपरत्वेनाप्रामाण्यं तत्प्रतिपाद्यपरमात्मनोऽपरिच्छिन्नत्वेन हेयोपादेयत्वाभावेनानर्थक्यञ्चेति वाच्यम्। परमात्मनो मानान्तरायोग्यतयाऽज्ञातत्वेन तज्ज्ञानात् परमपुरुषार्थसम्भवेन च तत्प्रतिपादकवेदान्तानां प्रामाण्यप्रयोजनत्वोपपत्तेः।

किञ्च ज्ञानविधिपरत्वे वेदान्तानां विधेयज्ञानसाध्यस्य मोक्षस्य स्वर्गादेरिवानित्यत्वं प्रसज्येत अदृष्टजन्यभावकार्य्यस्यानित्यत्वनियमात्। न च तदिष्टम्। सर्वे मोक्षवादिनो मोक्षं नित्यमभ्युपगच्छन्ति। ततश्च सर्वतन्त्रविरोधः प्रसज्येत। "अनावृत्तिः शब्दादि"ति सूत्रविरोधश्च। तस्मादयुक्तमेतत्। अपि च मोक्षो नाम ब्रह्मभावो वाऽज्ञाननिवृत्तिर्वा, सर्वथापि तस्य ज्ञानैकसाध्यत्वेन विधेयज्ञानजन्यापूर्वस्यानुपयोगान्निरर्थको ज्ञानविधिः।

किञ्च मोक्षस्योत्पत्त्याद्यसम्भवेन ज्ञानैक्यव्यङ्ग्यतया ज्ञानविधिर्निरर्थकः। उत्पत्त्याद्यन्यतमस्य विधिफलत्वात्। अभिव्यक्तिस्तु प्रमाणजन्येन केवलज्ञानेनापि सम्भवति।

●

वेदान्तवाक्यों में प्रामाण्य की सिद्धि होना—यह प्रयोजन भी सिद्ध है। अतः वेदान्तवाक्य सप्रयोजन होने से उन्हें अनर्थक नहीं कहा जा सकता।

किञ्च—वेदान्त वाक्यों को विधिपरक मानने पर विधेय जो ज्ञान, उससे 'मोक्ष' साध्य होगा, तब 'स्वर्ग' आदि फलों की तरह उसे भी अनित्य कहना होगा। क्योंकि जो अदृष्टजन्य भाव कार्य होता है, वह अनित्य हुआ करता है—यह नियम है। 'मोक्ष' फल को अनित्य कहना किसी को अभीष्ट नहीं होगा, क्योंकि सभी मोक्षवादी उसे 'नित्य' मानते हैं। ऐसी स्थिति में उसे अनित्य कहने पर एक तो 'सर्वतन्त्रविरोध' होगा, और 'अनावृत्तिः शब्दात्'—इस सूत्र से विरोध भी होगा। इसलिये वेदान्तवाक्यों को विधिपरक कहना उचित नहीं है।

अपिच—'ब्रह्मभाव' को प्राप्त करना—'मोक्ष' है, अथवा अज्ञान की निवृत्ति का होना—'मोक्ष' है। कुछ भी हो, वह 'ज्ञानैकसाध्य' ही है अर्थात् 'ज्ञान' के विना 'मोक्ष' की प्राप्ति की आशा करना केवल स्वप्न देखने के तुल्य है। अतएव कहा गया है—'नहि ज्ञानादृते मुक्तिः', तथा 'ज्ञानादेव तु कैवल्यम्'॥ इति॥

एवं च वह (मोक्ष), ज्ञानैकसाध्य होने से विधेयभूतज्ञानजन्य अपूर्व का 'मोक्ष' प्राप्ति में कोई उपयोग नहीं है। इसलिये 'ज्ञान' का विधान करना निरर्थक है, अर्थात् ज्ञानविधि, निरर्थक है।

किञ्च—मोक्ष की उत्पत्ति आदि का असंभव रहने से ज्ञानैक्यव्यङ्ग्य होने के कारण ज्ञानविधि को निरर्थक ही समझना चाहिये। क्योंकि विधि का फल तो उत्पत्ति आदिकों में से अन्यतम हुआ करता है। किन्तु—अभिव्यक्ति तो प्रमाण से जन्य होने के कारण केवल ज्ञान से भी संभव हो सकती है।

किञ्च—विधिवादी यह बतावे कि 'आत्मावारे द्रष्टव्यः'—से ब्रह्मज्ञान का विधान किया जा रहा है अथवा उसके साधनभूत 'श्रवणादि' का विधान बताया जा रहा है ?

उक्त वाक्य से ब्रह्मज्ञान का विधान तो किया नहीं जा सकता, क्योंकि 'ब्रह्म'—में विधेयज्ञान की विषयता का होना संभव नहीं है। श्रुति ने "ब्रह्म" में विदिक्रिया के 'कर्मत्व' का निषेध किया है।

इस पर विधिवादी कहता है कि 'ब्रह्म' में यदि 'ज्ञान' की विषयता नहीं है, तो प्रदेशान्तरविहित 'उपासना' की विषयता उसमें मान ली जाय।

१, एकमप्रामाण्यपदयधिकम्।

किञ्च ब्रह्मज्ञाने विधिराहोस्वित्तत्साधने श्रवणादौ वा ? नाद्यः, ब्रह्मणो विधेयज्ञानविषयत्वायोगात् । "अन्यदेव तद् विदितादथोऽविदितादधी"त्यादि श्रुत्या ब्रह्मणो विदिक्रियाकर्म्मत्वप्रतिषेधात् ।

किञ्चास्तु तर्हि प्रदेशान्तरविहितोपासनाकर्म्मत्वमिति चेदतिनिपुणमतिर्भवान् यतो ज्ञानाविषयस्योपासनाविषयत्वं ब्रवीति । किञ्च "यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इत्यादि श्रुतिरुपासनाकर्म्मत्वमपि तस्य निषेधति । अविषयत्वे ब्रह्मणः "शास्त्रयोनित्वादि"त्यधिकरणविरोध इति चेन्न । तन्निष्ठाज्ञाननिवर्त्तकत्वेन तद्विषयत्वोपचाराद-विरोधः ।

न द्वितीयः, इष्टापत्तेः । वेदान्तानां ब्रह्मणि महातात्पर्य्येऽप्यवान्तरतात्पर्य्येण श्रवणादिविध्युपगमे बाधकाभावात् ।

तस्माद्वेदान्तानां विधिपरत्वासम्भवात्, सङ्गतिग्रहसम्भवाच्च फलवदज्ञातार्थबोधकत्वेन प्रामाण्यसम्भवाच्च तन्मूलभूत-स्मृत्यादीनामपि तुल्यन्यायत्वाच्छ्रुत्यादिभिः परमात्माङ्गीकार्य्यः ।

किञ्च जडस्य कर्म्मणः फलदातृत्वायोगात् परमात्मावश्यमभ्युपगन्तव्यः । तदेतत् सर्वमभिप्रेत्य भगवद्बादरायणेनोक्तम्— "फलमत उपपत्ते"रिति ।

तस्मात् स परमात्मा यदि जीवभिन्नः स्यात्तर्हि घटादिवदनात्मत्वेनानित्य एव स्यात् । नच तदिष्टं नित्यत्वप्रतिपादक-श्रुतिस्मृतीतिहासपुराणविरोधप्रसङ्गात् ।

•

यह सुनकर सिद्धान्ती, कहता है कि हे विधिवादिन् ! आप तो बहुत अधिक (आवश्यकता से अधिक) बुद्धिमान् प्रतीत हो रहे हैं ! क्योंकि जो 'ज्ञान' का भी विषय नहीं हो सकता, उसे आप 'उपासना' का विषय बता रहे हैं । इस तरह कहकर **विधिवादी** का उपहास **सिद्धान्ती** ने किया है ।

किञ्च—श्रुति ने उसमें (ब्रह्म में), **उपासनाकर्मत्व का** भी निषेध किया है । **अर्थात्** 'वह', उपासना का **भी** विषय नहीं है ।

उस पर **विधिवादी** कहता है कि **'ब्रह्म'** को अविषय कहने पर **'शास्त्रयोनित्वात्'** इस अधिकरण के साथ विरोध होगा । क्योंकि शास्त्रयोनित्वाधिकरण (ब्र० सू० १।१।३) के **द्वितीय वर्णक** में 'ब्रह्म' को केवल ऋग्वेदादिशास्त्रगम्य ही बताया है । अर्थात् वह प्रमाणान्तरवेद्य नहीं है ।

तब **सिद्धान्ती** कहता है कि तन्निष्ठ अज्ञान का निवर्तक होने से उसमें तद्विषयत्व का उपचार किया गया है, उस-कारण कोई विरोध नहीं है । अतः **प्रथम पक्ष** का खण्डन हो गया ।

अब रहा **द्वितीय पक्ष** । वह तो हमें इष्ट ही है । वेदान्तवाक्यों का 'ब्रह्म' में **'महातात्पर्य'** रहने पर भी **'अवान्तरतात्पर्य'** से 'श्रवणादि' विधि का स्वीकार करने में कोई बाधक नहीं है ।

एवञ्च वेदान्तवाक्यों को विधिपरक कहना संभव नहीं है और सङ्गतिग्रह हो ही जाता है । तथा फलवदज्ञातार्थबोधक होने से उनका प्रामाण्य भी संभव है । अतएव तन्मूलभूतस्मृति-इतिहास-पुराणादिकों का भी प्रामाण्य अक्षुण्ण है । अतः श्रुति-स्मृति-इतिहास-पुराण आदि के बलपर **'परमात्मा'** का स्वीकार करना ही उचित होगा ।

किञ्च—विधेयभूत कर्म, स्वयं 'जड' होने के कारण उसमें 'फलदातृत्व' का होना संभव नहीं है । इसलिये 'परमात्मा' का स्वीकार अवश्य ही करना चाहिये । इसी समस्या की ओर ध्यान देकर ही भगवान् वादरायण ने कहा कि (ब्र० सू० ३।२।३८) परमात्मा ही समस्त प्राणियों को फल देता है, क्योंकि 'कर्म' क्षणिक तथा जड है, अतः वह फल देने में समर्थ नहीं है । अतः परमात्मा में ही फलदातृत्व मानना उचित है । उस परमात्मा को यदि 'जीवात्मा' से भिन्न समझा जाय तो घट-पट' आदि पदार्थों की तरह उसके भी अनात्मरूप होने से उसे अनित्य ही कहा जायगा । किन्तु उसे अनित्य कह देना, किसी को भी इष्ट नहीं है । और नित्यत्वप्रतिपादक श्रुति-स्मृति-इतिहास-पुराणादि के वचनों के साथ विरोध होने का भी प्रसङ्ग प्राप्त होगा ।

इस विवेचन से 'सांख्यवादी' दार्शनिकों को परास्त कर दिया गया । अचेतन (जड) प्रधान को जगत्कारण कहने में कोई प्रमाण उपलब्ध न रहने से 'परमेश्वर' को ही जगत् का 'अभिन्ननिमित्तोपादानकारण' माना गया है । यह कहने से पतञ्जलि अर्थात् योगदार्शिनिकों का और नैयायिकों का भी निराकरण कर दिया गया है ।

इस पर निरीश्वरवादी का कहना है कि ईश्वर को जगत्सर्जन के प्रति 'निमित्तकारण' कहने पर उसमें 'वैषम्य-नैर्घृण्य' का प्रसङ्ग आवेगा ।

यद्यात्मानन्दो न स्यात्तर्हि कोऽपि न व्याप्रियेत इत्यादिव्याप्यारोपेण व्यापकप्रसञ्जनरूपास्तर्काः श्रुत्युक्ता द्रष्टव्याः ।

●

एतेन सांख्याादयः परास्ता वेदितव्याः । अचेतनस्य प्रधानस्याप्रामाणिकत्वेन परमेश्वरस्यैव जगतोऽभिन्ननिमित्तोपादानत्वात् । अत एव पतञ्जलिनैयायिकादयोऽपि निराकृताः । निरपेक्षेश्वरस्य निमित्तत्वे वैषम्यनैर्घृण्यप्रसङ्गात्, श्रुत्यातदङ्गीकारे यथाश्रुति सोपाधिकसगुणेश्वरस्याभिन्ननिमित्तोपादानत्वं तस्यैव मायाविनिर्मुक्तस्य प्रत्यगभिन्नत्वमुक्तदोषपरिहाराय श्रुत्याद्यविरोधाय च सर्वैरवश्यमभ्युपगन्तव्यम् । तस्माद्यथोक्ततर्कस्य सविषयत्वात्ततो ब्रह्मात्मैक्यसंशयो निवर्त्तत इति भावः ।। १० ।।

इदानीं शोधितत्वंपदार्थस्य सुखात्मत्वसाधकं तर्कमुदाहरति—**यद्यात्मेति** । **आत्मा** शोधितत्वंपदार्थः, **आनन्द** आनन्दस्वरूपः **कोऽपि** कश्चिदपि जनो **न व्याप्रियेत** न प्रवर्त्तेत स्वार्थमित्यक्षरार्थः । तथा च श्रुतिः "कोह्येवान्यात्कः प्राण्याद्यदेव आकाश आनन्दो न स्यादि"ति । यद्यप्यत्राकाशशब्दः परमात्मपरः "आकाशोऽर्थान्तरत्वादिव्यपदेशादि"ति न्यायेन "रसं ह्येवायं लब्ध्वानन्दी भवती"ति पूर्ववाक्ये रसशब्देनानन्दवाचिना परमात्मनो विवक्षितत्वात् "एष ह्येवानन्दयती"त्युत्तरवाक्येऽपि एतच्छब्दार्थस्यान्येषामानन्दयितृत्वप्रतिपादनेन तस्यैव विवक्षितत्वाच्च मध्येऽपि स एव विवक्षित इति, तथापि शोधितयोस्तत्त्वंपदार्थयोर्नाममात्रभेदमन्तरेण स्वरूपभेदाभावात्, अत्रापि श्रुतिः प्रमाणं भवत्येव ।

नन्वेवं स्वसमवेतसुखार्थमपि प्रवृत्तिसम्भवात् । कथमनेन तर्केणात्मनः सुखात्मनः सुखात्मकत्वसिद्धिः ? न, सुखत्वेनैव सुखस्योद्देश्यत्वान्न स्वसमवेतसुखत्वेन गौरवात् । न चैवं वैरिसुखोद्देशेनापि प्रवृत्तिप्रसङ्ग इति वाच्यम् । तस्य प्रेमगोचरत्वाभावात् । स्वस्वरूपसुखस्य निरुपाधिकप्रेमगोचरत्वेन तदुद्देशेनैव निरुपाधिकप्रवृत्तेर्दर्शनात् । न च निरुपाधिकप्रेमगोचरत्वमपि सुखसमवायित्वेनात्मन इति वाच्यम् । तर्हि दुःखसमवायित्वेन निरुपाधिकद्वेषगोचरत्वमपि स्यात् । न च तत्कस्यचिदस्ति ! तस्मात्सर्वेषां स्वार्थे प्रवृत्तिदर्शनादात्मा सुखस्वरूप एवेति भावः ।

●

उस पर सिद्धान्ती कहता है कि हम श्रुति के बल पर उसे जगत् का 'निमित्त कारण' मान रहे हैं । श्रुति के अनुसार 'सोपाधिक सगुण ईश्वर ही जगत्सर्जन के प्रति 'अभिन्न निमित्तोपादान' है । अतः उक्तदोष-परिहारार्थ और श्रुति आदि के विरोधपरिहारार्थ भी उसी मायाविनिर्मुक्त परमात्मा को ही प्रत्यगभिन्न कहा गया है । अतः उसका स्वीकार सभी को करना चाहिये । एवं च यथोक्त तर्क, निर्विषय न होकर 'सविषय' है । उसी से ब्रह्मात्मैक्य के संशय की निवृत्ति होती है । अर्थात् 'परमात्मा', इस 'जीवात्मा' से भिन्न हैं, या अभिन्न है—इस संशय की निवृत्ति हो जाती है ।। १० ।।

परिशोधित 'त्वम्' पदार्थ के सुखात्मत्व (आनन्दरूपता) के साधक 'तर्क' को बता रहे हैं—यह 'जीवात्मा' ही परिशोधित 'त्वम्' पदार्थ है । तर्क का [1]आकार इस प्रकार है—**यदि यह जीवात्मा, आनन्द स्वरूप न होता, तो कोई भी व्यक्ति, अपने स्वार्थ-सम्पादनार्थ प्रवृत्त न होता** । इसी तथ्य को श्रुति भी अभिव्यक्त कर[2] रही है—यदि यह आकाश आनन्द न होता तो प्राणन और अपानन कौन करता ? यहाँ पर यद्यपि 'आकाश'—शब्द 'परमात्मपरक' है, तथापि 'आकाशोऽर्थान्तरत्वादिव्यपदेशात्'—इस न्याय से 'रसं ह्येवायं लब्ध्वानन्दी भवति'—इस प्रकार पूर्ववाक्य में आनन्दवाची 'रस' शब्द से परमात्मा की ही विवक्षा होने से 'एषह्येवानन्दयति'—इस उत्तरवाक्य में भी 'एतत्' शब्द का अर्थ—'दूसरों को आनन्दित करने वाला'—बताया गया है, और उसी की विवक्षा भी की गई है । तथा मध्य में भी उसी की विवक्षा की गई है । तथापि परिशोधित 'तत्' और 'त्वम्' इन दो पदार्थों के केवल 'नाम' का ही भेद है, उनके 'स्वरूप' का भेद नहीं है, अर्थात् उनके स्वरूप में भिन्नता नहीं है, दोनों का स्वरूप एक ही (अभिन्न ही) है । इस विषय में भी श्रुति ही प्रमाण है ।

शङ्का—इस रीति से तो स्व-समवेत सुखार्थी की भी प्रवृत्ति हो सकती है । अतः उक्त तर्क से आत्मा की सुखात्मकता कैसे होगी ? 'सुख' तो उद्देश्य होने के कारण 'सुखरूप' से उसकी प्रतीति नहीं हो सकती । स्व-समवेत सुख के रूप में मानने में भी गौरव होगा । शत्रु के सुख को उद्देश्य करके भी प्रवृत्ति हो सकती है ।

उस पर सिद्धान्ती का कहना है कि शत्रु के ऊपर प्रेम न होने से अर्थात् 'शत्रु' किसी के प्रेम का विषय न होने से उसके सुख को उद्देश्य करके प्रवृत्ति का होना सम्भव ही नहीं है । स्व-स्वरूपभूत सुख, निरुपाधिक प्रेम का विषय होने से उसी के उद्देश्य से निरुपाधिक प्रवृत्ति हुआ करती है ।

१. 'यदि आत्मा आनन्दो न स्यात् तर्हि कोऽपि न व्याप्रियेत' । २. 'को ह्येवान्यात्कःप्राण्याद्यदेव आकाश आनन्दो न स्यात्' ।

एतच्च मननं निरूपितम्, एतन्मननं शारीरक-द्वितीयाध्यायपठनेन निष्पद्यते ॥११॥
संशयविरोधि ज्ञानं निश्चयः ।

●

आदिशब्देन यदि परमात्मानन्दो न स्यात् तत्प्राप्तेरपुरुषार्थत्वं स्यात् । यदि परमात्मा चिद्रूपो न स्यात् तर्हि घटादिवज्जडत्वेन सूर्य्याद्यवभासकत्वं न सम्भवेत् । न चेष्टापत्तिः, "तस्य भासा सर्वमिदं विभाति" "तच्छुभ्रं" ज्योतिषांज्योतिः "आधारमानन्दमखण्डबोधं" "विज्ञानमानन्दम्ब्रह्म" "ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत" इत्यादि श्रुतिस्मृतिविरोधप्रसङ्गः । यदि परमात्मा सगुणः न स्यात्तर्हि निर्विशेषस्वरूपप्रतिपादकश्रुतिविरोधः स्यात् । यदि जीवश्चिद्रूपो न स्यात् तर्हि जड़त्वेन सावयवतया घटादिवदनात्मत्वेन जगदान्ध्यप्रसङ्गः । "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" "स्वयं ज्योतिर्भवति" "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" इत्यादिश्रुतिस्मृतिविरोधश्च प्रसज्येत । यद्यात्मा कर्त्ता स्यात्तर्हि विकारितया परिणामित्वेनानित्यःस्यात् । यदि कर्म्मसमुच्चितं ज्ञानं मोक्षसाधनं स्यात् तर्हि मोक्षस्यापि कर्म्मजतया स्वर्गस्येवानित्यत्वं[1] प्रसज्येदेवमादि तर्का गृह्यन्ते ।

तर्हि तर्कात्मकं मननं निरूपणीयमित्याकाङ्क्षायामाह—**एतदिति** । इदं मननं कुतो निष्पद्यतेऽत्राह—**एतन्मननमिति** ॥ ११ ॥

क्रमप्राप्तस्य निश्चयस्य लक्षणमाह—**संशयेति** । तं विभजते—**स चेति** । यथोद्देशं यथार्थं निरुपयति—**अविसंवादीति** । फलपर्य्यवसायिज्ञानं यथार्थनिश्चयः । निष्फलं ज्ञानं विसंवादि । अयथार्थनिश्चयं विभजते—**स चेति** । **तर्क इति** । उक्तोनिरुपितः अतीतानन्तरगन्थ इति शेषः । विपर्य्ययलक्षणमाह—**विपर्य्यय इति** । किमिदं ज्ञानस्य मिथ्यात्वम् ? न तावद्बाध्यत्वं, ज्ञानस्य

●

उसपर पूर्वपक्षी कहता है कि निरूपाधिक प्रेम का विषय, सुखसमवायित्वेन रूपेण 'आत्मा' ही होगा ।

सिद्धान्ती कहता है कि तुम्हारे उक्त कथन के अनुसार तो दुःखसमवायित्वेनरूपेण (दुःखसमवायी होने के कारण) निरुपाधिक द्वेष का विषय भी 'आत्मा' को मानना होगा । किन्तु आत्मा को निरूपाधिक द्वेष का विषय कोई नहीं कहता । अतः कहना होगा कि सभी की प्रवृत्ति, 'स्वार्थ' में ही हुआ करती है, इसलिये 'आत्मा' सुखस्वरूप ही है ।

'आदि' शब्द से ये [2]तर्क विवक्षित हैं—यदि परमात्मा आनन्द न होता तो उसकी प्राप्ति पुरुषार्थ न होती; यदि परमात्मा चेतन न होता तो घट आदि की तरह जड़ होने से सूर्य आदि का प्रकाशक न हो पाता किन्तु उसकी प्राप्ति में अपुरुषार्थता तथा परमात्मा में अवभासकता का न होना किसी को भी इष्ट नहीं है । अतः कोई भी उस कथन पर अपनी ईष्टापत्ति नहीं कहेगा । क्योंकि श्रुति-स्मृति के वचनों से विरोध होने लगेगा । यदि परमात्मा को 'सगुण' कहते हैं, तो निर्विशेषस्वरूपप्रतिपादक श्रुति के साथ विरोध होगा । यदि जीव को चिद्रूप नहीं कहते हैं, तो उसे जड़ कहना होगा, जड़ होने से उसे सावयव मानना होगा । सावयव होने पर घट आदि पदार्थों की तरह अनात्मरूप होने से जगत् में अन्धत्व प्राप्त होगा, तथा [3]श्रुति-स्मृतियों के साथ विरोध भी होगा ।

'यदि आत्मा, कर्ता होता तो विकारी होने से परिणामी होगा । तब उसे अनित्य कहना होगा । यदि कर्मसमुच्चित ज्ञान, मोक्ष का साधन होता तो मोक्ष भी कर्मजन्य होने से स्वर्ग की तरह अनित्य होता–इत्यादि ये सब तर्क हैं । व्याप्य का आरोप करके व्यापक का प्रसञ्जनरूप तर्क, जो प्रदर्शित किया गया है, उसे श्रुति ने प्रदर्शित किया है । यह मनन, शारीरक मीमांसा के द्वितीय अध्याय के पठन से निष्पन्न हो पाता है ॥ ११ ॥

अब क्रमप्राप्त 'निश्चय' का लक्षण बताते हैं—**पूर्वोक्त संशय का जो विरोधी ज्ञान है, उसे निश्चय कहते हैं ।** जिस व्यक्ति को जब किसी पदार्थ का निश्चय हो जाता है, तब उसे ज्ञात हुए पदार्थ में संशय नहीं रहता । अतः 'निश्चय' में संशय का विरोधित्व रहता है ।

---

१. प्रसज्येतैवमादि पठितव्यम् ।

२. 'यदि परमात्मा आनन्दो न स्यात् तत्प्राप्तेरपुरुषार्थत्वं स्यात्' । तथा—'यदि परमात्मा चिद्रूपो न स्यात् तर्हि घटादिवत् जडत्वेन तस्य सूर्याद्यवभासकत्वं न सम्भवेत्' ।

३. 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स्वयं ज्योतिर्भवति', 'क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत' इत्यादि ।

स च द्विविधः यथार्थोऽयथार्थश्चेति । अविसंवादी यथार्थनिश्चयः । स च उक्त एव । विसंवाद्ययथार्थनिश्चयः । स च द्विविधः तर्को विपर्ययश्चेति । तर्कस्तूक्त एव । विपर्ययो मिथ्याज्ञानम् । अतस्मिंस्तद्बुद्धिरिति यावत् । स च द्विविधः—निरुपाधिकः सोपाधिकश्चेति । तत्राद्यो द्विविधः—बाह्य आभ्यन्तरश्चेति । शुक्त्यादाविदं रजतमित्यादिर्बाह्यः । अहमज्ञो ब्रह्म न जानामीत्यादिराभ्यन्तरः ।

•

स्वरूपेण तदयोगात् । नापि निर्विषयत्वं निर्विषयज्ञानाभावादित्याशङ्कायामाह—**अतस्मिंस्तदिति** । तदभाववति तज्ज्ञानं मिथ्याज्ञानमित्यर्थः । स्वतो ज्ञानस्य बाधाभावेऽपि विषयबाधेन तत्सम्भवात् । बाध्यत्वं ज्ञानस्य मिथ्यात्वमित्यर्थः । विपर्ययं विभजते—**स चेति** । निरुपाधिकं विभज्य यथोद्देश्यं व्युत्पादयति—**आद्येति** । **शुक्ताविति** । इदं रजतमिति भ्रमः । **बाह्यो** निरुपाधिकभ्रम इत्यर्थः । अहमित्याभ्यन्तरो निरुपाधिकभ्रम इत्यर्थः ।

सोपाधिकं भ्रमं विभज्य यथाक्रमं व्युत्पादयति—**सोपाधिकेति** । **लोहितेति** । बाह्यः सोपाधिकभ्रम इत्यर्थः । **सोपाधिक इति** सोपाधिकभ्रम इत्यर्थः । **ननु** आकाशादिप्रपञ्चभ्रमस्य कथं सोपाधिकभ्रमत्वम् ? जपाकुसुमादिवत् तदनुपलम्भादित्याशङ्क्याह—**कर्मेति** । **ननु** अस्तु कर्माविद्याकार्यम्, तथापि कथं सोपाधिकत्वम् ? इत्याशङ्क्याह—**तत्त्वज्ञानिन इति** ।। ज्ञानेनावरणशक्तिमदज्ञाने निवृत्तेऽपि विक्षेपशक्तिमदज्ञानेन प्रारब्धक्षयपर्यन्तमाकाशादिप्रपञ्चस्यानुभूयमानत्वात्तद्भ्रमः सोपाधिक एव । न चोपाधेरनुपलम्भः; कर्मसहितविक्षेपशक्तिमदज्ञानस्यैवोपाधित्वादिति भावः । आभ्यन्तरसोपाधिकभ्रमं दर्शयति—**कर्तृत्वादीति** । अहं कर्तेत्यात्मनि कर्तृत्वादिबुद्धिराभ्यन्तरः सोपाधिकः । तत्रान्तःकरणमुपाधिः,[1] तन्निष्ठकर्तृत्वादिरात्मन्यविवेकेनारोप्यते, तस्याऽसङ्गत्वेन स्वतः कर्तृत्वायोगात्, अतस्तस्य सोपाधिकत्वमिति भावः ।।

•

वह निश्चय दो प्रकार का होता है—(१) यथार्थ व (२) अयथार्थ । अविसंवादी अर्थात् फलपर्यवसायी ज्ञान यथार्थ निश्चय है । उसे प्रमानिरूपण में बता दिया गया है । विसंवादी अर्थात् निष्फल ज्ञान को अयथार्थ निश्चय कहते हैं । वह पुनः दो प्रकार का है—(१) तर्क और (२) विपर्यय । तर्क अभी ही बताया जा चुका है । विपर्यय कहते हैं मिथ्या ज्ञान को । तात्पर्य यह है कि जो ज्ञान वस्तु को वैसा देखे जैसी वह है नहीं, तब उसे मिथ्या या विपर्यय कहा जाता है । वह भी दो प्रकार का है-(१) निरुपाधिक एवं (२) सोपाधिक । इनमें निरुपाधिक पुनः दो प्रकार का है—(१) बाह्य तथा (२) आभ्यन्तर या भीतरी । सीप आदि में यह चाँदी है—आदि बाह्य निरुपाधिक विपर्यय है । मैं अज्ञानी हूँ, परमात्मा को जानता नहीं—इत्यादि आभ्यन्तर या भीतरी निरुपाधिक विपर्यय है ।

यहाँ फलपर्यवसायी का अर्थ है—ज्ञान के अनुसार चेष्टा करने पर तदनुसार ही फल मिलना । अर्थात् वहाँ आग है—समझकर यदि वहाँ पहुँचे और आग मिली तो उस ज्ञान को संवादी या अविसंवादी कहेंगे एवं यदि आग न मिली और ज्ञात हुआ कि जब हमने वहाँ आग समझी थी तब भी वहाँ आग नहीं थी तो उसी ज्ञान को असंवादी या विसंवादी कहेंगे ।

तर्क की अयथार्थता भी स्पष्ट है । यदि धूप 'आग' का लिंग न होता तो आग से जन्य भी न होता—यही तर्क का स्वरूप कहा था । धुआँ 'आग' का लिंग भी है और कार्य भी, अतः दोनों 'न होना'-ग़लत ज्ञान या अयथार्थ निश्चय का सूचक है ।

शंका—'ज्ञान' में जो **मिथ्यात्व** है, उसका स्वरूप क्या है ? क्या उसका स्वरूप—'बाध्यत्व' होना है, अर्थात् 'बाध्यत्व' को ही मिथ्यात्व कहते हैं ? अथवा ज्ञान का अपने विषय से रहित रहना अर्थात् ज्ञान का 'निर्विषय' रहना ही **मिथ्यात्व** है ? याने 'निर्विषयत्व' को ही **मिथ्यात्व** कहते हैं । किन्तु किसी भी ज्ञान का स्वरूपेण (स्वरूपतः) बाध कभी भी नहीं होता । उस कारण 'बाध्यत्व' का नाम **मिथ्यात्व** नहीं है । तथा कोई भी 'ज्ञान', **निर्विषय** भी नहीं रहता । 'ज्ञान' सर्वदा सविषयक ही होता है । अतः 'मिथ्यात्व' का स्वरूप क्या है ? उसका निर्वचन करना आवश्यक है ।

समा०—अन्य वस्तु में अन्य वस्तु का ज्ञान होना ही 'मिथ्या ज्ञान' है । जैसे—अन्य वस्तुरूप 'शुक्ति' में, अन्य वस्तुरूप 'रजत' का ज्ञान होना, याने 'शुक्तौ इदं रजतम्'—यह ज्ञान होना, 'मिथ्या ज्ञान' है ।

---

१. अध्यासभाष्ये तु आत्मान्तःकरणयोः परस्परतादात्म्याध्यासपूर्वकत्वं कर्तृत्वाध्यासस्य निरूपितमिति निरुपाधिकभ्रमत्वपक्ष एवोरीकृतः । यदि तु सोपाधिकाध्यासे धर्मितादात्म्याध्यासोऽप्यपेक्षितस्तर्हि जपाकुसुमतादात्म्याध्यासोऽपि तत्र कल्प्येतेत्याद्यन्यत्र विस्तरः । कर्तृत्वाध्यासस्य सोपाधिकत्वेजीवन्मुक्तौतत्प्रतीतिः; निरुपाधिकत्वे न सेति विशेषो दर्शनीयः ।

सोपाधिको द्विविधः—बाह्य आभ्यन्तरश्चेति। लोहितः स्फटिकः इत्यादिः बाह्यः। आकाशादिप्रपञ्चभ्रमोऽपि बाह्यः सोपाधिकः; कर्माऽविद्याकार्यत्वात्, तत्त्वज्ञानिनो निवृत्तेऽप्यज्ञाने प्रारब्धक्षयपर्यन्तं प्रपञ्चोपलब्धि[1]दर्शनात्। कर्तृत्वादिभ्रम आन्तरः।

•

नैयायिकास्तु स्वप्नमयथार्थस्मरणं वदन्ति, तन्निराकर्तुं स्वप्नस्य सोपाधिकभ्रमान्तर्भावमाह—**स्वप्नोऽपीति। सोपाधिकभ्रमः** अनुभव इत्यर्थः। **ननु** स्वप्नस्य स्मृतिरूपत्वात् कथं भ्रमानुभवत्वम्? न च—तत्तोल्लेखाभावादिदं पश्यामीत्यनुभवाच्च तथात्वमिति—वाच्यम्; दोषवशेन तदितिस्थाने इदमित्युदयात् स्वप्नः स्मृतिरेव, निद्रादोषवशात् पश्यामीत्यपि भ्रम एव, अन्यथा रथतदुचितदेशादीनामभावाद्रथाद्युत्पादनसामग्र्यभावात्कथं तदुत्पत्तिस्तदनुभवो वा स्यात्? तस्मात् स्मृतिरेव स्वप्न इत्याशङ्क्याह—**न स्मृतिरिति।** जाग्रत्कालीनरथतदुचितदेशतदुत्पादकसामग्र्यभावेऽपि जाग्रत्कालीनरथोत्पादकसामग्रीतो विलक्षणसामग्रीवशेन प्रातिभासिकरजतोत्पत्त्यनुभवाविव स्वप्नकालीनरथोत्पत्त्यनुभवौ न विरुध्येते इत्युपपादयति—**तथाहीति।** दारुतक्षादिः व्यावहारिकरथोत्पादकसामग्री, जाग्रदनुभवजनितवासनाविशिष्टमन्तःकरणं प्रातिभासिकरथगजाद्युत्पादकसामग्री तद्विलक्षणा च, ततो रथाद्युत्पत्तिस्तदनुभवश्च द्वयं युक्तमेव, अतो स्वप्नो[2] न स्मृतिरिति भावः। **ननु** जाग्रद्भोगप्रदकर्मणि सति कथं स्वप्नः स्यादित्याशङ्क्याह—**जाग्रदिति।** तथापि भोगप्रदकर्मोपरमे सुषुप्तिरेव स्यात्, न स्वप्नः, इत्याशङ्क्याह—**स्वप्नेति। ननु** स्वप्ने प्रमाणप्रमेय-

•

यद्यपि 'ज्ञान' का स्वरूप से (स्वरूपतः) बाध नहीं होता, तथापि 'विषय' का बाध होने से, उस 'ज्ञान' का 'बाध' कहा जाता है। एवं च 'ज्ञान' में रहनेवाला 'बाध्यत्व' ही 'ज्ञान' के मिथ्यात्व को सिद्ध करता है।

यह 'विपर्यय' रूप भ्रम भी (१) 'निरुपाधिक भ्रम', और (२) 'सोपाधिकभ्रम' के भेद से दो प्रकार का होता है। उनमें से जो 'भ्रम', 'अधिष्ठान' के ज्ञान से निवृत्त हो जाता है, उस भ्रम (विपर्यय) को 'निरुपाधिकभ्रम' कहते हैं। तथा जो 'भ्रम', 'अधिष्ठान' के ज्ञात होने पर भी निवृत्त नहीं होता, उस भ्रम को 'सोपाधिकभ्रम कहते हैं।

'शुक्ति' तथा 'रज्जु' आदि अधिष्ठान का ज्ञान हो जाने पर 'इदं रजतम्', 'अयं सर्पः'—इत्यादि 'भ्रम' की निवृत्ति हो जाती है। तथा अधिष्ठानभूत 'आत्मा' का ज्ञान होने से 'अहं अज्ञः'—इस प्रकार के भ्रम की निवृत्ति हो जाती है। इसलिए इन उक्तभ्रमों में 'निरुपाधिकभ्रमत्व' है।

इसी प्रकार सोपाधिक भ्रम भी (१) बाह्य (२) आन्तर के भेद से दो प्रकार का होता है। जैसे—रक्त वर्ण (रक्तगुण) से रहित, निर्मल-श्वेत स्फटिकमणि में, रक्तवर्ण के जपाकुसुमादि द्रव्य के समीप रहने पर 'लोहितः स्फटिकः'—यह भ्रम होता है, इस भ्रम को 'बाह्य सोपाधिक भ्रम' कहते हैं। यह स्फटिकमणि, श्वेत है, 'रक्त' (लाल) नहीं है इसप्रकार अधिष्ठानभूत स्फटिकमणि का ज्ञान होने पर भी जबतक वहाँ से 'जपाकुसुम' रूप 'उपाधि' की निवृत्ति नहीं होती, तबतक 'लोहितः स्फटिकः'–इस भ्रम की निवृत्ति नहीं होती है। उस कारण 'लोहितः स्फटिकः'—इस भ्रम में 'सोपाधिक भ्रमरूपता' रहती है।

इसीप्रकार तत्त्वज्ञानी पुरुष को जो 'आकाशादिप्रपञ्च' का अनुभव होता है, वह भी 'बाह्य सोपाधिक भ्रम' है।

शङ्का—'लोहितः स्फटिकः'—इस भ्रम में तो 'जपाकुसुम' रूप उपाधि' विद्यमान रहता है, उस कारण उस 'भ्रम' को 'सोपाधिक' कहना उचित है, किन्तु इस 'प्रपञ्चभ्रम' में तो कोई 'उपाधि' दिखाई नहीं देता। तब इस 'प्रपञ्चभ्रम' को 'सोपाधिक' कैसे कहा जायगा?

समा०—इस 'प्रपञ्चभ्रम' में भी 'प्रारब्ध कर्मसहित विक्षेप-शक्तिविशिष्ट अज्ञान' ही 'उपाधि' रूप है। क्योंकि 'अहं ब्रह्मास्मि'—इत्याकारक 'अधिष्ठानभूत ब्रह्म' के ज्ञान से 'आवरणशक्तिविशिष्ट अज्ञान' की निवृत्ति होने पर भी 'विक्षेपशक्तिविशिष्ट अज्ञान' के कारण 'प्रारब्धकर्म' तो बना ही रहता है। उसका नाश जबतक नहीं होता, तबतक तत्त्वज्ञानी पुरुष को

---

१. ब्रह्मानन्दसरस्वत्यस्तु—अप्रामाण्यज्ञानानास्कन्दितपटुतमसंस्कारसहितभुज्यमानादृष्टाभावादिसहिताधिष्ठानसाक्षात्कारस्यैवाज्ञाननिवर्तकत्वात् न प्रारब्धक्षयात् पूर्वमज्ञानं निवर्तते, इत्याकाशादिभ्रमो निरुपाधिक एवेति मन्यन्ते।

२. अनुभूतसजातीयस्यैव स्वप्ने भानं न तु तस्यैव। अतः स्वसमानविषयकसंस्काराजन्यत्वात् न स्मृतित्वम्। स्मृतिरूपत्वं तु अध्याससामान्यस्याविद्यमानविषयत्वेन इति भामत्यादौ व्यक्तम्।

स्वप्नोऽप्याभ्यन्तरः सोपाधिकभ्रम एव, न तु स्मृतिः। तथाहि—जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके सकलविषयेन्द्रियादिवासनावासितं निद्रादोषोपप्लुतमन्तःकरणं[1] रथादिविषयाऽऽकारेण ग्राहकेन्द्रियाद्याकारेण रथादिविषया-

●

व्यवहारस्य जाग्रद्व्यवहारतुल्यत्वात्कथं रथादेः प्रातिभासिकत्वम्? इत्याशङ्क्य, जाग्रत्पदार्थस्य भौतिकत्वेन चिरस्थायित्वात् स्वप्नपदार्थस्य वासनाविशिष्टान्तःकरणपरिणामत्वेन वासनामयत्वादुभयोर्वैलक्षण्यमस्तीत्यभिप्रेत्याह—**सकलेति**। विषयाश्चेन्द्रियाणि च तेषां वासनाः ताभिर्वासितं वासनाश्रयमिति यावत्। **ननु** भ्रमस्य दोषजन्यत्वात् प्रकृते तदभावात्कथं भ्रमः स्यात् स्वप्नः? इत्याशङ्क्याह—**निद्रेति**। निद्रादोषसत्त्वाद्भ्रमः सम्भवतीत्यर्थः। **ननु** अन्तःकरणं सर्वाकारेण परिणमते चेत् तदानीं ग्राह्यग्राहकव्यवहारः कथं स्यात् तद्ग्राहकेन्द्रियाणामुपरतत्वात्? इत्याशङ्क्याऽन्तःकरणस्यैव ग्राह्यग्राहकोभयाकारेण परिणतत्वात्तथा व्यवहार

●

भी 'आकाशादिप्रपञ्च' का अनुभव होता रहता है। उस कारण 'लोहितः स्फटिकः'—इस भ्रम के समान 'प्रपञ्चभ्रम' को भी सोपाधिक भ्रम ही कहा जाता है। और 'अहं कर्ता, अहं भोक्ता'—मैं कर्ता हूँ, मैं भोक्ता हूँ—इत्याकारक जो 'आत्मा' में 'कर्तृत्व', 'भोक्तृत्व' बुद्धि होती रहती है, उस 'बुद्धि' को 'आन्तर (आभ्यन्तर) सोपाधिक भ्रम' कहा जाता है। इस 'भ्रम' में 'अन्तःकरण' ही 'उपाधि' है। क्योंकि 'आत्मा' तो वस्तुतः 'असंग' और 'निर्विकार' है। ऐसे 'आत्मा' में 'स्वरूपतः' तो 'कर्तृत्व-भोक्तृत्व' का होना सम्भव नहीं है। किन्तु 'अन्तःकरण' के 'कर्तृत्व'-'भोक्तृत्व' आदि धर्मों का, अविवेक से 'आत्मा' पर आरोप किया जाता है। उस कारण 'अहं कर्ता, अहं भोक्ता'—इत्यादि ज्ञान में आन्तर सोपाधिक भ्रमरूपता है।

नैयायिक विद्वान् 'स्वप्न' को 'अयथार्थस्मरण' कहा करते हैं। उनके उक्त वक्तव्य का खण्डन करने के लिए वेदान्ती विद्वान् 'स्वप्न' का 'सोपाधिक भ्रम' में अन्तर्भाव बता रहे हैं—**वेदान्ती का कहना है कि 'स्वप्न' भी 'आभ्यन्तर सोपाधिक भ्रम' (अनुभव) ही है। अर्थात् 'स्वप्न' में जो रथादि पदार्थों का ज्ञान होता है, वह ज्ञान भी 'आन्तर सोपाधिक भ्रम' ही है, वह 'स्मृति' रूप नहीं है।** क्योंकि 'स्वप्न' में होने वाला ज्ञान, यदि 'स्मृति' रूप होता तो उस 'स्मृतिरूप ज्ञान' का आकार 'सः रथः' होता। किन्तु स्वप्न में 'सः रथः' इत्याकारक ज्ञान नहीं होता, अपि तु यह रथ है, रथ को मैं देख रहा हूँ—यह 'ज्ञान' होता है। उसकारण यह 'स्वप्नज्ञान' भी 'आन्तर सोपाधिक भ्रमरूप' अयथार्थ '**अनुभव**' ही है। उसे 'स्मृति' रूप कहना उचित नहीं है। अतः 'स्वप्न' को 'अयथार्थस्मृति'रूप कहनेवाले तार्किकों (नैयायिकों) का मत, असंगत ही है।

शङ्का—नैयायिक कहता है कि 'स्वप्नज्ञान' को 'स्मृतिरूप' न मानकर यदि 'अनुभवरूप' मानोगे तो 'अनुभव' के विषयभूत 'रथादि पदार्थों' की वहाँ 'उत्पत्ति' भी माननी होगी। किन्तु 'स्वप्न' में 'रथादिकों' की उत्पत्ति का होना सम्भव नहीं है। क्योंकि जाग्रदवस्था में 'जितने देश' में 'जितनेकाल' में उन 'रथादिपदार्थों' की उत्पत्ति हुआ करती है, उतना देश और उतना काल' स्वप्न' में कहाँ है? अर्थात् नहीं है। और लोकप्रशिद्ध रथादिकों को बनाने के लिए जो काष्ठ, तक्षा (बढाई) आदि सामग्री अपेक्षित रहती है, वह सामग्री भी 'स्वप्न' में नहीं है, और 'कारणभूत सामग्री' के बिना 'कार्य' की उत्पत्ति कभी नहीं हुआ करती। उस कारण 'स्वप्न' में उन 'रथ' आदि पदार्थों की उत्पत्ति का होना सम्भव नहीं है। अतः स्वप्न में होनेवाले रथादिपदार्थों के ज्ञान को 'स्मृतिरूप' ही मानना चाहिए। **किञ्च**—वह स्वप्नज्ञान 'निद्रा' आदि दोष से उत्पन्न होता है, अर्थात् निद्रादिदोषजन्य है। उस कारण 'सः रथः'—यह ज्ञान, न होकर, उसके स्थान में 'अयं रथः'—इत्याकारक जो ज्ञान होता है, वह 'भ्रम' ही है।

समा०—जैसे हट्टस्थित (बाजार=सराफा बाजार में स्थित) व्यावहारिक (असली) रजत की उत्पादक सामग्री से भिन्न ही (विलक्षण) 'प्रातिभासिक रजत' की उत्पादक सामग्री होती है, उसी प्रकार जाग्रदवस्था के रथादिपदार्थों की उत्पादक सामग्री से भिन्न (विलक्षण), ही स्वाप्निक रथादिपदार्थों की उत्पादक सामग्री होती है। सामग्री की विलक्षणता (भिन्नता) को बताते हैं—**जाग्रत्कालिक सुख-दुःखादिभोगप्रद पुण्य-पापरूप कर्मों का उपराम होने पर, तथा स्वप्नकालिक सुख-दुःखादिभोगप्रद कर्मों का उद्भव होने पर, तथा 'चक्षुरादि इन्द्रियों' के लीन होने पर, 'जाग्रत्कालीन' रथादि पदार्थों की जो 'संस्काररूप वासना' है, तथा इन्द्रियादिकों की जो संस्काररूप वासना है, उन समस्त वासनाओं का आश्रयभूत, तथा 'निद्रादि दोषों' से युक्त जो 'अन्तःकरण' है, वह 'अन्तःकरण' ही 'स्वप्नावस्था' में उन रथादिविषयों (पदार्थों) के आकारों में परिणत हो जाता है। तथा उन रथादिविषयों के ग्राहक 'चक्षुरादि', इन्द्रियाकार में परिणत हो जाते हैं। तथा वे 'रथादि', विषयाकार वृत्ति के**

१. प्रातीतिकानामाविद्यकत्वनियमादन्तःकरणमिति तत्कारणीभूतमज्ञानमित्यर्थः।

कारवृत्त्याकारेण च परिणमते। अन्तःकरणोपहितसाक्षी स्वयमन्यानवभास्यस्तत्सर्वमवभासयति। अतः स्वप्ने साक्षिणः स्वप्रकाशत्वं सुविज्ञेयम्। जाग्रदवस्थायां सूर्यादितेजोभिः संकीर्णत्वात् साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयम्। स्वप्ने तु सूर्यादीनां

●

इत्याह—**रथादीति। ननु** आलोकसहकृतचक्षुष एव रूपग्राहकत्वात्तदानीं तदभावात्कथं रूपाद्यनुभवः? इत्याशङ्क्य सर्ववासनाश्रयान्तःकरणोपहितसाक्षिबलेन रूपादिसर्वविषयानुभव उपपद्यत इत्याह—**अन्तःकरणेति। ननु** साक्षी साक्ष्यन्तरेण प्रथते चेत्तदाऽनवस्था स्यात्। न चेद्, अज्ञायमानो जडः कथं विषयमवभासयेत्? इत्याशङ्क्याह—**स्वयमिति।** स्वयंप्रकाशमानत्वात्स्वयमन्यानवभास्यः सन् सर्वस्वप्नपदार्थजातमवभासयतीत्यर्थः। **ननु** जाग्रदवस्थायां साक्षिणः स्वयम्प्रकाशत्वस्याननुभूयमानत्वात्कथमन्यानवभास्यत्वम्? इत्याशङ्क्य जाग्रति सूर्यादितेजोभिः संकीर्णतयाऽविवेकिनां साक्षिणः स्वयम्प्रकाशत्वस्याननुभवेऽपि स्वप्ने

●

रूप में परिणत हो जाते हैं। इस प्रकार से जाग्रत्कालिक रथादिकों की सामग्री से, स्वप्न की प्रातिभासिक रथादिकों की सामग्री विलक्षण (भिन्न) ही होती है।

शङ्का—जैसे जाग्रत् अवस्था में 'प्रमाता', 'प्रमाण', और 'प्रमेय' का व्यवहार किया जाता है, वैसे ही स्वप्न में भी प्रमाता, प्रमाण, प्रमेय' का व्यवहार किया जाता है। उस कारण स्वाप्निक पदार्थों को 'प्रातिभासिक' कहना उचित नहीं है।

समा०—जाग्रदवस्था के जो पदार्थ हैं, वे भौतिक (पृथिव्यादिभूतों से पैदा हुए) कार्य हैं, उस कारण वे पदार्थ, चिरकाल तक स्थायी रहते हैं। किन्तु स्वप्नावस्था के 'रथादिपदार्थ', 'वासनाविशिष्ट अन्तःकरण' के परिणामरूप होने से 'वासनामय' है। यही कारण है कि वे स्वप्नकाल के पदार्थ, अल्पकाल तक ही स्थित रहते हैं, अर्थात् चिरकाल तक स्थायी नहीं रहते। एवं च स्वाप्निक पदार्थों में जाग्रत् के पदार्थों से विलक्षणता होने के कारण उनमें प्रातिभासिकता का होना असंभव नहीं है, अपितु सर्वथा संभव है।

किञ्च—'शुक्ति' में 'रजत' का ज्ञान, जैसे दोषजनित है, वैसे ही स्वाप्नपदार्थों का ज्ञान भी 'निद्रा' रूप दोष से जन्य है। उस कारण उस स्वाप्नज्ञान में 'भ्रमरूपता' का होना भी संभव है, असंभव नहीं।

शंका०—जाग्रदवस्था में सूर्यादिज्योतियों के प्रकाश की सहायता प्राप्त किये चक्षुरादि इन्द्रिय रहते हैं, अर्थात् चक्षुरादि इन्द्रियाँ आलोकसहकृत रहती हैं। उस कारण उन इन्द्रियों से 'रूपादि' पदार्थों का ज्ञान (ग्रहण) होता है। किन्तु स्वप्नावस्था में उन चक्षुरादि इन्द्रियों का अभाव रहता है। अभाव रहने से स्वप्न में उन रूपादि पदार्थों का अनुभव कैसे हो सकता है?

समा०—स्वप्नावस्था में जो 'वासना (संस्कार) विशिष्ट अन्तःकरण' है, उससे उपहित साक्षी चैतन्य ही, स्वाप्निक रथादि-पदार्थों को प्रकाशित करता है।

शंका—स्वप्न में जो 'साक्षी' है, वह किसी दूसरे साक्षी से प्रकाशित होकर उन रथादि पदार्थों को प्रकाशित करता है, अथवा दूसरे के द्वारा अप्रकाशित रहकर ही (दूसरे से प्रकाशित न होकर ही) स्वप्न के रथादि पदार्थों को प्रकाशित करता है?

प्रथम पक्ष का स्वीकर यदि करते हो तो 'अनवस्थादोष' होगा। क्योंकि प्रथम साक्षी के समान, दूसरा साक्षी भी किसी तीसरे साक्षी से प्रकाशित होकर ही प्रकाश करेगा, उसी तरह तीसरा साक्षी भी किसी चतुर्थ साक्षी से प्रकाशित होकर ही प्रकाश करेगा। इस प्रकार पूर्व-पूर्व साक्षी के प्रकाशार्थ उत्तर-उत्तर साक्षी का स्वीकार करने से अनवस्था का प्रसंग प्राप्त होगा।

यदि दूसरा पक्ष स्वीकार करते हो तो 'अज्ञात' रहने से जड बना हुआ साक्षी, उन स्वाप्न पदार्थों को कैसे प्रकाशित करेगा?

समा०—**वह साक्षी चैतन्य, स्वयं प्रकाशमान है, अर्थात् वह स्वत एव प्रकाशमान है। उस कारण उस साक्षी में पूर्वोक्त-अनवस्था, तथा जडता नहीं होगी। यह स्व-प्रकाश साक्षी ही उन स्वाप्निक पदार्थों को प्रकाशित करता है। एवं च स्वप्नावस्था में उस साक्षीचैतन्य का 'स्व-प्रकाशत्व' सहजगम्य है। अर्थात् सरलता से जाना जा सकता है।**

शंका—श्रुतियाँ, उस साक्षी चैतन्य को सूर्य-चन्द्रादि समस्त जगत् का प्रकाशक, कह रही हैं। तथा सूर्य-चन्द्रादि की ज्योतियों से उस साक्षी चैतन्य को प्रकाशित नहीं किया जा सकता। यही साक्षी चैतन्य का 'स्वप्रकाशत्व' है। उस कारण साक्षी

जाग्रत्पदार्थानामुपरतत्वात्स्वयम्प्रकाशत्वं विवेक्तुं शक्यते ॥ १२ ॥

तथाच श्रुतिः "स यत्र प्रस्वपित्यस्य लोकस्य सर्वतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन

●

सूर्यादिज्योतिषामुपरतत्वात्तस्य स्वप्रकाशत्वं सुग्रहमित्याह—**अत एवेति**। यतः स्वयमन्यानवभास्यः सन् तत्सर्वमवभासयत्यत एवेत्यर्थः। सुज्ञेयत्वमेवोपपादयति—**जाग्रदिति**। यद्यपि जाग्रदवस्थायामपि स्वप्रकाशसाक्षिबलेन सूर्यादिज्योतिषां भानम् "येन सूर्यस्तपति तेजसेद्धः" "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती"त्यादिश्रुतेः" स्वयमादित्यादिभिरनवभास्यः, "न तत्र सूर्यो भाति न चन्द्रतारकमि"त्यादिश्रुतेः, तथाप्यविवेकिनां साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयमेव जडप्रकाशैः संकीर्णत्वात्। स्वप्ने तु तत्संकीर्णाभावात्सुज्ञेयमितिभावः ॥ १२ ॥

स्वप्नपदार्थानामन्तःकरणपरिणामित्वेन तत्साक्षिणः स्वप्रकाशत्वे श्रुतिमुदाहरति—**तथा चेति**। **सः**[1] बुद्ध्युपाधिको जीवः। **यत्र** यस्यामवस्थायाम्। **लोकस्य** जाग्रत्पदार्थजातस्य। **मात्राम्** वासनाम्। **स्वयं विहत्य** स्थूलशरीराभिमानं मनुष्योऽह-मित्याकारं त्यक्त्वा। **स्वयं निर्माय** वासनामयान् रथादिपदार्थान् सृष्ट्वा। **स्वेन भासा** स्वोपाधिभूतान्तःकरणविषयाकाररूपया वृत्त्या। **स्वेन ज्योतिषा** स्वप्रकाशचैतन्यज्योतिषा। **अत्र** स्वप्नावस्थायाम्। **स्वयं ज्योतिर्भवति** जडप्रकाशानामादित्यादीनामु-परतत्वादात्मा स्वप्रकाशचिद्रूपस्सन् विविक्ततयाऽवतिष्ठत इत्यर्थः, तत्र स्वप्नावस्थायां रथादयस्तदुचितदेशाश्च केऽपि न सन्तीत्यर्थः। **अथ** तदा। रथादीन् वासनामयान् तदुचितदेशाँश्च। **सृजति** उत्पादयति निद्रादोषेण स्वात्मन्यारोपयतीत्यर्थः। **आदिशब्देन**—स्वप्नेन शरीरमभिप्रहृत्याचेतनः "सुप्तः सुप्तानभिकाचाशीति शुक्रमादाय पुनरेतिस्थानं हिरण्मयःपुरुष एकहंसः" इत्याद्याः श्रुतयो गृह्यन्ते। श्रुतिं व्याचष्टे—**स्वयं ज्योतिरिति**।

●

चैतन्य का स्वप्रकाशत्व, जाग्रदवस्था में भी निर्णीत ही है। उस जाग्रदवस्था को न कहकर स्वप्नावस्था में उस साक्षीचैतन्य के 'स्वप्रकाशत्व' को सुविज्ञेय कहना उचित नहीं है।

समा०—यद्यपि विवेकशील पुरुषों को जाग्रदवस्था में भी साक्षीचैतन्य का स्वप्रकाशत्व सुविज्ञेय है, तथापि **अविवेकी** पुरुषों को जाग्रदवस्था में साक्षी का स्वप्रकाशत्व दुर्विज्ञेय ही है। क्योंकि जाग्रदवस्था में सबके गमनागमनादिव्यवहार, सूर्यरूप-ज्योति से होते हैं, और सूर्यरूप ज्योति के अभाव में चन्द्ररूप ज्योति से वे व्यवहार चलते हैं, चन्द्ररूप ज्योति के भी अभाव में अग्निरूप ज्योति से वे व्यवहार होने लगते हैं। और अग्निरूप ज्योति का अभाव होने पर घने अन्धकार में शब्दरूप ज्योति से वे व्यवहार सम्पन्न हो जाते हैं। **इस प्रकार जाग्रदवस्था में व्यवहारसम्पादक (साधक) सूर्यादि अनेक ज्योतियों से मिश्रित हुआ वह साक्षी चैतन्य-रूप ज्योति है। उस कारण जाग्रदवस्था में अविवेकी जनों को उस साक्षी चैतन्य के स्वप्रकाशत्व का निर्णय नहीं हो पाता। और स्वप्नावस्था में तो जाग्रदवस्था की उन सूर्य-चन्द्रादिक समस्त ज्योतियों का लय हो जाता है। तथापि जाग्रदवस्था के समान ही स्वप्नावस्था में भी वे सभी व्यवहार हुआ करते हैं। जो भी व्यवहार किया जाता है वह ज्योति की सहायता से प्रकाश में ही किया जाता है। अतः उन स्वाप्न व्यवहारों की साधक किसी ज्योति (प्रकाश) को भी अवश्य मानना होगा। यद्यपि स्वप्नावस्था में 'अन्तःकरण', तथा 'अज्ञान' विद्यमान है, तथापि वह 'अन्तःकरण', 'विषय' के आकार में परिणत हो गया है। इसलिये उस अन्तःकरण को भी ज्योतिःस्वरूप नहीं कह सकते, और 'अज्ञान' तो 'तम' के समान 'प्रकाश' का 'विरोधी भाव पदार्थ' ही है। इसलिये उस अज्ञान को भी ज्योतिरूप नहीं कह सकते। परिशेषात् वह साक्षीचैतन्यरूप ज्योति ही, स्वाप्नव्यवहारों की साधक (सम्पादक) है, यही मानना पड़ता है।** इस रीति से अविवेकी पुरुषों को भी स्वप्नावस्था में उस साक्षी चैतन्य के 'स्वप्रकाशत्व' का निर्णय हो सकता है। इसलिये स्वप्नावस्था में साक्षी चैतन्य का स्वप्रकाशत्व, सुविज्ञेय है—यह कहा था ॥ १२ ॥

शंका—उन स्वाप्न पदार्थों का प्रकाश, 'स्वप्रकाश साक्षी' से भले ही होता रहे, तथापि वे रथादि स्वाप्न पदार्थ, स्वप्न में नवीन ही उत्पन्न होते हैं—इसमें कौन-सा प्रमाण है ?

समा०—साक्षात् 'श्रुति' ही उक्त वक्तव्य में प्रमाण है। 'श्रुति' का अर्थ इस प्रकार है—'सः'—वह **बुद्ध्युपाधिक जीव, 'अत्र'—जिस अवस्था में, 'लोकस्य'—जाग्रत्कालिक पदार्थों की, 'मात्राम्'—वासना को, 'स्वयं विहत्य'—स्थूलशरीराभिमान को अर्थात् 'मनुष्योऽहम्'—इस आकार को त्याग कर, 'स्वयं निर्माय'—वासनामय रथादिपदार्थों को उत्पन्न करके 'स्वेन भासा'—स्वोपाधिभूत** अन्तःकरणविषयाकाररूप वृत्ति से—**'स्वेन ज्योतिषा'—स्वप्रकाशचैतन्यरूप ज्योति** से, **'अत्र'—स्वप्ना-**

---

1. अहंकारोपहितचैतन्यं स्वप्नाध्यासस्योपादानमिति मताभिप्रायमिदं विवरणम्। सर्वत इत्यस्य सर्वावत इति श्रुतौ पाठः।

ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः

●

ननु—किमिदं स्वप्रकाशत्वम् ? न तावत् ज्ञानाविषयत्वम्; "तन्त्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिविरोधप्रसङ्गात् । नापि स्वसमानजातीयज्ञानाविषयत्वम्; अप्रसिद्धेरसम्भवात् । नापि स्वविषयत्वम्; एकस्य कर्मकर्तृभावायोगात् । **एतेन**—अवेद्यत्वं स्वप्रकाशत्वमिति—**प्रत्युक्तम्** । **न च**—फलाव्याप्यत्वं तदिति—**वाच्यम्**; धर्माधर्मयोरतिव्याप्तेः । **नापि**—अपरोक्षव्यवहारयोग्यत्वं तदिति—**वाच्यम्**; आत्मनोऽसङ्गतया निर्धर्मकत्वेन योग्यतावच्छेदकापरिज्ञानाद्योग्यत्वस्यासम्भवात् । तस्मात् स्वप्रकाशत्वं दुर्निरूपम्—इति ?

तत्राह—**चैतन्येति**[1] । **ननु**—आत्मनः सर्वात्मनाऽविषयत्वे व्यवहारः **कथं** स्याद्, व्यवहारस्य स्वसमानविषयव्यवहर्तव्यज्ञानसाध्यत्वादिति—**चेत् ? न**; लाघवात् व्यवहर्तव्यज्ञानमेव व्यवहारकारणम् न तु स्वसमानविषयत्वेन, गौरवात् । ज्ञानस्य स्वस्मिन् स्वविषयभ्रमसंशयादिनिवर्तकत्वनियमादविषयत्वम्, अन्यथा जडत्वप्रसङ्गात् ।

ननु—एवं सति व्यवहर्तव्यज्ञानस्य चैतन्यस्य सदातनत्वेन सर्वदा घटादिव्यवहारप्रसङ्गः स्वसमानविषयत्वस्य तत्राप्रयोजकत्वात्; नहि कस्यचित्सर्वदा घटादिव्यवहारो भवति । किञ्च वृत्तिनिर्गमनाभ्युपगमवैयर्थ्यप्रसङ्गः; घटादीन्द्रियसन्निकर्षे सति

●

वस्था में 'स्वयंज्योतिर्भवति' जब प्रकाशवाले आदित्य आदि के उपरत होने से स्वप्रकाश आत्मा, चिद्रूप होकर विविक्त (पृथक्) रूप से स्थित रहता है । उस स्वप्नावस्था में रथ आदि, और उसके योग्य देश (स्थान), प्रभृति कुछ भी नहीं रहता है । 'अथ'—तब, 'रथादीन्' वासनामय रथों को एवं तदुचित देशों को, 'सृजति'—उत्पन्न करता है । अर्थात् निद्रादोष से अपने में (स्वात्मनि) आरोपित कर लेता है । अर्थात् जाग्रदवस्था में जो व्यावहारिक रथ है, तथा उन रथों में जुतनेवाले जो अश्व हैं, तथा उन अश्वों के चलने योग्य जो मार्ग है, उन सभी का स्वप्न में अभाव है । तथापि स्वप्न में रथों को, अश्वों को, तथा उनके मार्गों को उत्पन्न करता है—यह श्रुति बता रही है कि 'स्वप्न' में, जाग्रदवस्था के रथों का अभाव है, और प्रातिभासिक रथादिकों की उत्पत्ति हुआ करती है । यह कहने से सिद्ध हो रहा है कि रथादिकों को विषय करनेवाला जो स्वाप्नज्ञान है, वह 'अनुभवरूप' ही है । स्मृतिरूप नहीं ।

यह 'स्वप्रकाशत्व' क्या है ? 'ज्ञानाऽविषयत्व' को यदि स्वप्रकाशत्व कहते हैं, तो उसे उपनिषद् से ज्ञेयपुरुष बतानेवाली श्रुतियों के साथ विरोध का प्रसंग प्राप्त होगा । यदि 'स्वसमानजातीयज्ञानाऽविषयत्व स्वप्रकाशत्व—कहते हैं तो अप्रसिद्ध होने से असम्भव' ही है । यदि 'स्वविषयत्व' कहते हैं, तो एक ही वस्तु में 'कर्मत्व' तथा 'कर्तृत्व' दोनों का रहना सम्भव नहीं है । एवञ्च 'अवेद्यत्वं स्वप्रकाशत्वम्'—इस लक्षण का खण्डन हो गया । 'फलाव्याप्यत्वं स्वप्रकाशत्वम्'—यह भी नहीं कह सकते । क्योंकि धर्माधर्म में अतिव्याप्ति होगी । 'अपरोक्षव्यवहारयोग्यत्वंस्वप्रकाशत्वम्'—यह भी नहीं कह सकते । क्योंकि 'आत्मा' के असंग होने से निर्धर्मक रहने के कारण योग्यतावच्छेदक का परिज्ञान न हो पाने से 'योग्यत्व' ही असम्भव है । अतः 'स्वप्रकाशत्व' का निरूपण करना दुःसाध्य है ।

उस पर सिद्धान्ती कहता है 'चैतन्याऽविषयत्व ही स्वप्रकाशत्व है' अर्थात् चैतन्य में तादात्म्येन अनारोपित होना (आरोपित न होना) ही स्वप्रकाशत्व है ।

आत्मा को सर्वात्मना अविषय मानने पर व्यवहार कैसे उपपन्न होगा ? इस पर यदि यह कहें कि व्यवहार, 'स्वसमानविषयव्यवहर्तव्यज्ञानसाध्य होने से हो सकेगा । किन्तु यह कहना ठीक नहीं है । लाघव की दृष्टि से 'व्यवहर्तव्यज्ञान' के होने से ही व्यवहार की उपपत्ति हो जाती है । 'अतः 'व्यवहर्तव्यज्ञानमेव व्यवहारकारणम्'—यह कहने में ही 'लाघव' है । 'स्वसमानविषयत्वेन' व्यवहर्तव्य ज्ञान को कहने में 'गौरव' है । क्योंकि यह नियम है कि 'ज्ञान', में स्वविषयभ्रमसंशय आदि की निवर्तकता रहा करती है । उस कारण 'ज्ञान' में अविषयता रहती है, अर्थात् ज्ञान किसी का विषय नहीं होता । अन्यथा 'जडता' प्राप्त होगी ।

शङ्का—ऐसी स्थिति में व्यवहर्तव्यज्ञान का चैतन्य, तो सर्वदा (सदातन) रहने से सर्वदा ही घटादिव्यवहार चलते रहने का प्रसंग आवेगा । इस पर यदि यह कहा जाय कि 'स्वसमानविषयत्व' को व्यवहार के होने में अप्रयोजक माना है, उस कारण सर्वदा व्यवहार का प्रसंग नहीं होगा । कोई भी व्यक्ति, सदा-सर्वकाल घटादि व्यवहार नहीं किया करता । दूसरी बात यह भी

१. तादात्म्येन चैतन्येऽनारोपितत्वमिति यावत् । अत्र च प्रतीयमानत्वस्यापि विशेषणत्वात् न शशशृङ्गादीनामप्रतीयमानाना स्वप्रकाशत्वमिति बोध्यम् ।

सृजते" इत्यादिः। **स्वयंज्योतिः स्वयंप्रकाशश्चैतन्याऽविषय इति यावत्** ॥ १३ ॥

●

साक्षिचैतन्येनैव व्यवहारोपपत्तेः, तस्मात् स्वसमानविषयत्वमन्तरेण व्यवहर्तव्यज्ञानं व्यवहारकारणमित्यसङ्गतमिति—**चेत्? मैवम्;** व्यवहर्तव्यज्ञानत्वेन व्यवहारत्वेन सामान्यतः कार्यकारणभावः, घटादिव्यवहारे तु स्वसमानविषयत्वेन विशेषतोऽपि, "यत्सामान्ययोः कार्यकारणभावः बाधकं विना तद्विशेषयोरपि" इति न्यायात्, अन्यथा सर्वत्रातिप्रसङ्गात्। एवं च स्वप्रकाशचैतन्यं व्यवहर्तव्यज्ञानत्वेन स्वव्यवहारहेतुः, घटादिव्यवहारे तु स्वसमानविषयत्वेन तद्धेतुः। ततश्च न सर्वदा घटव्यवहारापत्तिः, न वा वृत्तिनिर्गमनवैयर्थ्यम्; इन्द्रियसंयोगस्य ज्ञानशब्दवाच्यत्वाभावेन तद्धेतुत्वायोगात्। तथा चात्मनः स्वप्रकाशत्वेन सामान्यसामग्रीतो व्यवहारः तद्वैपरीत्याद्घटादेस्सामान्यविशेषाभ्यामुपपद्यते। तस्माच्चैतन्याविषयत्वं स्वप्रकाशत्वमिति निरवद्यम्।

न च श्रुतिविरोधः; तज्जन्यवृत्तिविषयत्वाभ्युपगमात्, अन्यथा तद्गताज्ञाननिवृत्तिर्न स्यात्। न च "यन्मनसा न मनुते" इति श्रुतिविरोधः, तस्याः फलव्याप्यत्वप्रतिषेधपरत्वात्। इन्द्रियजन्यवृत्त्यभिव्यक्तं चैतन्यं **फलम्।** न च तद्विषयत्वमात्मनः, स्वप्रकाशत्वात्। तदुक्तम्—

'ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्ष्यते। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्" ॥ इति।

अथवा—अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं **स्वप्रकाशत्वम्;** फलाव्याप्यत्वमवेद्यत्वम्। **अपरोक्षव्यवहारः** प्रमाणजन्यवृत्तिः, तद्योग्यत्वम्[1] आत्मचैतन्यस्वरूपमेव न त्वतिरिक्तम्, येन योग्यतावच्छेदकज्ञानाभावात्तन्निरूपणाभावः प्रसज्येत। एवञ्च घटादौ धर्माधर्मयोश्चातिव्याप्तिवारणाय विशेषणद्वयम्। तस्मात् स्वप्रकाशत्वस्य निरूपितत्वादात्मा स्वयंज्योतिःस्वभावः।

●

है कि व्यवहार को सार्वकालिक यदि कहा जाय तो 'वृत्तिनिर्गमन' का स्वीकार करना ही व्यर्थ हो जायगा। घट और इन्द्रिय का सन्निकर्ष होने पर साक्षिचैतन्य से व्यवहार उपपन्न हो जाता है। उस कारण 'स्वसमानविषयत्व' के विना भी व्यवहर्तव्यज्ञान से व्यवहार हो सकता है—'स्वसमानविषयत्वमन्तरेण व्यवहर्तव्यज्ञानं व्यवहारकारणम्'—यह कहना असंगत है।

समा०—व्यवहर्तव्यज्ञानत्वेन और व्यवहारत्वेन सामान्यतः कार्य-कारणभाव हुआ करता है। किन्तु घटादिव्यवहार में 'स्वसमानविषयत्वेन विशेषतः भी कार्यकारणभाव होता है। क्योंकि एक नियम है कि 'कोई विरोध न हो तो सामान्यों में जो कार्यकारणभाव होता है वही विशेषों में भी—इस नियम के अनुसार होता है। अन्यथा सर्वत्र अतिप्रसंग होने लगेगा। एवञ्च 'स्वप्रकाशचैतन्य'—व्यवहर्तव्यज्ञानत्वेन 'स्व-व्यवहार का हेतु होता है। उसका फल यह होता है कि सर्वदा घटव्यवहार का प्रसंग नहीं हो पाता, तथा 'वृत्तिनिर्गमन' भी व्यर्थ नहीं हो पाता। इन्द्रिय संयोग में 'ज्ञानशब्दवाच्यत्व' के न होने से वह उसमें कारण भी नहीं है। तथा च 'आत्मा', स्वप्रकाश होने से सामान्य सामग्री से व्यवहार की उपपत्ति हो जाती है। और उसके वैपरीत्य से हट्टस्थ रजत का सामान्य और वेशेष के द्वारा व्यवहार उपपन्न हो जाता है। उस कारण 'चैतन्याविषयत्वं स्वप्रकाशत्वम्'—यह निर्दुष्ट लक्षण सिद्ध होता है। और 'तज्जन्यवृत्तिविषयत्व' का स्वीकार करने से श्रुतिविरोध भी नहीं होता है। अन्यथा तद्गत अज्ञाननिवृत्ति नहीं हो सकेगी।

यदि 'यन्मनसा न मनुते'—इस श्रुति के साथ विरोध को कोई बताता है, तो उस पर उत्तर यह है कि वह श्रुति, 'फलव्याप्यत्व' का निषेध कह रही है। इन्द्रियजन्यवृत्ति से अभिव्यक्त होनेवाला 'चैतन्य' ही फल है। 'आत्मा' उसका विषय नहीं है, क्योंकि वह तो 'स्वप्रकाश' है। यह विवरणकार के मत से बताया गया है। भामती-कल्पतरुकार के सिद्धान्त से तो 'शुद्धचैतन्य' में वृत्तिविषयता भी नहीं है। 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादिक तो 'उपहित चैतन्यविषयक है। 'अद्वैतसिद्धि' में भी जडत्वनिरुक्ति के प्रसंग में इस अवेद्यत्व को बताया गया है।

अथवा—'अवेद्य रहते हुए अपरोक्षव्यवहार की योग्यता स्वप्रकाशता है। 'अवेद्यत्व' का अर्थ है—'फलाऽव्याप्यत्व'। 'अपरोक्षव्यवहारयोग्यत्व' का अर्थ है—प्रमाणजन्यवृत्तियोग्यत्व। एवञ्च फलाव्याप्यत्वेसति प्रमाणजन्यवृत्तियोग्य, केवल 'आत्मचैतन्य-

---

१. अत्रावेद्यत्वं फलाव्याप्यत्वं चेत् शुक्तिरूप्यादीनामपि तत्त्वाद् अपरोक्षव्यवहारयोग्यत्वाच्च स्वप्रकाशत्वापत्तिः, यदि तु वृत्त्यविषयत्वं, तर्ह्यात्मन्यसम्भवः। न च—अपरोक्षव्यवहारपदेन प्रमाणजन्यवृत्तेरेव विवक्षणात् शुक्तिरूप्याकारवृत्तेः प्रमाणाजन्यत्वाद् अवेद्यत्वपदेन फलाव्याप्यत्वविवक्षायामपि न दोष इति—वाच्यम्, एवमपि घटादीनां चैतन्यरूपज्ञानाविषयत्वात् फलाव्याप्यत्वेनोक्तापरोक्षव्यवहारविषयत्वेन च स्वप्रकाशत्वापत्तिरित्यत आह—तद्योग्यत्वं स्वरूपचैतन्यमेवेति, तथा च न कोऽपि दोष इति भावः।

एवं स्वप्नोऽनुभवरूप एव न स्मृतिः; अन्यथा रथं पश्यामीत्यनुभवविरोधप्रसङ्गात् । स्वप्नपदार्थानामन्तःकरणमाया-

●

एवमात्मनः स्वप्रकाशत्वेऽर्थापत्तिरपि प्रमाणम् । तथाहि—अन्तःकरणतद्धर्मगोचरानुभवस्य भासकत्वं स्वप्रकाशत्वं विनाऽनुपपन्नं सत्तस्य स्वप्रकाशत्वं कल्पयति । न चाज्ञायमानस्य वाऽनुव्यवसायविषयस्य वा सन्दिह्यमानस्य वाऽनुभवस्य विषयसत्तानिश्चायकत्वं सम्भवति । अज्ञायमानस्य विषयसत्तानिश्चायकत्वे निर्विकल्पत्वेन निर्विकल्पादपि विषयसिद्धिप्रसङ्गात् । अनुव्यवसायविषयस्य तथात्वेऽनवस्थापत्तेः । संशयेत्वर्थनिश्चायकत्वाभावस्य सर्वानुभवसिद्धत्वात् । तस्मात् स्वप्रकाशत्वं विनाऽन्तःकरणतद्धर्मविषयानुभवस्य तदवभासकत्वानुपपत्त्या तदवश्यमभ्युपगन्तव्यम् । अन्यथा तस्य जडत्वेन जगदान्ध्यप्रसङ्गः । एवं च जन्यज्ञानस्य स्वप्रकाशत्वे प्रमाणाभावात् अनादिनित्यत्वमवश्यमभ्युपगन्तव्यम् । अन्तःकरणतद्धर्मयोरनुभवस्योत्पत्तिविनाशयोरनिरूपणात् । न च—दुःखज्ञानं नष्टं सुखज्ञानमुत्पन्नमित्यनुभवात्कथं तदनिरूपणम् ? इति—वाच्यम्; साक्षिणोऽनादिनित्यत्वेन सुखदुःखयोरुत्पत्तिविनाशाभ्यां तदुपचारोपपत्तेः अन्यथा "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इत्यादिश्रुतिविरोधप्रसङ्गात् । तस्मादनाद्यनन्तासङ्गस्वप्रकाशचिद्रूप आत्मेति सिद्धम् ॥ १३ ॥

एवं प्रसङ्गादात्मनः स्वप्रकाशत्वमुक्त्वा प्रकृतमुपसंहरति—**एवमिति** । विपक्षे दण्डमाह—**अन्यथेति** । तस्मात् स्वप्नस्य स्मृतिरूपत्वमनुपपन्नमिति भावः । ननु एवं स्वप्नस्यानुभवत्वे स्वप्नाध्यस्तपदार्थानां रथादीनां तदधिष्ठानतत्त्वसाक्षात्काराभावेन बाधाभावात् निवर्तकान्तराभावाच्च जाग्रदवस्थायामनुवृत्तिः स्यात् । न चेष्टापत्तिः; अनुभवविरोधात्, तस्मात्तदनुभवत्वमनुपपन्नम् ?

●

स्वरूप' ही होगा, उसके अतिरिक्त अन्य कोई नहीं होगा। अतः योग्यतावच्छेदकज्ञानाभाव के कारण उसके निरूपणाभाव का प्रसंग प्राप्त नहीं है। एवञ्च घट आदि में तथा धर्माधर्म में अतिव्याप्तिवारणार्थ दो विशेषण दिये गये हैं। एवञ्च 'स्वप्रकाशत्व' का निरूपण हो सकने से 'आत्मा', स्वयंज्योतिः स्वभाव है, यह सिद्ध हुआ।

इसी प्रकार आत्मा के स्वप्रकाशत्व में 'अर्थापत्ति' प्रमाण भी है। अन्तःकरण-तद्धर्मगोचर अनुभव का भासकत्व होना स्वप्रकाशत्व' के विना अनुपपन्न होकर उसके 'स्वप्रकाशत्व' की कल्पना कराता है। अज्ञायमान, अथवा अनुव्यवसायविषय, अथवा सन्दिह्यमान अनुभव, 'विषय की सत्ता' का निश्चायक नहीं हुआ करता। अज्ञायमान अनुभव को विषयसत्ता का निश्चायक मानने पर उसके निर्विकल्परूप होने से निर्विकल्प से भी विषय की सिद्धि होने लगेगी। अनुव्यवसायविषय को विषयसत्ता का निश्चायक मानने पर अनवस्था होने लगेगी। संशय में अर्थनिश्चायकत्वाभाव तो सर्वानुभवसिद्ध ही है। इसलिए 'स्वप्रकाशत्व' के विना अन्तःकरण-तद्धर्मविषयानुभव मे तदवभासकता की अनुपपत्ति से उसे अवश्य ही स्वीकार करना होगा। अन्यथा उसके जड़ रहने से जगदान्ध्यप्रसंग होगा। एवञ्च 'जन्यज्ञान' को स्वप्रकाश मानने में कोई प्रमाण न होने से उसमें 'अनादिनित्यत्व' अवश्य मानना चाहिए। अनुभव के धर्म, 'उत्पत्ति-विनाश' नहीं है, वे तो अन्तःकरण के धर्म हैं।

'दुःखज्ञानं नष्टं', 'सुखज्ञानमुत्पन्नम्'—यह अनुभव तो सभी को होता है। तब कैसे कहा जाय कि उत्पत्ति और विनाश 'अनुभव' के धर्म नही हैं ? इसका समाधान तो यह है कि 'साक्षी', अनादि और नित्य होने से सुख और दुःख की उत्पत्ति-विनाश के द्वारा उसमें उपचार किया जाता है। अन्यथा श्रुतिविरोध होने लगेगा। तस्मात् अनादि, अनन्त, असंग, स्वप्रकाश, चिद्रूप 'आत्मा' है—यह सिद्ध हुआ ॥ १३ ॥

प्रसंगवश आत्मा के स्वप्रकाशत्व को बताकर प्रकृत प्रसंग का उपसंहार कर रहे हैं—**उपर्युक्त विवेचन से यह स्पष्ट हो जाता है कि रथादिकों को विषय करने वाला 'स्वाप्नज्ञान" अनुभव रूप ही है, 'स्मृति' रूप नहीं है। यदि वह अनुभवरूप न हो तो रथ देख रहा हूँ—इस स्वाप्न अनुभव का विरोध होगा। स्वप्नसिद्ध वस्तुएँ अन्तःकरण व माया के द्वारा शुद्ध चेतन पर अध्यस्त होती हैं और जगने पर शुद्ध चेतन का साक्षात्कार होता नहीं, अतः स्वाप्नवस्तुओं का बाध नहीं होता। क्योंकि स्वप्न सोपाधिक भ्रमानुभव है, इसलिए उपाधि के हट जाने से स्वाप्न वस्तुओं की निवृत्ति हो जाती है, जिससे जगने पर उनका अनुभव होता नहीं। स्वप्न में फलीभूत होने वाले कर्म; निद्रा, तथा जाग्रत् में एकत्र हुई वासनाओं से युक्त अन्तःकरण ही स्वप्नभ्रम के लये उपाधि है।**

द्वारा शुद्धचैतन्याऽध्यस्तत्वेन इदानीं तत्साक्षात्काराऽभावेन बाधाऽभावेपि सोपाधिकत्वोपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः। कर्मनिद्रोपप्लुतमन्तःकरणमुपाधिः ॥ १४ ॥

•

इत्याशङ्क्याह—**स्वप्नेति**। द्विविधः कार्यनाशः—बाधो लयश्चेति। अधिष्ठानतत्त्वसाक्षात्कारेण बाधो भवति। अनुभूयमानस्याभावप्रमा **बाधः**। अथवा—अधिष्ठानतत्त्वसाक्षात्कारेण स्वोपादानाज्ञानेन सह कार्यस्य नाशो **बाधः**। उपादाने सत्यपि कार्यस्य तिरोभावो **लयः**। तथा च शुक्तितत्त्वसाक्षात्कारेण रजतबाधवदिदानीं स्वप्नपदार्थाधिष्ठानब्रह्मसाक्षात्काराभावेन स्वप्नपदार्थानां बाधाभावेऽप्युपाधिभूतजपाकुसुमादिनिवृत्त्या स्फटिके लौहित्यादिनिवृत्तिवत्स्वप्नपदार्थानामुपाधिनिवृत्त्या निवृत्तिसंभवान्न जाग्रदवस्थायां स्वप्नपदार्थानुवृत्तिरिति भावः। कस्तत्रोपाधिः? इत्यत आह—**कर्मेति**। जाग्रद्वासनावासितमित्यपि विशेषणीयम्; अन्यथा निर्वासनस्योपाधित्वायोगात्। उपाधिर्नाम स्वस्मिन्निव स्वसंसर्गिणि स्वधर्मासञ्जकः। तथा च स्वप्नस्य सोपाधिकभ्रमत्वादनुभवत्वमुपपन्नमिति भावः ॥ १४ ॥

•

शंका—उक्त विवेचन के अनुसार 'स्वाप्नज्ञान' को यदि 'अनुभवरूप' कहा जाय तो स्वप्नकालिक रथादि पदार्थों की अनुवृत्ति, जाग्रत् अवस्था में भी होनी चाहिये। क्योंकि जो पदार्थ, जिस अधिष्ठान में कल्पित (आरोपित) होते हैं, उस अधिष्ठान का ज्ञान हो जाने पर उन कल्पित (आरोपित) पदार्थों का नाश (बाध) हुआ करता है। और वे स्वप्नकालीन पदार्थ, 'ब्रह्मचैतन्य' रूप अधिष्ठान पर ही कल्पित (आरोपित) हैं। उस कारण ब्रह्मचैतन्यरूप अधिष्ठान के साक्षात्कार (ज्ञान) से ही उन कल्पित स्वाप्नपदार्थों का नाश (बाध) हो जाएगा। किन्तु अधिष्ठानभूत 'ब्रह्म' का साक्षात्कार (ज्ञान) तो अभी हुआ नहीं है। और 'अधिष्ठान साक्षात्कार' के अतिरिक्त अन्य किसी से भी उन स्वाप्न पदार्थों की निवृत्ति नहीं होती है। अर्थात् उनका निवर्तक अन्य कोई नहीं है। इसलिये जाग्रदवस्था में उन स्वाप्न पदार्थों की अनुवृत्ति अवश्य होनी चाहिये। यदि इस अनुवृत्ति को 'इष्टापत्ति' मानोगे तो सब लोगों के अनुभव के साथ विरोध होगा। क्योंकि सभी लोग, जाग्रदवस्था में स्वाप्न पदार्थों के अभाव का ही अनुभव करते हैं। उस कारण 'स्वाप्नज्ञान' को अनुभवरूप कहना संभव नहीं है।

समा०—'कार्य' का नाश दो प्रकार से होता है—(१) 'बाध' से और (२) 'लय' से। अधिष्ठान के वास्तविक स्वरूप का साक्षात्कार करके 'कार्य' का अपने उपादानकारणरूप 'अज्ञान' के सहित जो 'नाश' होता है, उसे 'बाध' शब्द से कहा जाता है। जैसे—शुक्तिरूप अधिष्ठान के साक्षात्कार से 'रजत' रूप कार्य का अपने उपादानकारण 'अज्ञान' के सहित नाश होता है। इसी को 'बाध' कहते है और 'उपादानकारण' के विद्यमान रहनेपर भी 'कार्य' का जो 'तिरोभावमात्र' होता है, उसे 'लय' कहते हैं। स्वाप्निक रथादिपदार्थ, माया के द्वारा 'शुद्धचैतन्य' में अध्यस्त हैं, और उस शुद्धचैतन्यरूप अधिष्ठान का साक्षात्कार, जाग्रत्काल में अनधिकारी पुरुष को है नहीं, उस कारण शुक्तिरजत के समान उन स्वाप्न पदार्थों का बाध (नाश) तो हो नहीं सकेगा। अतः पूर्वोक्त रीति से 'स्वप्न' को 'सोपाधिक भ्रम' ही कहना होगा। जैसे—जपाकुसुमादिरूप उपाधि की निवृत्ति होने से स्फाटिक लौहित्य की निवृत्ति होती है। उसी तरह 'उपाधि' की निवृत्ति होने से उन स्वाप्न पदार्थों की निवृत्ति का होना भी संभव है। उस कारण जाग्रदवस्था में उन स्वाप्न पदार्थों की अनुवृत्ति का होना संभव हो नहीं है। जाग्रत् के संस्कार, तथा स्वप्न में भोग देनेवाला कर्म और निद्रादोष—इन तीनों से विशिष्ट हुआ अन्तःकरण ही 'स्वाप्नभ्रम' में 'उपाधि' है। उस अन्तःकरणरूप उपाधि की निवृत्ति से जाग्रदवस्था में उन स्वाप्न पदार्थों की निवृत्ति होती है।

यद्यपि जाग्रदवस्था में वह 'अन्तःकरण' 'स्वरूप' से विद्यमान ही है, तथापि उस जाग्रदवस्था में वह 'अन्तःकरण' स्वाप्नभोगप्रद नहीं है, क्योंकि वह स्वाप्नभोगप्रद कर्म तथा 'निद्रादोष' से युक्त नहीं है।

जो पदार्थ, अपने में स्थित धर्मों को अपने से संबंधित पदार्थ में आरोपित करता है, उसे 'उपाधि' कहते हैं। जैसे जपाकुसुम अपने में 'रक्तवर्ण' को अपने से संबंधित स्फटिकमणि में आरोपित करता है, उस कारण 'जपाकुसुम' को 'उपाधि' शब्द से कहा जाता है। उसी तरह वह 'अन्तःकरण' भी अपने 'कर्तृत्व-भोक्तृत्वादि धर्मों को अपने से संबंधित 'आत्मा' में आरोपित करता है। उसकारण उस अन्तःकरण को भी 'उपाधि' शब्द से कहा जाता है। इस रीति से स्वप्नद्रष्टा मनुष्य को सोपाधिक भ्रम होने से 'स्वप्न' को 'अनुभव' रूप ही कहा गया है, 'स्मृति' रूप नहीं ॥ १४ ॥

केचित्तु स्वप्नाऽध्यासं निरुपाधिकं वदन्ति । तत्र विरोधिजाग्रत्प्रत्ययेन तन्निवृत्तिः ॥ १५ ॥

●

मतान्तरमाह—**केचित्त्विति । ननु** स्वप्नाध्यासस्य निरुपाधित्वे इदानीमधिष्ठानसाक्षात्काराभावेन स्वप्नपदार्थानां बाधाभावाज्जाग्रदवस्थायामनुवृत्तिः स्यात्, इत्याशङ्क्य रजतभ्रमानन्तरं शुक्तितत्त्वसाक्षात्काराभावेऽपि विरोधिदण्डादिज्ञानाद्यथा रजतभ्रमनिवृत्तिरुपादाने सत्यपि, तथाऽधिष्ठानसाक्षात्काराभावेऽपि विरोधिजाग्रत्प्रत्ययेन स्वप्नपदार्थनिवृत्तिरुपपद्यते, अतो न जाग्रदवस्थायामनुवृत्तिरित्याह—**तत्रेति ।** [1]न स्वप्नस्य निरुपाधिकत्वे । न च—उत्पन्नब्रह्मसाक्षात्काराणामज्ञानस्य निवृत्तत्वात् स्वप्नाध्यासो न स्यादिति—**वाच्यम् ।** ज्ञानेनाऽज्ञाने निवृत्तेऽपि तत्कार्यनिवृत्तेरभावात्, स्वप्नपदार्थानां साक्षादन्तःकरणोपा[2]दानत्वेन ज्ञानिनामपि स्वप्नाध्यासो भवत्येव । अन्यथा जाग्रदवस्थायामपि विषयाभावप्रसङ्गात् । तस्मात्स्वप्नोऽनुभव एवेति भावः ॥ १५ ॥

●

कुछ ग्रन्थकारों का कहना है कि वह 'स्वप्नाध्यास'—'सोपाधिकभ्रम' नहीं है, अपितु 'शुक्ति-रजतभ्रम' के समान 'निरुपाधिक भ्रम' ही है ।

शंका—'स्वप्नाध्यास' को 'निरुपाधिक भ्रम' कहने पर उन स्वप्नकालिक पदार्थों की जाग्रदवस्था में भी अनुवृत्ति होनी चाहिये । क्योंकि निरुपाधिक भ्रम की निवृत्ति, 'अधिष्ठान' के ज्ञान से हुआ करती है । और 'स्वप्नभ्रम' का अधिष्ठान 'ब्रह्म-चैतन्य' है । किन्तु अनधिकारी पुरुष को जाग्रदवस्था में ब्रह्मचैतन्यरूप अधिष्ठान का साक्षात्कार तो है नहीं । उस कारण उन स्वाप्न पदार्थों का जाग्रदवस्था में बाध, न हो पाने से उनकी अनुवृत्ति जाग्रदवस्था में भी होनी चाहिये ।

समा०—जैसे 'रजतभ्रम' का अधिष्ठान जो 'शुक्ति' है, उस शुक्ति का साक्षात्कार (प्रत्यक्ष) न होने पर भी तथा 'रजतभ्रम' की निवृत्ति, विरोधी जाग्रत्प्रत्यय से अर्थात् विरोधी दण्डादि पदार्थों के ज्ञान से हो जाती है, उसी प्रकार **'स्वाप्नभ्रम' के अधिष्ठानरूप 'ब्रह्मचैतन्य' का साक्षात्कार न होने पर भी 'विरोधिजाग्रत्प्रत्यय' से अर्थात् जाग्रत्कालिक अन्यान्य विरोधी पदार्थों के ज्ञान से उन स्वाप्न पदार्थों की निवृत्ति हो जाती है । इसलिये उन स्वाप्न-पदार्थों की अनुवृत्ति, जाग्रदवस्था में नहीं होती ।** उस कारण रजतभ्रम के समान ही 'स्वाप्नभ्रम' भी 'निरुपाधिक भ्रम' ही है ।

शंका—'स्वाप्नभ्रम' को यदि 'निरुपाधिक भ्रम' कहेंगे तो 'ब्रह्मज्ञानी' अधिकारी पुरुष को 'स्वप्नभ्रम' (स्वप्न) नहीं होना चाहिये । क्योंकि 'स्वाप्नपदार्थों' का अधिष्ठान जो 'ब्रह्मचैतन्य' है, उसका साक्षात्कार तो उसे हो चुका है । उस कारण उस ब्रह्मज्ञानी पुरुष का 'अज्ञान' (जो स्वाप्नभ्रम का उपादान कारण है) भी निवृत्त हो गया है । तब ब्रह्मज्ञानी को 'स्वप्न' क्यों दिखाई देते हैं ?

समा०—ब्रह्मसाक्षात्कार होने से 'अज्ञान' के निवृत्त होने पर भी उस अज्ञान के कार्यरूप अन्तःकरण आदि की निवृत्ति, 'प्रारब्ध कर्मों का नाश' जब तक नहीं हो पाता, तब तक नहीं होती । प्रारब्धकर्म के नाश के साथ ही अन्तःकरण की निवृत्ति होती है । यह 'अन्तःकरण' ही 'स्वाप्न पदार्थों' का साक्षात् 'उपादानकारण' है । इसलिये 'प्रारब्धकर्मों के नष्ट होने तक ब्रह्मज्ञानी को भी स्वप्नभ्रम का होना संभव है । अर्थात् उसे भी स्वप्न दिखाई देते हैं । ब्रह्मसाक्षात्कार से 'अज्ञान' की निवृत्ति होने से यदि ब्रह्मज्ञानी को 'स्वाप्नभ्रम' का होना नहीं मानोगे, तो उस ब्रह्मज्ञानी को जाग्रदवस्था में भी शब्दादि विषयों का अनुभव नहीं होना चाहिये, किन्तु जाग्रदवस्था में वह ब्रह्मज्ञानी पुरुष, सभी व्यवहार करता रहता है, यह सभी का प्रत्यक्ष अनुभव है । इसलिये कहना होगा कि ब्रह्मज्ञानी पुरुष को भी स्वप्नभ्रम हुआ करता है । तथापि वह ब्रह्मज्ञानी पुरुष, 'अज्ञानी पुरुषों' के समान अपने स्वरूप में किसी व्यवहार को नहीं मानता, अर्थात् उस व्यवहार करने का अभिमान उसे नहीं रहता ॥ १५ ॥

---

१. अत्र यद्वक्तव्यं तत् पूर्वमेवोक्तम् ।

२. यद्यपि स्वाप्निकानां रथादीनां अविद्योपादानकत्वमेव, न तु कामादीनामिवान्तःकरणोपादानकत्वम् । अन्यथा तेषामिव स्वाप्निकानामपि व्यावहारिकत्वापत्तेः, तथापि अहंकारोपहितचैतन्यस्य स्वाप्निकविवर्तोपादानत्वेनाधिष्ठानत्वपक्षे रजतं प्रति शुक्तेरिवाधिष्ठानावच्छेदकत्वात् गौण, उपादानत्वव्यवहारोऽन्तःकरणस्याप्युपपन्न इति मन्तव्यम् ।

पुनश्च विपर्ययः प्रकारान्तरेण द्विविधः—अन्तःकरण[1]वृत्तिरूपोऽविद्यावृत्तिरूपश्चेति। स्वप्नादिरन्तःकरणवृत्तिरूपः। रजतादिभ्रमोऽविद्यावृत्तिरूपः। संशयस्त्वविद्यावृत्तिरेव[2]। तत्रैवं सति निरूपाधिकविपर्ययोनिदिध्यासनेन निवर्तते सोपाधिकस्तूपाधिनिवृत्त्या। निदिध्यासनं निरूपितमेव। तदपि शारीरकतृतीयाऽध्यायपठनेन निष्पद्यते।

•

प्रकारान्तरेण विपर्ययं विभजते—**पुनश्चेति**। अन्तःकरणवृत्तिरूपं[3] विपर्ययं व्युत्पादयति—**स्वप्नेति**। आदिशब्देन मनोराज्यनष्टपुत्रसाक्षात्कारो गृह्यते। द्वितीयं व्युत्पादयति—**रजतादीति**। आदिशब्देन रज्जुसर्पादि गृह्यते। **न च**—रजतभ्रमस्येदमाकारवृत्त्युपहितसाक्षिरूपतया कथमविद्यावृत्तिरूपत्वम्? इति—**वाच्यम्**; साक्षिणोऽनादिनित्यतयोत्पत्तिविनाशशून्यत्वेनान्याकारवृत्तिनाशेनान्यसंस्कारोत्पत्तावतिप्रसक्त्या कालान्तरे प्रातिभासिकरजतस्मृतिहेतुसंस्कारार्थं तदाकाराविद्यावृत्तेरावश्यकत्वेनोक्तत्वादिति भावः। **ननु**—किं संशयोऽपि वृत्तिद्वयात्मकः? नेत्याह—**संशयस्त्विति**। **ननु**—विपर्ययनिवृत्तिः कस्मात् भवति? इत्यत आह—**तत्रेति**। एवमुक्तप्रकारेण द्विविधे विपर्यये निरूपिते सति तयोर्मध्ये निदिध्यासनेन निरुपाधिकस्य निवृत्तिमाह—**निरुपाधिकेति**। सोपाधिकः कस्मान्निवर्तत इत्यत आह—**सोपाधिकस्त्विति**। निवर्तते इत्यनुषज्यते। वाक्यान्तरे श्रुतपदस्य वाक्यान्तरे योजनमनुषङ्गः। तर्हि तन्निरूप्यतामित्याशङ्क्याह—**निदिध्यासनमिति**। शब्दप्रमाणनिरूपणावसरे तात्पर्यनिरूपणप्रसङ्गेनेति शेषः। तन्निदिध्यासनं कुतो निष्पद्यते? इत्याशङ्क्याह—**तदपीति**।

ततः किम्? इत्यत आह—**एवं चेति**। श्रवणेन मानगताऽसम्भावना निवर्तते, मननेन मेयगताऽसम्भावना, निदिध्यासनेन विपरीतभावना। **तदुक्तम्**—

"शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्माच्छृणोम्यहम्। मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः॥

•

पहले बता चुके हैं कि 'विपर्यय'—दो प्रकार का होता है, (१) निरुपाधिक और (२) सोपाधिक। उसी को अभी तक बताया गया। अब उक्त विपर्यय, 'रजतभ्रम' के उपादानकारणरूप 'अज्ञान' के विद्यमान रहने पर भी उसका ही अन्य प्रकार से पुनः विभाग बता रहे हैं। पूर्वोक्त **भ्रमरूप विपर्यय, पुनः दो प्रकार का होता है। उनमें से एक (१) तो 'अन्तःकरणवृत्तिरुप' होता है, और दूसरा (२) अविद्यावृत्तिरुप' होता है। उनमें से, 'स्वाप्न पदार्थों का ज्ञान, तथा मनोराज्य, और नष्ट पुत्रादिकों का प्रत्यक्ष इत्यादि भ्रम, तो 'अन्तःकरणवृत्तिरुप' हैं। और 'शुक्ति' में 'रजतज्ञान' या 'रज्जु' में 'सर्प' का ज्ञान—इत्यादि भ्रम तो, 'अविद्यावृत्तिरुप' है। इसी प्रकार पूर्वोक्त 'संशय' भी 'अविद्यावृतिरुप' ही है।** 'भावाऽभावकोटिक संशय',—एक अंश में तो 'अन्तःकरणवृत्तिरुप' है, और दूसरे अंश में 'अविद्यावृत्तिरुप' **है**—यह बात 'दृश्यत्वनिरुक्ति' के उपक्रम में ब्रह्मानन्दसरस्वती **ने बताई है।**

शंका—'रजतभ्रम'—इदमाकारवृत्ति से उपहित साक्षीरुप होने से उसे 'अविद्यावृत्ति' रूप क्यों कहा जा रहा है?

समा०—उक्त शंका करना उचित नहीं है। 'साक्षी' के अनादिनित्य होने से, वह उत्पत्ति-विनाश रहित है। अन्याकारवृत्ति के नष्ट होने से अन्यसंस्कार की उत्पत्ति में उसकी अतिप्रसक्ति होती है। अतः कालान्तर में होने वाली प्रातिभासिक रजतस्मृति के हेतुभूत संस्कारोत्पत्ति के लिये तदाकार हुई 'अविद्यावृत्ति' की आवश्यकता होने से उसे कहा गया है।

शंका—उक्त 'विपर्यय' की निवृत्ति किस उपाय से होती है?

समा०—उक्त प्रकार से द्विविध विपर्यय की निवृत्ति का उपाय बता रहे हैं। उनमें से पूर्वोक्त 'अहम् अज्ञः'—यह **'निरुपाधिक विपर्यय' 'निदिध्यासन' से निवृत्त होता है। और सोपाधिक तो उपाधि हटने से ही हटता है। पूर्वोक्त 'विपरीत भावनारूप विपर्यय' का निवर्तक जो 'निदिध्यासन' है, उसका स्वरूप, द्वितीय परिच्छेद में बता चुके हैं। तथा शारीरक मीमांसा के तृतीय अध्याय में भी 'निदिध्यासन' को बताया गया है।**

एवं च 'श्रवण' से 'प्रमाणगत असंभावना' निवृत्त होती है। 'मनन' से 'प्रमेयगत असम्भावाना' निवृत्त होती है। और 'निदिध्यासन' से विपरीत भावना' निवृत्त होती है। अन्य प्रतिबन्धक न हों तो इन सब के निवृत्त होने पर 'अधिकारी

---

१. नेति भास्तु। तत्रपदस्यार्थः स्वप्नेत्यादिः।

२. भावाभावकोटिकसंशयस्यैकांशेऽन्तःकरणवृत्तिरूपत्वमपरांशेऽविद्यावृत्तिरूपत्वमिति दृश्यत्वनिरुक्त्युपक्रमे ब्रह्मानन्दसरस्वत्यो निरूपयन्ति।

३. साम्प्रदायिकास्तु सर्वो विपर्ययोऽविद्यावृत्तिरूप एवेति स्वीचिकीर्षन्ति। तर्ह्यत्राप्यन्तःकरणपदं तदवच्छिन्नचिन्निष्ठाविद्यापरं नेयम्। न चैवं विपर्ययद्वैविध्यविरोधः, अधिष्ठानभेदेनोपपत्तेरिति दिक्।

एवं च श्रवणमनननिदिध्यासनैरसम्भावनाविपरीतभावनानिवृत्तावसत्यन्यस्मिन्प्रतिबन्धे तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीति अपरोक्षप्रमा जायते। तदुक्तम् "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति ॥ १६ ॥

●

विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये।" इति ॥ **ननु** श्रवणमनननिदिध्यासनानि कुर्वतां केषांचित् कुतः साक्षात्कारो न जायते ? इत्याशङ्क्याह—**असत्यन्यस्मिन्निति।** भूतभाविवर्तमानः प्रतिबन्धः येषां यावत् वर्तते ज्ञानोत्पत्तौ, तावत्तेषां न ज्ञानोदयः श्रवणादि कुर्वतामपि, येषां स नास्ति तेषां विचारिततत्त्वमस्यादिवाक्याद्ब्रह्मसाक्षात्कारो भवत्येवेत्यर्थः। उक्तार्थे व्याससूत्रं संवादयति—**तदुक्तमिति।** तृतीये स्थितम्—ब्रह्मज्ञानमुद्दिश्यान्तरङ्गबहिरङ्गसाधनानि निरूपितानि। तत्र कृतैः श्रवणमनननिदिध्यासनैर्ब्रह्मज्ञानमिहैव भवति वा, अमुत्रापि वा। तत्रहैवेतिप्राप्तम्; अस्मिन्नेव जन्मनि ब्रह्मापरोक्षज्ञानं मे भूयादिति श्रवणादीनामनुष्ठानात् ? **ननु**—यज्ञादीनामपि ब्रह्मज्ञानसाधनत्वश्रवणेन तेषामामुष्मिकफलत्वात् कथं श्रवणादिनाऽस्मिन्नेव जन्मनि ज्ञानं स्यात् इति—**चेत्** ? **न**; तेषां विविदिषाहेतुत्वेन साक्षात् ज्ञानसाधनत्वाभावात्, श्रवणादीनां तु साक्षात् ज्ञानसाधनत्वेन तेषु सत्सु ब्रह्मज्ञानमिहैव भवत्येव, तस्य प्रमाणफलत्वात्। तस्माद्ब्रह्मज्ञानमैहिकमेवेति प्राप्ते।

ब्रूमः, अप्रस्तुतप्रतिबन्धे ब्रह्मज्ञानमैहिकं भवति, प्रस्तुतप्रतिबन्धे त्वामुष्मिकमपि। तथाच श्रुतिः—प्रतिबन्धयुक्तानामात्मनो दुर्ज्ञेयतां दर्शयति—"श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः" इति। स्मृतिरपि—"आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्" इत्युक्तार्थं दर्शयति। **ननु** जन्मान्तरकृतश्रवणादीनां ब्रह्मसाक्षात्कारहेतुत्वं कुतोऽवगम्यत इति **चेत्** ? "गर्भ एवैतच्छयानो वामदेव एवमुवाचे"त्यादि श्रुत्या। तस्मात् श्रवणाद्यनुतिष्ठतः पुंसः प्रस्तुतप्रतिबन्धाभावे इहैव ब्रह्मापरोक्षज्ञानं भवति तस्मिन् सत्यमुत्र जन्मान्तरेऽपि भवति। यत्कर्म फलोन्मुखं ब्रह्मसाक्षात्कारोत्पत्तिविरोधिवासना वा स एव प्रतिबन्धः तदभावे ज्ञानमैहिकम्, अन्यथा वैपरीत्यमिति सिद्धम् ॥ १६ ॥

●

पुरुष' को 'तत्त्वमसि' आदि महावाक्य से 'अहं ब्रह्मास्मि'—इत्याकारक 'अपरोक्षज्ञान' उत्पन्न होता है। उस अपरोक्षज्ञान के होने पर 'अज्ञान-निवृत्ति' पूर्वक 'परमानन्द' की प्राप्ति होती है।

शंका—'श्रवण-मनन-निदिध्यासन' को करते हुए भी कितने ही लोगों को 'ब्रह्मसाक्षात्कार' नहीं हो पाता, यह देखा गया है। अतः उसके न हो पाने में क्या कारण है ?

समा०—पहले बता चुके हैं कि जैसे—'आत्मज्ञान' के उत्पन्न होने में 'असंभावना' तथा 'विपरीतभावना' रूप प्रतिबन्ध हुआ करते हैं, वैसे ही (१) भूत, (२) भावी, (३) वर्तमान—यह तीन प्रकार का अन्य प्रतिबन्ध भी होता है। ये प्रतिबन्ध, जिन पुरुषों में विद्यमान रहते हैं, उनको 'श्रवण' आदि के करने पर भी 'आत्मसाक्षात्कार' नहीं हो पाता। और जिन पुरुषों को यह प्रतिबन्ध नहीं रहता, उनको श्रवणादि के अनन्तर 'तत्त्वमसि' महावाक्य से 'ब्रह्मसाक्षात्कार' अवश्य होता है। इस रहस्य को बादरायण व्यासने अपने ब्रह्मसूत्र में ऐहिक इत्यादि सूत्र से बताया है। उक्त सूत्र का अभिप्राय यह है कि फलोन्मुख' हुए कर्म-'विशेष को 'प्रस्तुत प्रतिबन्ध कहते हैं। अथवा ब्रह्मसाक्षात्कार के उत्पन्न होने में जो 'विरोधी वासनाविशेष' है, उसे 'प्रस्तुत प्रतिबन्ध' कहते हैं। इस प्रस्तुत प्रतिबन्ध के न रहने पर (अभाव में) 'श्रवण-मननादि' के करने से इसी जन्म में 'ब्रह्मसाक्षात्कार' हो जाता है। और 'प्रस्तुत प्रतिबन्ध' के विद्यमान रहने पर जन्मान्तर में भी ब्रह्मसाक्षात्कार हो सकता है। जैसे 'वामदेव' आदि को हुआ है। जो 'पुरुष', भूत-भावी-वर्तमान प्रतिबन्ध से युक्त रहता है, उसके लिये 'आत्मा' की दुर्विज्ञेयता को श्रुति-स्मृति ने भी बताया है। श्रुति कहती है—कितने ही लोगों को उसके सम्बन्ध में 'श्रवण' भी प्राप्त नहीं होता, अर्थात् आत्म-सम्बन्धी श्रवण करने की इच्छा तक नहीं होती, यदि जैसे-तैसे इच्छा हो भी तो वैसा अवसर ही प्राप्त नहीं होता। कितने ही लोग, आत्मश्रवण करते हुए भी किसी 'प्रतिबन्ध' के कारण 'आत्मसाक्षात्कार' नहीं कर पाते।

शंका—यज्ञ आदि को भी ब्रह्मज्ञान का साधन होना बताया गया है, क्योंकि उनका 'फल' आमुष्मिक (पारलौकिक) होता है। अतः प्रतिबन्ध रहित पुरुष को 'श्रवणादि' साधनों से इसी जन्म में 'आत्मज्ञान' का होना कैसे सम्भव होगा ?

समा०—उन यज्ञादिकों को 'विविदिषाहेतुत्व' होने से ,साक्षात् ज्ञानसाधनत्व' नहीं है, किन्तु 'श्रवणादिकों' को 'साक्षात् ज्ञानसाधनत्व' श्रुत है। अतः श्रवणादिकों के होने पर इसी जन्म में 'ब्रह्मज्ञान' अवश्य हो जाता है। क्योंकि वह तो 'प्रमाण' का 'फल' है इसलिए 'ब्रह्मज्ञान' 'ऐहिक फल' है, 'आमुष्मिक फल' नहीं है। किन्तु यह समाधान, अभी पर्याप्त नहीं है। अतः यह और कहना चाहिये कि 'अप्रस्तुत प्रतिबन्धे ब्रह्मज्ञानमैहिकं भवति', 'प्रस्तुतप्रतिबन्धे तु आमुष्मिकमपि'। इतना निवेश करने पर समाधान पर्याप्त हो जाता है।

प्रतिबन्धस्त्रिविधः—भूतभाविवर्तमानभेदात् । भूतप्रतिबन्धः पूर्वाऽनुभूतविषयस्याऽऽवेशेन पुनः पुनः स्मरणम् । तदुपाधिकब्रह्माऽनुसंधानेन तन्निवृत्तिः । यथा भिक्षोः पूर्वानुभूतमहिष्यादिस्मरणेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्माऽनुसन्धानेन तन्निवृत्तिरिति वदन्ति ।

भाविप्रतिबन्धो द्विविधः—प्रारब्धशेषो ब्रह्मलोकेच्छा चेति ।

●

सूत्रोक्तप्रतिबन्धं विभजते—**प्रतिबन्ध इति ।** तत्राद्यप्रतिबन्धं तन्निवृत्त्युपायं च सदृष्टान्तमाह—**भूतेति ।** भाविप्रतिबन्धं विभजते—**भावीति ।** ननु प्रारब्धस्य कर्मणो ज्ञानप्रतिबन्धकत्वे कस्यचिदपि ब्रह्मसाक्षात्कारो न स्यात्, तथाच "श्रोतव्यः" इत्यादि विधेरप्रामाण्यापत्तिरित्याशङ्क्य तत्परिहाराय प्रारब्धं कर्म विभजते—**प्रारब्धमिति ।** तत्राद्यं फलभोगेनैव क्षीयते इत्याह—**तत्रेति ।** तयोर्मध्ये इत्यर्थः । स्वर्गो मे भूयादित्यादीच्छा फलाभिसन्धिरस्तु, ततः किम् ? तत्राह—**तस्मिन्निति ।** फलाभिसन्धिकृते कर्मणि । तत्र युक्तिमाह—**तस्येति ।** इच्छाघटितसामग्र्याः प्रबलत्वेनेतरकार्योत्पत्तिप्रतिबन्धकत्वात्तस्य प्राबल्यमिति भावः । फलाभिसन्धिकृतस्य प्राबल्ये प्रमाणमाह—**तथाचेति । सः** पुरुषः **यथाकामः** यत्फलकामवान् यत्फलानुकूलसंकल्पः । **तत्क्रतुः ।** संकल्पितं कर्म **तत्कर्म । तदभिसम्पद्यते** कर्मानुरूपं फलं प्राप्नोतीत्यर्थः । फलितमाह—**तादृशेति ।**

●

शङ्का—जन्मान्तर में किये गये श्रवणादिक भी 'ब्रह्मसाक्षात्कार'—होने में कारण होते हैं, यह कैसे जाना जाय ?

समा०—गर्भस्थ वामदेव की अद्वैतनिष्ठा और मोक्षानुभूति बताने वाली श्रुति के वचन से जाना जाता है । अतः श्रवणादि साधनों का अनुष्ठान करने वाले पुरुष को 'प्रस्तुत प्रतिबन्ध' का अभाव रहने पर इसी जन्म में (इसी लोक में) ब्रह्म-साक्षात्कार हो जाता है, और 'प्रस्तुत प्रतिबन्ध के विद्यमान रहने पर 'जन्मान्तर' में भी होता है ॥ १६ ॥

प्रतिबन्धों के तीन भेद हैं—(१) भूत, (२) भावी, (३) वर्तमान । इन तीन प्रतिन्धों का स्वरूप तथा उनकी निवृत्ति के उपाय को दृष्टान्त के साथ बता रहे हैं—उक्त तीन प्रकार के प्रतिबन्धों में से **पहिला (१) भूतप्रतिबन्ध यह है—'पूर्वानुभूत प्रियविषय के दृढसंस्कारवशात् उसका 'ब्रह्मचिन्तनकाल' में बार-बार स्मरण होना'—इसी को 'भूतप्रतिबन्ध' कहते हैं । उस 'भूतप्रतिबन्ध' की निवृत्ति, अनुभूत विषय से उपहित 'ब्रह्म' के चिन्तन करने से होती है । जैसे—किसी संन्यासी ने पूर्व के गृहस्थाश्रम में जिन 'महिषी' आदि पदार्थों का अनुभव किया था, उन सब पदार्थों का स्मरण, उस संन्यासी को ब्रह्म-चिन्तन काल में भी बार-बार हो आने से तत्त्वज्ञानोत्पत्ति नहीं हो पा रही थी, यह देखकर तत्त्वज्ञानोपदेशक गुरू ने उस भूत-प्रतिबन्ध की निवृत्ति के लिये उस संन्यासी को उन अनुभूत महिषी आदि पदार्थों से 'उपहित ब्रह्म' के चिन्तन करते रहने का उपदेश किया । उस उपहितब्रह्म का चिन्तन करने से उस संन्यासी का 'भूतप्रतिबंध' निवृत्त हो गया । तदनन्तर उस संन्यासी को श्रवणादिसाधनों के अनुष्ठान से 'आत्मसाक्षात्कार' हुआ ।**

अब भाविप्रतिबन्ध का विभाग बताते हैं—**यह भाविप्रतिबन्ध तो (१) प्रारब्धकर्म का शेष, तथा (२) ब्रह्मलोक की इच्छा के भेद से दो प्रकार का होता है ।** इस भाविप्रतिबन्ध के विद्यमान रहने पर श्रवणादिसाधनों का अनुष्ठान करते हुए भी 'आत्मज्ञान' नहीं हो पाता ।

शंका—प्रारब्धकर्म को यदि 'आत्मज्ञान' के उत्पन्न होने में 'प्रतिबन्धक' माना जाय तो किसी को भी 'आत्म-साक्षात्कार' (आत्मज्ञान = ब्रह्मज्ञान) नहीं हो सकेगा । क्योंकि जब तक 'शरीर' की स्थिति है, तब तक 'प्रारब्धकर्म' का नाश नहीं होता है । और उस प्रारब्धकर्मरूप प्रतिबन्ध के विद्यमान होने के कारण जब किसी को भी ब्रह्मसाक्षात्कार नहीं होगा, तब ब्रह्मसाक्षात्कार कराने वाले श्रवणादि साधनों की विधायक 'आत्मा वाऽरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'—इत्यादि श्रुतियों को अप्रमाण कहने का प्रसंग आवेगा ।

समा०—उक्त शंका का परिहार करने के लिये 'प्रारब्धकर्म' का विभाग करते हैं—**'प्रारब्ध कर्म' दो प्रकार का होता है । (१) फलाभिसन्धिकृत प्रारब्ध, और (२) केवल प्रारब्ध । फल की इच्छा को 'फलाभिसन्धि' कहते हैं । उस फलाभिसन्धि से किये हुए कर्म को 'फलाभिसन्धिकृत' कहते हैं । जैसे—अमुक कर्म, हम स्वर्गफल की प्राप्ति की इच्छा से कर रहे हैं । तथा फलाभिसन्धि के विना किये हुए कर्म को 'केवल प्रारब्ध' कहते हैं ।**

इनमें से 'फलाभिसन्धिकृत प्रारब्ध कर्म' का तो उसके फलभोग को प्राप्त करने से ही नाश होता है । अन्य किसी उपाय से उस कर्म का नाश नहीं होता । अतः फलाभिसंधिकृत कर्म के विद्यमान रहते, श्रवणादिसाधनों का अनुष्ठान करने पर

तत्र प्रारब्धकर्म द्विविधम्। फलाऽभिसंधिकृतं केवलं चेति। तत्र फलाभिसन्धिकृतं फलं दत्त्वैव नश्यति। तस्मिन् सति ज्ञानं नोत्पद्यते; तस्य प्रबलत्वात्। तथाच श्रुतिः—"स यथाकामो भवति तथा क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते"—इति। तादृशप्रारब्धशेषो भाविप्रतिबन्धः।

केवलं प्रारब्धं तत्त्वज्ञानहेतुः पापनिवृत्तिद्वारा। तथाच श्रुतिस्मृतौ "धर्मेण पापमपनुदति" "ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः" इति। "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" इति च। एवञ्च भाविप्रतिबन्धस्य प्रारब्धशेषस्य भोगेनानिवृत्तौ सत्यपि श्रवणादौ न ज्ञानोदयः। यथाहुः "एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभि"रिति।

द्वितीयस्य फलाभिसन्धिरहितस्य प्रारब्धस्य कर्मणः पुण्यस्य ब्रह्मज्ञानोत्पत्त्यनुकूलतामाह—**केवलमिति**। फलाभिसन्धि-रहितमित्यर्थः। सुकृतप्रारब्धस्य फलाभिसन्धिरहितस्य पापनिवृत्तिद्वारा तत्त्वज्ञानानुकूलत्वे प्रमाणमाह—**तथाचेति**। **पापं प्रारब्धं** फलाभिसन्धिकृतं केवलं चोभयमपि ज्ञानप्रतिबन्धकप्रबलतरोत्तेजकेन तिरोभूय गच्छति। अन्यथा ज्ञानोत्पत्तिं प्रतिबध्नातीति भावः। ननु भाविप्रतिबन्धस्य कियता कालेन क्षयो भवतीत्याशङ्क्य तत्र नियमो नास्तीत्यत्र सम्मतिमाह—**यथाहुरिति**। राम-स्यैकेन जन्मना भाविप्रतिबन्धः क्षीणः, भरतस्य त्रिभिर्जन्मभिः क्षीणः, तथा च न कालनियम इति भावः।

द्वितीयं भाविप्रतिबन्धं विद्यारण्यवचनेन स्पष्टयति—**ब्रह्मलोकेति**। अभिवाञ्छायाम् इच्छायां। **तां निरुध्येति** योजना। ननु कृतश्रवणादीनां व्यर्थत्वात् स किमधः पतति? नेत्याह—**स पुनरिति**। तत्र प्रमाणमाह—**तथाचेति**। "न हि कल्याणकृत्

●

ब्रह्मसाक्षात्कार नहीं हो पाता, क्योंकि 'इच्छाघटित सामग्री, सर्वत्र प्रबल हुआ करती है'। जैसे—लोकव्यवहार में हम देखते हैं कि दो पदार्थों के ज्ञान की सामग्री विद्यमान रहने पर भी मनुष्य को जिस पदार्थ के ज्ञान की इच्छा होती है, उसी पदार्थ का ज्ञान 'प्रथम' होता है। एवं च 'फलेच्छासहित प्रारब्धकर्म' के प्रबल रहने से उसकी विद्यमानता में श्रवणादिक साधनों के करते रहनेपर भी ब्रह्मसाक्षात्कार नहीं होता। किन्तु उस फलाभिसन्धिकृत प्रारब्धकर्म का फलभोग कर लेने पर ही 'ब्रह्मसाक्षात्कार' हो पाता है।

फलाभिसन्धिकृत की प्रबलता को श्रुति बता रही है—

इस मनुष्य को जिस फल की कामना होती है, उस फल के अनुकूल 'कर्म' करने का वह संकल्प करता है और संकल्प के अनुसार वह उस कर्म को करता है। और उस कर्म के अनुसार ही तत्तत् स्वर्गादिफलों को वह पाता है। एवं च इस प्रकार के 'फलाभिसन्धिकृत प्रारब्ध कर्म' को ही 'भावीप्रतिबन्धक' कहते हैं।

और दूसरा जो 'केवल प्रारब्धकर्म' है, वह 'फल' की इच्छा से रहित रहता है। वह 'केवल प्रारब्धकर्म' भी (१) पुण्य और (२) पाप के भेद से दो प्रकार का होता है। इन दोनों में से **'केवल पुण्य प्रारब्ध' तो 'पापनिवृत्ति' के द्वारा मनुष्य को तत्त्वज्ञान कराने में कारण बन जाता है। इस तथ्य को श्रुति-स्मृतियों के वचन बता रहे हैं—यह पुरुष, 'धर्म' का अनुष्ठान करके 'पाप' को नष्ट करे। 'पाप' के नाश से ही अधिकारी निष्पाप पुरुषों को 'ब्रह्मसाक्षात्कार' होता है। पुण्यकर्मों के अनुष्ठान से 'पापादिकर्मों' की निवृत्ति होती है, तब उस पुरुष का अन्तःकरण, निर्मल हो जाता है, और उसमें 'आत्मज्ञान' उत्पन्न होता है। एवंच उक्त वचनों से यह स्पष्ट होता है कि 'पुण्य प्रारब्ध', पापनिवृत्तिपूर्वक आत्मज्ञानोत्पत्ति' में कारण है।**

दूसरा जो 'पाप प्रारब्ध' है, वह चाहे 'फलाभिसन्धिकृत' हो, चाहे 'फलाभिसन्धिरहित' हो दोनों प्रकार का (उभयविध) वह 'पापप्रारब्ध', 'आत्मज्ञानोत्पत्ति' में 'प्रतिबन्धक' होता है। अतः मुमुक्षु को चाहिये कि वह, शास्त्रविहित किसी प्रबल पुण्यकर्म के द्वारा 'पापप्रारब्ध' को नष्ट करे। अन्यथा आत्मज्ञानोत्पत्ति में वह प्रतिबन्ध करेगा। **एवंच 'प्रारब्धशेषरूप भावी प्रतिबन्ध' जब तक 'फलभोग' देकर निवृत्त नहीं होता, तब तक 'श्रवणादि साधनों' को करते हुए भी मनुष्य को 'आत्मसाक्षात्कार नहीं होता।** किन्तु जब 'फलभोग' देकर 'भावी प्रतिबन्ध' निवृत्त हो जाता है, तभी मनुष्य को उन 'श्रवणादिसाधनों' से 'आत्म-साक्षात्कार' (आत्मज्ञान) उत्पन्न होता है। अतः 'आत्मसाक्षात्कार' के लिये उन 'श्रवणादिसाधनों' का विधान करनेवाली 'श्रुति' का 'अप्रामाण्य' कैसे कहा जायगा?

शंका—उक्त 'भावी प्रतिबन्ध' कितने समय के बाद निवृत्त होता है?

समा०—उक्त 'भावी प्रतिबन्ध' के निवृत्त होने के समय का कोई नियम नहीं है। किसी का तो 'एक जन्म' में भी वह निवृत्त हो जाता है, और किसी का दो-तीन जन्मों में भी निवृत्त होता है। इस तथ्य को अनेक ग्रन्थों में बताया गया है—

(१) ब्रह्मलोकेच्छाया ब्रह्मसाक्षात्करोत्पत्तिप्रतिबन्धकत्वं विद्यारण्यस्वामिनो वदन्ति स्म—

"ब्रह्मलोकाऽभिवाञ्छायां सम्यक् सत्यां निरुध्यताम् । विचारयेद्यस्त्वात्मानं ननु साक्षात्करोत्ययम् ।।" इति ।।

स पुनर्वेदान्तश्रवणादिमहिम्ना[1] ब्रह्मलोकं गत्वा निर्गुणं ब्रह्म साक्षात्करोति । तथाच श्रुतिः "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः, ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे" इति । स पुनस्तत्रैव मुच्यते ।। १७ ।।

•

कश्चित् दुर्गतिं तात गच्छती"ति स्मृतिं चकारेण समुच्चिनोति । वेदान्तविज्ञानेन श्रवणजनितेन सुष्ठु निश्चितोऽर्थोऽद्वितीयब्रह्मस्वरूपो येषां ते तथोक्ताः,—**संन्यासयोगात्** श्रुतिस्मृतिविहितसर्वकर्मपरित्यागपूर्वकज्ञानाभ्यासयोगात् **शुद्धसत्त्वाः** निर्मलान्तःकरणाः **यतयः** सन्यासिनो ये ते **ब्रह्मलोके** निर्गुणं ब्रह्म साक्षात्कृत्य परस्य हिरण्यगर्भस्य अन्तकाले अवसाने । **परामृतात्** उत्पन्नसाक्षात्कारात् बन्धनात् **परिमुच्यन्ति** मुक्ता भवन्तीत्यर्थः । तथा च स्मृतिः ।

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति । तत्रैव विदेहकैवल्यमनुभवतीत्याह—**स पुनरिति** ।। १७ ।।

•

"आगामिप्रतिबन्धो हि वामदेवे समीरितः । एकेनजन्मनाक्षीणो भरतस्य त्रिजन्मभिः ।।"

पूर्वोक्त 'प्रारब्धशेषरूप भावी प्रतिबन्ध' वामदेव तथा भरत का जिस प्रकार से हुआ है, उसे बताया गया है । **वामदेव** का तो वह भावी प्रतिबन्ध, एक जन्म में ही निवृत्त हुआ है, किन्तु **भरत** का तीन जन्म में निवृत्त हुआ है । अतः भावी प्रतिबन्ध की निवृत्ति का कोई काल नियम नहीं है । वामदेव के इस वृत्त को आत्मपुराण के प्रथम अध्याय में सविस्तर बताया गया है । 'प्रारब्धशेष' और 'ब्रह्मलोक आदि की इच्छा'—इस प्रकार से होनेवाले 'भावी प्रतिबन्ध' को पहिले बता चुके हैं । उनमें से 'प्रारब्धशेष' रूप प्रथम प्रतिबन्ध का निरूपण अभी तक किया गया ।

अब 'ब्रह्मलोक' की इच्छारूप 'द्वितीय भावीप्रतिबन्ध' का निरूपण कर रहे हैं—जिस मनुष्य के मन में 'ब्रह्मलोकादि' की प्राप्ति की इच्छा है, उसे श्रवणादि के करते रहने पर भी 'आत्मसाक्षात्कार' नहीं हो पाता है । अतः वह 'ब्रह्मलोक' प्राप्ति की इच्छा भी, 'आत्मज्ञान' की उत्पत्ति में 'भावी प्रतिबन्धरूप' है । श्री विद्यारण्यस्वामिपाद कहते हैं जिस मनुष्य के मन में ब्रह्मलोक प्राप्ति की अत्यन्त उत्कट इच्छा रहती है, वह पुरुष उस 'इच्छा' को रोककर 'श्रवणादिकों' को करता हुआ भी उसे 'आत्मसाक्षात्कार' नहीं होता है ।

शंका—ब्रह्मलोक प्राप्ति की साधनरूप जो 'उपासना' है, उसे भी उस मनुष्य ने नहीं किया, जिससे वह, ब्रह्मलोक को प्राप्त कर सके, तथा जिन 'श्रवणादिकों' को उसने किया है; उनसे, 'इच्छारूप प्रतिबन्ध' के कारण 'आत्मज्ञान' की भी प्राप्ति नहीं हुई । अतः वह मनुष्य तो 'इतो भ्रष्टस्ततो भ्रष्टः' अर्थात् दोनों फलों से भ्रष्ट होने के कारण कहीं का भी नहीं रहा, अर्थात् उसका तो अधःपतन ही हुआ ।

समा०—वह मनुष्य देहपात (मृत्यु) के पश्चात् पूर्व अनुष्ठित श्रवणादिसाधनों के प्रभाव से अपनी उत्कट इच्छा के अनुरूप वहाँ 'निर्गुण ब्रह्म' का 'अहं ब्रह्मास्मि'—इस प्रकार से 'साक्षात्कार' कर लेता है, उस साक्षात्कार से वहाँ उसे 'विदेह कैवल्य' रूप मोक्ष प्राप्त होता है । इस उक्त तथ्य के समर्थन में श्रुति का प्रमाण है ।

प्रमाणभूत श्रुतिवचन का अर्थ इस प्रकार है वेदान्त का श्रवण करके उत्पन्न हुए ज्ञान से जिन्हें अपना अद्वितीय ब्रह्मरूप लक्ष्य पदार्थ, सुनिश्चित हो गया है, तथा जिनका 'अन्तःकरण', श्रुति-स्मृति विहित समस्त कर्मों का विधि के अनुसार त्याग करके 'ज्ञानाभ्यासरूप योग' से शुद्ध (निर्मल) हुआ है, वे 'संन्यासी', किसी प्रतिबन्ध के कारण इस जन्म में 'ब्रह्मसाक्षात्कार' के न हो पाने पर भी उन 'श्रवणादिकों के प्रभाव से 'ब्रह्मलोक' में पहुँच कर वहां 'निर्गुण ब्रह्म' का साक्षात्कार कर लेते हैं, और "स पुनस्तत्रैव मुच्यते" कहकर स्पष्ट किया है कि ब्रह्मलोक के अधिपति 'हिरण्यगर्भ के अन्तकाल में (अवसान = समाप्तिकाल में) वे संन्यासी, उत्पन्न हुए 'ब्रह्मसाक्षात्कार' से 'बन्धनमुक्त' अर्थात् 'विदेहकैवल्यरूप मोक्ष' को प्राप्त होते हैं ।

इसी तथ्य अर्थ को इस स्मृति ने भी बताया है ।

एवं च उस मुमुक्षु मनुष्य के जो 'श्रवणादिसाधन' हैं, वे निष्फल नहीं हैं । अपितु ब्रह्मलोक की प्राप्ति कराते हुए **'आत्मज्ञान' को उत्पन्न कराने के कारण वे 'मोक्ष' के ही साधन सिद्ध हो रहे हैं ।। १७ ।।**

१. आदिपदं सगुणोपासनापरम् । ब्रह्मलोकमिच्छतस्तदुपपत्तेः श्रवणादित्रितयमात्रस्य ब्रह्मलोकफलकत्वे मानदौर्लभ्यात् ।

वर्तमानप्रतिबन्धं तन्निवृत्त्युपायं च विद्यारण्यस्वामिनो वर्णयांचक्रुः—

"प्रतिबन्धो वर्तमानो विषयाऽऽसक्तिलक्षणः। प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः॥
शमाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयम्। नीतेऽस्मिन्प्रतिबन्धे तु स्वस्य ब्रह्मत्वमश्नुते॥" इति॥

•

वर्तमानप्रतिबन्धं सम्मतिदर्शनेन व्युत्पादयति—**वर्तमानेति। विषयेति।** विषयेष्वासक्तिः राग इति यावत्। प्रज्ञायाः बुद्धेः मान्द्यं श्रुतार्थग्रहणधारणापटुत्वम्। कुत्सितः तर्कः **कुतर्कः** श्रुतिविरोधितर्क इत्यर्थः। विपर्यये आत्मनः कर्तृत्वे दुराग्रहः आत्मा कर्तैवेत्यभिमानः। एतेषां चतुर्णां वर्तमानप्रतिबन्धानां निवृत्त्युपायं तत्सम्मत्या दर्शयति—**शमाद्यैरिति।** शमदमादिभिर्विषयासक्तिलक्षणस्य वर्तमानप्रतिबन्धस्य निवृत्तिः। श्रवणेन प्रज्ञामान्द्यस्य, मननेन कुतर्कस्य, निदिध्यासनेन विपर्ययदुराग्रहस्य। शमाद्यैरित्यनेन दमादयो गृह्यन्ते। शमादीन्यनुपदमेव निरूपयिष्यति। श्रवणाद्यैरित्याद्यशब्देन मनननिदिध्यासने गृह्येते। श्रवणादीनि निरूपितानि। **तत्र तत्र** तस्मिन् तस्मिन् प्रतिबन्धे प्रथमस्य निवृत्तौ समाधिरुचितः कारणत्वेन, द्वितीयस्य निवृत्तौ श्रवणं, तृतीयस्य मननं, चतुर्थस्य निदिध्यासनम्। **क्षयं नीते** नाशं गते; यथोक्तसाधनचतुष्टयेन यथोक्तवर्तमानप्रतिबन्धचतुष्टये नष्टे सतीत्यर्थः। **स्वस्य** अन्तःकरणतद्वृत्तिसाक्षिणोऽहंपदलक्ष्यस्य। **ब्रह्मत्वम्** अखण्डैकरसानन्दस्वरूपत्वम्। **अश्नुते** मुमुक्षुरनुभवतीत्यर्थः।

श्रवणादिनाऽधिकारिणो ब्रह्मसाक्षात्कारोत्पत्तावन्तरङ्गसाधनानि दर्शयति—**श्रवणादिनेति।** साधनानि व्युत्पादयति—**अन्तरिन्द्रियेति।** अन्तरिन्द्रियं मनः। इदं प्रस्थानान्तररीत्यैष्टव्यम्; अन्यथा पूर्वोत्तरव्याघातापत्तेरिति भावः[1]। पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणीति बाह्येन्द्रियाणि दश। शीतोष्णसुखदुःखमानापमाननिन्दास्तुत्यादीति द्वंद्वानि। श्रवणादीत्यादिशब्देन मनननिदिध्यासने गृह्येते। चित्तस्य अन्तःकरणस्यैकाग्र्यम्। ऐकाग्र्यं नाम विजातीयप्रत्ययतिरस्कारेण लक्ष्यैकगोचरसजातीयप्रत्ययप्रवाहः। तदुक्तम्—"शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः" इति॥ शमादीनामन्तरङ्गसाधनत्वे प्रमाणमाह—**शान्त इति। आत्मनि** अन्तःकरणे। तत्र सम्मतिमाह—**सूत्रकारोऽपीति।**

•

पूर्वोक्त तीसरे 'वर्तमान प्रतिबन्ध' को सम्मति प्रदर्शन के सहित बता रहे हैं—**यह 'वर्तमान प्रतिबन्ध', (१) विषयासक्ति, (२) बुद्धि की मन्दता, (३) कुतर्क, (४) विपर्ययदुराग्रह के भेद से चार प्रकार का होता है।**

शब्द-स्पर्शादि विषयों में जो 'राग', उसे—'विषयासक्ति' कहते हैं। श्रवण किये हुए 'अर्थ' के ग्रहण और धारण करने में बुद्धि की जो अकुशलता, उसे—'बुद्धि की मन्दता' अर्थात् 'प्रज्ञामान्द्य' कहते हैं। तथाश्रुतिविरोधीतर्क को 'कुतर्क' कहते हैं। वस्तुतः अकर्ता, अभोक्ता जो 'आत्मा', उसे कर्ता-भोक्ता मनवाने के लिये जो दुराग्राह, अर्थात् 'आत्मा' ही कर्ता-भोक्ता है—इत्याकारक जो अभिमान, उसे—'विपर्ययदुराग्रह' कहते हैं।

इन चतुर्विध 'प्रतिबन्धों' में से किसी एक के भी विद्यमान रहते, श्रवणादिकों को करते रहने पर भी मुमुक्षु को **'आत्मसाक्षात्कार'** नहीं हो पाता। अतः ये चारों, 'आत्मज्ञान' के होने में 'वर्तमान प्रतिबन्ध' कहे जाते हैं। इन वर्तमान **प्रतिबन्धों की निवृत्ति** होने पर ही मुमुक्षु को श्रवणादि के करने से 'आत्मज्ञान' हो पाता है।

इस चतुर्विध वर्तमान प्रतिबन्धों की निवृत्ति का उपाय, श्रीविद्यारण्यस्वामिपाद की सम्मति के रूप में बता रहे हैं—**'शम-दम' आदि साधनों से तो 'विषयासक्ति' रूप प्रतिबन्ध की निवृत्ति होती है। 'वेदान्त के श्रवण' से 'बुद्धिमन्दतारूप प्रज्ञामान्द्य' नामक प्रतिबन्ध की निवृत्ति होती है। तथा 'मनन' करने से 'कुतर्करूप प्रतिबन्ध' की निवृत्ति होती है। और 'निदिध्यासन' करते रहने से 'विपर्यय दुराग्रह' नामक प्रतिबन्ध की निवृत्ति होती है।**

एवं च यथोक्त साधनचतुष्टय से यथोक्त वर्तमान प्रतिबन्धचतुष्टय के निवृत्त (नष्ट) होने पर 'स्वस्य ब्रह्मत्वमश्नुते'—अन्तःकरण-तद्वृत्ति साक्षी, अहं पदलक्ष्य अपने को ('स्व' को) अखण्डैकरस आनन्द स्वरूप 'ब्रह्म' ही समझने लगता है। अर्थात् मुमुक्षु, अपने में ('स्व' में) ब्रह्मत्व का अनुभव करने लगता है।

श्रवण-मनन-निदिध्यासन—तीनों का स्वरूप, द्वितीय परिच्छेद में बता चुके हैं। अब श्रवणादिक के द्वारा अधिकारी **बने हुए मुमुक्षु** के लिये ब्रह्मसाक्षात्कार की उत्पत्ति में अन्तरङ्ग साधनों को बता रहे हैं—**'श्रवण-मनन आदि' के द्वारा सम्पूर्ण प्रतिबन्धों के निवृत्त होने पर 'गुरु के उपदेशवाक्य' से 'ब्रह्मसाक्षात्कार' की उत्पत्ति हो जाती है। 'उस उत्पत्ति' में (१) शम,**

---

१. अन्तरिन्द्रियपदस्यान्तःकरणे रूढतया स्वप्रस्थानेप्यविरोधो द्रष्टव्यः।

ततश्च श्रवणादिभिः[1] सकलप्रतिबन्धनिवृत्त्या वाक्याद् ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धासमाधानानि अन्तरङ्गसाधनानि ।

●

बहिरङ्गसाधनानि दर्शयति—**यज्ञादय इति** । श्रवणादिना सकलप्रतिबन्धनिवृत्तौ वाक्याद् ब्रह्मसाक्षात्कारोत्पत्ताविति शेषः । यज्ञादीनां सत्त्वशुद्धिद्वारा विविदिषोत्पादनमुखेन ब्रह्मसाक्षात्कारोपयोगाद्बहिरङ्गसाधनत्वमित्यर्थः । तत्र प्रमाणमाह—**तमेतमिति** । वेदानुवचनम् ब्रह्मचर्याङ्गाध्ययनम् । बहिर्वेदिदानम् दानम् । हितमितमेध्याशनम् तपः । अत एवानाशकेनेति विशेषणम् ।

केचित्तु—अनशनं वा कृच्छ्राद्यनुष्ठानं वा तपः; "तप इति तपो नानशनात्परमि"ति श्रुतेरिति—वदन्ति । अस्मिन् पक्षे **नाशकेनेति** पदच्छेदः अयमर्थः—नाशकेन पृथूदकगङ्गायमुनासङ्गमादिषु बुद्धिपूर्वकतनुत्यागेन विविदिषोत्पत्तिद्वारा ब्रह्मसाक्षात्कारो भवति, श्रुतिस्मृतीतिहासपुराणेषूपलम्भात् । अत एवोक्तं कालिदासेनापि ।

"समुद्रपत्न्योर्जलसन्निपाते पूतात्मना मन्त्रकृताभिषेकात् ।
तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ।।" इति ।

तत्त्वावबोधेन विनेति प्रशंसा । अन्यथा "ब्रह्म वेद ब्रह्मैव भवती"ति श्रुतिविरोधप्रसङ्गात्, ज्ञानमेवाज्ञाननिवर्तकं न कर्मेति न्यायविरोधापत्तेश्चेति ।

अन्ये तु—बुद्धिपूर्वकप्रयागादिमरणं युगान्तरविषयम्, त्रैवर्णिकव्यतिरिक्तविषयं वा; कलिकाले सति सामर्थ्ये ब्राह्मणादीनां

●

(२) दम, (३) उपरति, (४) तितिक्षा, (५) श्रद्धा, (६) समाधान-ये छह 'अन्तरङ्ग साधन, कहलाते हैं । इसे 'शमादिषट्कसम्पत्ति' कहते हैं ।

उन अन्तरङ्गसाधनों के स्वरूप को बताते हैं—जैसे 'श्रवण-मनन-निदिध्यासन'—ये तीनों, उक्तप्रतिबन्ध' की निवृत्ति के द्वारा 'आत्मज्ञान' की उत्पत्ति में 'अन्तरंग' साधन हैं, उसी प्रकार यह 'शमादिषट्कसम्पत्ति' भी 'उक्त 'प्रतिबन्ध' की निवृत्ति के द्वारा 'अन्तरंग साधन' हैं । **अन्तरिन्द्रिय के निग्रह को 'शम' कहते हैं** । यहाँ पर 'अन्तरिन्द्रिय' शब्द से 'मन' को समझना है । श्री वाचस्पति मिश्र के मतानुसार 'मन' को 'इन्द्रिय' कहा गया है । किन्तु विवरणकार के मत में 'मन' को 'इन्द्रिय' नहीं माना जाता । अतः प्रस्थानान्तर की दृष्टि से 'मन' को यहाँ पर 'इन्द्रिय' कहा गया है । अन्यथा पूर्वोत्तर व्याघात होगा । वेदान्त शास्त्र में (१) 'वाचस्पतिमिश्र' (भामतीकार) का प्रस्थान है, और (२) 'विवरणकार' का प्रस्थान है । एवं च अन्तरिन्द्रिय मन का, उसके अपने 'विषयचिन्तन' से निग्रह करना ही 'शम' कहलाता है । **श्रोत्रादि बाह्यइन्द्रियों का उसके अपने शब्दादिविषयों की ओर निग्रह करना ही 'दम' कहलाता है शास्त्रविधिपूर्वक समस्त विहित कर्मों के संन्यास (त्याग) को 'उपरति'** कहते हैं । **तथा 'शीत-उष्ण', 'सुख-दुःख', 'मान-अपमान', 'निन्दा-स्तुति'** आदि **द्वन्द्वधर्मों के सहन करने** (सहिष्णुता) को 'तितिक्षा' कहते हैं । **तथा गुरुवचनों में और वेदान्त वचनों में विश्वास करने को 'श्रद्धा' कहते हैं । और 'श्रवण'** आदि साधनों के अनुष्ठान के **समय 'चित्त को 'एकाग्रता' को 'समाधान' कहते हैं ।** विजातीय वृत्तियों का तिरस्कार करके 'लक्ष्य वस्तुविषयक सजातीय **वृत्तियों के प्रवाह' को 'चित्त की एकाग्रता'** कहते हैं । श्रुति ने भी 'शम-दमादिषट्कसम्पत्ति' को 'आत्मसाक्षात्कार' के प्रति **'अन्तरङ्गसाधन'** कहा है—'शम-दम-उपरति-तितिक्षा-श्रद्धा-समाधान'—**इन षट् (छह) सम्पत्तियों से युक्त हुआ मुमुक्षु, अपने अन्तःकरण में 'आत्मा'** का साक्षात्कार कर पाता है । **इस उक्त तथ्य को ही ब्रह्मसूत्रकार भगवान् व्यास ने एक (ब्र० सू० ३।४।२७) सूत्र के द्वारा बताया है । यद्यपि 'यज्ञेन विविदिषन्ति'—में वर्तमान काल का प्रयोग होने से 'विधि' नहीं है, तथापि मुमुक्षु को शम-दम' आदि से युक्त होना आवश्यक है । क्योंकि 'तस्मादेवं विच्छान्तो दान्त उपरतः'—इस श्रुति ने 'शमादि' का विधान किया है । अतः विहित होने के कारण 'शमादि' अवश्य अनुष्ठेय हैं ।**

एवं च 'श्रवणादि' साधनों के समान ही 'शमादिषट्कसम्पत्ति' भी 'आत्मसाक्षात्कार' के प्रति 'अन्तरंग साधन' है ।

अब 'आत्मज्ञान' के प्रति बहिरंग साधनों को बताते हैं—**स्वर्गादि फल की इच्छा से रहित होकर अनुष्ठीयमान जो यज्ञ-दानादि कर्म है, वे, 'आत्मज्ञान' के 'बहिरंगसाधन'** हैं । क्योंकि 'निष्काम यज्ञ-दान' आदि कर्मों के अनुष्ठान से अधिकारी पुरुष के 'अन्तःकरण' की शुद्धि होती है । उस शुद्ध (निर्मल) हुए अन्तःकरण में आत्मज्ञान की इच्छा (आत्मा के जानने की इच्छा) रूप 'विविदिषा' उत्पन्न होती है । तदनन्तर 'श्रवण' आदि साधनों के अनुष्ठान से उसको 'आत्मसाक्षात्कार' होता है ।

---

१. श्रवणादिभिरिति टीकानुसारी पाठः ।

अन्तरिन्द्रियनिग्रहः शमः। बाह्येन्द्रियनिग्रहो दमः। उपरतिः संन्यासः। तितिक्षा द्वन्द्वसहिष्णुता। श्रद्धा गुरुवेदान्तविश्वासः। समाधानं श्रवणादिषु चित्तैकाग्रयम्। 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येदि''-त्यादि। सूत्रकारोऽप्याह—''शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्याऽनुष्ठेयत्वादि''ति।

•

तत्प्रतिषेधात्, धर्मशास्त्रे मरणान्तप्रायश्चित्तप्रतिषेधाच्चेति—**वदन्ति**। यज्ञादीनां समुच्चित्यविविदिषासाधनत्वमिति केचित्। विकल्पेनेत्यपरे।

न च—कर्मणां साक्षादेव मुक्तिसाधनत्वात्कथं विविदिषाहेतुत्वमिति—**वाच्यम्**; मुक्तेरविद्यानिवृत्तेर्वा ब्रह्मभावस्य वा ज्ञानैकसाध्यत्वात्, शुक्त्यज्ञानस्याधिष्ठानसाक्षात्कारान्निवृत्तेर्दृष्टत्वाच्च। ब्रह्मात्मभावस्यानादित्वाच्च मुक्तेः कर्मसाध्यत्वमनुपपन्नम्। तदुक्तं।

''भ्रान्त्या प्रतीतः संसारो विवेकान्न तु कर्मभिः। न रज्ज्वारोपितः सर्पो घण्टाघोषान्निवर्तते॥'' इति।

तस्माद्यज्ञादीनां विविदिषाहेतुत्वमेव न मोक्षहेतुत्वमिति।

अत्र यज्ञादिश्रुतेरविशेषात् फलाभिसन्धिमन्तरेणानुष्ठितानि नित्यनैमित्तिककाम्यप्रायश्चित्तरूपाणि सर्वाणि कर्माणि विविदिषाहेतवः, सगुणोपासनं चित्तैकाग्र्यहेतुरिति केचित्। **आचार्यास्तु**—''काम्यानां कर्मणां न्यासः'' इति स्मृत्या काम्यकर्मणामननुष्ठेयत्वं प्रतिपाद्य फलाभिसन्धिमन्तरेण नित्यकर्मणां मुमुक्षुभिरनुष्ठेयत्वप्रतिपादनान्नित्यकर्माण्यग्निहोत्रादीनि विविदिषाहेतुत्वेन विधीयन्ते खादिरतादिवद्वीर्यायेति—**आहुः**। यज्ञादीनां बहिरङ्गसाधनत्वे सूत्रसंमतिमप्याह—**सर्वापेक्षा चेति**। तृतीये स्थितम्—ब्रह्मविद्यया मुक्तिफले जनयितव्ये कर्माणि नापेक्ष्यन्ते इत्युक्तम्—''अत एवाग्नीन्धनाद्यनपेक्षे''त्यत्र। इदानीं ब्रह्मविद्या

•

इस प्रक्रिया (परम्परा) से 'यज्ञादिकर्म' भी 'आत्मसाक्षात्कार' (आत्मज्ञान) के 'साधन' होते हैं। उस कारण उन 'यज्ञ-दान' आदि कर्मों को 'आत्मज्ञान' के प्रति 'बहिरंगसाधन' कहा गया है। श्रुति कहती है—**(बृ. ४।४।२२) कि अधिकारी ब्राह्मण इस आत्मा को वेदानुवचन से तथा यज्ञ-दान करके जानने की इच्छा करते** हैं। इस श्रुतिगत 'वेदानुवचन' शब्द से 'नित्य सांग वेदाध्ययन' को समझना चाहिए। तथा 'यज्ञ' शब्द से 'अग्निहोत्रा'दि यज्ञों को तथा 'दान' शब्द से 'यज्ञ के बहिर्भूत दान' को समझना चाहिए। और हितकारक, परिमित तथा पवित्र अन्न के भोजन को 'तप' कहा गया है। अतएव 'अनाशकेन'—यह 'विशेषण' जोड़ा गया है। जो 'तप', शरीर के नाश का कारण नहीं होता, उस 'तप' को 'अनाशक' कहा गया है। श्रीमद्-भगवद्गीता में भी कहा है कि जो परिमाण से अधिक खाता है, जो सर्वदा सोता ही रहता है, जो जागता ही रहता है, जो कुछ खाता ही नहीं है, उसकी योगसाधना कभी भी सिद्ध नहीं होती। चित्तनिरोध करने वाला योगी, शरीरस्थिति के लिए कर्म करता हुआ भी 'पाप' से लिप्त नहीं होता।

कुछ ग्रन्थकारों ने श्रुतिवचन में 'अनाशकेन' ऐसा पदच्छेद न करके 'तपसा नाशकेन' यह पदच्छेद करते हैं। और उक्त श्रुति का अर्थ करते हैं कि 'शरीर' के नाश का हेतुभूत जो 'अनशन व्रत' है, तथा प्रयाग में स्थित तीर्थराज गंगा-यमुना के संगम में जो मनुष्य, बुद्धिपूर्वक देहपात (शरीर त्याग) करता है, तथा शरीर को क्षीण करने वाले जो 'कृच्छ्र चान्द्रायणादि व्रत' हैं, उन्हें 'तप' कहते हैं। अतएव श्रुति, 'अनशन व्रत' को समस्त तपों से 'उत्कृष्ट तप' बताती है। तथा प्रयाग में बुद्धिपूर्वक शरीरत्याग करनेवाले मनुष्य को 'विविदिषा' द्वारा 'ब्रह्मसाक्षात्कार' की प्राप्ति का होना श्रुति-स्मृति-पुराण-इतिहासादि ग्रन्थों ने बताया है। अतएव महाकवि कालिदास ने भी कहा है (रघु० १३-५८) कि समुद्र की दोनों पत्नियों का जल जहां मिलता है वहाँ पवित्र मन से मन्त्रोच्चारण करते हुए स्नान करने से शरीर त्यागने वालों को तत्वज्ञान के विना भी पुनः शरीर में बँधने से छुटकारा मिल जाता है। यहाँ 'तत्त्वज्ञान के विना' यह केवल प्रशंसामात्र है। अन्यथा श्रुति और न्याय के साथ विरोध होगा। एवंच श्रुतिगत 'तप' शब्द से 'अनशन' आदि 'तप' को जानना चाहिए।

कुछ ग्रन्थकारों का कहना है कि प्रयाग स्थित संगम में बुद्धिपूर्वक शरीर त्याग करना, जो बताया गया है, वह 'कलियुग' के लिए नहीं है, अपितु त्रेत्रादि युगों के लिए वह बताया है। इस कलियुग में तो बुद्धिपूर्वक मरण का सर्वथा निषेध ही है। यदि देहपातविधायक वचनों की अवस्था, युगभेदपरक न भी करें तो उन वचनों को त्रैवर्णिकेतरपरक समझना चाहिए। त्रैवर्णिकों के लिए वह विधान नहीं है। अतएव धर्मशास्त्र में ब्राह्मणादि त्रैवर्णिकों के लिए मरणान्त प्रायश्चित्त कानिषेध किया है। कलियुग में सामर्थ्य होते हुए, ब्राह्मणादिकों के लिए उसका प्रतिषेध किया गया है।

यज्ञादयो बहिरङ्गसाधनानि; "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने"त्यादिश्रुतेः ।

•

स्वोत्पत्तौ कर्माण्यपेक्षते न वेति संशये, नापेक्षते इति तावत्प्राप्तम्, प्रमाणप्रवृत्तौ सत्यां ज्ञानस्य स्वत एवोत्पत्तिसंभवेन कर्मणां तत्राप्रयोजकत्वात् । किञ्च स्वर्गोद्देशेन यजेतेति यागविधिवत् ब्रह्मज्ञानोद्देशेन कर्मविधानाभावात् न कर्मणां मोक्षहेतुत्वम् । नच—विविदिषन्तीति विविदिषावाक्ये तदुद्देशेन तद्विधानात्कर्मणां ज्ञानहेतुत्वमिति—वाच्यम्; तत्र विधिप्रत्ययाश्रवणेन वर्तमानापदेशितया तस्य स्तावकत्वात् । तस्मात् ब्रह्मविद्या स्वोत्पत्तौ कर्माणि नापेक्षते इति प्राप्ते—

•

कुछ ग्रन्थकारों का कहना है कि श्रुति में बताए गए जो 'वेदाध्ययन, यज्ञ, दान, तप'—हैं, उन सबका समुच्चय, ही 'विविदिषा' का साधन होता है।

किन्तु कुछ ग्रन्थकार उन यज्ञादि कर्मों को विकल्प के रूप में 'विविदिषा' का साधन (हेतु) मानते हैं। अतः यज्ञ-दान आदि कर्मों का अनुष्ठान करने से ही 'विविदिषा' होती है।

शंका—यज्ञ-दानादि कर्म तो 'मुक्ति' के साक्षात् ही साधन हो सकते हैं। तब उनको 'विविदिषा) का साधन कहना उचित प्रतीत नहीं हो रहा है।

समा०—अविद्या की निवृत्ति, अथवा ब्रह्मभाव की प्राप्ति को ही 'मुक्ति' कहते हैं। वह 'मुक्ति', केवल 'आत्मज्ञान' से ही हो सकती है। कर्मानुष्ठान से उस मुक्ति को प्राप्ति होना कभी सम्भव नहीं हैं। क्योंकि 'शुक्ति' का अज्ञान ही, 'रजतभ्रम' का कारण है। उस 'अज्ञान' की निवृत्ति, उस शुक्तिरूप अधिष्ठान के ज्ञान (साक्षात्कार) से ही होती है। अन्य किसी उपाय से नहीं। और 'ब्रह्मात्मभावरूप मोक्ष' तो अनादि है। अतः उसमें (मोक्ष में) भी 'कर्मरूप साध्यता' का होना संभव नहीं है। अर्थात् भ्रान्ति से रज्जु पर आरोपित (कल्पित) किया गया सर्प, उस रज्जुरूप अधिष्ठान के ज्ञान से निवृत्त होता है। घण्टाघोष करने से अथवा गारुडादिमन्त्र से उस कल्पित सर्प की निवृत्ति नहीं होती। उसी तरह 'आत्मा' पर भ्रान्तिवशात् आरोप किये गये संसार की निवृत्ति, उसके अधिष्ठानरूप आत्मा के साक्षात्कारात्मक विवेकज्ञान से ही हो सकती है। कर्मानुष्ठान से उस आरोपित (कल्पित) संसार को निवृत्ति नहीं हो सकती।

किञ्च—श्रुतिवचनों ने 'कर्म' को साक्षात् मोक्षसाधनता का निषेध किया है और 'आत्मज्ञान' को ही 'मोक्ष' का साक्षात् साधन बताया है। उस कारण 'कर्म' में 'मोक्ष' की साक्षात् साधनता का रहना कभी सम्भव नहीं है। अतः पूर्वोक्त प्रकार से वे कर्म, 'अन्तःकरण' की शुद्धिद्वारा 'विविदिषा' के ही 'कारण' (हेतु) हो सकते हैं।

शंका—श्रुतिप्रतिपादित यज्ञादि कर्म, भले ही विविदिषा के हेतु रहें, तथापि वे चारों प्रकार के ((१) नित्य, (२) नैमित्तिक, (३) काम्य, (४) प्रायश्चित्त) 'यज्ञादि कर्म; उस 'विविदिषा' के हेतु (कारण) होते हैं, अथवा केवल 'नित्यकर्म' ही उस विविदिषा के हेतु होते हैं ?

समा०—कुछ ग्रन्थकारों का तो कहना है कि श्रुति ने तो केवल 'यज्ञ-दान आदि कर्म' मात्र को ही 'विविदिषा' के प्रति 'हेतु' कहा है। उसने नित्य-नैमित्तिक-काम्य या प्रायश्चित्त—इन विशेषणों को उन कर्मों के साथ, जोड़ा नहीं है। उस कारण फलेच्छा से रहित होकर (निष्काम) होकर अनुष्ठीयमान नित्य-नैमित्तिक-काम्य-प्रायश्चित्तरूप सभी यज्ञादि कर्म, 'अन्तःकरण' की शुद्धि के द्वारा 'विविदिषा' के प्रति 'हेतु' होते हैं। तथा सगुणब्रह्म की उपासना से 'चित्त' की एकाग्रता होती है।

किन्तु पूज्यपाद आचार्य का कहना तो यह है कि स्मृति ने 'काम्य कर्मों' के अनुष्ठान का निषेध करके निष्काम (फलेच्छा से रहित) 'अग्निहोत्रादि' नित्य कर्मों के अनुष्ठान का विधान किया है। क्योंकि उक्त श्रुति ने भी निष्काम अग्निहोत्रादि नित्य कर्मों को ही 'विविदिषा' का हेतु कहकर विहित बताया है। 'नैमित्तिक', 'काम्य', तथा 'प्रायश्चित्त' कर्मों का विधान उसने नहीं किया है। अतः 'यज्ञादिकर्म', 'आत्मज्ञान' की प्राप्ति में 'बहिरंग' साधन ही हैं।

आत्मज्ञान के प्रति 'यज्ञादिकर्मों' की बहिरंगसाधनता को ब्रह्मसूत्रकार भगवान् व्यास ने भी बताया है—वे कहते हैं कि (ब्र० सू० ३।४।२६) **'ब्रह्मविद्या' को अपनी उत्पत्ति में उन यज्ञादि कर्मों की (समस्त आश्रम कर्मों की) अपेक्षा घोड़े की तरह होती है, क्योंकि श्रुति ने ऐसा बताया है।** अतएव पूर्वोक्त श्रुति ने (बृ० ४।४।२२) अर्थात् ब्राह्मण लोग, वेद के नित्य *स्वाध्याय से, यज्ञ से, दान से और* निष्काम तप से जानने की इच्छा करते हैं। यह श्रुति, यज्ञादि कर्मों को 'ब्रह्मविद्या' की साधन होना बता रही है। और 'विविदिषा' के साथ इन यज्ञादिकों का संयोग होने से वे कर्म, ब्रह्मविद्या की 'उत्पत्ति' में साधन हैं—

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्'' इत्यप्युक्तम् ॥ १८ ॥

●

ब्रूमः, अस्ति कर्मापेक्षा ब्रह्मविद्यायाः स्वोत्पत्तौ। कस्मात् ? "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने"त्यादिश्रुतेः। **नच**—वर्तमानापदेशितयाऽनुवादकत्वेनास्य स्तावकत्वमिति—**वाच्यम्**; विविदिषासंयोगस्यापूर्वत्वेन लेट्परिग्रहेण विधायकत्वोपपत्तेः। अन्यथा—"उपांशुयाजमन्तरा यजति" "पूषा प्रपिष्टभागः" इत्यादौ सर्वत्र विध्यभावप्रसङ्गः, "विधिर्वा धारणवत्"[1] इति सूत्रविरोधप्रसङ्गश्च स्यात्। तस्मात् यथाऽश्वः लाङ्गलाकर्षणेऽयोग्यतया न नियुज्यते, किन्तु योग्यत्वेन रथचर्यायां नियुज्यते तथा कर्माणि ब्रह्मविद्यया मोक्षफले जनयितव्ये नापेक्ष्यन्ते, तेषां तत्रायोग्यत्वात्। स्वोत्पत्तौ तु अपेक्ष्यन्ते, चित्तशुद्धिविविदिषोत्पत्तिद्वारा तद्योग्यत्वात्। तथाच स्मृतिः—

"कषायपक्तिः कर्माणि ज्ञानं च परमा गतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते॥" इति।

●

यह निश्चित होता है। ये आश्रम कर्म यज्ञादि, 'ब्रह्मविद्या' की फलसिद्धि के लिये अपेक्षित नहीं हैं, परन्तु उत्पत्ति के लिये उनकी अपेक्षा है। मोक्षरूप फल प्राप्ति कराने में उन कर्मों की योग्यता नहीं है। जिसकी जहाँ योग्यता होती है, उसी की वहाँ अपेक्षा की जाती है। जैसे 'अश्व' की 'हल' जोतने में योग्यता नहीं है, किन्तु 'रथ' के खींचने में हो उसकी योग्यता होती है। उस कारण 'अश्व' को 'रथ' में ही जोता जाता है। 'हल' खींचने में उसे नहीं जोता जाता। उसी तरह यज्ञादि कर्मों में 'मोक्ष' प्राप्त कराने की योग्यता नहीं है, अपितु 'चित्त' की शुद्धि द्वारा 'विविदिषा' को उत्पन्न करते हुए 'ब्रह्मविद्या' को उत्पन्न कराने को ही योग्यता है। अतः यज्ञ-दानादि कर्मों में 'आत्मज्ञान' के प्रति बहिरंग साधनता हो है। एवंच सूत्रकार ने सूत्र के द्वारा स्पष्ट कह दिया है कि 'मुक्तिफल' की प्राप्ति कराने में 'आश्रमकर्म यज्ञादिकों' की अपेक्षा नहीं है। अविद्या और अन्धकार को नष्ट करने में 'ज्ञान' और 'दीपक' निरपेक्ष (स्वतन्त्र) रहते हैं। अतः 'विद्या' भी फल की प्राप्ति कराने में निरपेक्ष होकर ही कारण होती है।

इति वार्तिकाचार्योक्तेश्च। केषांचित् परमेश्वरानुगृहीतानामसम्भावनादिरहितानां पण्डितानां ब्रह्मापरोक्षज्ञानिनां ध्याननिष्ठापेक्षाभावेऽपि तद्विपरीतानां ध्याननिष्ठाऽपेक्षितैवेत्याह—**प्रमाणेति**। तथा संशयादिनिवृत्त्याऽप्रतिबद्धब्रह्मसाक्षात्कारेण परमपुरुषार्थो मोक्षस्तेषां भवतीति भावः।

तत्राचार्यसम्मतिमाह—**तदुक्तमिति**। तृतीये स्थितम्—"प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः"। "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवाऽमूर्तं चे"त्युपक्रम्याधिदैवमध्यात्मं च ब्रह्मणो मूर्ताऽमूर्तलक्षणे द्वे रूपे मूर्ताऽमूर्तरसौ समष्टिव्यष्टिरूपौ महारजनाद्युपमं लिङ्गगतं वासनारूपं चोपन्यस्याम्नायते—"अथात आदेशो नेति नेती"ति। अत्र यद्यपि निषेध्यं किञ्चिन्न प्रतीयते; तथाप्येवंशब्दसमानार्थकेनेतिशब्देन सन्निहितवाचिना निषेध्यं किंचित् समर्प्यते।

तत्र संशयः—किमत्र रूपे परिशिनष्टि, ब्रह्म प्रतिषिद्ध्यते, आहोस्वित् ब्रह्म परिशिनष्टि रूपे प्रतिषिध्येते इति। तत्र प्राप्तं तावत्—रूपे परिशिनष्टि, ब्रह्म प्रतिषिध्यत इति। कुत इति चेत्? प्रत्यक्षादिसिद्धस्य रूपादेः प्रतिषेधायोगात्, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुत्या ब्रह्मणो वाङ्मनसातीतत्वप्रतिपादनेन तस्यैव निषेधो युक्त इति प्राप्ते—

अभिधीयते। न तावत् ब्रह्मप्रतिषेधः सम्भवति; रूपिणं विना रूपानवस्थानात्। किंच ब्रह्मव्यतिरिक्तस्य मूर्तामूर्तलक्षणस्य कार्यतयाऽनित्यत्वेन ब्रह्मप्रतिषेधे शून्यवादः प्रसज्येत। तर्हि किं प्रतिषिध्यत इति चेत्? **प्रकृतैतावत्त्वं हि प्रतिषेधति;**

अवश्य रहती है। उस ध्याननिष्ठा से ही उसकी सन्दिग्धभावना तथा विपरीत भावनारूप प्रतिबन्धकों की निवृत्ति हो पाती है। तब प्रतिबन्धरहित ब्रह्मसाक्षात्कार उसे होता है, और मोक्ष प्राप्ति होती है।

किन्तु परमेश्वर के अनुग्रह पात्र, असम्भावना–सन्दिग्धभावना–विपरीत–भावनाओं से रहित जो व्युत्पन्न अधिकारी रहते हैं, उन्हें ब्रह्म साक्षात्कार के पश्चात् ध्याननिष्ठा की अपेक्षा (आवश्यकता) नहीं होती है।

'ध्यान' ही 'ब्रह्मसाक्षात्कार' के होने में कारण (हेतु) है—**इस तथ्य को ब्रह्मसूत्रकार व्यास भगवान् ने भी अपने ब्रह्मसूत्र में बताया है—(ब्र० सू० ३।२।२४) धीर पुरुष, उस परमात्मा का, समाधिदशा में अर्थात् ध्यानकाल में एकाग्रचित्त से आत्मरूप में ब्रह्मसाक्षात्कार कर पाता है।** (भक्ति, ध्यान, प्रणिधानादि के अनुष्ठान को 'संराधन' कहते हैं)। क्योंकि श्रुति तथा स्मृति ने भी 'ध्यान' से ही 'ब्रह्मसाक्षात्कार' का होना बताया है। श्रुति कहती है—(मुं० उ० ३।१।८) ज्ञान की निर्मलता से जिनका अन्तःकरण विशुद्ध (निर्मल) हुआ है, वह ध्यान करता हुआ समस्त अवयवभेद से रहित आत्मा को देखता है। अर्थात् निर्मल अन्तःकरण वाला पुरुष 'निर्गुण ब्रह्म' का ध्यान करता हुआ उस निर्गुण ब्रह्म का साक्षात्कार करता है, और बाह्य रूपादिविषयों से मोड़ लिया है चक्षुरादि इन्द्रियों को जिसने वही ध्याननिष्ठ पुरुष, मोक्षप्राप्ति की इच्छा करने वाला पुरुष 'प्रत्यक् आत्मा' का साक्षात्कार करता हैं। तथा स्मृति भी बता रही है कि निद्रारहित, श्वास को जीतनेवाले, संयतेन्द्रिय मनुष्य, ध्यान लगाकर जिस ज्योति को देखते हैं, उस योगलभ्य आत्मा को प्रणाम है। उस सनातन परमेश्वर को योगी लोग सम्यक्तया देखते हैं। अर्थात् संयत निद्रावाले, तथा प्राणायाम के द्वारा श्वास-प्रश्वास को जीतनेवाले, तथा यथालाभ में ही सन्तुष्ट रहनेवाले, तथा जितेन्द्रिय पुरुष, ध्यानयोग के द्वारा जिस परमात्मज्योति का साक्षात्कार करते हैं उस योगलभ्य (योगरूप) परमात्मा को हमारा नमस्कार है। एवञ्च परमेश्वर का ध्यान करने से 'प्रत्यगात्मा' का साक्षात्कार होता है और ज्ञानोत्पत्ति के होने में जितने भी प्रतिबन्धक हैं, उन सबकी निवृत्ति होती है। बादरायण व्यास ने भी कहा है—(ब्र० सू० ३।२।५) अर्थात् जीवात्मा का अविद्या' आदि से व्यवहित ऐश्वर्य, परमात्मा के ध्यान से अभिव्यक्त होता है, क्योंकि परमेश्वर का 'ज्ञान' न होने से जीवात्मा का 'बन्ध', और 'ज्ञान' होने से 'मोक्ष' होता है। श्रुति (श्वेता० १।११) भी बता रही है—'वह मैं ही हूँ' इसप्रकार परमेश्वर को जानकर 'जीव' के समस्त बन्धनों का नाश हो जाता है। अविद्यादि क्लेशों के क्षीण होने पर जनन-मरणादि दुःखहेतु का नाश हो जाता है—उस परमेश्वर के अभिध्यान से शरीरपात होने पर तृतीय विश्वैश्वर्यलक्षण फल की प्राप्ति होती है। तब वह अनुभवी व्यक्ति, उसका त्याग करके केवल पूर्णानन्द अद्वितीय ब्रह्मरूप हो जाता है। इसी तथ्य को सूत्रकार ने भी बताया है—बृ० उ० २।३।६)। सन्दर्भ यह चल रहा है कि—'ब्रह्म' के दो रूप हैं—मूर्त और अमूर्त, मर्त्य और अमृत, स्थिर और चर तथा सत् और त्यत्। जो वायु और अन्तरिक्ष से भिन्न है, वह मूर्त है। यह मर्त्य है, यह स्थित है, और यह सत् है। उस

अन्यत्राऽप्युक्तम्—

"बहुव्याकुलचित्तानां विचारात् तत्त्वधीर्न चेत्। योगो मुख्यस्ततस्तेषां धीदपस्तेन नश्यति ॥" इति।

•

नेति नेतीति श्रुतिः पूर्ववाक्ये प्रकृतं ब्रह्मणो रूपत्वेनोपन्यस्तं मूर्तामूर्तलक्षणतद्रसतद्गतवासनारूपमेतावन्मात्रं प्रतिषेधति, "अथात आदेशो नेति नेती"ति, न रूपि ब्रह्म प्रतिषेधति, शून्यवादप्रसङ्गात् सर्वप्रतिषेधे। आदरार्थे नेति नेतीति वीप्सा। इदं कुतो ज्ञायत इति चेत्? ततः प्रतिषेधानन्तरं भूयो ब्रवीति "न ह्येतस्मादिति नेत्यन्यत् परमस्तीति"। नेति। कोऽर्थः? नेत्येतस्मात् निषेधावधिभूतात् ब्रह्मणोऽन्यत् परं न ह्यस्तीति योजना।

यदा तु नेत्येतस्मादतिदेशादन्यत् परं अतिदेशान्तरं नह्यस्तीति योजना क्रियते, तदा ततो ब्रवीति च भूय इत्यस्यायमर्थः—ततः नेतिनेत्यादेशानन्तरं भूयः ब्रवीति स्तुतिः "अथ नाम ध्येयम्[1] सत्यस्य सत्यमिति प्राणा वै सत्यम् तेषामेव सत्यमि"ति।

यदुक्तम्—प्रमाणसिद्धस्य रूपस्य प्रतिषेधायोगादिति; तदसत्। रूपस्याऽविद्याविलसितत्वेन तद्बोधकमानानामाभासत्वात्॥ यदुक्तम्—ब्रह्मणो वाङ्मनसातीतत्वप्रतिपादनेन प्रतिषेधो युक्त इति; तत्तुच्छम्। नहि ब्रह्मणो निरात्मतया वाङ्मनसातीतत्वं प्रतिपाद्यते। किं तर्हि? ब्रह्मणः सर्वेषां नः प्रत्यगात्मतया विषयित्वेन श्रुत्या तत्प्रतिपाद्यते। तस्मात् ब्रह्म परिशिनष्टि, रूपे प्रतिषेधति।

तर्हि ब्रह्म सर्वैः कस्मात् न गृह्यते? इति चेत्, अव्यक्तत्वात्। तदपि कुतः? इति चेत्, "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा" "स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते" "अस्थूलमनणु" "यत्तदद्रेश्यमग्राह्यम्" "अव्यक्तोऽ-

•

मूर्त का, उस मर्त्य का, उस स्थिति का, उस सत् का यह रस है, जो यह तपता है, यह सत् का ही रस है। तथा वायु और अन्तरिक्ष अमूर्त हैं, ये अमृत हैं, ये यत् हैं और ये ही त्यत् हैं। इस अमूर्त का, इस अमृत का, इस यत् का, इस त्यत् का यह सार है, जो कि इस मण्डल में पुरुष है, यही इस त्यत् का सार है। यह अधिदैवत दर्शन है। अब अध्यात्म मूर्तामूर्त का वर्णन कर रहे हैं—जो प्राण से तथा यह जो देहान्तर्गत आकाश हैं, उससे भिन्न है, यही मूर्त है। यह मर्त्य है, यह स्थित है, यह सत् है। यह जो नेत्र है, वही इस मूर्त का, इस स्थिति का एवं इस सत् का सार है। यह सत् का ही सार है।

अब अमूर्त का वर्णन कर रहे हैं—प्राण और इस शरीर के अन्तर्गत जो आकाश है, ये अमूर्त है, यह अमृत है, यह है और यही त्यत् है। इस अमूर्त का, इस अमृत का, इस यत् का, इस त्यत् का यह रस है, जो कि यह दक्षिण नेत्रान्तर्गत पुरुष है, यह त्यत् का ही रस है। उस पुरुष का रूप-चमत्कार ऐसा है जैसा हरिद्रा से रंगा हुआ वस्त्र हो, जैसा सफेद ऊनी वस्त्र हो, जैसा इन्द्रगोप (वीरबहूटी) हो, जैसी अग्नि की ज्वाला हो, जैसा श्वेतकमल हो, और जैसी बिजली की चमक हो। जो ऐसा जानता है, उसकी 'श्री', बिजली की चमक के समान (सर्वत्र एक साथ फैलनेवाली) होती है।

इतना कहने के पश्चात् अब 'नेति-नेति' यह ब्रह्म का निर्देश है। 'नेति-नेति'—इससे बढ़कर कोई उत्कृष्ट आदेश नहीं है। 'सत्य का रस' यह उसका नाम है। प्राण ही सत्य है, उनका यह सत्य है। अभिप्राय यह है कि "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवाऽमूर्तं च" ऐसा उपक्रम करके अधिदैव और अध्यात्म मूर्तामूर्तलक्षण दो रूप—ब्रह्म के हैं, और समष्टि-व्यष्टिरूप दो मूर्तामूर्त रस हैं। और हरिद्रा (महारजन) की उपमा देकर लिंगगत वासनारूप का उपन्यास करके "अथात आदेशो नेति-नेति" यह कहा गया है।

यद्यपि यहाँ पर किसी निषेध्य वस्तु की प्रतीति नहीं हो रही है, तथापि 'नेति-नेति' में 'नञ्' के साथ जो 'इति' शब्द है, वह 'एवं' शब्द का तुल्यार्थक प्रतीत हो रहा है। जैसे—'इति ह स्मोपाध्यायः कथयति'—ऐसा उपाध्याय ने कहा। 'इति' शब्द, 'सन्निहित' का अवलम्बन करता है। अतः यहाँ पर प्रकरण के सामर्थ्य से सन्निहित तो प्रपञ्चयुक्त 'ब्रह्म' के दो रूप हैं। जिसके ये दो रूप हैं, वही ब्रह्म है। यहाँ पर संशय होता है कि यहाँ का निषेधार्थक 'नञ्', 'दो रूपों और रूपवत्'—इन दोनों का निषेध करता है, या दो में से एक का? यदि एक का करता है, तो क्या 'ब्रह्म' का निषेध करता है, और दो रूपों को अवशिष्ट रखता है? अथवा दो रूपों का प्रतिषेध करता है, और ब्रह्म को अवशिष्ट रखता है?

तब पूर्वपक्षी कहता है—'प्रकृत' के समान होने से अर्थात् प्रकरण से रूपद्वय और रूपी ब्रह्म, निर्विशेष 'ब्रह्म' नहीं है। इस प्रकार आक्षेप संगति से पूर्वपक्ष को उपस्थित किया है—ये दो प्रतिषेध हैं, क्योंकि 'नेति' शब्द का दो बार प्रयोग किया है। उन दो बार प्रयुक्त हुए शब्दों में से एक के द्वारा 'सप्रपञ्च ब्रह्म' के रूप का प्रतिषेध होता है, और दूसरे से 'रूपवद् ब्रह्म'

१, नामधेयमिति श्रुतिपाठः।

संशयादिरहितानां ध्याननिष्ठा चेत् स्याद् दृष्टं सुखम्। तदुक्तं भगवता—

●

यमचिन्त्योऽयमविकार्योऽयमुच्यते" इत्यादिश्रुतिस्मृतिभिरिन्द्रियाद्यग्राह्यत्वप्रतिपादनाद् ब्रह्मणोऽव्यक्तत्वम्। तर्हि तद्ब्रह्म मुमुक्षवः कथं कदा साक्षात्कुर्वन्ति? इत्याकाङ्क्षायां तत्प्रकारं भगवान् सूत्रकारः उपदिशति—**अपीति। संराधने** ध्यानकाले एकाग्रचित्तेन प्रत्यगात्मतया ब्रह्म साक्षात्कुर्वन्ति। कस्मात्? **प्रत्यक्षानुमानाभ्यां** प्रत्यक्षं श्रुतिः, प्रामाण्ये निरपेक्षत्वात्। अनुमानं स्मृतिः, प्रामाण्यं प्रति सापेक्षत्वात्। श्रुतिस्तावत्—"ज्ञानप्रसादेन विशुद्धसत्त्वः तं पश्यते निष्कलं ध्यायमानः" "कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन्" इत्याद्या।

"यं विनिद्राः जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः। ज्योतिः पश्यन्ति युञ्जानाः तस्मै योगात्मने नमः।"

इत्याद्या स्मृतिः ततश्च ध्यानेन प्रतिबन्धनिवृत्तौ ब्रह्मसाक्षात्कारान्मोक्षो भवत्येव। नच—इदं ध्यानं सर्वसाधारण्येनोपदिश्यमानं संशयादिग्रस्तपण्डितकर्तव्यत्वेन उपदिष्टमिति कथमुच्यत इति—वाच्यम्; "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इत्यत्र संशयादिरहितानां पण्डितानां तत्त्वमस्यादिमहावाक्यार्थज्ञानमात्रेण परमपुरुषार्थप्रतिपादनेनास्य सूत्रस्य संशयादिग्रस्तपण्डितविषयत्वावगमात्; अन्यथा पूर्वोत्तरयोर्विरुद्धं वदन् सूत्रकार उन्मत्ततुल्यः स्यात्। तस्मादिदं सूत्रं संशयादिग्रस्तपण्डितविषयमेव, न सर्वसाधारणमिति भावः॥

●

का प्रतिषेध होता है, अथवा 'रूपवद् ब्रह्म' का ही प्रतिषेध होता है, क्योंकि वाणी और मन से अतिक्रान्त होने के कारण (वाङ्मनसातीत होने से) उसका सद्भाव (अस्तित्व) नहीं हो सकता। अतः वह प्रतिषेध के योग्य है। किन्तु 'रूपप्रपञ्च',—प्रत्यक्षादि प्रमाणों का विषय होने से प्रतिषेध के योग्य नहीं है।

इस पर सिद्धान्ती कहता है कि 'दोनों का प्रतिषेध करना सम्भव नहीं है। क्योंकि ब्रह्मव्यतिरिक्त जितना भी मूर्त-अमूर्त है, वह सब 'कार्यरूप' होने से अनित्य है, उस कारण 'ब्रह्म' का प्रतिषेध करने पर शून्यवाद का प्रसंग प्राप्त होगा। किसी एक परमार्थ के आधार पर 'अपरमार्थ' का प्रतिषेध हुआ करता है। जैसे रज्जु आदि में सर्पादि का। 'ब्रह्म' का प्रतिषेध करना भी सम्भव नहीं है, क्योंकि रूपवान् (रूपी) के विना 'रूप' की स्थिति नहीं हुआ करती। तब किस का प्रतिषेध किया जा रहा है? यह प्रश्न करने पर उसके उत्तर में कहा गया है कि "प्रकृतैतावत्त्वं हिं प्रतिषेधति" अर्थात् 'नेति-नेति' यह श्रुति तो प्रकृत में प्रधानतया उपन्यस्त ब्रह्म के मूर्त और अमूर्त रूप इन दो रूपों का ही निषेध कर रही है। क्योंकि 'इति' शब्द, प्रधानरूप से 'प्रकृत' का परामर्श करता है। और वे ही प्रधानतया प्रकृत हैं। 'ब्रह्म' प्रधानतया प्रकृत नहीं है। किन्तु रूपद्वयात्मक जगत् के उपसर्जनरूप से निर्दिष्ट है। अतः उसका निषेध नहीं किया जा रहा है। किञ्च प्रपञ्चनिषेध के पश्चात् भी 'नह्येतस्मादिति नेति नेति इत्यादि निर्वचनवाक्य 'ब्रह्म' को बता रहा है। अथवा 'अथ नामधेयम्' इत्यादिवाक्य 'ब्रह्म' को ही बता रहा है। अतः उसका निषेध नहीं है, यह तो निर्विवाद है। 'प्रत्यक्ष-विरोध होने से प्रपञ्च का निषेध नहीं है'—यह आशंका नहीं करनी चाहिए, क्योंकि उसमें तो 'व्यावहारिक प्रामाण्य' है। अतः दोष नहीं है।

यदि सब निषेध करके ब्रह्म ही यदि अवशिष्ट रहता है, तो सबको उसका ज्ञान क्यों नहीं होता? इस प्रश्न का समाधान तो सरलता से यही होगा कि वह 'अव्यक्त' है। तब पुनः यह प्रश्न हो सकता है कि यह कैसे अवगत हुआ? तो उसका उत्तर यह है कि श्रुति-स्मृतियों ने उसे इन्द्रियाऽग्राह्य बताया है। अतः 'ब्रह्म', अव्यक्त है।

ऐसी स्थिति में मुमुक्षुओं को उस ब्रह्म का साक्षात्कार कब होता है? यह आशंका होने पर, उसके साक्षात्कार का प्रकार भगवान् सूत्रकार ने बता दिया है—'अपि संराधने' इस सूत्र के द्वारा। ध्यानकाल में एकाग्रचित्त से प्रत्यगात्मतया ब्रह्म का साक्षात्कार उन्हें होता है। यह कैसे जाना जाय? सूत्रकार ने कहा कि 'प्रत्यक्षानुमानाभ्याम्'—प्रत्यक्ष श्रुति कह रही है, वह अपने प्रामाण्य में निरपेक्ष है। अतः उसी से जाना जाता है, तथा 'स्मृति'—अनुमानरूप है। क्योंकि वह अपने प्रामाण्य में सापेक्ष रहती है। श्रुति इस प्रकार की है—"ज्ञानप्रसादेन विशुद्धसत्त्वः"। "यं विनिद्राः" इत्यादि स्मृतिरूप अनुमान से जाना जाता है। यह सब पूर्व बता चुके हैं। एवंच ध्यान करने से प्रतिबन्ध की निवृत्ति हो जाती है, तब ब्रह्मसाक्षात्कार होता है, और उससे मोक्षप्राप्ति होती है।

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याऽभियुक्तानां योगक्षेमं वहाम्यहम् ॥"
"मच्चिता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥" इति ॥ २१ ॥

●

संमत्यन्तरमाह—**अन्यत्रेति**। धीदर्पः संशयादिः। ननु केचित् ज्ञानिनः संशयादिरहिता पण्डिताः ध्यानं कुर्वन्तो दृश्यन्ते, तत् किमर्थं कुर्वन्ति ? इत्याशङ्क्य दृष्टसुखार्थमित्याह—**संशयेति**। पण्डितानामित्यनुषङ्गः। **दृष्टमिति**। तदर्थं ध्यानं कुर्वन्ति इति भावः। तत्र भगवद्वचनमुदाहरति—**तदुक्तमिति**। न विद्यतेऽभिनिवेशोऽन्यस्मिन् मायिके येषां **तेऽनन्याः मां** सर्वेषां प्रत्यगात्मानं वासुदेवं "ज्ञेयं यत् तत् प्रवक्ष्यामि" इत्युपक्रम्य "अनादिमत् परं ब्रह्म न सत् तत् नासदुच्यते" इत्यादिना प्रतिपाद्यमानम्। **चिन्तयन्तः** अन्वेषणं कुर्वन्तः। **ये जनाः** साधनचतुष्टयसंपन्नाः। **पर्युपासते** विजातीयप्रत्ययानन्तरिततया ध्यानं कुर्वन्ति। अतएव **नित्याभियुक्तानां तेषां अहम् योगक्षेमं वहामि**। अप्राप्तप्राप्तिर्योगः। प्राप्तस्य परिपालनं क्षेमः। **ननु** अखण्डैकरसानन्द-

●

शंका—ध्यान का उपदेश तो सर्वसाधारण के लिये है, तब संशयादिग्रस्त पण्डितों को ही ध्यान का उपदेश दिया गया है, यह कैसे कहा जा रहा है ?

समा०—उक्त आशंका करना उचित नहीं है। क्योंकि (ब्र० सू० १।१।३०) वामदेव, शुकाचार्य आदि के समान इन्द्र भी ब्रह्मज्ञानी था, इन्द्र को ('मैंपरब्रह्म हूँ'—यह ज्ञान हो गया था) उसी ब्रह्मदृष्टि से उसने 'मामेव विजानीहि'—इस प्रकार प्रतर्दन को उपदेश किया था। यहाँ पर संशयादिरहित पण्डितों को 'तत्त्वमस्यादिमहावाक्य' के अर्थज्ञानमात्र से ही परमपुरुषार्थ (मोक्ष) का प्रतिपादन करने से स्पष्ट है कि यह सूत्र, संशयादि से ग्रस्त पण्डितों के लिए ही है। अन्यथा पूर्वोत्तर विरुद्ध कथन करने के कारण सूत्रकार को उन्मत्ततुल्य समझा जायगा। अतः उक्त संराधन सूत्र को संशयादिग्रस्त पण्डितविषयक ही समझना चाहिए। सर्वसाधारण के लिए नहीं है।

उक्त अर्थ में अन्य ग्रन्थकारों की भी सम्मति प्रदर्शित कर रहे हैं

अन्यत्र भी कहा गया है—अनेक विध विचारों के कारण अत्यधिक व्याकुल चित्त के लोगों को (पण्डितों को) विचार करने पर भी यदि आत्मज्ञान न होता हो तो उसके लिए 'ध्यानरूप योग' ही मुख्य साधन है। उस ध्यानयोग से ही उनकी बुद्धि में स्थित 'सन्दिग्ध भावना' 'विपरीत भावना' आदि दोषों (धीदर्प की) निवृत्ति हो सकती है।

शंका—संशयादि दोषों से रहित ज्ञानी पण्डितजन भी 'ध्यानयोग' की साधना करते पाये जाते हैं। अतः जिज्ञासा होती है कि दोषरहित वे ज्ञानी पण्डित लोग किस प्रयोजन से ध्यानयोग किया करते हैं ?

समा०—उसका प्रयोजन दृष्टसुखार्थ है, यही कहा जायगा। उसे बता रहे हैं—**संशय-विपरीत भावना से रहित पण्डित लोग 'अहं ब्रह्मास्मि' इत्याकारक वृत्तियों के प्रवाहरूप ध्यान को करते रहते हैं, तो उससे बाह्य विक्षेपों की निवृत्ति होती है और ब्रह्मानन्दरूप दृष्ट सुखविशेष (अलौकिक = लोकोत्तर सुख = आनन्द) मिलता रहता है।** उस लोकोत्तर आनन्द (सुख) के लिए ही वे ज्ञानी लोग ध्यानयोग किया करते हैं। उनके ध्यान करने का अन्य कोई प्रयोजन नहीं है। क्योंकि 'संशय-विपरीत भावना रूप प्रतिबन्ध की निवृत्ति तथा आत्मसाक्षात्कार'—ये दोनों उन ज्ञानी पण्डितों को पूर्व से ही प्राप्त हुए रहते हैं। एवंच परिशेषतः उनके ध्यानयोग का फल, वह दृष्टसुख ही है। **किसी मायिक पदार्थ में जिनका अभिनिवेश नहीं रहता उन अनन्य भक्तों के द्वारा मुझ पृथक् अभिन्न परमात्मा का चिन्तन किये जाने पर अर्थात् साधनचतुष्टयसम्पन्न जो अधिकारी व्यक्ति, मुझ निर्गुण परमात्मा का ध्यान करते हैं, (विजातीय वृत्तियों का परित्याग करके सजातीयवृत्तिप्रवाहरूप ध्यान मेरा किया करते हैं) उन ध्यानपरायण तत्त्ववेत्ता पुरुषों का योग, क्षेम, मैं (परमेश्वर) चलाता हूँ।**

अप्राप्त वस्तु (अर्थ) की प्राप्ति को 'योग' कहते हैं। और प्राप्तवस्तु के परिरक्षण को 'क्षेम' कहते हैं। मैं वासुदेव, सभी प्राणियों का प्रत्यगात्मा हूँ। "ज्ञेयं यत् तत् प्रवक्ष्यामि"—यहाँ से आरम्भ कर "अनादिमत् परं ब्रह्म न सत् तत् नासदुच्यते"—इत्यादि ग्रन्थ से जिसे बताया है, वह मैं ही हूँ। इस प्रकार मुझे पहचान कर जो लोग मुझ वासुदेव का अन्वेषण (चिन्तन) करते रहते हैं, उनको मैं अप्राप्त एवं अप्राप्य वस्तु भी दिया करता हूं, और दिये हुए की रक्षा भी किया करता हूं !

शंका—अखण्डैकरस आनन्दरूप ब्रह्मात्मा में निष्ठा रखने वाले जो ज्ञानी पुरुष हैं, उनके लिये अप्राप्त आनन्द तो कोई है ही नहीं, क्योंकि मनुष्य लोक से लेकर ब्रह्मलोक तक के समस्त आनन्दों का जिस 'ब्रह्मानन्द' में अन्तर्भाव है, वह ब्रह्मानन्द, ही तो उन ज्ञानी पुरुषों का अपना 'आत्मा' है, जो नित्य प्राप्त ही है। और वह, उत्पत्ति-विनाश रहित होने से उस

न तु ज्ञानिनो ध्यानविधिः; देहाभिमानशून्यतया कर्तृत्वाऽभावेन तस्य विधिकिङ्करत्वाऽयोगात्। तदुक्तम्—अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिव"दिति। भाष्यकारैरप्युक्तम्—"अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे

•

ब्रह्मात्मनिष्ठानां लौकिकानन्दजातस्य तत्रैवान्तर्भावादप्राप्तांशस्यैवाभावात् ब्रह्मानन्दस्य प्रत्यग्रूपतया नित्यप्राप्तत्वात् कथं भगवान् तेषां योगक्षेमं वहामीति वदति इति चेत्? उच्यते; यद्यपि तेषामप्राप्तांशस्याभावात् ब्रह्मानन्दस्य नित्यप्राप्तत्वाच्च योगक्षेमौ न स्तः; तथापि अनात्मन्यात्मबुद्धिपरित्यागेन ब्रह्मानन्दात्मनाऽवस्थानं योग इत्युपचर्यते। प्रबलप्रारब्धभोगेनापि ब्रह्मनिष्ठातोऽप्रच्युतिः क्षेम इत्युपचर्यते। एतादृशयोगक्षेममेव वहामीति भगवानाह; त्यक्तसर्वैषणानामन्यादृशयोगक्षेमवहनायोगात्। अतः ध्याननिष्ठानां नियतादृष्टसुखं भवतीति भावः। भगवद्वचनान्तरमुदाहरति—मच्चित्ता इति। मयि सर्वेषां प्रत्यगात्मन्यखण्डैकरसानन्दे नित्यशुद्ध-बुद्धमुक्तस्वभावे वासुदेवे चित्तं येषां ते तथोक्ताः। एवं सर्वत्र बोध्यम् ॥ २१ ॥

ननु एवं ज्ञानिनां ध्यानविधिः कुतो न स्यात्, "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः" इति श्रुतेः सत्त्वात्। न च—साक्षात्कारेण परमपुरुषार्थलाभादुत्तरं ध्यानविधिर्निष्फलः इति—वाच्यम्; इदानीं ब्रह्मसाक्षात्कारे सत्यपि यथा पूर्वसुखदुःखादि-संसारोपलंभान्न तावता पुरुषार्थसिद्धिः, किन्तु गुरूपसत्तिपूर्वकं श्रवणादिना ब्रह्म निश्चित्य यावज्जीवं ब्रह्मध्यानाभ्यासः कर्तव्य एव, अन्यथा यथेष्टचेष्टाप्रसक्त्या मुमुक्षोर्नरकपातः स्यात्। तथाहुः—

"निःसंगता मुक्तिपदं यतीनां संगादशेषाः प्रभवन्ति दोषाः।
आरूढयोगोऽपि निपात्यतेऽधः संगेन योगी किमुताल्पसिद्धिः" ॥ इति।

•

ब्रह्मानन्द के रक्षण करने का प्रश्न ही नहीं है, क्योंकि रक्षण तो 'अनित्य वस्तु का ही किया जाता है। अतः 'मैं परमेश्वर, ज्ञानी पुरुषों के 'योगक्षेम' को चलाता रहता हूँ'—यह कहना संगत, प्रतीत नहीं हो रहा है।

समा०—उन ज्ञानी पुरुषों के लिये कोई अप्राप्त अंश नहीं है और 'ब्रह्मानन्द' (लोकोत्तर आनन्द) उन्हें नित्य ही प्राप्त है। अतः उन ज्ञानियों के योग-क्षेम को चलाने का कोई प्रश्न ही नहीं उठता। उस कारण 'योगक्षेमं वहाम्यहम्'—यह कथन यद्यपि असंगत प्रतीत हो रहा है, तथापि 'योग-क्षेम' शब्दों का अर्थ, यहाँ पर यह होगा कि 'देहादिक सम्पूर्ण अनात्म वस्तुओं' में 'आत्मत्वबुद्धि' का परित्याग करके ज्ञानी को जो 'ब्रह्मानन्द' के रूप में प्राप्त हुआ है, वही 'योग' है। अर्थात् अज्ञान अवस्था में अप्राप्त ब्रह्मानन्द की जो ज्ञानावस्था में प्राप्ति हुई है, वही 'योग' है। और प्रबल प्रारब्ध भोग को सहते हुए भी ब्रह्म-निष्ठा से न डिगपाना अर्थात् प्रच्युति न होना ही 'क्षेम' है। अर्थात् ब्रह्मनिष्ठा से च्युति न होना (अप्रच्युति) ही 'क्षेम' शब्द से कहा जाता है। 'इस प्रकार का योग-क्षेम, मैं ज्ञानियों का चलाता हूँ'—भगवत्कथन का यही अभिप्राय है, क्योंकि जिस ज्ञानी ने समस्त एषणाओं का परित्याग कर दिया है, उसका योग-क्षेम, अन्य अज्ञानियों जैसा कैसे होगा? इसलिये ज्ञानियों के 'योग-क्षेम' का उपर्युक्त अर्थ करना ही उचित है। तब कोई असंगति नहीं हो सकती। एवं च ध्याननिष्ठ ज्ञानवान् पुरुष को निरन्तर 'दृष्ट सुख' प्राप्त होता है।

इसी अर्थ को भगवान् ने एक अन्य स्थान पर भी कहा है—जिनका चित्त मुझ में (सविशेष ईश्वर में), एवं जिनकी वाग् आदि इन्द्रियाँ मेरे स्वरूप के प्रतिपादक वाक्यों के उच्चारण आदि में लगी हैं, वे बुध (मुमुक्षु), परस्पर अपने-अपने अनुभवानुसार वाक्यार्थ का बोधन करते हुए तथा अपने अनुभव का कथन करते हुए सन्तुष्ट होते हैं और सदा स्मरण करते हैं, अर्थात् मेरा सर्वदा श्रवण, मनन और निदिध्यासन करते हुए काल का यापन करते हैं ॥ २१ ॥

शंका—जैसे मुमुक्षु जनों के 'श्रवणादिकों' की आवश्यकर्तव्यता का बोधक विधि है, वैसे ही सन्दिग्ध भावना–विपरीत भावना से रहित ज्ञानीजनों के लिए भी 'ध्यान' की अवश्यकर्तव्यता का बोधक विधि क्यों नहीं है? अर्थात् 'ज्ञानी पुरुषों को भी 'ध्यान' अवश्य करना चाहिये' ऐसी वेदाज्ञा क्यों नहीं है? यदि यह कहो कि ज्ञानी को ध्यान का विधान करने वाला कोई वेदवाक्य नहीं है। इसलिये ज्ञानी को ध्यान का विधि नहीं है। किन्तु ऐसी बात नहीं है "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः" अर्थात् धीरप्रकृति ब्राह्मण, परमेश्वर का साक्षात्कार करके उसका (परमेश्वर का) ध्यान करे—ऐसा श्रुतिवचन उपलब्ध होने से 'ध्यान' का विधान, ज्ञानी के लिए भी होना चाहिये, जो इसी श्रुतिवचन ने ज्ञानी के लिये भी ध्यान का विधान किया है।

विषयः"[१] "सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणो"ति[२] "देहेन्द्रियादिष्वहं ममाभिमानहीनस्य प्रमातृत्वाऽनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ति"रिति। तदुक्तं—

•

अतो विषयासंगलक्षणयथेष्टचेष्टानिवृत्त्यर्थं ध्यानविधिरपेक्षितः। तदप्युक्तम्—

"संगं त्यजेत् मिथुनव्रतिनां मुमुक्षुः सर्वात्मना विसृजेत् बहिरिन्द्रियाणि[३]।
एकश्चरेत् रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसंगः॥ इति।

न च इदं साधकविषयं न सिद्धविषयमिति—वाच्यम्; "यस्मात् भिक्षुः हिरण्यं रसेन दृष्टं चेत् स ब्रह्महा भवेत्" इत्यादिना सिद्धस्यापि विषयासक्त्या पातित्याभिधानात्, "तमेव धीरो विज्ञाये"ति श्रुतिमूलत्वाच्च। अतएव वेदान्तशास्त्रं ध्यानविधिपरमिति वदन्ति। अन्यथा प्रवृत्तिनिवृत्तिप्रयोजनत्वाभावेन परिनिष्पन्नवस्तुपरतयाऽनुवादकत्वेन शास्त्रस्याप्रामाण्यप्रसङ्गात्। तस्मात् शास्त्रेण ज्ञानानन्तरं ध्यानविधानात् सर्वैर्मुमुक्षुभिः पण्डितैरपण्डितैः संशयादिरहितैः तद्ग्रस्तैर्वा ब्रह्मज्ञानोत्तरं यावज्जीवं ब्रह्मध्यानं कर्तव्यमेवेत्याशङ्क्याह—**न तु ज्ञानिन इति**। वेदाभिमानो द्विविधः—कर्मजो भ्रान्तिजश्चेति। कर्मं साक्षाद् आद्यो निवर्तते, द्वितीयस्याज्ञानमूलत्वेन ज्ञानेनाज्ञाने निवृत्ते तन्मूलभ्रान्तेरपि निवृत्तत्वात् भ्रान्तिजाभिमानोऽपि निवर्तते। ततश्च देहाभिमानशून्यस्य कर्तृत्वादिनिवृत्तौ सर्वाधिकारनिवृत्तेः कुतो ध्यानविधिः? तदुक्तम्—

"व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा। येऽत्राधिकारिणो मर्त्या नाधिकारोऽक्रियत्वतः॥
शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्मात् शृणोम्यहम्। मन्यन्तां संशयापन्नाः न मन्येऽहमसंशयः॥
विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये।" इति।

•

इस पर यदि यह कहो कि ज्ञानी को साक्षात्कार हो जाने से परमपुरुषार्थ का लाभ तो पहले ही हो चुका है, उसके बाद भी उसे ध्यान का विधान करना निष्फल ही रहेगा। अर्थात् आत्मसाक्षात्कार के अनन्तर ध्यान करना निष्फल ही है।

किन्तु ऐसा समझ लेना और कह देना उचित नहीं है। क्योंकि वर्तमान समय में ब्रह्मसाक्षात्कार के विद्यमान रहने पर भी उसे ध्यान रहित स्थिति में पूर्वकालीन अज्ञान की अवस्था के समान सुख-दुःखादिरूप संसार की प्रतीति तो बनी ही रहती है। उससे स्पष्ट है कि उस ब्रह्मसाक्षात्कारमात्र से उस ज्ञानी को 'मोक्ष' रूप परमपुरुषार्थ की प्राप्ति अभी हुई नहीं है।

उस ज्ञानी को, ब्रह्मनिष्ठ श्रोत्रिय गुरु के समीप हो जाना होगा। गुरु के मुखारविन्द से उपदेश का श्रवण भी करना होगा, तब उससे (श्रवणादिकों से) ब्रह्म का साक्षात्कार करके वह ज्ञानी पुरुष, जबतक जीवन है तबतक अर्थात् आजीवन उस ब्रह्म के ध्यान का निरन्तर अभ्यास करता रहे, तभी उसे मोक्ष की प्राप्ति होती है। अन्यथा मनमानी चेष्टा करने से संभाव हो सकती है, जिससे मुमुक्षु का नरकपात होना संभव है। इस तथ्य को अन्य ग्रन्थों में भी कहा गया है कि विषयासक्त बहिर्मुख लोगों के संसर्ग का जो परित्याग है, उसी का नाम 'निःसंगता' है। वह निःसंगता ही सन्यासियों के लिये 'मुक्ति' प्राप्ति का मार्ग है। क्योंकि उस प्रकार के संसर्ग से मुमुक्षु में कामादिक अनेक दोषों के उत्पन्न होने की सम्भावना हो सकती है। उन दोषों के होने से ज्ञानी पुरुष का भी अधःपतन हो जाता है। तब मुमुक्षु के विषय में तो कहना ही क्या है? अतः यथेष्टाचरण की निवृत्ति के लिये संशय-विपरीत भावना से रहित हुए ज्ञानी पुरुष को भी आजीवन 'ब्रह्म' का ध्यान, करना आवश्यक ही है। एवं च ज्ञानी पुरुष के लिये भी 'ध्यान' का विधान आवश्यक है।

उक्त कथन को साधकपरक कहना और सिद्धपरक न मानना उचित न होगा। क्योंकि भिक्षु यदि हिरण्य को राग पूर्वक देखे तो वह ब्रह्महत्यारा होवे इत्यादि कथन के श्रवण से स्पष्ट होता है कि सिद्ध भी विषयासक्त हो सकता है, जिससे वह पतित हो जाता है। "तमेव धीरो विज्ञाय"—उक्त कथन श्रुतिमूलक है। अतएव वेदान्तशास्त्र, ध्यानविधि परक है—ऐसा

१. सर्वाणि चेतराणि प्रमाणानि—इति वाक्यशेषः (सूत्रभाष्ये चतुःसूत्रीसमाप्तौ)।

२. इतरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः इति वाक्यशेषः (अध्यासभाष्ये)। देहेन्द्रियादिष्वित्याद्यप्यध्यासग्रन्थे तत्रैव।

३. आद्यपादयोः पञ्चमाक्षरत्रुटिः। त्यजेतेति प्रथमे, सर्वात्मना नेति च द्वितीये यथापुराणं पाठः।

"गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् । तत्सद्ब्रह्माऽहमस्मीति बोधे कार्यं कथं भवेत् ॥" इत्युक्तम् ॥ २२ ॥

न च—एवं शास्त्रस्याप्रामाण्यापत्तिः ब्रह्मात्मभावस्य मानान्तरायोग्यत्वेन शास्त्रस्य विधिपरत्वानङ्गिकारे ततः प्रवृत्ति-निवृत्त्यभावेन शास्त्रत्वमेव न स्यादिति—वाच्यम्, हितशासनाच्छास्त्रत्वोपपत्तेः। न च—एवमप्यनुवादकत्वेनाप्रामाण्यमिति—वाच्यम्, ब्रह्मणो मानान्तरायोग्यत्वेन तदयोगात्। तस्मात् वेदान्तशास्त्रं न ध्यानविधिपरम्। अत एव सूत्रकारभाष्यकाराभ्यां समन्वयाध्याये चतुर्थाधिकरणे "तत्तु समन्वयादि"त्यत्र शास्त्रस्य विधिपरत्वं पूर्वपक्षीकृत्य सिद्धान्ते वस्तुनिष्ठत्वेन वेदान्तानां प्रामाण्यं समर्थितम्।

ननु एवं सति "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः" इति श्रुतेरप्रामाण्यप्रसंग इति चेत्? न; विज्ञायेत्यनेन श्रवणजन्यज्ञानस्यैव विवक्षितत्वेन तदुत्तरं ब्रह्मसाक्षात्कारमुद्दिश्य ब्रह्मध्यानविधानोपपत्तेर्नाप्रामाण्यं श्रुतेः। न च एवमपि साक्षात्कारानन्तरं ध्यानविध्यनङ्गीकारे यथेष्टचेष्टाप्रसंग इति—वाच्यम्; देहाभिमानशून्यत्वेन[1] तदयोगात्। "निस्संगता मुक्तिपदम्" "सगं त्यजेत्" इति वचनद्वयस्य साधकविषयत्वाच्च। यद्यपि "यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेदित्या"दि वाक्यं विद्वत्संन्यासप्रकरणे पठितं सिद्धविषयमिवाभाति; तथापि सिद्धस्य देहाभिमानशून्यतया रागादिप्रसक्तेरभावेन साधकविषयकमेवेदं वाक्यं सिद्धं स्तौति[2]।

तदेतत्सर्वमभिप्रेत्याह—**देहाभिमानेति**। ज्ञानिनः ध्यानविध्यभावे व्याससूत्रं संवादयति—**तदुक्तमिति**। अधिकरणं पूर्वमनुक्रान्तम्। यद्यात्मा ब्रह्म स्यात् तनुज्ञापरिहारौर्ह्य निर्विषयौ स्याताम् इति चेन्न, **देहसंबन्धात्** देहाभिमानात् "गृहस्थः सदृशीं भार्यामुपेयात्", **इत्यनुज्ञा**, "गुर्वङ्गनां नोपेयात्" इति **परिहारः**", एतौ अनुज्ञापरिहारौ देहाभिमानात् आत्मनो

कहते हैं। अन्यथा प्रवृत्ति-निवृत्तिरूप प्रयोजन के न हो पाने से परिनिष्पन्न (सिद्ध) वस्तुपरक ही उसे कहना होगा, तब उसमें अनुवादकत्व की प्रसक्ति होगी, जिससे शास्त्र को अप्रमाण मानने का प्रसंग प्राप्त होगा। अतः ज्ञान के अनन्तर भी 'ध्यान' का विधान, 'शास्त्र' ने किया है। उस कारण सभी मुमुक्षुओं को चाहे वह 'पण्डित' हो, अथवा 'अपण्डित' हो, वह संशयादिदोषों से रहित हो, चाहे उन दोषों से ग्रस्त हो, उसे ब्रह्मज्ञान के होने पर भी यावज्जीव 'ब्रह्मध्यान' तो करना ही होगा। इस प्रकार ध्यानवादी पूर्वपक्षी ने अपना विचार उपस्थित किया है।

समा०—पूर्वपक्षी के उक्त पूर्वपक्ष पर समाधान दे रहे हैं—**सन्दिग्ध भावना तथा विपरीत भावना से रहित ज्ञानी पुरुष के लिये ध्यान करने का विधान नहीं है। क्योंकि जिस पुरुष को दृढ़ाध्यासपूर्वक देहाभिमान रहता है, उसी पुरुष को 'आत्मा' में 'कर्तृत्वबुद्धि' हुआ करती है। अपनी आत्मा में कर्तृत्व बुद्धि रखने वाला अज्ञानी पुरुष ही शास्त्र के विधि-निषेधों का अधिकारी होता है। किन्तु ज्ञानी पुरुष को तो 'देहाभिमान' नहीं रहता। उस कारण उसे अपनी आत्मा में कर्तृत्वबुद्धि भी नहीं रहती। अतः वह ज्ञानी पुरुष, उस शास्त्र के विधि-निषेधों का भी अधिकारी नहीं है।**

देहाभिमान भी दो प्रकार का होता है। (१) कर्मजन्य और (२) भ्रान्तिजन्य। उनमें से कर्मजन्य देहाभिमान तो, कर्मनाश के पश्चात् ही निवृत्त हो जाता है। किन्तु दूसरा जो भ्रान्तिजन्य देहाभिमान है, वह तो अज्ञानकाल में रहता ही है। जब आत्मज्ञान होने पर अज्ञान की निवृत्ति होती है, तभी उस भ्रान्ति की निवृत्ति हुआ करती है। भ्रान्ति की निवृत्ति होने पर ही वह भ्रान्तिजन्य देहाभिमान भी निवृत्त हो जाता है। उस देहाभिमान के निवृत्त होने पर ही कर्तृत्वबुद्धि से रहित हुआ जो ज्ञानी पुरुष है, उसके शास्त्रप्रतिपादित समस्त अधिकार भी निवृत्त हो जाता हैं। अतः उस ज्ञानी पुरुष के लिये शास्त्र प्रतिपादित ध्यानविधि का होना कैसे संभव हो सकता है? अर्थात् उसके लिए वह ध्यानविधि नहीं है।

इसी अभिप्राय से श्रीविद्यारण्यस्वामी ने पञ्चदशी ग्रन्थ में उन ज्ञानी पुरुषों के अनुभव को बताया है जो पुरुष कर्तृत्व-बुद्धि का अभिमान रखते हैं, वे ही अधिकारी होने के कारण, शास्त्रों का व्याख्यान करें, तथा वेदों को पढावें। किन्तु कर्तृत्वबुद्धि के अभिमान से रहित हुआ मैं तो 'अक्रिय' हूँ। उस कारण मेरे लिये कोई अधिकार नहीं है। जिन पुरुषों ने प्रत्यक् अभिन्न ब्रह्म को नहीं जाना है, वे पुरुष ही वेदान्तशास्त्र को सुना करें। मैं तो उस प्रत्यगभिन्न ब्रह्म को अपरोक्षतया जान रहा हूँ। अतः मैं किसलिये वेदान्त का श्रवण करूँ? 'आत्मा' के विषय में जिसे संशय हो, वह मनुष्य, उस संशय को निवृत्त करने के लिये 'मनन'

---

१. देहाभिमानोऽत्र भ्रान्तिजो बोध्यः।

२. यदा सिद्धोपि रागेण सदोषो भवेत्तर्हि साधकस्य का कथेहि स नूनं रागहीनः स्यादित्यस्य साधकविषयत्वम्। यदैवं साधकोऽपि दोषभिया रागं परित्यजति तर्हि का कथा सिद्धस्येति सिद्धस्तुतिरिति भावः।

ब्रह्मत्वाज्ञानदशायामुपपद्येते, ब्रह्मज्ञानदशायामात्मनस्तदभावादुभयमपि नास्त्येव। तत्र ज्योतिरादिवदिति दृष्टान्तः। यथाऽग्निः श्मशानसम्बन्धी परिह्रियतेऽन्यस्तूपादीयते, यथा वा पुरीषं मनुष्यशरीरसम्बन्धिपरित्यज्यते, गवां शरीरसम्बन्ध्युपादीयते, तस्य पवित्रत्वात्, तद्वत् देहाभिमानिनोऽनुज्ञापरिहारौ, अन्यस्य तु न किमपि कर्त्तव्यमस्ति। तदुक्तम्—

"यस्त्वात्मरतिरेव स्यात् आत्मतृप्तस्य मानवः। आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते।
नैव तस्य कृतेनार्थः नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः।" इति।

पुराणेऽप्युक्तम्—

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। नैवास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित्॥" इति।

तथा देहाभिमानादनुज्ञापरिहारौ दर्शयत् सूत्रं अर्थात् तच्छून्यस्य सर्वकर्तव्यताऽभावं दर्शयतीत्यभिप्रायः।

तत्र भाष्यसम्मतिमाह—**भाष्यकारैरिति।**

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"

●

करे। मैं तो समस्त संशयों से रहित हूँ, तब मैं किसलिये 'मनन' करूँ? तथा जो लोग, विपरीत भावना से ग्रस्त हैं, वे ही उस विपरीत भावना की निवृत्ति के लिए 'निदिध्यासन' करें। मैं तो विपरीत भावना से रहित हूँ। उस कारण मुझे ध्यान करने की क्या आवश्यकता है?

देहाभिमान का अर्थ है—देह को 'आत्मा' समझना। वह देहाभिमान ही पुरुष को कर्म करने का अधिकार दिलाता है, अर्थात् वही कर्माधिकार दिलाने में प्रयोजक है। घट-पटादि पदार्थों के समान 'देहसत्त्वज्ञानमात्र' को ही 'देहाभिमान' नहीं समझना चाहिए। तथा च ज्ञानी पुरुष को देह के विद्यमान रहने पर भी उसमें आत्मबुद्धि न रहने के कारण उसे कर्म करने का अधिकार नहीं है। यह देहाभिमान 'अध्यासपूर्वक ही है। कर्मजन्य नहीं है। 'कर्म से देहाभिमान, और देहाभिमान से कर्म'—इस प्रकार अन्योन्याश्रय है।

शंका—ज्ञानी पुरुष के लिए ध्यान की कर्तव्यता यदि नहीं मानी जायगी तो आत्मसाक्षात्कार के अनन्तर ध्यानविधायक 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः'—श्रुति को 'अप्रामाण्य' प्राप्त होगा।

समा०—उक्त श्रुति, आत्मा के अपरोक्षज्ञान (साक्षात्कार) के पश्चात् ध्यान का विधान नहीं कर रही है। अपितु वेदान्तश्रवणमात्र से उत्पन्न हुए ब्रह्मसाक्षात्कार के अनन्तर ही उस ब्रह्म के अपरोक्षज्ञान की प्राप्ति के लिये 'निदिध्यासनरूपध्यान' का विधान कर रही है। उस कारण उक्त श्रुति के अप्रामाण्य का प्रसंग नहीं है।

शंका—ब्रह्मसाक्षात्कार के अनन्तर ज्ञानी के लिये 'ध्यान' की कर्तव्यता यदि नहीं मानी जायगी तो 'चित्त' की बहिर्मुखता के कारण वह ज्ञानी यथेष्टाचरण करने लगेगा।

ज्ञानी पुरुष, 'भ्रान्तिजन्य देहाभिमान' से रहित रहता है। उस कारण वह यथेष्टाचरण में कभी भी प्रवृत्त नहीं होता। देहाभिमानवाले पुरुष ही यथेष्टाचरण में प्रवृत्त हुआ करते हैं। जो पुरुष, मुमुक्षुदशा में भी 'शम-दम-उपरति' आदि का अभ्यास करने से 'यथेष्टाचरण' से निवृत्त हो जाता है, वह पुरुष, 'ज्ञानदशा' में 'यथेष्टाचरण' करने कैसे प्रवृत्त होगा? अर्थात् ऐसी दुष्प्रवृत्ति उसकी कभी हो ही नहीं सकती है। देहाभिमानवाले पुरुषों की ही यथेष्टाचरण में प्रवृत्ति हुआ करती है। 'निःसंगता-मुक्तिपदं यतीनाम्'—यह वचन तो आत्मज्ञानरहित साधक पुरुष-परक है। तत्त्वज्ञानी सिद्ध पुरुष परक नहीं है। अतः इस वचन से ध्यानरहित ज्ञानी पुरुष का अधःपतन सिद्ध नहीं हो रहा है।

किञ्च—'ज्ञानी पुरुष के लिये 'ध्यान' का विधि नहीं है'—यह बात, सूत्रकार भगवान् व्यास ने ब्रह्मसूत्र में बताई है—देहसम्बन्ध से अनुज्ञा-परिहार उपपन्न हैं, जैसे अग्नि आदि।

यह कार्य अवश्य कर्तव्य है'—इत्याकारक शास्त्रविधि को 'अनुज्ञा' कहते हैं। और 'यह कार्य, करने योग्य नहीं है'—इत्याकारक शास्त्र निषेध को 'परिहार' कहते हैं। इस प्रकार के अनुज्ञा-परिहाररूप विधि-निषेध, 'आत्मज्ञान' होने के पूर्व, 'देहाभिमान' के कारण मनुष्य को हुआ करते हैं। किन्तु आत्मसाक्षात्कार होने पर देहाभिमान के निवृत्त हो जाने से ज्ञानी-पुरुष को शास्त्रप्रतिपादित विधि-निषेधों की प्राप्ति नहीं हुआ करती। जैसे श्मशानाग्नि को 'त्याज्य' समझाता है, किन्तु 'अन्य-अग्नि' को ग्राह्य समझा जाता है। अथवा जैसे मनुष्य का विष्ठा-मूत्र 'त्याज्य' रहता है, किन्तु 'गौ' का विष्ठा-मूत्र 'ग्राह्य' माना

इति श्लोकोक्तलक्षणं भाष्यं कुर्वन्तीति भाष्यकाराः तैरित्येतत्। ब्रह्मविदां वचनमपि संवादयति—**गौणेति**। आत्मा त्रिविधः—गौणात्मा मिथ्यात्मा मुख्यात्मा चेति। पुत्रभार्यादयो **गौणात्मानः**। अन्नमयादयः पञ्चकोशाः **मिथ्यात्मानः**। तेषामधिष्ठानभूतो यश्चिदात्मा साक्ष्यानन्दैकरसः स **मुख्यात्मा**। आत्मनोऽसत्व इत्यार्षत्वात् रेफलोपो न दोषाय। ततश्च गौणमित्यात्मनोरसत्त्वे मिथ्यात्मनिश्चये पुत्रदेहादीनामात्मत्वबाधनात् सर्वेषामधिष्ठानभूतसच्चिदानन्दैकरसब्रह्माहमस्मि इति बोधे जाते सति **कार्यं** कर्तव्यं

●

जाता है। उसी तरह देहाभिमानी अज्ञानी पुरुषों के लिये ही शास्त्रप्रतिपादित विधि-निषेध हुआ करते हैं, किन्तु देहाभिमानरहित ज्ञानी पुरुषों के लिये वे विधि-निषेध, नहीं हुआ करते।

किञ्च—'ज्ञानी पुरुष के लिये किञ्चिन्मात्र भी कर्तव्य नहीं है'—यह श्रीमद्भगवद्गीता में भगवान् श्रीकृष्ण ने (गी० ३।१७–१८) स्वयं कहा है—

जो पुरुष अपनी आत्मा में ही क्रीडा करता है, अर्थात् जो मनुष्य, बाहर-भीतर सर्वत्र ब्रह्मदृष्टि ही रखता है, उसी का सर्वदा भजन करता है, वही आत्मरति कहलाता है, वह सर्वदा अपनी आत्मा में ही विहार करता है। अनात्मा में कभी विहार नहीं करता। और आनन्दैकरस पूर्णतया साक्षात् किये गये आत्मा में ही तृप्त होता है, क्योंकि आत्मलाभ से बढ़कर अन्य कोई लाभ नहीं है। अतः दूसरे प्राप्तव्य का अभाव होने से आत्मप्राप्ति से ही सम्पूर्ण प्राप्तव्य वस्तुओं में जिसकी अहं बुद्धि हुई हो वही आत्मतृप्त कहलाता है। और जो आत्मा में ही सन्तुष्ट रहता है जैसे नेत्र, 'रूप' में सन्तुष्ट होता है, वैसे ही बाहर-भीतर सर्वत्र वृत्ति के विषयभूत चिदानन्दैकरस ब्रह्म में ही जो सन्तुष्ट होता है। अथवा कामी पुरुष अपने अभीष्ट अर्थ में सन्तुष्ट होता है, वैसे ही जो अपने आप में ही (आत्मा में ही) सन्तुष्ट रहता है, उसे आत्मतुष्ट कहते हैं, उस महात्मा आत्माराम कृतकृत्य यति के लिये कोई कर्तव्य कर्म है ही नहीं, क्योंकि पूर्णकाम होने से उसे कोई भी वस्तु, प्राप्तव्य के रूप में शेष नहीं है।

सर्वत्र आत्मभाव को देखनेवाले यति का 'कर्म' करने से या न करने से कोई भी प्रयोजन नहीं है। 'अहमेव इदं सर्वम्' मैं ही यह सब हूँ—इस प्रकार सब को अद्वितीय आत्मा के रूप में देखनेवाले उस आत्माराम यति के लिये अनुष्ठित कर्म से प्राप्त होने योग्य अर्थ—(फल) कुछ भी नहीं है, क्योंकि वह अपनी आत्मा में ही तृप्त है। और सबको मिथ्या देखता है। योगसाधना से प्राप्त होने योग्य आकाशगमन, अणिमा आदि सिद्धियों की उसे अपेक्षा नहीं है। सर्वात्मभाव को प्राप्त होने के कारण तपोरूप क्रिया से प्राप्त होने योग्य ब्रह्मा, इन्द्र आदि किसी पद की अपेक्षा भी नहीं है। और जीवन्मुक्त होने से वैदिक क्रिया से प्राप्त होनेवाली चित्तशुद्धि के द्वारा प्राप्य मोक्ष की अपेक्षा भी नहीं है। अतः उत्तम ब्रह्मज्ञानी को कर्म से साधनीय कोई भी अर्थ नहीं है।

शंका—कर्म से प्राप्तव्य अर्थ के न होने पर भी 'विधि' के उल्लंघन का दोष और न करने में प्रत्यवाय का दोष अवश्य ही होगा। उस कारण उसके ज्ञान की हानि अथवा स्वरूप की हानि का प्रसंग प्राप्त होगा।

समा०—नाऽकृतेनेह कश्चन—उक्त लक्षणवाले ब्रह्मज्ञानी को न करने से (विहित कर्म का आचरण न करने से) यहाँ पर (इस लोक में) उक्त कोई अनर्थ नहीं हो सकता। मायामात्रमिदं द्वैतम्'—यह द्वैत मायामात्र है—इस न्याय से 'विधि' भी अविद्यारूप होने से मिथ्या है। इसलिए ज्ञानी को उसके उल्लंघन से दोष नहीं होता। 'उभे ह्येवैष सते आत्मानं स्पृणुते'—इन दोनों को वह आत्मा जानता है—इस श्रुति से स्पष्ट है कि अकर्म की भी ब्रह्ममात्रदर्शन से पृथक् सत्ता नहीं है। इसलिए अकर्म भी दोषावह नहीं है। निरन्तर ब्रह्मनिष्ठा से ही स्थिर रहनेवाले विद्वान् ज्ञानी पुरुष के ज्ञान का हानि का होना भी उससे सम्भव नहीं है। 'एष नित्यो महिमा ब्राह्मणस्य'—ब्राह्मण की यह नित्य महिमा है—इस श्रुति से स्पष्ट है कि ब्रह्मज्ञानी के स्वरूप की 'कर्म' और 'अकर्म' से कोई वृद्धि और क्षति नहीं हुआ करती। अतः अकर्म में ब्रह्मज्ञानी के स्वरूप की भी हानि नही है। इसलिए कर्म के न करने से उसका कोई अनर्थ नहीं होता।

शंका—तथापि ब्रह्मज्ञानी को मुक्ति के प्रतिबन्धक की निवृत्ति के लिए अथवा आध्यात्मिकादि उपद्रवों की निवृत्ति के लिए उपासना क्रिया के द्वारा शिव, विष्णु अथवा अन्य किसी का आश्रय तो करना ही होगा। अथवा शरीरयात्रा (शरीर निर्वाह के लिये ब्राह्मण अथवा क्षत्रिय का आश्रयण तो करना ही होगा। अतः विद्वान् ब्रह्मज्ञानी के लिए सर्वदा, कर्म का त्याग करना उचित नहीं है।

समा०—'न चास्य सर्वभूतेषु' से समाधान किया जा रहा है। वह ज्ञानी पुरुष, किसी भी प्रयोज के लिए न शिव आदि देवताओं में से और न ब्राह्मण आदि में से किसी का आश्रय लेता है। अर्थात् उक्त लक्षणवाले ब्रह्मज्ञानी को देवताओं से शिव

कथं भवेत् न किमपि कर्तव्यं स्यादित्यर्थः। तथा च श्रुतिः—"स ब्राह्मणः केन स्यात् येन स्यात् तेनेदृश एव एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान्" इत्याद्या स्मृतिरपि—"एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत। स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्" इत्याद्या ज्ञानिनः सर्वकर्तव्यताभावं कृतकृत्यताञ्च दर्शयतः। तस्मात् ज्ञानिनः कर्तव्यताभावात् ध्याननिष्ठा चेत् स्यात् तदा दृष्टसुखं भवति, अतो न तद्विधिगन्धोऽपीति भावः॥ २२॥

●

या विष्णु. भूतों में से ब्राह्मण या अन्य कोई भी किसी भी कार्य के निमित्त आश्रयण (व्यापाश्रय) करने योग्य नहीं है। वह स्वयं ही शरीरशम्बन्ध से रहित होकर सर्वदा स्थिर रहता है, इसलिए वह ज्ञानी तो यहीं मुक्त हो गया है। अतः मुक्ति के प्रतिबन्धक का सम्भव न होने से देवादिकों का मिथ्याकोटि में प्रवेश रहने से, उसके लिए शिव, विष्णु आदि कोई आराध्य नहीं है। आध्यात्मिकादि उपद्रव और शरीर की रक्षा (शरीरयात्रा) प्रारब्धाधीन होने से और पुरुष प्रयत्न की व्यर्थता दिखाई देने से ब्राह्मणादि में से भी कोई आश्रय करने योग्य नहीं हैं। एवं च ब्रह्मज्ञानी मुक्त पुरुष के लिए कोई भी कर्म, कर्तव्य के रूप में नहीं है। यदि कर्तव्य हो तो वह ब्रह्मवित् हो नहीं है।

इसी बात को पुराणों में बताया गया है—जो पुरुष 'अहं ब्रह्मास्मि'—इस प्रकार के आत्मज्ञानरूप अमृत का पान करके तृप्त हुआ है, उस कारण वह कृतकृत्य हो गया है। अर्थात् जो सम्पादन करने योग्य था उसे उसने सम्पादन कर लिया है, अतः उस ज्ञानी को अब किञ्चिन्मात्र भी कर्तव्यशेष नहीं है। किन्तु जिस पुरुष को किञ्चिन्मात्र भी कर्तव्य शेष है, वह पुरुष 'ज्ञानी' ही नहीं है—यह समझना चाहिए।

किञ्च—भगवान् भाष्यकार ने भी इसी तथ्य को अभिव्यक्त किया है।

जितने भी शास्त्रीयविधि और विधि-निषेध एवं मोक्षकारक शाखाएँ हैं वे सब 'अहं ब्रह्मास्मि'—इस अनुभव तक ही हैं। अर्थात् इनका क्षेत्र ब्रह्मानुभव होने तक ही है, उसके पश्चात् नहीं। क्योंकि देह-इन्द्रियादिकों में 'अहं-मम' इत्याकारक अभिमानशून्य व्यक्ति में 'प्रमातृत्व' का होना सम्भव ही नहीं है। अर्थात् अभिमानशून्य व्यक्ति, 'प्रमाता' नहीं हो सकता, तब 'प्रमाण प्रवृत्ति' उसके लिए कैसे उपपन्न हो सकेगी? अर्थात् शास्त्र और उनके विधि-निषेधादि प्रमाण उसके लिए लागू नहीं हैं।

तथा ब्रह्मवेत्ता विद्वानों का (भा० १।४।४) भी कहना है—'आत्मा'—तीन प्रकार का है (१) गौणात्मा, (२) मिथ्यात्मा और (३) मुख्यात्मा। इनमें से 'पुत्र-भार्या' आदि 'गौण आत्मा' है। 'अन्नमयादि पञ्चकोश'—मिथ्या आत्मा है। और उनका अधिष्ठानभूत जो चिदात्मा, साक्षी, आनन्दैकरस है, वह 'मुख्य आत्मा' है। श्लोक में 'आत्मनोः असत्त्वे' = 'आत्मनोऽसत्त्वे', यह 'आर्ष- प्रयोग है। अतः 'रेफलोप' दोषावह नहीं है।

एवंच 'गौणमिथ्यात्मनोःअसत्त्वे'—अर्थात् गौण और मिथ्या आत्मा में 'मिथ्यात्व' का निश्चय हो जाने पर 'पुत्र-देहादिकों' में होनेवाली 'आत्मत्व बुद्धि का बाध हो जाता है। उसके अनन्तर 'सबका अधिष्ठानभूत सच्चिदानन्दैकरस ब्रह्म'-मैं ही हूँ, यह बोध जब हो जाता है, तब उसके लिए कोई भी अन्य कर्तव्य, (कार्य) कहाँ शेष रह जाता है? अर्थात् उस ज्ञानी के लिए कोई 'कर्तव्य' शेष नहीं रहता है, क्योंकि वह कृतकृत्य हो गया है।

इसी तथ्य को श्रुति व स्मृति ने भी प्रकट किया है। श्रुति-स्मृतियों ने 'ब्रह्मज्ञानी' को समस्त कर्तव्यों से शून्य अर्थात् कृतकृत्य बताया है। अतः ज्ञानीपुरुष के लिए किसी प्रकार का कोई भी कर्तव्य (कार्य), शेष नहीं है, फिर भी यदि वह 'ध्याननिष्ठ' रहता है (ध्यान लगाता है), तो उसका फल उसे 'दृष्टसुख' अवश्य उपलब्ध होता है। अर्थात् लोकोत्तर आनन्द (महान् आनन्द) की प्राप्ति होती है। एवं च उस ज्ञानी महात्मा के लिये 'ध्यानविधि' की बात करना अनुचित ही है। उसके लिये कोई 'विधि' नहीं है। उसे मोक्ष प्राप्त होने में कोई किसी प्रकार की रुकावट (प्रतिबन्ध) नहीं होती। क्योंकि चिरकाल तक उसने श्रवण, मनन निदिध्यासन किया है, उस कारण उसे 'ब्रह्मतत्त्व' के विषय में दृढतर निश्चय हो चुका है। अतः करतल पर स्थित आमलक (आँवले) के समान, वह अपने अद्वयभेद स्वरूप का अनुभव करता रहता है, उस ज्ञानी पुरुष को प्रारब्धकर्मवशात् बाह्य व्यवहार करते रहने पर भी उनके इष्टानिष्ट परिणामों से किसी प्रकार की कोई सन्दिग्धभावना, विपरीतभावना अथवा असंभावना आदि उसके मन में उत्पन्न नहीं होती हैं। वह तो अपने स्वरूप में रमता रहता है।

गीता में भी बताया गया है कि बुद्धिमान् वही है, जो इस ब्रह्मतत्त्व को जान लेता है और कृतकृत्य हो जाता है। हे भारत! सम्पूर्ण मनुष्य समाज में उस बुद्धिमान् पुरुष के लिये कोई भी कर्तव्य कर्म, शेष नहीं रहता। उसने सब कर्तव्य कर्मों को कर लिया है। इत्यादि स्मृतियों ने उस बुद्धिमान् पुरुष के लिये 'सर्वकर्तव्यताभाव' और 'कृतकृत्यता' का निरूपण कर दिया है। उस कारण उस बुद्धिमान् ज्ञानी पुरुष के लिये 'ध्यान विधि' की शंका करना उचित नहीं है॥ २२॥

ज्ञानिनो ध्यानाऽभावे व्यवहारप्राचुर्याद् दृष्टदुःखमात्रं, न मोक्षप्रतिबन्धः। तदुक्तं—"तन्निष्ठस्य मोक्षोपदेशा"दिति। तस्मिन् ब्रह्मात्मनि निष्ठा अनन्यव्यापारतया परिसमाप्तिः पर्यवसानं यस्य स तथा तस्य, ज्ञानैकशरणस्येति यावत्।

•

ननु ज्ञानिनो ध्यानविध्यभावेन प्रारब्धवशेन बहिर्व्यवहारप्रसक्त्या असम्भावनादिप्रसक्त्या मोक्षो न स्यादित्याशङ्क्याह—**ज्ञानिन इति। दृष्टेति। मात्र**शब्देनासम्भावनादि व्यावर्त्यते। नहि श्रवणमननिदिध्यासनैर्निश्चततत्त्वस्य स्वतो निवृत्तस्य करतलामलकवत् स्वरूपमद्वयानन्दमनुभवतः संशयादि सम्भवति। तदुक्तम्—

"विद्याविग्रहमग्रहेण पिहितं प्रत्यञ्चमुच्चैस्तरां उत्कृष्टोत्तमपूरुषं मुनिधिया मुञ्जादिषिकामिव।
कोशात् कारणकार्यरूपविकृतात् पश्यामि निःसंशयं नासीदस्ति[1] भविष्यति क्व नु गतः संसारदुःखोदधि॥" इति।

ननु मास्तु संशयादिः, अज्ञानमेव मोक्षप्रतिबन्धकं स्यात्, कथमन्यथा प्रारब्धभोगः? इत्याशङ्क्याह—**नेति।** अपरोक्षज्ञाने विरोधिनि सति ब्रह्मज्ञानायोगात् बाधितानुवृत्त्याबाधित्तानुवृत्त्या द्वैतदर्शनमात्रेण प्रारब्धभोगोपपत्तेर्न मोक्षप्रतिबन्धः। तदुक्तं वार्तिककारैः—

"तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्यासह कार्येण नासीदस्ति भविष्यति॥ इति।

•

शंका—ज्ञानी के लिये 'ध्यानविधि' यदि न माना जाय तो प्रारब्धवशात् बाह्यव्यवहारप्रसक्ति तथा असंभावना आदि की प्रसक्ति की संभावना से उसे 'मोक्षलाभ' कैसे हो सकेगा?

समा०—उक्त आशंका के समाधानार्थ ही ग्रन्थकार ने कहा है—**ध्यान के अभाव में बाह्यव्यवहार के प्राचुर्य से उस ज्ञानी को 'दृष्ट दुःखमात्र' हो सकता है, किन्तु 'मोक्षलाभ' में कोई रुकावट (प्रतिबन्ध) नहीं हो सकती।** 'दुःखमात्रं' में 'मात्र' शब्द के प्रयोग से 'असंभावना' आदि की व्यावृत्ति का होना सूचित किया है। क्योंकि 'ब्रह्मतत्त्व' के विषय में उसे सुदृढ़तम निश्चय हो चुका है।

शंका—'संशय' आदि, उस ज्ञानी को भले ही न हों किन्तु 'अज्ञान' ही 'मोक्ष' का प्रतिबन्धक हो जायगा। अन्यथा उसे 'प्रारब्ध भोग' क्यों भोगना पड़ रहा है?

समा०—उक्त आशंका के निरासार्थ ही ग्रन्थकार ने कहा है कि मोक्ष में कोई रुकावट नहीं हो सकती। अज्ञान के विरोधी ब्रह्म के अपरोक्ष (प्रत्यक्ष) ज्ञान की उपस्थिति में 'अज्ञान' कैसे टिक सकता है? जैसे तमस् के विरोधी प्रकाश की उपस्थिति में 'तमस्' नहीं ठहर पाता, उसी तरह यहाँ भी समझना चाहिये। बाधितानुवृत्ति के कारण द्वैतदर्शनमात्र होता है, उससे प्रारब्धभोग की उपपत्ति लग जाती है, किन्तु मोक्षलाभ में कोई प्रतिबन्ध (रुकावट) नहीं होता। वार्तिककार ने भी यही कहा है।

एवञ्च 'ज्ञान' से 'अज्ञान' और उसके कार्यभूत संशयादि की निवृत्ति, हो जाने से प्रारब्धीन व्यवहार के विद्यमान रहने पर भी 'ज्ञानी' के मोक्षलाभ की उपपत्ति लग जाती है।

उक्त कथन में ब्रह्मसूत्रकार की सम्मति प्रदर्शित कर रहे हैं। समन्वयाध्याय में "ईक्षतेर्नाशब्दम्" प्रसंग में "सदेव" यह उपक्रम करके "तदैक्षत"—इत्यादि श्रुति से प्रतीत होता है कि 'जगत्' का 'कोई कारण' अवश्य है। तब अनेक विचारकों ने अपने-अपने विचारों को उपस्थित किया है। भिन्न-भिन्न विचारों के उपस्थित होने पर मन में संशय होता है कि 'जगत्' का कारण 'प्रधान' (प्रकृति) है, अथवा 'ब्रह्म' है? तब सांख्यदार्शनिक कहता है कि 'ज्ञान क्रियाशक्ति' से युक्त होने के कारण और 'परिणामित्व' होने से 'त्रिगुणात्मक प्रधान' ही 'जगत्' का कारण है, 'ब्रह्म' नहीं है। क्योंकि वह (ब्रह्म) 'अपरिणामी' है। यह पक्ष, सांख्य ने उपस्थित किया है।

उस पर वेदान्ती ने कहा कि 'प्रधान' को 'जगत्' का कारण नहीं कह सकते। जगत् कारण तो 'सत्' शब्द से वाच्य होता है। 'प्रधान' कभी भी 'सत्' शब्द से वाच्य नहीं होता। क्योंकि 'अशब्द' है। अर्थात् वह (प्रधान) श्रुति से प्रतिपादित नहीं है। क्योंकि 'तदैक्षत'—इस श्रुति में जगत्कारण को 'ईक्षण' का कर्ता कहा गया है। 'प्रधान' तो 'जड' है। जड प्रधान में ईक्षण करने की शक्ति नहीं है। 'तदैक्षत' में 'तत्' शब्द का अर्थ है 'सत्' शब्दवाच्य कारण। श्रुति ने सच्छब्दवाच्य कारण को ईक्षिता बताया है, अर्थात् उसमें 'ईक्षितृत्व' धर्म का रहना बताया है। 'ईक्षितृत्व' धर्म, 'चेतन' का ही हो सकता है, 'प्रधान' का नहीं, क्योंकि वह (प्रधान) अचेतन (जड) है। अचेतन में ईक्षितृत्वधर्म, नहीं होता।

---

१. क्वासीदस्तीति सर्वज्ञग्रन्थपाठः।

तथैव[1] भगवानप्याह—

"य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह। सर्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते॥"

"यस्य नाऽहंकृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमान् लोकान् न हन्ति न निबध्यते॥" इति।

●

संक्षेपशारीरकाचार्यैरप्युक्तम्—

"पश्यामि चित्रमिव सर्वमिदं द्वितीयं तिष्ठामि निष्कलचिदेकवपुष्यनन्ते।
आत्मानमद्वयमनन्तसुखैकरूपं पश्यामि दग्धरशनामिव च प्रपञ्चम्॥
अद्वैतमप्यनुभवामि करस्थबिल्वतुल्यं शरीरमहिनिर्ल्वयनीव वीक्षे।
एवञ्च जीवनमिव प्रतिभासनञ्च[1] निःश्रेयमाधिगमनं[2] मम सुप्रसिद्धम्॥" इति।

तस्मात् ज्ञानेनाज्ञानतत्कार्यसंशयादीनां निवृत्तत्वात् प्रारब्धाधीनव्यवहारे सत्यपि ज्ञानिनो मोक्ष उपपद्यत इति भावः। तत्र सम्मतिमाह—तदुक्तमिति। समन्वयलक्षणे स्थितम्—"ईक्षतेर्नाशब्दम्"। "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्युपक्रम्य "तदेक्षत बहु स्यां प्रजायेय" इत्यादिश्रुत्या जगतः कारणं किञ्चित् श्रूयते। तत्र संशयः—प्रधानादि जगत्कारणम्, आहोस्वित् ब्रह्म वेति। तत्र ज्ञानक्रियाशक्तिमत्त्वात् परिणामित्वाच्च त्रिगुणात्मकं प्रधानमेव जगत्कारणम् न ब्रह्म; तस्यापरिणामित्वात् इति प्राप्ते—अभिधीयते; न प्रधानं जगत्कारणं सच्छब्दवाच्यम्; अशब्दम् यतः। कथमशब्दत्वमिति चेत् "तदेक्षत बहु स्यां प्रजायेय" इति कारणस्येक्षितृत्वश्रवणात् इक्षितृत्वस्य चेतनधर्मत्वात् प्रधानस्याचेतनत्वेन तदयोगात्। ननु प्रधानस्यापि गौणमीक्षितृत्वं भविष्यतीति चेत्? नः "सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति कारणे सत्यात्मशब्दप्रयोगादचेतने तदयोगात्।

●

शंका—'प्रधान' में भी 'गौण ईक्षितृत्व' मानने में क्या हानि है?

समा०—"सेयं देवतैक्षत" इस श्रुति ने 'कारण' के लिये सत्य (मुख्य) आत्मशब्द का प्रयोग किया है, 'अचेतन' में 'मुख्य' आत्म शब्द का प्रयोग नहीं किया जाता।

शंका—अचेतन में भी 'आत्म' शब्द का गौण प्रयोग मान लेंगे।

समा०—इसी आशंका का उत्तर, 'सूत्रकार भगवान् व्यास' ने दिया है—

यदि 'प्रधान' को 'जगत्' का कारण कहें, तो श्रुति-स्मृति के द्वारा प्रतिपादित मोक्ष प्राप्ति 'ब्रह्मनिष्ठ ज्ञानी पुरुष' को नहीं हो सकेगी। किन्तु श्रुति तो कह रही है कि उस ज्ञानी पुरुष को 'मोक्ष' की प्रतीक्षा तभी तक करनी है, जब तक भोग के द्वारा प्रारब्ध कर्मों का क्षय नहीं होता है। प्रारब्धकर्मों के क्षीण होते ही वह ज्ञानी पुरुष, 'निर्विशेष ब्रह्मभाव' रूप विदेह मुक्तिको अवश्य ही प्राप्त करता है। इस प्रकार बताया हुआ, ब्रह्मनिष्ठ ज्ञानी पुरुष का जो मोक्षोपदेश है, वह संगत नहीं होगा।

'अचेतनप्रधाननिष्ठ पुरुष' के लिये उक्त मोक्षोपदेश का होना संभव नहीं हो सकता। क्योंकि श्रुति से निश्चित है कि परमात्म विज्ञान के अतिरिक्त अन्य कोई भी 'मोक्ष प्राप्ति' का उपाय (साधन) नहीं है।

किञ्च—'तत्त्वमसि'—यह उपदेश, चेतन श्वेतकेतु को किया गया है। अचेतनतादात्म्यनिष्ठ पुरुष को उक्त उपदेश नहीं किया गया है। अतः अचेतन के ध्यान से मोक्ष मिलना संभव नहीं है। अतः जगत्कारण, 'प्रधान' नहीं है किन्तु 'ब्रह्म' ही है। इस विवेचन से यह स्पष्ट हो जाता है कि 'तन्निष्ठस्य मोक्षोपदेशात्' सूत्र यह बता रहा है कि ब्रह्मज्ञानैकशरण हुए पुरुष को मोक्ष प्राप्ति के होने में कोई प्रतिबन्ध (रुकावट) नहीं है। भगवान् श्रीकृष्णचन्द्र स्वयं अपने मुखारविन्द से कह रहे हैं—

समस्त इन्द्रियों की जो बाह्यविषयाभिमुख प्रवृत्ति है, उसका परित्याग कर अनन्यभाव से मेरी ही शरण में आओ। तब मैं समस्त पापों से तुमको मुक्त करा दूँगा। अतः शोक मत करो।

तथा भगवान् ने और भी कहा है—

हे अर्जुन! पुरुष और प्रकृति के स्वरूप को महत् से लेकर स्थूलान्त गुणों (कार्यों) के साथ जो जानता है, वह व्यावहारिक वर्ताव करता हुआ भी पुनः जन्म-मरण के चक्र में नहीं आता। अभिप्राय यह है कि प्रकृति और पुरुष के स्वरूप का

१. प्रतिभासमानमिति तद्ग्रन्थे पाठः। २. निःश्रेयसोऽधिगमनमिति तत्र मुद्रितम्।

शेषोऽपि—

"हयमेधशतसहस्त्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ।।" इति ।

●

अचेतनेऽप्यात्मशब्दो गौणो भविष्यतीत्याशङ्क्य तदुत्तरत्वेनेदमाह—**तन्निष्ठेति** । सूत्रं व्याचष्टे—**तस्मिन्निति** । अयमर्थः—यदि प्रधानं जगत्कारणं स्यात्, तर्हि "आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति तन्निष्ठस्य मोक्षोपदेशो न स्यात् । न ह्यचेतनप्रधाननिष्ठस्य मोक्षोपदेशः सम्भवति; "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति परमात्मविज्ञानादन्यस्य मोक्षसाधनत्वप्रतिषेधात् । किञ्च तत्त्वमसीति चेतनस्य श्वेतकेतोरचेतनतादात्म्यनिष्ठोपदेशायोगाद् न तद्ध्यानात् मोक्षः सम्भवति । तस्मात् न प्रधानं जगत्कारणम्, किन्तु ब्रह्मैव । ततश्च तन्निष्ठस्य मोक्षोपदेशात् ब्रह्मज्ञानैकशरणस्य न मोक्षप्रतिबन्धः ।

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।"

इति भगवद्वचनाच्चेति भावः ।

तत्र भगवत्सम्मतिमाह—**तथैवेति** । **पुरुषं** पूर्णं अपरिच्छिन्नानन्दस्वरूपमिति यावत् । **गुणैः** सत्त्वादिभिः सह प्रकृतिञ्च वेत्तीति सम्बन्धः । **सः** निवृत्ताविद्यो ब्रह्मीभूतः । **सर्वथा** सर्वप्रकारेण । **वर्तमानः** यथेष्टव्यवहारं कुर्वन्नपीत्यर्थः । उक्ताभिप्रायो भगवतैवोद्घाटित इति दर्शयितुमष्टादशाध्यायश्लोकमुदाहरति—**यस्येति** । उक्तार्थे शेषवचनमुदाहरति—**शेषोऽपीति** । हयमेधः अश्वमेधः । **परमार्थवित्** अहंब्रह्मास्मीतिसाक्षात्कारवान् । वृद्धवचनान्तरमुदाहरति—**विद्यारण्यैरिति** । वैराग्योपरमा**वन्यौ द्वौ** ।

"वैराग्यबोधोपरमाः सहायास्ते परस्परम् । प्रायेण सह वर्तन्ते वियुज्यन्ते क्वचित् क्वचित् ।।"

●

नीर-क्षीर के समान विवेक करके गुणसहित प्रकृति को ज्ञान के द्वारा विलीन करके 'ब्रह्मैवाहम्'—ब्रह्म ही मैं हूँ—इस प्रकार अविक्रिय ब्रह्मरूप से स्थित होने वाले ज्ञानी पुरुष का सर्वथा वर्तनरूप मन-माना यथेष्टाचार नहीं हो सकता, क्योंकि 'अनात्मा' में उसका 'मैं—मेरा' इत्याकारक अभिमान नहीं है । देहादि अनात्मपदार्थों में 'मैं—मेरा'—इत्याकारक अभिनिवेश होने पर ही 'इदं कर्तव्यं, इदं भोक्तव्यम्'—यह कर्तव्य है, यह भोक्तव्य है—इत्याकारक इच्छा का आवेग होने पर ही 'दुष्ट', 'अदुष्ट' कर्मों में मनुष्य की प्रवृत्ति हुआ करती है, अन्यथा नहीं । अतः ब्रह्मज्ञानी की 'सत् और असत्' में प्रवृत्ति होना संभव ही नहीं है । क्योंकि सर्वत्र ब्रह्मदर्शन और प्रपञ्चदर्शन का परस्पर विरोध है ।

अपने अभिप्राय को भगवान् स्वयं ही स्पष्ट कर रहे हैं—(गी० १८।१७) ।

जिस ब्रह्मज्ञानी पुरुष का अन्तःकरण, 'अहंभाव' से रहित है, और जिसकी बुद्धि, 'धर्माधर्मसंस्कार' से रहित है, वह पुरुष, त्रिलोकी के प्राणियों का हनन करके भी 'हनन' नहीं करता है, और उसके पुण्य-पापरूप फल से सम्बद्ध नहीं होता है ।।

निष्कर्ष यह है—जो ज्ञानी पुरुष, 'देश, काल, वस्तु'—इन तीनों परिच्छेदों से रहित आनन्दस्वरूप परमात्मा को 'अहं ब्रह्मास्मि' इस रूप में जानता है, तथा 'सत्त्व-रजस्-तमस्'—इस त्रिगुणात्मक प्रकृतिरूप 'माया' को 'मिथ्या' समझता है, वही ज्ञानी पुरुष, समस्त व्यवहार करता हुआ भी अर्थात् प्रबल प्रारब्धकर्मवशात् कदाचित् यथेष्टाचरण करता हुआ भी पुनः जन्म नहीं पाता है । इसी का स्पष्टीकरण भगवान् ने स्वयं ही अठारहवे अध्याय के सत्रहवें श्लोक से किया है—जिस ज्ञानी को अपने कर्मकर्तृत्व की भावना, नहीं है, तथा 'मैं इस कर्म के फल को भोगूंगा' मया इदं कर्मफलं भोक्तव्यम्—इस प्रकार से कर्मफल में जिसकी बुद्धि लिप्त नहीं होती, वह ज्ञानी पुरुष, कदाचित् समस्त लोकों का भी हनन करे, तो भी वह 'हननक्रिया' का 'कर्ता' नहीं होता है, तथा हननक्रियाजन्य 'अनिष्टफल' के साथ उसका संबंध भी नहीं हो पाता है ।

इसी अभिप्राय से शेष भगवान् भी कहते हैं—'अहं ब्रह्मास्मि'—इस प्रकार साक्षात्कार करनेवाला पुरुष, अर्थात् जो तत्त्वज्ञानी पुरुष है, वह, कदाचित् शतसहस्र अश्वमेध यज्ञों को करे, अथवा लक्षसंख्याक ब्राह्मणों का हनन भी करे तो उस तत्त्वज्ञानी पुरुष को, न अश्वमेधजन्य पुण्य प्राप्त होते हैं, और न ही ब्रह्महत्याजन्य पाप लगते हैं । क्योंकि वह तत्त्वज्ञानी पुरुष 'विमल' है । अर्थात् अविद्यादि मलों से रहित है ।

इसी अभिप्राय को विद्यारण्यस्वामी ने भी व्यक्त किया है (१) वैराग्य, (२) बोध, (३) उपरति—इन तीनों में से इस ज्ञानी पुरुष को आत्मसाक्षात्काररूप 'बोध' तो पूर्णतया हो गया, किन्तु किसी पापरूप प्रारब्धकर्म का उदय होने से 'वैराग्य'

विद्यारण्यैरप्युक्तम्—

"पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा।
मोक्षो विनिश्चितः किं तु दृष्टं दुःखं[1] न नश्यति ॥" इति । ॥ २३ ॥

●

इति वैराग्यादीनां परस्परसहायत्वमुक्त्वा क्वचित् क्वचित् वियोगमुक्त्वा, कस्य पुंसः त्रयाणां सहावस्थानं केन वा कस्यचित् वियोगो भवतीत्याकांक्षायां—

"त्रयोऽप्यत्यन्तपक्वाश्चेत् महतस्तपसः फलम् । दुरितेन क्वचित् किञ्चित् कदाचित् प्रतिबध्यते ॥"

इति कस्यचिदुत्तमाधिकारिणः पुरुषधौरेयस्य महता तपसा परमेश्वरानुग्रहेण च वैराग्यादीनां महावस्थानमुक्त्वा मध्यमाधिकारिणः दुरितेन त्रयाणामन्यतमस्य प्रतिबन्धमुक्त्वा कस्मिन् पूर्णे किं फलं भवतीत्याकांक्षायां—

"वैराग्योपरमे[2] पूर्णे बोधस्तु प्रतिबध्यते यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ॥"

इति वैराग्योपरमयोः पूर्णत्वे बोधस्य प्रतिबन्धफलमुक्त्वा तद्विपरीत इदमाह—**पूर्णे इति**। तत्र त्रयाणां साधनस्वरूपं फलं च तैरेव व्युत्पादितम्—

"दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता[3] । असाधारणहेत्वाद्या वैराग्यस्य त्रयो ह्यमी ॥
श्रवणादित्रयं तद्वत् तत्त्वमिथ्याविवेचनम् । पुनर्ग्रन्थेरनुदयो बोधस्यैते त्रयो मताः ॥
यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः । स्युर्हेत्वाद्याः उपरतेरित्यसङ्कर ईरितः ॥"
ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः ।"
सुप्तिवत् विस्मृतिः सीमा भवेदुपरमस्य हि ।"
देहात्मवत् परात्मत्वदार्ढ्ये बोधः समाप्यते ॥" इति ।

●

और 'उपरति'—ये दोनों प्रतिबद्ध हो गये हों तभी उस ज्ञानी पुरुष को मोक्ष की प्राप्ति निश्चितरूप से होती है। किन्तु 'वैराग्य' और 'उपरति' के न रहने से उस ज्ञानी का दृष्ट दुःख निवृत्त नहीं होता।

निष्कर्ष यह है—'वैराग्य, बोध, उपरति'—ये तीनों परस्पर एक-दूसरे के सहायक रहने से प्रायः इकट्ठे ही रहते हैं, किन्तु कभी-कभी किसी स्थल विशेष में इन तीनों का परस्पर वियोग भी हो जाता है।

जो महान् तपस्वी तथा परमेश्वरानुगृहीत उत्तम अधिकारी पुरुष होता है, उसमें ये तीनों इकट्ठे ही रहते हैं।

"त्रयोऽप्यत्यन्तपक्वाश्चेत् महतस्तपसः फलम् । दुरितेन क्वचित् किञ्चित् कदाचित् प्रतिबध्यते ॥"

किन्तु मध्यम अधिकारी पुरुष में किसी प्रारब्ध पापकर्म के कारण तीनों का वियोग भी रहता है। उसमें भी यह विशेष है कि जिस पुरुष में वैराग्य और उपरति ये दोनों तो पूर्णतया हैं, किन्तु आत्मसाक्षात्काररूप बोध, प्रतिबद्ध हो गया है (रुक गया है), उस पुरुष को मोक्षप्राप्ति नहीं होती। तथापि किये हुए तप के प्रभाव से 'उत्तमलोक' की प्राप्ति होती है। किन्तु जिस पुरुष को आत्मसाक्षात्काररूप बोध तो पूर्ण रूप से हो गया है, और किसी प्रारब्ध पापकर्म के कारण 'वैराग्य और उपरति'—ये दोनों प्रतिबद्ध हो गये हैं, अर्थात् नहीं हो पाये, उस पुरुष को मोक्ष प्राप्ति तो अवश्य होती है, "ब्रह्म वेद ब्रह्मैव भवति", परन्तु उसका दृष्टदुःख निवृत्त नहीं होता। क्योंकि प्रारब्धकर्मवशात् व्यवहारप्राचुर्य के कारण दृष्ट दुःख का नाश नहीं हो पाता, क्योंकि दुःखनिवर्तक 'योग' प्रतिबद्ध है।

शंका—प्रारब्ध की अपेक्षा 'योग' के प्रबल होने से उसका प्रतिबन्ध कैसे हो सकता है ?

समा०—'अवश्यंभावि प्रारब्ध', योग की अपेक्षा प्रबल होता है।

अवसर प्राप्त 'वैराग्य, बोध, उपरति'—इन तीनों के 'साधन', 'स्वरूप', 'फल' और 'पूर्णता की अवधि' का निरूपण कर रहे हैं।

१. दृष्टदुःखमिति तत्पाठः । २. वैराग्योपरतीति पञ्चदश्यां मुद्रितम् ।
३. पुनर्भोगेष्वदीनतेति तत्र दृश्यते । एवमन्ते त्रयोप्यमीति ।

बोधस्य पूर्णत्वावधिर्विष्णुपुराणे पराशरेण दर्शितः—

"अहं हरिः[1] सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्ति ॥" इति ।

ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनापि—

"अहं हि सर्वं न च किंचिदन्यन्निरूपणायामनिरूपणायाम् ।
इयं हि वेदस्य परा हि निष्ठा ममाऽनुभूतिश्च न संशयश्च ॥" इति ।

●

ततश्च यस्य बोधः पूर्णः वैराग्योपरमौ प्रारब्धकर्मणा प्रतिबद्धौ यदा, तदा तस्य मोक्षः सिद्ध एव; "ब्रह्म वेद ब्रह्मैव भवति" "ब्रह्मविदाप्नोति परम्" इत्यादिश्रुतेः। किन्तु प्रारब्धकर्मवशेन व्यवहारप्राचुर्यात् दृष्टदुःखं न नश्यति, तन्निवर्तकस्य योगस्य प्रतिबद्धत्वादिति भावः। न च—प्रारब्धापेक्षया योगस्य प्रबलत्वात् कथं तस्य प्रतिबन्ध इति—वाच्यम्; अवश्यम्भाविप्रारब्धस्य योगापेक्षया प्रबलत्वात् तदुक्तम् ।

"अवश्यम्भाविभावानां प्रतीकारो भवेद्यदि । तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ॥" इति ॥ २३ ॥

ननु बोधे पूर्णे वैराग्योपरमयोः प्रतिबन्धेऽपि मोक्षो भवतीत्युक्तम्, तत्र बोधस्य पूर्णत्वं कीदृशमित्याकाङ्क्षायां असम्भावनाविपरीतभावनाराहित्यं ब्रह्मसाक्षात्कारस्य पूर्णत्वमित्यभिप्रेत्य तत्र विष्णुपुराणवचनमुदाहरति—**बोधस्येति**। अज्ञानतत्कार्यं हरतीति **हरिः** भगवान् वासुदेवः परमात्मा। **ततो** हरेः कारणञ्च कार्यजातञ्च **कारणकार्यजातम् अन्यत्** किमपि नास्ति; कार्यकारणयो-

●

इस लोक के तथा परलोक के विषयों में सातिशयता, अनित्यता आदि दोषों को जो दृष्टि है, वह तो 'वैराग्य' का साधन है और इस लोक तथा परलोक के विषयों के त्याग को जो इच्छा है, वही 'वैराग्य' का स्वरूप है और विना प्रयत्न के प्राप्त हुए भोगों के प्रति चित्त की जो अदीनता है, वही वैराग्य का 'फल' है। और समस्त लोकों से उत्कृष्ट जो 'ब्रह्मलोक' है, उसे भी 'तृण' के समान तुच्छ समझना, यही वैराग्य की पूर्णता का 'अवधि' है, और 'श्रवण-मनन-निदिध्यासन'—ये तोनों 'बोध' के उपाय (साधन) हैं, और मिथ्यादेहादि जडपदार्थों से 'प्रत्यगात्मा' का विवेचन (भेद) ही 'बोध' का स्वरूप है, और अहंकारादिकों के साथ आत्मा की जो तादात्म्याध्यासरूप ग्रन्थि का पुनः उदय न होना ही 'बोध' का फल है। जैसे अज्ञानी पुरुष को 'देह' में 'आत्मत्वबुद्धि' दृढ़ होती है, वैसे ही 'परमात्मा' में आत्मत्व बुद्धि का दृढ़ रहना ही 'बोध' की पूर्णता का अवधि है। और 'यम-नियम आदि' 'उपरति' के साधन हैं, और मन की समस्त वृत्तियों का जो निरोध है, वही 'उपरति' का स्वरूप है और लौकिक वैदिक समस्त व्यवहारों का जो अभाव है वही उपरति का 'फल' है, और सुषुप्ति के समान समस्त पदार्थों की जो 'स्मृति' है, वही 'उपरति' की पूर्णता का अवधि है ॥ २३ ॥

शंका—पहिले बता चुके हैं कि 'बोध' की पूर्णता होने पर 'वैराग्य' और 'उपरम'—इन दोनों के प्रतिबद्ध होने पर भी 'मोक्ष' के होने में कोई प्रतिबन्ध नहीं होता। किन्तु 'बोध' की पूर्णता कैसी समझी जाय ?

समा०—उक्त आशंका का समाधान यही है कि 'असम्भावना, विपरीतभावना, सन्दिग्धभावना'—इन तीनों भावनाओं का राहित्य (न हो पाना) ही ब्रह्मसाक्षात्कार (बोध) को पूर्णता है—यह समझना चाहिये। इसी अभिप्राय से ग्रन्थकार विष्णुपुराण के बचन को उद्धृत कर रहे हैं—**बोध के पूर्णत्व का अवधि, महर्षि पराशर ने विष्णुपुराण में बताया है—अर्थात् मैं तथा यह सम्पूर्ण जगत्, आत्मरूप ही है। उस परमात्मा से भिन्न कोई भी कारण या कार्य नहीं है। इस प्रकार की सर्वात्मबुद्धि जिस पुरुष को प्राप्त हुई हो, उस पुरुष को सांसारिक शीतोष्णद्वन्द्व, मानापमानादि द्वन्द्वरूप रोग, पुनः प्राप्त नहीं होते।** ठीक इसी आशय का एक अन्य श्लोक भी है—

"हरिरेव जगत् जगदेव हरिः जगतो हरितो नहि भिन्न तनुः ।
इति यस्य मतिः परमार्थगतिः स नरो भवसागरमुद्धरति ॥"

१. हरिरिति पुराणेऽत्र च टीकायां पाठः ।

उपदेशसहस्रिकायामपि—

"देहात्मज्ञानवद् ज्ञानं देहात्मज्ञानबाधकम् । आत्मन्येव भवेद्यस्य सोऽनिच्छन्नपि मुच्यते ॥" इति ॥ २४ ॥

"अयमस्मीति पुरुषः" इत्यत्राऽयमिति श्रुतेस्तात्पर्यप्रतिपादनव्याजेन विद्यारण्यैरपि दर्शितं तृप्तिदीपे—

"असन्दिग्धाऽविपर्यस्तबोधो देहात्मताक्षये । तद्वदात्मनि निर्णेतुमयमित्युच्यते पुनः ॥" इति ।

●

द्वन्द्वाणि कल्पितत्वेन तद्व्यतिरेकेणाभावादिति भावः। द्वन्द्वगदाः शीतोष्णमानापमानानि द्वन्द्वव्याधयः। संशयविपर्यासशून्यतया गुरूपदिष्टमहावाक्यात् ब्रह्मसाक्षात्कारे सत्यज्ञानतत्कार्यं विनश्यति; "तरतिशोकमात्मवित्" इति श्रुतेरिति भावः। तत्र स्कन्दपुराणवचनमप्युदाहरति—ब्रह्मेति। शिवेनापि बोधस्य पूर्णत्वावधिर्दर्शित इत्यनुषज्यते। तत्र आचार्यवचनमप्युदाहरति—उपदेशेति ॥२४॥

ग्रन्थान्तरसम्मतिमाह—अयमित्यादिना। परमप्रकृतमुपसंहरति—सर्वथेति। ततः किं? तत्राह—तत इति। तं परमात्मानम्। विदित्वा ब्रह्मास्मीति साक्षात्कृत्य। मृत्युं संसारकारणमज्ञानम्। अत्येति अतिक्रामति नाशयतीत्यर्थः। शोकमिति संसारकारणमज्ञानमुपलक्ष्यते। सम्यक् प्रसीदत्यस्मिन् जीव इति संप्रसाद इति सुषुप्तिवाचकेद सम्प्रसादशब्देन तद्वान् जीवो लक्षणया प्रतिपाद्यते। अस्माच्छरीरात् स्थूलरूपात्। समुत्थाय विवेकेन तदभिमानं त्यक्त्वा। स्वेन रूपेण ब्रह्म अभिनिष्पद्यते। अयमर्थः—अहं ब्रह्मास्मीति स्वस्वरूपेण ब्रह्म साक्षात्कृत्य परं ज्योतिः सम्पद्यते परमात्मा भवतीति। यो ब्रह्मीभूतः सः उत्तमः पुरुषः उद्गतं निवृत्तं तमः अज्ञानं यस्यासावुत्तमः, अज्ञानतत्कार्यातीतः पुरुषः पूर्णः "नैतेन किञ्चनानावृतं नैतेन किञ्चनासंवृतमि"ति श्रुतेः। अयं नित्यापरोक्षस्वरूपः पुरुषः सर्वसाक्षी अहमस्मीति। आत्मानं प्रत्यगात्मानम् जानीयात् चेत् कश्चित् स किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति सम्बन्धः। अत्र चेदिति ज्ञानाधिकारिणोऽत्यन्तदुर्लभत्वं सूचयति; "कश्चिद्धीरः प्रत्यगात्मानमैक्षत्" इति श्रुत्यन्तरात्।

●

तथा उक्त 'बोध' की पूर्णता के अवधि को स्कन्दपुराणस्थित ब्रह्मगीता में 'ब्रह्मा' को 'शिव' ने भी बताया है—मैं ही सम्पूर्ण जगद्रूप हूँ, मुझसे भिन्न कोई वस्तु नहीं है। इस प्रकार का जो 'सर्वात्मभाव' है, वही समस्त वेदों का परम तात्पर्य है, और हमारा भी यही अनुभव है। इस सर्वात्म भाव के विषय में किंचिन्मात्र भी संशय नहीं करना चाहिये।

इसी सन्दर्भ में आचार्यवचन को भी उद्धृत कर रहे हैं—बोध की पूर्णता के अवधि को भगवत्पूज्यपाद आचार्य शंकर ने अपनी उपदेशसाहस्री में भी बताया है—जैसे अज्ञानी पुरुष को अपने 'देह' में 'अहं मनुष्यः'—इत्याकारक दृढ़ ज्ञान होता है, वैसे ही जिस पुरुष को 'प्रत्यगात्मा' में 'अहं ब्रह्मास्मि'—इस प्रकार का 'संशय तथा विपरीत भावनाओं' से रहित दृढ़ ज्ञान होता है, वही ज्ञान, 'देहात्मज्ञान' का नाशक होता है, अर्थात् देहात्मज्ञान की भ्रान्ति को नष्ट करता है। एवं च 'अहं ब्रह्मास्मि' इस सुदृढ़ज्ञान से सम्पन्न हुआ पुरुष 'मोक्ष' को न चाहते हुए भी 'मोक्ष' को अवश्य प्राप्त करता है ॥ २४ ॥

ग्रन्थान्तर की सम्मति को भी बताते हैं—"अयमस्मीति पुरुषः"—इस श्रुति के तात्पर्य प्रतिपादन के बहाने इस बोध की पूर्णता के अवधि को श्रीविद्यारण्य स्वामी ने भी 'तृप्तिदीप' प्रकरण में बताया है—लौकिक पुरुषों को अपने देहरूप आत्मा में जिस प्रकार संशय-विपरीत भावना से रहित 'मैं मनुष्य हूँ', 'मैं ब्राह्मण हूँ'—इस प्रकार का ज्ञान रहता है, उसी प्रकार मुमुक्षु पुरुष को भी अपनी लक्ष्यसिद्धि (मुक्ति प्राप्ति) के लिये 'प्रत्यगात्मा' में संशय-विपरीत भावना से रहित होकर 'अहं ब्रह्मास्मि'—मैं ब्रह्म हूँ—इत्याकारक 'बोध' ही सम्पादन करना चाहिये। उक्त निर्णय करने के लिये ही 'अयमस्मीति पुरुष.'—इस श्रुति में 'अयम्' पद का प्रयोग किया है, इत्यादि अनेक श्रुति-स्मृति-आचार्यवाक्यरूप प्रमाणों से 'बोध' की पूर्णता का अवधि बताया गया है। एवं च सर्वथापि श्रवण-मननादि के द्वारा 'आत्मब्रह्म साक्षात्कार' होता है। उस प्रकार के साक्षात्कार से 'ब्रह्मभावरूपा मुक्ति' होती है। अर्थात् विवेकादि साधनचतुष्टयसाधनसम्पन्न मुमुक्षु पुरुष को श्रवण-मनन-निदिध्यासन के द्वारा 'अहं ब्रह्मास्मि'—इत्याकारक ब्रह्मसाक्षात्कार होता है। उस ब्रह्मसाक्षात्कार से 'अविद्या' की निवृत्ति तथा ब्रह्मभावरूप मुक्ति होती है।

शंका—ब्रह्मसाक्षात्कार से उस मुमुक्षु पुरुष को अविद्यानिवृत्तिपूर्वक ब्रह्मभावरूपा मुक्ति होती है—इसमें प्रमाण क्या है ?

समा०—इसमें श्रुति और स्मृति वचन ही प्रमाण है।

सर्वथापि श्रवणादिनात्मब्रह्मसाक्षात्कारस्ततो[1] ब्रह्मभावलक्षणा मुक्तिर्भवतीति सिद्धम्। 'तमेव विदित्वाऽतिमृत्युमेति' "तरति शोकामत्मवित्" "ब्रह्मविद् ब्रह्मैव भवति" "एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते स उत्तमः पुरुषः"।

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥'

●

"मनुष्याणां सहस्रेषु कश्चित् यतति सिद्धये। यततामपि सिद्धानां कश्चित् मां वेत्ति तत्त्वतः॥"

इति भगवद्वचनाच्च। कृतं कृत्यं येनासौ कृतकृत्यः। एतत् कृतकृत्यत्वं विद्यारण्यश्रीपादैः प्रपञ्चितम्।

"ऐहिकामुष्मिकव्रातसिद्धौ[3] मुक्तेश्च सिद्धये। बहु कृत्यं पुरास्याभूत्[2] तत्सर्वमधुना कृतम्॥

तदेतत् कृतकृत्यत्वं प्रतियोगिपुरस्सरम्। अनुसंदधते चायमेवं[4] तृप्यति नित्यशः॥

दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया। परमानन्दपूर्णोऽहं संसरामि किमिच्छया॥

अनुतिष्ठन्तु कर्म्माणि परलोकयियासवः। सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम्॥ व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा। येऽत्राधिकारिणो मर्त्या[5] नाऽधिकारोऽक्रियत्वतः॥

●

यह मुमुक्षु पुरुष 'अहं ब्रह्मास्मि'—इस प्रकार से उस परमात्मा (ब्रह्म) का साक्षात्कार करके संसार के कारणभूत अज्ञानरूप मृत्यु का नाश कर देता है, अर्थात् उस मृत्यु का अतिक्रमण करता है, तथा आत्मसाक्षात्कार करने वाला पुरुष, 'शोक' के पार हो जाता है। अर्थात् संसार के कारणीभूत अज्ञान का नाश कर देता है। ब्रह्मविदिति–ब्रह्म का साक्षात्कार करने वाला पुरुष 'ब्रह्मरूप' ही हो जाता है। एवमिति सम्प्रसाद नाम का जीव 'सम्यक्-प्रसीदति अस्मिन् जीव इति सम्प्रसादः'—इस निरुक्ति से सुषुप्ति वाचक सम्प्रसाद शब्द से 'तद्वान् जीव' लक्षणा से बताया गया है। वह जीव, स्थूल शरीर के अभिमान को 'विवेक' के द्वारा त्याग करके अपने स्व-स्वरूप से सम्पन्न हो जाता है। अर्थात् 'अहं ब्रह्मास्मि' इस प्रकार स्व-स्वरूप में ब्रह्म का साक्षात्कार कर लेता है, और परं ज्योतिःस्व-स्वरूप (परमात्मा = ब्रह्म) ही हो जाता है। जो मुमुक्षु पुरुष, ब्रह्मसाक्षात्कार करके ब्रह्मरूप हुआ है, वही 'उत्तम पुरुष' है। अर्थात् वही उत्तम है और वही पुरुष है। ब्रह्मसाक्षात्कार के द्वारा जिसका अज्ञानरूपतम, निवृत्त हो चुका हो, उसे ही 'उत्तम' कहा जाता है, और सर्वत्र पूर्ण जो हो, उसे 'पुरुष' कहा जाता है। आत्मानमिति—'नित्य अपरोक्षरूप तथा सर्वसाक्षी परमात्मा (ब्रह्म), मैं हूँ'—इस प्रकार से जब किसी पुरुष को प्रत्यगात्मा का साक्षात्कार होता है, तब वह ज्ञानी पुरुष, किस वस्तु को इच्छा करता हुआ, किस लिये अपने शरीर में सन्तप्त होगा? अर्थात् कभी सन्तप्त नहीं होगा। क्योंकि उसने सब कुछ पालिया है, वह 'पूर्णकाम, आप्तकाम' हो चुका है। 'आत्मानं चेत्' यहाँ 'चेत्' के प्रयोग से यह सूचित किया है कि 'अधिकारी ज्ञानी पुरुष' अत्यन्त दुर्लभ है। 'कश्चिद्धीरः प्रत्यगात्मानमैच्छत्' यह भी एक श्रुति है, तथा भगवद्वचन (गी० ७।३) भी है कि हजारों मनुष्यों में से कोई विरला ही ज्ञान की सिद्धि के लिये (ज्ञान प्राप्ति के लिये) यत्न करता है, और ज्ञानसिद्धि के लिये प्रयत्न करने वाले उन सिद्ध मनुष्यों में से कोई एक-आध ही मुझ परमात्मा को यथार्थरूप से जान पाता है॥ इस 'कृतकृत्यता' को श्रीविद्यारण्य श्रीपादों ने बताया है। (टीकोक्त श्लोकों का क्रमशः यह अर्थ है—) तत्त्वज्ञान होने के पूर्व ऐहलौकिक सुख प्राप्ति और दुःख निवृत्ति के लिये कृषि-वाणिज्य आदि तथा पारलौकिक स्वर्ग प्राप्ति के लिये यज्ञ उपासना आदि, तथा मोक्षसाधनीभूत ज्ञान प्राप्ति के लिये श्रवण, मनन, निदिध्यासनादि अनेक प्रकार के कर्म करने पड़ते थे। किन्तु अब ज्ञानप्राप्ति होने पर तो उसे संसार सुख की इच्छा नहीं रही। अत एव ब्रह्मानन्द साक्षात्कार की सिद्धि उसे हो पाई है। इसलिये वे सब उसके द्वारा किये हुए के समान ही हैं, अब उसके लिये कोई कर्तव्य शेष बचा नहीं है।

इसप्रकार पूर्व की स्थिति का स्मरण कर अपनी कृतकार्यता को नित्य मन में लाकर वह सर्वदा ही तृप्त रहता है।

---

१. आत्म-पदं सोरीजपुस्तके नास्ति। २. सिद्धयै—इति तत्र पाठः।

३. पुराऽस्याभूदिति तत्पाठः। ४. अनुसन्दधदेवायमिति तत्पाठः।

५. मे तु—इति पाठः।

"यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवती"ति ।

"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते"त्यादिश्रुतिस्मृतिभ्यः ॥ शेषोऽप्याह—

"वृक्षाग्राच्च्युतपादो यद्वदनिच्छन्नपि क्षितौ पतति ।
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवली भवति ॥" इति ॥ २५ ॥

॥ इति तत्त्वानुसन्धाने तृतीयः परिच्छेदः ॥

●

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च । द्रष्टारश्च कल्पयन्तु[1] किं मे स्यादन्यकल्पनात् ॥
गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्निना । नान्यारोपितसंसारधर्मान्नैवमहं[2] भजे ।" इत्यादि ।

एतत् ब्रह्मात्मतत्त्वम् । बुध्वा ब्रह्मास्मीति साक्षात्कृत्य । बुद्धिमान् कुशलः । तत्र शेषवचनमुदाहरति—शेषोऽपीति । तस्माद्विचारिततत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेण नित्यनिरतिशयाखण्डैकरसानन्दब्रह्मभावलक्षणा मुक्तिर्भवतीति सिद्धम् ॥ २५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वती-पूज्यपाद-शिष्यभगवन्महादेवसरस्वती-विरचिते तत्त्वानुसंधानव्याख्यानेऽद्वैतचिन्ताकौस्तुभे तृतीयः परिच्छेदः ॥

●

वह ज्ञानी पुरुष उपर्युक्त प्रकार से स्वयं को धन्य समझता है । अज्ञानी लोग, दुःखी होते हुए पुत्रादिकों की अपेक्षा करके यदि संसार करते हैं, तो भले ही करें । मैं तो परमानन्द से पूर्ण हूँ, अतः मुझे किसी भी वस्तु की इच्छा नहीं है । अतः मैं किसलिये संसार करूँ ।

जिन्हें परलोक की इच्छा हो, वे यज्ञयागादि कर्मों का अनुष्ठान भले ही करें । मैं तो सर्वव्यापक हूँ, उस कारण मुझसे रहित (शून्य) कोई भी लोक नहीं है । तब मुझे कर्मानुष्ठान करने की आवश्यकता ही क्या है ? जो अधिकारी हो वे, वेद-शास्त्रों का अध्ययन भले ही करें, तथा अध्यापन करें । मैं तो सर्वथैव अक्रिय हो गया हूँ, अतः उनके पढ़ने-पढ़ाने का मुझे अधिकार ही कहाँ है ? निद्रा, भिक्षा, स्नान, शौच आदि कर्म करने की मैं इच्छा भी नहीं करता और उन्हें करता भी नहीं । देखनेवालों को 'मैं कर्म करता हुआ सा दीखता हुँ, तो भले ही उनको वैसा प्रतीत हो, उनको वैसा प्रतीत होने से मुझमें कौन सा अन्तर होना है ? जिस प्रकार गुंजाओं की राशि को किसी के द्वारा अग्नि, कहे जाने पर भी वह गुंजाराशि दाहक नहीं बनती, उसी प्रकार 'मैं संसार करता हूं'—इस प्रकार किसी दूसरे के द्वारा कहे जाने पर भी उस कथन का मुझे स्पर्श तक हो नहीं पाता । अपरिच्छिन्न आनन्दरूप जो ब्रह्म है, वह एक है तथा बोधरूप है, वह, मैं ही हूँ—इस ज्ञान से सम्पन्न होने वाला पुरुष वस्तुतः कृतकृत्य ही है ।

भगवान् स्वयं गीता में बता रहे हैं—हे अर्जुन ! 'अहंब्रह्मास्मि'—इस प्रकार 'ब्रह्मतत्त्व' का साक्षात्कार करके यह ज्ञानी पुरुष, 'बुद्धिमान्' कहलाता है तथा कृतकृत्य होता है । अर्थात् वही बुद्धिमान् है और वही कृतकृत्य भी है । 'ज्ञानी पुरुष', मेरा आत्मरूप ही है । अर्थात् मुझ परमेश्वर की 'आत्मा' है ।

इसी अभिप्राय से शेष भगवान् भी कह रहे हैं—जैसे वृक्ष पर से गिरा हुआ पुरुष, भूमि पर गिरने की इच्छा नहीं करता, तथापि वह भूमि पर अवश्य ही गिरता है, उसी प्रकार आत्मसाक्षात्कार किया हुआ पुरुष, मोक्ष को न चाहता हुआ भी मोक्ष को अवश्य ही प्राप्त करता है । एवं च विचारित तत्त्वमस्यादिवाक्यजन्य साक्षात्कार से नित्य निरतिशय अखण्डैकरस आनन्द ब्रह्मभावरूप मुक्ति तो उसे प्राप्त हो ही जाती है । अतः अनेक श्रौत-स्मार्त वचनों से बोधित ब्रह्मसाक्षात्कार से अविद्या की निवृत्ति तथा ब्रह्मभावरूप मुक्ति की प्राप्ति होती है—यह स्पष्ट किया गया ।

इति 'साक्षात्कार' नाम्नो हिन्दी व्याख्या में तीसरा परिच्छेद समाप्त हुआ ॥

---

१. द्रष्टारश्चेत्कल्पयन्तीति तत्पाठः ।

२. धर्मानेवमहमिति तत्पाठः । अत्रत्य पाठे ············वरोहमित्यर्थः ।

अथ चतुर्थः परिच्छेदः

सा च मुक्तिर्द्विविधा—विदेहमुक्तिर्जीवन्मुक्तिश्चेति ;

•

यच्चिन्तयाऽऽप्ताः परमात्मभावज्ञानतत्कार्यनिवर्तनेन ।
त्यक्तैषणाः संयमिनो महान्तस्तं कृष्णमाद्यं शरणं प्रपद्ये ॥ १ ॥

ब्रह्मसाक्षात्काराद्विदेहमुक्तिरेकैव भवति, न जीवन्मुक्तिः प्रमाणाभावात् । न च—"विमुक्तश्च विमुच्यते" "स जीवन्मुक्त उच्यते" "स्थितप्रज्ञस्तदोच्यते" इत्यादि श्रुतिस्मृतिवचनानां सत्त्वात् कथं प्रमाणाभाव इति—वाच्यम्; तेषामन्यपरत्वात् ।

किञ्च, केयं जीवन्मुक्तिः—अज्ञाननिवृत्तिर्वा, ब्रह्मभावो वा, आहोस्वित् जीवदवस्थायां कर्तृत्वादिबन्धनिवृत्तिर्वा ? नाद्यः; विदेहमुक्तावतिव्याप्तेः । अतएव न द्वितीयः । नापि तृतीयः; जीवदवस्थायां भोगप्रदे प्रारब्धे कर्मणि सति कर्तृत्वादिबन्धनिवृत्तेरयोगात् ।

किञ्च कर्तृत्वादिबन्धः किं साक्षिणो निवार्यते, आहोस्विदहंकाराद्वा । नाद्यः, तत्त्वज्ञानेनैव वारितत्वात् । न द्वितीयः; भोगप्रदप्रारब्धकर्मणि सत्यहंकारगतस्य स्वाभाविकस्य कर्तृत्वादेः वारणायोगात् । न च—योगेन तदभिभव इति—वाच्यम् योगात् प्रारब्धस्य बलवत्त्वात् ।

•

तृतीय परिच्छेद के अन्त में बता चुके हैं कि 'ब्रह्मसाक्षात्कार' से 'मुक्ति' होती है । वह मुक्ति (१) जीवन्मुक्ति और (२) विदेहमुक्ति के भेद से दो प्रकार की होती है । परन्तु कतिपय ग्रन्थकार 'जीवन्मुक्ति' को स्वीकार नहीं करते । वे 'विदेह-मुक्ति' को ही स्वीकार करते हैं । उनके मत के खन्डनार्थं प्रथमतः उनके मत को बता रहे हैं—उनका कहना है कि 'ब्रह्म-साक्षात्कार' होने पर 'ज्ञानी पुरुष' को विदेहमुक्ति' की ही प्राप्ति होती है, 'जीवन्मुक्ति' नहीं होती है । क्योंकि 'जीवन्मुक्ति' के होने में कोई प्रमाण उपलब्ध नहीं है । तथा 'जीवन्मुक्ति' का कोई लक्षण करना भी सम्भव नहीं है । तथा 'जीवन्मुक्ति' के किसी साधन का होना भी सम्भव नहीं है । उसी तरह 'जीवन्मुक्ति' के किसी अधिकारी का होना भी सम्भव नहीं है । और 'जीवन्मुक्ति' का कोई फल (प्रयोजन) भी नहीं है एवं च 'जीवन्मुक्ति' के होने में न कोई प्रमाण है, न उसका कोई लक्षण ही है, और न उसकी प्राप्ति का कोई साधन है, और न उसका कोई अधिकारी है, तथा न उससे कोई प्रयोजन (फल) हो निष्पन्न होता है । किसी भी पदार्थ का अस्तित्व, लक्षण तथा प्रमाण पर ही निर्भर रहता है—'लक्षण-प्रमाणाभ्यां हि वस्तुसिद्धिः'—यह नियम सर्वत्र प्रसिद्ध ही है । अतः लक्षण तथा प्रमाण के न होने से 'जीवन्मुक्ति' को मान लेना उचित नहीं है । 'जीवन्मुक्ति' के विषय में किसी श्रुति या स्मृति का वचन भी उपलब्ध नहीं है, जिसे प्रमाणरूप में कहा जाय । अतः जीवन्मुक्ति को मान लेना अनुचित है ।

शङ्का—'विमुक्तश्च विमुच्यते', 'सजीवन्मुक्त उच्यते', 'स्थितप्रज्ञस्तदोच्यते',—इत्यादि श्रुति-स्मृतियों के वचन ही 'जीवन्मुक्ति' के होने में प्रमाण है । अतः 'जीवन्मुक्ति' में प्रमाण का अभाव कहना असंगत है ।

समा०—उन 'श्रौत-स्मार्त वचनों' का ब्रह्मविद्या की स्तुति के द्वारा 'ब्रह्म' में ही तात्पर्य है । 'जीवन्मुक्ति' को बताने में उन वचनों का तात्पर्य नहीं है । अतः उन वचनों से 'जीवन्मुक्ति' की सिद्धि नहीं हो सकती ।

अब 'लक्षण' के न बन पाने से भी 'जीवन्मुक्ति' के अभाव को सिद्ध करते हैं । जीवन्मुक्ति के स्वरूप के विषय में अनेक वैकल्पिक प्रश्न उपस्थित किए जा सकते हैं—(१) 'अज्ञान की निवृत्ति' को 'जीवन्मुक्ति' कहते हैं अथवा (२) ब्रह्मभाव' को जीवन्मुक्ति कहते हैं ? अथवा (३) 'जीवित अवस्था में कर्तृत्व-भोक्तृत्वादिरूप बन्ध की निवृत्ति' को जीवन्मुक्ति कहते हैं ?

इन लक्षणों में के प्रथम लक्षण अथवा द्वितीय लक्षण को यदि स्वीकार करते हैं तो, वह सम्भव नहीं है, क्योंकि 'विदेह मुक्ति' में भी 'अज्ञान' की निवृत्ति, तथा 'ब्रह्मभाव' विद्यमान है ही । उस कारण दोनों लक्षणों की विदेहमुक्ति में अतिव्याप्ति होगी और अतिव्याप्ति दोष से दूषित हुआ 'लक्षण', अपने 'लक्ष्यभूत अर्थ' की सिद्धि करने में समर्थ नहीं रहता । अतः प्रथम-द्वितीय लक्षणों से 'जीवन्मुक्ति' को सिद्ध नहीं किया जा सकता ।

तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो विदेहमुक्तिः। तदुक्तं "भोगेन त्वितरे क्षपयित्वा सम्पद्यते" इति ॥ १ ॥

•

किञ्च साधनाभावाच्च जीवन्मुक्तिर्न सिध्यति तत्त्वज्ञानस्य विदेहमुक्तिकारणत्वात्। न च—योगाभ्यास एव तत्साधनमिति—वाच्यम्; तस्य तत्त्वज्ञानसाधनत्वेनातत्साधनत्वात्।

"ज्ञानामृतेन तृप्तस्य नित्यतृप्तस्य योगिनः। नैवास्ति किञ्चित् कर्तव्यमस्ति चेद् न स तत्त्ववित् ॥"

"तस्य कार्यं न विद्यते," इति च साक्षात्कारोत्तरं कर्तव्यप्रतिषेधाच्च।

किञ्च ज्ञानिनो देहाभिमानशून्यस्य कर्तृत्वाभावेन कर्तव्यप्रवृत्त्यसम्भवेन तत्र अधिकारासम्भावात् सा न सम्भवति। नहि निरधिकारजीवन्मुक्तिसाधनाभ्यासः सम्भवति।

किञ्च प्रयोजनञ्च न पश्यामः तत्सिद्धेः। न च—ज्ञानरक्षादिकमेव तत्प्रयोजनमिति—वाच्यम्; प्रमाणजन्यज्ञानस्याज्ञाननिवर्तनक्षमस्य बाधकासक्तौ[1] तद्रक्षाया दुर्निरूपत्वात्, तपसोऽन्यफलत्वात्, विसम्वादाभावस्य समाध्यन्तर्भूततया ज्ञानासाधनत्वेन तत् फलत्वात् दुःखनाशसुखाविर्भावयोः ज्ञानफलत्वाच्च। तस्मात् प्रमाण-स्वरूप-लक्षण-साधनाधिकारि-प्रयोजनानां दुर्निरूपत्वात् जीवन्मुक्तभ्युपगमो निरर्थकः। तस्मात् तत्त्वज्ञानात् मुक्तिरेकरूपैवेति केचिद्वावदुकाः मन्यन्ते। तान्निराकर्तुकामो मुक्तिं विभजते—**सा चेति।**

•

अब तृतीय लक्षण को यदि स्वीकार करते हैं, तो वह भी सम्भव नहीं है। क्योंकि जीवित अवस्था में भोग देने वाले 'प्रारब्ध कर्मों' के विद्यमान रहते उन 'कर्तृत्व-भोक्तृत्व' आदि बन्धों की निवृत्ति का होना सम्भव नहीं है। अतः 'गोरेकशफवत्त्वं' के समान 'असम्भव' दोष से दूषित होने के कारण 'तृतीय लक्षण' भी 'जीवन्मुक्ति' को सिद्ध नहीं कर पा रहा है।

किञ्च—अर्थात् जीवदवस्था में 'कर्तृत्वादि बन्धों' को 'साक्षीचैतन्य' से निवृत्त करते हो, अथवा 'अहङ्कार' से उसको निवृत्त करते हो।

यहाँ भी प्रथम पक्ष का स्वीकार करना सम्भव नहीं है, क्योंकि 'साक्षी चैतन्य' में वस्तुतः वह 'बन्ध' है ही नहीं। अपितु 'अन्तःकरण' के 'तादात्म्याध्यास' से उस बन्ध की प्रतीतिमात्र होती रहती है। जब भी आत्मसाक्षात्कार से तादात्म्याध्यास की निवृत्ति होती है, तभी उस आरोपित बन्ध की भी निवृत्ति हो जाती है। अतः साक्षी के बन्ध की निवृत्ति करने के लिए 'जीवन्मुक्ति' का सम्पादन करना व्यर्थ है।

उसी तरह द्वितीय पक्ष का स्वीकार करना भी सम्भव नहीं है। क्योंकि भोग प्राप्त करनेवाले 'प्रारब्धकर्म' के विद्यमान रहते 'अहंकारगत स्वाभाविक बन्ध' की निवृत्ति का होना सम्भव नहीं है। अर्थात् जिस धर्मी का जो 'स्वाभाविक धर्म' रहता है, वह स्वाभाविक धर्म, उस 'धर्मी' के विद्यमान रहते निवृत्त नहीं होता। जैसे अग्नि का 'उष्णत्व धर्म', तथा जल का 'द्रवत्व धर्म', अग्निरूप धर्मी तथा जलरूप धर्मी के विद्यमान रहते निवृत्त नहीं होता। वैसे ही 'अहंकार' का स्वाभाविक धर्म जो 'कर्तृत्व' आदि बन्ध है, वह भी 'अहंकाररूप धर्मी' के विद्यमान रहते निवृत्त नहीं होगा।

शङ्का—अहंकारगत 'कर्तृत्वादि बन्ध' का यद्यपि स्वरूपतः नाश नहीं होता, तथापि योगाभ्यास के द्वारा उस 'बन्ध' का अभिभव हो सकता है।

समा०—जैसे आत्मसाक्षात्कार (आत्मज्ञान) की अपेक्षा 'प्रारब्धकर्म' प्रबल होता है, वैसे हो योगाभ्यास की अपेक्षा भी प्रारब्धकर्म प्रबल होता है। और उस प्रारब्धकर्म का भोग, 'कर्तृत्वादि के अभिमान' के विना हो नहीं सकता। अतः प्रबल प्रारब्धकर्म के विद्यमान रहते उस योगाभ्यास के द्वारा 'कर्तृत्वादि बन्ध' का अभिभव हो नहीं सकेगा। उस कारण 'जीवित अवस्था में कर्तृत्वादि बन्ध की निवृत्ति को 'जीवन्मुक्ति' शब्द से नहीं कह सकते। इस प्रकार जीवन्मुक्ति का लक्षण बनना सम्भव नहीं है। एवं च जीवन्मुक्ति के न होने में उसके लक्षण का अभाव रहना ही एक कारण है।

अब जीवन्मुक्ति के साधन का अभाव रहने से भी जीवन्मुक्ति के अभाव को बता रहे हैं।

---

१. बाधकप्रसक्ताविति स्यात्।

द्वैविध्यमेवाह—**विदेहेति**। अयं भावः—जीवन्मुक्तेः स्वरूपः प्रमाण-साधन-फलान्यनुपदमेव निरूपयिष्यति। तत्तदाक्षेपाणां तत्तन्निरूपणावसरे समाधानं वक्ष्यामः। न चात्राधिकार्यसम्भवः; उत्पन्नब्रह्मसाक्षात्कारस्य चित्तविश्रान्ति कामयमानस्य विद्वत्संन्यासिनः तत्राधिकारित्वात्[1]। न च—निवृत्ताविद्यस्य ब्रह्मसाक्षात्कारेणाभिमानशून्यतया कर्तृत्वाभावेन कथं तत्राधिकार इति—वाच्यम्; ज्ञानेनावरणशक्तिमदज्ञाननाशेऽपि प्रारब्धानुसारेण विक्षेपशक्तिमदज्ञानस्य लेशशब्दवाच्यस्य सर्वैरवस्थानाभ्युपगमेन बाधितानुवृत्त्या विदुषो देहाभिमानेन कर्तृत्व सम्भवात्। न च—"तस्य कार्यं न विद्यते," "ज्ञानामृतेन तृप्तस्य" इत्यादिस्मृत्या विदुषः कृतकृत्यस्य कर्तव्यप्रतिषेधात् न कर्तव्यशेषाभ्युपगम इति—वाच्यम्; अकृतोपास्तेर्विदुषोऽविश्रान्तचित्तस्य कर्तव्यशेषसत्त्वेन

•

जीवन्मुक्ति को मानने वाले वादी से हम यह पूछते हैं कि 'जीवन्मुक्ति' का साधन 'आत्मज्ञान' है अथवा 'योग' है ?

यदि प्रथम पक्ष (विकल्प) को स्वीकार करते हैं, तो वह संभव नहीं है, क्योंकि 'आत्मज्ञान' तो 'विदेहमुक्ति' का ही 'साधन' है। वह 'जीवन्मुक्ति' का साधन नहीं है। 'ज्ञानादेव तु कैवल्यम्'—इस श्रुति ने तो 'आत्मज्ञान' से 'मुक्ति' की प्राप्ति बताई है। 'जीवनमुक्ति' की प्राप्ति नहीं बताई है। क्योंकि 'आत्मज्ञान' तो 'विदेहमुक्ति' का ही साधन है। अतः प्रथम पक्ष का स्वीकार करना संभव नहीं है।

उसी तरह द्वितीय पक्ष (विकल्प) का भी स्वीकार करना भी संभव नहीं है। क्योंकि जैसे 'श्रवणादिक'—आत्मज्ञान के साधन हैं, वैसे ही 'योग' भी 'आत्मज्ञान' का ही साधन है। उस कारण 'योग' को भी 'जीवन्मुक्ति' का साधन कहना संभव नहीं है। अतः द्वितीय पक्ष को भी स्वीकार नहीं कर सकते।

अब 'अधिकारी के अभाव के कारण भी 'जीवन्मुक्ति' का अभाव बता रहे हैं।

'जीवन्मुक्ति' का अधिकारी 'मुमुक्षु' तो हो नहीं सकता। अतः 'जीवन्मुक्ति' का अधिकारी 'ज्ञानी' पुरुष को ही कहना होगा। किन्तु वह भी संभव नहीं हो रहा है। क्योंकि शास्त्र के वचनों ने ज्ञानी पुरुष के लिये सभी कर्तव्यों का निषेध किया है।

यदि ज्ञानी पुरुष को 'जीवन्मुक्ति' का अधिकारी कहें तो उसे 'जीवन्मुक्ति' के साधनों को अवश्य करना होगा। अर्थात् उन साधनों का अनुष्ठान करना होगा। तब पूर्वोक्त निषेधक वचनों के साथ विरोध होगा।

किञ्च—देहाभिमान होने पर ही पुरुष, किसी कर्म का कर्ता हो सकता है, अन्यथा नहीं। ज्ञानी पुरुष तो 'देहाभिमानशून्य होता है। उस कारण वह 'कर्तृत्व' से रहित है। अर्थात् वह किसी भी कर्म का कर्ता नहीं हो सकता। अतः उसमें 'कर्तृत्व' न रहने से उस ज्ञानी पुरुष की प्रवृत्ति, जीवन्मुक्ति के साधनों के अनुष्ठान में हो ही नहीं सकती। इसलिये 'ज्ञानी पुरुष' को 'जीवन्मुक्ति' में अधिकार का होना संभव नहीं है। और अधिकार प्राप्त हुए बिना जीवन्मुक्ति के साधनों का अनुष्ठान करना भी संभव नहीं है।

अब 'फल' (प्रयोजन) के अभाव के कारण भी 'जीवन्मुक्ति' के अभाव को बता रहे हैं।

जीवन्मुक्ति को मानने वाले वादी से हम यह पूछ रहे हैं कि 'जीवन्मुक्ति' का 'फल' (प्रयोजन) क्या है ? क्योंकि किसी फल प्राप्ति के विना 'मन्दपुरुष' की किसी कार्य में प्रवृत्ति नहीं होती है, तब बुद्धिमान् पुरुष की प्रवृत्ति, विना प्रयोजन के जाने कैसे होगी ? इसलिये जीवन्मुक्ति के सम्पादनार्थ पुरुषप्रवृत्ति के निमित्त 'जीवन्मुक्ति' का कोई प्रयोजन (फल) अवश्य बताना होगा। अतः बताइये कि क्या उत्पन्न हुए आत्मज्ञान का रक्षण, उस जीवन्मुक्ति का प्रयोजन है, अथवा 'दुःखनाश' उसका प्रयोजन है ? अथवा 'स्वरूप सुख' का आविर्भाव होना उसका प्रयोजन है।

इन तीन विकल्पों में से प्रथम विकल्प का स्वीकार कर संभव नहीं है, क्योंकि 'तत्त्वमसि' आदि महावाक्यरूप प्रमाणों

---

१. बुद्ध्या विशुद्धयेत्यादिगीतायां बुद्धिरध्यवसाय इति भाष्यस्य व्याख्याने 'अध्यवसायो ब्रह्मात्मत्वनिश्चय' इति वदन्नानन्दगिरिस्वामिनोऽपि ज्ञानिने निष्ठोपायोपदेशं भगवतो मन्यते। निश्चयस्यापि संशयविपर्ययशून्यत्वं समिच्छन्ति। अत्र ज्ञानदार्ढ्यादार्ढ्याभ्यां प्रतिबद्धाप्रतिबद्धत्वाभ्यां वाऽविरोध उपपादनीयः। न च चित्तविश्रान्तिकामनानुपपत्तिः, क्षुधादिवत् सम्भवाद्भिक्षाटनादिवच्च तदुपायानुष्ठान सम्भवाद्। अत एव भोगकाले कदाचिन्मर्त्योऽस्मीत्यनुभूतिं स्वीचकाराचार्यो जीवन्मुक्तेव्रतरूपतामपवन् वस्तुस्थितिं विदधानः पञ्चदश्याम् (७.२४५–६)। किं च ज्ञाननिष्ठाप्राप्तेरितिकर्तव्यताविचारोऽयमिति न तर्केण निरसनीयः किन्तर्हि अनुष्ठेय इति। यस्त्वकर्तृत्वधीमान्न कुर्याद् न तं प्रति विधीयतेपीति।

निरंकुशकृतकृत्यत्वासंभवात् । न च—अकृतोपास्तेः विश्रान्तचित्तस्य ज्ञानमेव नास्ति इति—वाच्यम्; ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन सर्वसाधारणत्वात्, अन्यथा याज्ञवल्क्यकहोलादीनां तत्त्वज्ञानाभावप्रसंगात् । न चेष्टापत्तिः, तद्दृष्टान्तेनास्मदादेः कस्यापि ज्ञानसाधनश्रवणादौ प्रवृत्त्यभावप्रसंगात् । उदाहृतस्मृतेर्विश्रान्तचित्तज्ञानिविषयत्वात् । तस्मात् उत्पन्नब्रह्मसाक्षात्कारः चित्तविश्रान्ति कामयमानो विद्वत्सन्यासी जीवन्मुक्तिसाधनाभ्यासेऽधिकारीति मुक्तिविभागो युक्त इति संतोष्टव्यमायुष्मतेति ।। प्रथमोद्दिष्टां विदेहमुक्तिं निरूपयति—**तत्रेति** । तयोर्मध्य इत्यर्थः । तत्र सम्मतिमाह—**तदुक्तमिति** । "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति वाक्यं विषयः । तत्र ज्ञानिनो वर्तमानदेहपाते वासनावशात् जन्मान्तरं भवति न वेति संशयः । तत्र तत्त्वज्ञानिनो

●

से उत्पन्न होने वाला, तथा 'अज्ञान' की निवृत्ति करने में समर्थ (अज्ञान निवारक) जो 'आत्मज्ञान' है, उसका कोई 'बाधक' नहीं है । यदि कोई 'बाधक' होता तो उससे 'रक्षा' करने का प्रसङ्ग प्राप्त होता । अतः 'आत्मज्ञान' का रक्षण करना,—यह प्रयोजन नहीं कहा जा सकता ।

उसी प्रकार 'दुःखनाश' तथा 'सुखाविर्भाव' को भी जीवन्मुक्ति का 'प्रयोजन' नहीं कह सकते । क्योंकि वे दोनों ही 'आत्मज्ञान' से प्राप्त होते हैं । जो 'वस्तु', जिस साधन से प्राप्त होती है, वह वस्तु, उसी साधन का 'फल' कहलाती है । किसी अन्य साधन का फल, नहीं होती । दुःखनाश, तथा 'सुख' का आविर्भाव—ये दोनों 'आत्मज्ञान' के ही फल हैं, उस जीवन्मुक्ति के फल नहीं हैं । एवं च 'प्रमाण, स्वरूप, लक्षण, साधन, अधिकारी और प्रयोजन'—इन पाँचों के न रहने से 'जीवन्मुक्ति' को स्वीकार करना व्यर्थ ही है । अतः 'आत्मज्ञान' से एकमात्र 'विदेहमुक्ति' ही होती है, 'जीवन्मुक्ति' नहीं इस प्रकार कुछ वावदूकों का कथन है ।

उनका निराकरण करने की इच्छा से ग्रन्थकार मुक्ति का विभाग बता रहें हैं—**वह 'मुक्ति' दो प्रकार की होती है—(१) विदेहमुक्ति और (२) जीवन्मुक्ति ।**

यद्यपि जीवन्मुक्ति के अनन्तर ही विदेहमुक्ति होती है, उस कारण प्रथमतः जीवन्मुक्ति को ही बताना उचित है, तथापि उसके विवादग्रस्त रहने से उसको सविस्तर कहना होगा । और विदेहमुक्ति में किसी प्रकार का विवाद न रहने से उसके बताने में विशेष प्रयास नहीं करना पड़ेगा इसलिये परिगणन में पहले विदेहमोक्ष कहा । आगे चलकर शीघ्र ही जीवन्मुक्ति के स्वरूप-प्रमाण-साधन-फल का निरूपण करेंगे । उस पर जो आक्षेप किये गये हैं, उनका समाधान भी तत्तत् निरूपण के प्रसङ्ग पर किया जायगा ।

जीवन्मुक्ति प्राप्त करने का 'अधिकारी' कोई नहीं है'—यह कहना उचित नहीं है । क्योंकि चित्त की विश्रान्ति की की इच्छा रखने वाला ब्रह्मसाक्षात्कारसम्पन्न विद्वत्संन्यासी पुरुष, 'जीवन्मुक्ति' प्राप्त करने का अधिकारी है ।

शंका—अविद्या रहित और ब्रह्मसाक्षात्कार हो जाने से अभिमान शून्य हो जाने के कारण उस ज्ञानी पुरुष में 'कर्तृत्व' का अभाव रहने से उसको उस जीवन्मुक्ति का अधिकारी कैसे कह सकते हैं ? कर्तृत्व के न रहने से उसका तो जीवन्मुक्ति की प्राप्ति में अधिकार ही नहीं है ।

समा०—ब्रह्मज्ञान (ब्रह्मसाक्षात्कार) के होने से आवरण शक्ति विशिष्ट अज्ञान का नाश हो जाने पर भी प्रारब्ध कर्म के अनुसार 'लेश' शब्दवाच्य विक्षेपशक्तिविशिष्ट अज्ञान का स्वीकार तो सभी ने किया है । अतः बाधिताऽनुवृत्ति से विद्वान् ज्ञानी पुरुष में भी देहाभिमान के रहने से उसमें 'कर्तृत्व' की संभावना की जा सकती है ।

शंका—'तस्य कार्यं न विद्यते', 'ज्ञानामृतेन तृप्तस्य'—इत्यादि स्मृति के द्वारा कृतकृत्य हुए ज्ञानी पुरुष के लिये 'कर्तव्य' का निषेध किया है । अतः उसके लिये कोई कर्तव्य, शेष नहीं है, जो उसे करना हो । तब उसमें 'कर्तृत्व' की संभावना कैसे की जायगी ?

समा०—उक्त आशंका ठीक नहीं है, क्योंकि जिसने उपासना नहीं की है उस विद्वान् ज्ञानी पुरुष के चित्त में विश्रान्ति नहीं होती, अर्थात् उसका चित्त 'अविश्रान्त' रहता है । उस कारण उसके लिए अभी 'कर्तव्य' करना 'शेष' है । उस पुरुष में अभी निरंकुश 'कृतकृत्यता' नहीं' हो पाई है ।

शङ्का—उपासनारहित होने में अविश्रान्त चित्त वाले पुरुष को 'ज्ञान' ही नहीं हो पाया है, वह अज्ञानी ही है—यही क्यों न माना जाय ?

अन्ये तु भाविशरीराऽनारम्भो विदेहमुक्तिः ।

●

ज्ञानेनाज्ञाने निवृत्तेऽपि यथा वासनावशात् प्रारब्धभोगः तथा भोगेन प्रारब्धक्षये वर्तमानदेहपाते वासनाबलादपूर्वदेहान्तरप्राप्तिलक्षणं जन्म भवत्येवेति प्राप्ते—अभिधीयते—**भोगेन** सुखदुःखानुभवेन **इतरे** प्रारब्धपुण्य पापे **क्षपयित्वा** नाशयित्वा । ब्रह्म **सम्पद्यते** अखण्डैकरसानन्दब्रह्मात्मनाऽवतिष्ठते, न देहान्तरप्राप्तिलक्षणं जन्म प्राप्नोति; कारणाभावात् तथाहि—ज्ञानेनाज्ञानसञ्चितकर्म्मणां नष्टत्वादागामिकर्मणामश्लेषात् भोगेन प्रारब्धकर्मणि प्रतिबन्धे नष्टे सवासनस्य विक्षेपशक्तिमदज्ञानस्यापि नष्टत्वात् ज्ञानी देहान्तरप्राप्तिलक्षणं जन्म न प्राप्नोति, किन्तु ब्रह्मैव सम्पद्यते । तथा च श्रुतिः—"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति ॥ १ ॥

ननु—अनेकजन्मप्रदप्रारब्धकर्मणि सति प्रथमजन्मनि तत्त्वज्ञानोत्पत्तौ जन्मान्तरं भवति न वा । आद्ये, ज्ञानस्य पाक्षिकत्वप्रसङ्गः । द्वितोये, "नाभुक्तं क्षीयते कर्म" इति शास्त्रविरोधः प्रसज्येतेति—चेत्,

●

समा०—'ज्ञान' तो 'प्रमाणवस्तु परतन्त्र' रहता है, उस कारण वह, 'सर्वसाधारण' होता है । अन्यथा याज्ञवल्क्य, कहोला आदिकों को भी 'तत्त्वज्ञान' नहीं था—यह कहना पड़ेगा । किन्तु ऐसा कहना, किसी को भी अभीष्ट नहीं होगा । अर्थात् कोई भी व्यक्ति उसे 'इष्टापत्ति' नहीं कहेगा । अन्यथा उसी दृष्टान्त से हम में से किसी की भी ज्ञानसाधनभूत श्रवण आदि में प्रवृत्त नहीं हो पाएगी । अतः पूर्वोदाहृत 'स्मृति' को 'विश्रान्तचित्त' वाले ज्ञानी पुरुष से सम्बन्धित समझना चाहिए । एवं च उत्पन्न ब्रह्मसाक्षात्कार से सम्पन्न और चित्त में विश्रान्ति की चाहनेवाला विद्वत्संन्यासी पुरुष, 'जीवन्मुक्ति' के साधनों के अनुष्ठान का अधिकारी है । इसी अभिप्राय से 'मुक्ति' का विभाजन करना उचित ही है ।

अब प्रथमतः कथित 'विदेह मुक्ति' को बता रहे हैं—

अर्थात् 'सूचीकटाहन्याय' से पहले 'विदेह मुक्ति' का निरूपण करना ही उचित प्रतीत हो रहा है ।

'अहं ब्रह्मास्मि'—इत्याकारक तत्त्वज्ञान—हुए पुरुष का भी भोग के द्वारा प्रारब्धकर्म जब नष्ट हो जाता है, तब उसके विद्यमान शरीर का जो नाश होता है, उसी को 'विदेह मुक्ति' का निरूपण अपने सूत्र में इस प्रकार किया है—कि ज्ञानी पुरुष सुख दुःख के अनुभवरूप भोग से पुण्य-पापरूप प्रारब्धकर्म का नाश करके जब शरीर नष्ट (पात) हो जाता है, तब वह अखण्ड-एकरस-आनन्द ब्रह्मरूप में स्थित होता है । पुनः उसे 'जन्म' को प्राप्ति नहीं होती । क्योंकि उस ज्ञानी पुरुष का उसे प्राप्त हुए आत्मसाक्षात्कार से 'अज्ञान' तथा 'संचितकर्म' नष्ट हो जाता है, और उस 'आत्मसाक्षात्कार' के प्रभाव से उस ज्ञानी पुरुष को क्रियमाण पुण्य-पापरूप कर्म का स्पर्श तक नहीं हो पाता । और प्रतिबन्धरूप प्रारब्धकर्म का 'भोग' से नाश होने पर वासनासहित विक्षेपशक्तिविशिष्ट 'अज्ञान' भी नष्ट हो जाता है । उस कारण 'जन्म' की प्राप्ति करानेवाले 'संचितकर्म' रूप कारण के अभाव में उस ज्ञानी पुरुष को पुनः जन्म की प्राप्ति नहीं होती । इस वर्तमानशरीर का पात (नाश) होने पर वह ज्ञानी पुरुष, 'निर्विशेष ब्रह्मरूप' ही हो जाता है । विदेहमुक्ति के इस स्वरूप को "तस्य तावदेवचिरं यावन्न विमोक्ष्येऽथ विमोक्ष्येऽथ सम्पत्स्ये'—इस श्रुति ने भी बताया है) ।

इस विषयवाक्य को लेकर विचार किया जा रहा है । यहाँ पर संशय यह हो रहा है 'ज्ञानी पुरुष का वर्तमान देह का पतन (मृत्यु) होने पर वासनावशात् क्या 'जन्मान्तर (पुनर्जन्म) होता है अथवा नहीं होता है ?

यह संशय होने पर पूर्वपक्षी का कहना यह है कि 'ज्ञान' से तत्त्वज्ञानी का 'अज्ञान' निवृत्त होने पर भी जैसे वासनावशात् उसका 'प्रारब्धभोग' भुगतना होता है, वैसे ही 'भोग' से 'प्रारब्धक्षय' होने वर्तमानदेह का पात (मृत्यु) जब होता है, तब वासनाबलात् उसका अपूर्वदेहान्तरप्राप्तिरूप जन्म, भी अवश्य होता है—यह पूर्वपक्ष उपस्थित होनेपर उसके समाधानार्थ भगवान् सूत्रकार ने उपर्युक्त सूत्र से इस श्रुति को दोनों मोक्षों का प्रतिपादक बता दिया है ।

उस कारण श्रुति-सूत्रादिप्रमाणों से 'विदेहमुक्ति' के होने में कोई विवाद ही नहीं है ॥ १ ॥

शंका—अनेक जन्म प्राप्त करानेवाला 'प्रारब्धकर्म', जिनका विद्यमान रहता है, उन पुरुषों को प्रथम जन्म में 'तत्त्वज्ञान' (आत्मसाक्षात्कार) यदि हो जाता है, तो उनका पुनः 'दूसरा जन्म' होता है, अथवा नहीं ?

सा च तत्त्वज्ञानोत्पत्तिसमकालेव। ज्ञानेनाऽज्ञाने निवृत्ते सञ्चितकर्मणां नाशादागामिकर्मणामश्लेषाद्भोगेन प्रारब्धक्षयाच्छरीरान्तरान्तराऽऽरम्भकस्याऽसम्भवात् भाविशरीराऽनारम्भस्य ज्ञानसमकालत्वं युज्यते।

तदुक्तम्— "तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः॥"

*

अत्र केचित्—यथा "यावदधिकारमवस्थितिराधिकारिकाणामि"त्यत्र देवादीनां देहान्तरप्राप्तावपि तत्त्वज्ञानस्य न बाधोऽस्ति स्वधिकारावसाने मोक्षश्च भवतीत्यभ्युपगतम्, तथात्रापि प्रमाणबलात् तत्त्वज्ञानोत्पत्तावपि प्रथमजन्मनि प्रारब्धकर्मप्राबल्येन जन्मान्तरं भवति अज्ञानस्य बाधश्च भवति प्रारब्ध फलस्य ज्ञानाविरुद्धत्वात्। अन्यथा अधिकारिपुरुषाणामपि तथात्वप्रसङ्गः। ततश्च ब्रह्मभावलक्षणो मोक्षोऽपि न विरुध्यते। अतो ज्ञानस्य न पाक्षिकत्वम्, न वा "नाभुक्तं क्षीयते कर्मेति" शास्त्रविरोधः इति—वदन्ति॥

अपरे तु—"यस्तु विज्ञानवान् भवत्यमनस्कस्सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते॥"
"य एवं वेत्ति पुरुषं प्रकृतिञ्च गुणैः सह। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥"
इत्यादिश्रुतिस्मृतिभ्यां तत्त्वज्ञानिनो जन्मप्रतिषेधात् तादृशप्रारब्धकर्मणि सति प्रथमजन्मनि श्रवणादौ सत्यपि ज्ञानं नोत्पद्यते, किन्तु चरमजन्मनि तत्त्वज्ञानमुत्पद्यते। तदुक्तम्—

"यस्येदं जन्म पाश्चात्यं तस्मिन्नेव महामते। विशन्ति विद्या विमला मुक्ता वेणुमिवोत्तमम्। इति।

कालिदासेनाप्युक्तम्—

"जन्तोरपश्चिमतनोः सति कर्मसाम्ये निश्शेषपाशपटलच्छिदुरा निमेषात्।
कल्याणि! देशिककटाक्षसमाश्रयेण कारुण्यतो भवति सा भववेददीक्षा॥" इति।

सर्वथापि, प्रारब्धक्षये ज्ञानी ब्रह्मात्मनाऽवतिष्ठत इति सिद्धमिति चतुर्थे निरूपितम्।

●

यदि प्रथम पक्ष का स्वीकार करते हैं तो 'तत्त्वज्ञान' को पाक्षिक कहना होगा, अर्थात् 'आत्मसाक्षात्कार', को 'जन्म निवृत्ति' का नियत हेतु, नहीं कहा जायगा।

यदि द्वितीय पक्ष को स्वीकार करते हैं, तो—फल भोगे विना अनन्त कल्पों में भी कर्म क्षीण नहीं होता—इस वचन के साथ विरोध होगा।

समा०—उक्त शंका का समाधान कुछ विद्वान् इस प्रकार करते हैं—अर्थात् सृष्टि के आरंभकाल में जगत् का व्यवहार चलाने के लिये परमेश्वर ने नियुक्त किये हुए जो देव आदि अधिकारी हैं, उनका जितने समय तक अधिकार रहता है, उतने ही काल तक उनकी स्थिति रहती है। उस काल (समय) के बीच में ही यदि किसी के 'वर' अथवा 'शाप' के कारण उस अधिकारी पुरुष को अन्यजन्म की प्राप्ति होने पर भी उसको हुए 'आत्मज्ञान' की निवृत्ति—नहीं होती। तथा अधिकारकाल के समाप्त होने पर अर्थात् स्थितिकाल के समाप्त होनेपर उसे 'मोक्ष' भी अवश्य प्राप्त होता है। एवंच जिस पुरुष को प्रथम जन्म में 'तत्त्वमसि' इत्यादि महावाक्य के प्रभाव से आत्मसाक्षात्कार हो जाता है। तदनन्तर उस प्रबल प्रारब्धकर्मवशात् जन्मान्तर की प्राप्ति होने पर भी उसके आत्मसाक्षात्काररूप ज्ञान की निवृत्ति नहीं होती। क्योंकि उस प्रारब्धकर्म का जो 'फल' है, वह उस आत्मज्ञान का विरोधी नहीं है।

यदि वह प्रारब्धकर्मफल, उस आत्मज्ञान का विरोधी होता, तो देवता जैसे अधिकारी—पुरुषों के आत्मज्ञान की भी उस प्रारब्धकर्म के फल निवृत्ति होनी चाहिये। उस देवता आदि अधिकारी पुरुष का पूर्व हुए आत्मज्ञान से ही ब्रह्मभावरूप मोक्ष भी निश्चित रूप से हो जाता है। अतः 'आत्मज्ञान' को 'पाक्षिक' (वैकल्पिक) भी नहीं कह सकते। इस प्रतिपादित व्यवस्था के पूर्वोक्त वचन के साथ कोई विरोध भी नहीं होता।

कुछ अन्य विद्वान् उक्त आशंका का—समाधान इस प्रकार से करते हैं—उनका कहना है कि अनेक स्मृति वचनों से ज्ञानी पुरुष के जन्म होने का निषेध प्रतीत हो रहा है। उस कारण यह स्पष्ट हो रहा है कि जिस पुरुष का प्रारब्धकर्म, उसकी अनेक जन्म प्राप्ति कराने का कारण है उस पुरुष को प्रथम जन्म में श्रवणादि उपायों से आत्मज्ञान उत्पन्न नहीं हुआ है, अपितु—अन्तिम जन्म में ही उसे आत्मज्ञान होना है।

इति, एवं वर्णयांचक्रुः।

श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिर्जीवन्मुक्तिः।

भोगप्रदप्रारब्धप्राबल्येपि योगाऽभ्यासेन तदभिभवात्, प्रारब्धाऽपेक्षया योगाऽभ्यासस्य प्रबलत्वात्; अन्यथा पुरुषप्रयत्नवैयर्थ्येन चिकित्साशास्त्रमारभ्य मोक्षशास्त्रपर्यन्तस्याऽनारम्भप्रसङ्गात्। अतएव पुरुषप्रयत्नस्य साफल्यमाह वसिष्ठः—

"आ बाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः। गुणैः पुरुषयत्नेन सोऽर्थः सम्पाद्यते हितः॥" इति।

विदेहमुक्तौ पक्षान्तरमाह—**अन्येत्विति**। भाविशरीरानारम्भलक्षणाया विदेहमुक्तेर्ज्ञानसमकालत्वं कथमित्याशङ्क्याह—**ज्ञानेनेति**। तत्र सम्मतिमाह—**तदुक्तमिति**। क्रमप्राप्तां जीवन्मुक्तिं निरूपयति—**श्रवणेति**। जीवदवस्थायामिति शेषः। **अन्यथा** विदेहमुक्तावतिव्याप्तिः स्यात्। **यदुक्तम्**—भोगप्रापकप्रारब्धकर्मणि जाग्रति सति कर्तृत्वादिप्रतिभासस्यावश्यकत्वात्तस्य साक्षिणः सकाशात् तत्त्वज्ञानेन निवारितत्वात् जलगतद्रवत्ववदन्तःकरणनिष्ठस्य वारयितुमशक्यत्वात् वारणे प्रारब्धभोगायोगात् कर्तृत्वादिप्रतिभासनिवृत्तिः जीवन्मुक्तिरित्यसंगतम्—**इति**, तत्राह—**भोगेति**। तत्त्वज्ञानापेक्षया यथा प्रारब्धं प्रबलं तथा प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात्। तेन प्रारब्धभोगानुकूलकर्तृत्वादिप्रतिभासस्यात्यन्तिकनिवृत्त्यभावे तदभिभवो भवत्येव, तथाच न तु दोष इति भावः। विपक्षे दण्डमाह—**अन्यथेति**। न च—योगाभ्यासेन प्रारब्धप्रतिबन्धे "नाभुक्तं क्षीयते कर्म" इति शास्त्रविरोध इति—**वाच्यम्**; असति विरोधिनि तदुपपत्तेः। अन्यथा

"जन्मान्तरकृतं पापं व्याधिरूपेण बाधते। तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः"॥

इति शास्त्रविरोधस्तत्रापि प्रारब्धकर्मण्यत्यन्तभक्तस्य प्रसज्येत्! तस्मात् प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात् तेन कर्तृत्वादिप्रतिबन्धप्रतिभासाभिभवरूपा जीवन्मुक्तिः सिध्यतीति न कोऽपि दोष इति भावः।

प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वे प्रमाणमाह—**अत एवेति**। पुरुषप्रयत्नो द्विविधः—अशास्त्रीयः शास्त्रीयश्चेति तत्र पुरुषोऽशास्त्रीयेण पुंयत्नेन नरकं प्राप्नोति; तस्य रागद्वेषपूर्वकत्वात्। द्वितीयेन बाल्यमारभ्य शास्त्रसत्संगादिभिरभ्यस्तैर्गुणैः शान्त्यादिभिर्युक्तेन पुरुषप्रयत्नेन परमपुरुषार्थो हितः संप्राप्यते। तथाचोक्तम्—

"उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतम्। तथोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम्॥"

इति।

•

ब्रह्मर्षि वसिष्ठ ने भी यही कहा है कि—

हे महामतिशालिन् राम! जिस पुरुष का जो—अन्तिम जन्म रहता है, उसी पुरुष में यह निर्मल ब्रह्मविद्या प्रवेश करती है, अर्थात् उसे ही यह निर्मल ब्रह्मविद्या प्राप्त होती है। जैसे उत्तम जाति के वेणुओं (बाँसों) में ही मोती (मुक्ताफल) प्रवेश करते हैं।

महाकवि कालिदास ने भी इस बात का समर्थन किया है। निष्कर्ष यह है कि सर्वथापि प्रारब्धक्षय होने पर ज्ञानीपुरुष ब्रह्मभाव से ही स्थित रहा है।

कुछ विद्वानों का कहना है कि 'विदेह मुक्ति' का स्वरूप यह है—**जन्मान्तर की प्राप्ति न होना अर्थात् भावी शरीर की अनारम्भकता को ही 'विदेहमुक्ति' 'ज्ञान' की उत्पत्ति के समकाल में ही होती है। अर्थात् जिस काल में आत्मज्ञान होता है; उसी काल में 'विदेह मुक्ति' होती है। क्योंकि आत्मज्ञान से 'संचितकर्म' का भी नाश हो जाता है। और संचित कर्म ही 'भावी शरीर' का आरंभक होता है। उसकारण 'आत्मज्ञान' की उत्पत्ति के समय ही भावी शरीर का 'अनारम्भकत्व' रूप 'विदेह-मुक्ति' का होना उपपन्न हो जाता है। इसी अभिप्राय को अन्य ग्रन्थों में भी कहा गया है—कि प्रयाग-काशी आदि तीर्थ क्षेत्र में अथवा चाण्डाल के घर में देहत्याग करनेवाला तथा सन्निपातादिदोषवशात् 'ब्रह्मात्मस्मृति' से शून्य रहता हुआ भी ज्ञानी पुरुष, मोक्ष (कैवल्य) को ही प्राप्त होता है। क्योंकि वह तत्त्वज्ञानी पुरुष, आत्मज्ञान के समकाल ही 'मुक्त' हो चुका है तथा समस्त शोकों से रहित हो चुका है।** इस प्रकार विदेह मुक्ति का अभी तक निरूपण किया गया।

अब 'जीवन्मुक्ति' का निरूपण करते हैं—

वेदान्तश्रवण आदि के करने से ब्रह्मसाक्षात्कार सम्पन्न विद्वत्संन्यासी को 'जीवदवस्था' में 'कर्तृत्वभोक्तृत्वादिरूप समस्त बन्ध प्रतीति की जो निवृत्ति होती है, उसी को 'जीवन्मुक्ति' कहते हैं।

तत्र श्रुतिस्मृतीतिहासपुराणवचनानि प्रमाणानि ।
विमुक्तश्च विमुच्यते" इति श्रुतिः ।
"यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते । यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते ॥" इति वासिष्ठे ।

●

एवं जीवन्मुक्तिस्वरूपं निरूप्येदानीं तस्यां प्रमाणमाह"—**तत्रेति** । जीवन्मुक्तिः सप्तम्यर्थः । न च—श्रुत्यादीनां ब्रह्मण्येव तात्पर्यात् कथं तत्र प्रामाण्यमिति—वाच्यम्; ब्रह्मणि महातात्पर्येऽपि देवताधिकरणन्यायेन मानान्तराविरोधेऽन्यत्रावान्तर-तात्पर्ये[1] बाधकाभावात् । अन्यथा "ब्रह्म वेद ब्रह्मैव भवति" "श्रोतव्यो मन्तव्यः" इत्यादीनामप्रामाण्यं प्रसज्येत । तस्मात् यत्किञ्चिदेतत् । कठवल्लीवाक्यमुदाहरति—**विमुक्तश्च विमुच्यते इति** । यद्यपि ज्ञानात् पूर्वमपि रागादिभिर्मुक्तः; "शान्तो दान्त" इत्यादिश्रुत्या शमदमाद्युपेतस्य श्रवणाद्यधिकारावगमात्, तथापि ज्ञानात्पूर्वं रागद्वेषातिमुक्तिर्यत्नसाध्या, ज्ञानोत्तरन्तु योगाभ्यासेन वासनाक्षयमनोनाशयोर्दृढतरं सम्पन्नत्वेनाभासरूपस्य रागादेरप्यसम्भवात् रागद्वेषादिमुक्तिः स्वतः सिद्धा भवतीत्यतो **विमुक्तः** विशेषेण मुक्तः आत्यन्तिकरागद्वेषादिनिवृत्तिमानित्यर्थः । एतादृशो जीवन्मुक्त उच्यते । भोगेन प्रारब्धे कर्मणि क्षीणे वर्तमानदेहपाते भाविबन्धात् विशेषेण मुच्यते । यद्यपि प्रलयकाले कञ्चित्कालं भाविबन्धान्मुच्यते, तथापि नात्यन्तिकी तत्र मुक्तिरिति विशेषेण मुच्यत इत्युक्तम् । ज्ञानान्तरभोगेन प्रारब्धकर्मक्षये वर्तमानदेहपाते पुनर्देहान्तरसम्बन्धाभावात् । तस्मादियं श्रुतिः तत्त्वज्ञानोत्तरं विदेहमुक्तिविलक्षणायां कर्तृत्वादिबन्धप्रतिभासनिवृत्तिरूपायां जीवनन्मुक्तौ प्रमाणम् । तथा "तद्यथाऽहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरं शेते" "अथायमशरीरोऽमृतः" "प्राणो ब्रह्मैव तेजं एवे"त्यादिश्रुतिस्तत्र प्रमाणत्वेनोदाहर्तव्या ।

●

शंका—'जीवन्मुक्ति' का उक्त लक्षण, संगत प्रतीत नहीं हो रहा है । क्योंकि भोग देने वाले 'प्रारब्ध कर्म' के विद्यमान रहते 'ज्ञानी पुरुष' को भी उन कर्तृत्वादि बन्धों की प्रतीति अवश्य ही होगी । क्योंकि उन कर्तृत्व, भोक्तृत्व की प्रतीति हुए बिना उस प्रारब्ध कर्म के फल का भोग होना संभव नहीं है ।

यद्यपि वह 'कर्तृत्वादि बन्ध', साक्षीभूत आत्मा का 'ज्ञान' होने से ही निवृत्त हो चुका है, तथापि जल के 'द्रवत्व' धर्म के समान अथवा अग्नि के उष्णत्व धर्म के समान वह 'कर्तृत्वादि बन्ध' रूप धर्म तो 'अन्तःकरण' का स्वाभाविक धर्म है । उस कारण 'अन्तःकरण' से उसका निवृत्त होना कदापि शक्य नहीं है । अतः 'कर्तृत्वादि समस्त बन्ध की निवृत्ति' को 'जीवन्मुक्ति' का लक्षण बताना उचित नहीं है ।

समा०—जैसे 'तत्त्वज्ञान' की अपेक्षा 'प्रारब्धकर्म' प्रबल होता है, वैसे ही उस प्रारब्धकर्म की अपेक्षा 'योगाभ्यास' प्रबल होता है । यद्यपि 'योगाभ्यास' से प्रारब्धभोगानुकूल 'कर्तृत्वादिबन्धप्रतीति' की 'आत्यन्तिकनिवृत्ति' नहीं होती, तथापि 'योगाभ्यास' के द्वारा उस 'कर्तृत्वादि बन्ध प्रतीति' का 'अभिभव' तो अवश्य होता ही है । उस कारण पूर्वोक्त 'जीवन्मुक्तिलक्षण' संगत है । उसे असंगत कहना उचित नहीं है ।

यदि प्रारब्धकर्म की अपेक्षा 'योगाभ्यास' को प्रबल न माना जाय तो 'पुरुषप्रयत्न' ही व्यर्थ हो जायगा । पुरुषप्रयत्न के व्यर्थ होने पर 'चिकित्साशास्त्र' से लेकर 'मोक्षशास्त्र' तक सभी शास्त्रों का आरंभ निष्फल हो जायगा ।

शंका—योगाभ्यास से 'प्रारब्धकर्म' प्रतिबन्ध मानने पर बिना भोगे कर्म की असमाप्ति बताने वाले वचन का विरोध उपस्थित होगा ।

समा०—'प्रारब्धकर्म' के विरोधी जो 'योगाभ्यास' हों, उनके अभाव में ही अर्थात् उनके विद्यमान न रहने पर ही उक्त वचन, सार्थक होता है । अभिप्राय यह है कि जो 'योगाभ्यास', जिस 'प्रारब्ध कर्म' का प्रतिबन्धक नहीं है, वह 'प्रारब्धकर्म' तो भोग के विना निवृत्त नहीं होगा । यदि किसी भी उपाय से जिस प्रारब्धकर्म का प्रतिबन्ध नहीं हो पाता, उस प्रारब्धकर्म में अत्यन्त श्रद्धा रखने वाले वादी को भी पूर्व जन्म में किये हुए पापकर्म, इस जन्म में ज्वरादिव्याधि के द्वारा दुःख देते हैं । उनकी शान्ति, औषधिसेवन, दान, जप, होम, अर्चना आदी से की जाती है । इत्यादि—शास्त्रवचन का विरोध होगा । अतः यह मानना होगा कि 'योगाभ्यास' से 'प्रारब्धकर्म' का अभिभव होना संभव है ।

---

१. अवान्तरेति महतोऽविरोधस्पष्टीकरणायाऽवान्तरस्य महद्विरोधायोगात्तच्छेषतयैव चोपयोगात् । एवं चावान्तरप्रकरणसिद्धस्य महदर्थ-तयैवावस्थानमिति स्थितिः । यथाहुराचार्याः 'प्रधानबुद्धिफलत्वाऽविरोधेनाऽर्थान्तरबुद्धिफलत्वम् अवान्तरतात्पर्यम्'; 'निरुपाधिकशेषि-बुद्धिफलत्वं महातात्पर्यम्' इति निबन्धाख्यप्रमाणमालाटीकायां प्रकटार्थकृतः ।

"प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥"
इति गीतायाम् ।

•

तत्र वसिष्ठवचनमप्युदाहरति—**यो जागर्तीति । यः** ब्रह्मविदिन्द्रियाणामुपरमाभावा**ज्जागर्ति** जाग्रदवस्थामनुभवति । इन्द्रियैरर्थग्रहणाभावा**त्सुषुप्तिस्थः** । अतएवेन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणजाग्रद्यस्य न विद्यते, **यस्य निर्वासनः** शुभाशुभ-वासनारहितो **बोधः** स्वस्वरूपाखण्डैकरसानन्दानुभवः स जीवन्मुक्त उच्यते इत्यर्थः ।

भगवद्गीतासु द्वितीयाध्यायगतस्थितप्रज्ञलक्षणगतश्लोकमुदाहरति—**प्रजहातीति । यदा** यस्यामवस्थायाम् **मनोगतान्** त्रिप्रकारकान् बाह्याभ्यान्तरवासनामात्ररूपान् कामान् **प्रजहाति** सर्वात्मना परित्यजति । **आत्मनि** प्रत्यग्भूताखण्डैकरसानन्दे **आत्मना** योगाभ्यासपाटवेन वशीकृतमनसा वृत्तिरहितान्तःकरणेन स्वस्वरूपानन्दमनुभवन् **संतुष्टः तदा** तस्यामवस्थायां स्थिता प्रतिष्ठिता प्रज्ञायस्य स तथोक्तः ।

•

किञ्च—'प्रारब्धकर्म' की अपेक्षा 'योगाभ्यासादि शास्त्रीय प्रयत्न' की प्रबलता भगवान् वसिष्ठ ने भी बताई है—

"आबाल्यादलमभ्यस्तः शास्त्रसत्सङ्गमादिभिः ।
गुणैः पुरुषयत्नेन सोऽर्थः सम्प्राप्यते हितः ॥"

'पुरुष-प्रयत्न' दो प्रकार का होता है । एक 'अशास्त्रीय' और दूसरा 'शास्त्रीय' । श्रुति-स्मृति आदि के द्वारा जिसका निषेध किया गया हो, उसे 'अशास्त्रीय' प्रयत्न कहते है । जैसे—चोरी, हिंसा, आदि । और श्रुति-स्मृति आदि के द्वारा विधान किया हुआ 'प्रयत्न' शास्त्रीय कहलाता है । जैसे—यज्ञ, दान, जप, होमादि । अशास्त्रीय पुरुष प्रयत्न से मनुष्य, नरकगामी होता है । **वसिष्ठ जी ने कहा है कि—बाल्यावस्था से किये गये अध्यात्मशास्त्र के सत्समागम के अभ्यास से शान्त-दान्त आदि गुणों से युक्त शास्त्रीय पुरुष प्रयत्न से मनुष्य, मोक्षरूप परमपुरुषार्थ को प्राप्त कर लेता है ।**

इस विवेचन से निष्कर्ष यही निकला कि योगाभ्यास रूप शास्त्रीय प्रयत्न से 'प्रारब्धकर्म' का अभिभव हो सकता है । अतः पूर्वोक्त 'कर्तृत्वादिबन्ध प्रतीति की निवृत्ति' रूप 'जीवन्मुक्ति' का लक्षण, निर्दुष्ट है ।

इस प्रकार 'जीवन्मुक्ति' के स्वरूप का निरूपण कर दिया गया । अब उस जीवन्मुक्ति के विषय में प्रमाण बता रहे हैं—**जीवन्मुक्ति के होने में श्रुति-स्मृति, इतिहास, पुराण आदि अनेकानेक वचन, प्रमाण हैं ।**

शंका—उपर्युक्त श्रुति आदिकों का 'ब्रह्म' में ही तात्पर्य रहने से जीवन्मुक्ति के विषय में उनको प्रमाण कैसे कहा जायगा ?

समा०—आप ठीक कह रहे हैं, तथापि श्रुत्यादिकों का महातात्पर्य 'ब्रह्म' में रहने पर भी देवताधिकरण न्याय से किसी अन्य प्रमाण का विरोध न रहने पर अन्यत्र अवान्तरतात्पर्य मानने में कोई बाधक नहीं बन सकता । अन्यथा "ब्रह्म वेद-ब्रह्मैव भवति", "श्रोतव्यो मन्तव्यः"—आदि वचनों को अप्रमाण कहना पड़ेगा । अतः आपकी शंका, अविचारित रमणीय ही है ।

जीवन्मुक्ति के लिये कठवल्ली का वाक्य प्रस्तुत करते हैं—**"विमुक्तश्च विमुच्यते" अर्थात् जीवित काल में मुक्त ही मरने पर भी मुक्त होता है ।** 'शान्तो दान्त'—इत्यादि श्रुति से 'शम-दमादि' गुणों से सम्पन्न पुरुष को ही 'श्रवण' आदि करने में अधिकार बताने से यद्यपि तत्त्वज्ञान के पूर्व से हो वह पुरुष, 'रागादि' कों से मुक्त हो गया है, तथापि 'तत्त्वज्ञान' के पूर्व जो 'रागद्वेषादिमुक्ति' होती है, वह प्रयत्न साध्य होती है । और तत्त्वज्ञानोत्तर तो योगाभ्यास के द्वारा 'वासनानाश' और 'मनोनाश' दृढ़तर हो जाने से राग-द्वेषादिका आभास तक होना संभव नहीं हैं, उस कारण 'राग-द्वेषादि' से मुक्ति तो 'स्वतः सिद्ध' हो जाती है, उसके लिये प्रयत्न को आवश्यकता नहीं है । अतः 'विमुक्त' का अर्थ, होगा 'विशेषेणमुक्तः' अर्थात् 'आत्यन्तिक राग-द्वेषादि-निवृत्तिमान्' 'पुरुष' जो हो, उसे 'जीवन्मुक्त' कहा जाता है । 'भोग' के द्वारा 'प्रारब्धकर्म' के क्षीण होने पर 'वर्तमान देहपात' जब होता है, तब 'भावी बन्ध' (भविष्यत्कालीन बन्ध) से विशेषतया मुक्त हो जाता है । यद्यपि 'प्रलयकाल' में भी कुछ समय तक के लिये 'भावी बन्ध' से मुक्त रहता है, तथापि वह 'मुक्ति' आत्यन्तिकी नहीं है, इसलिये 'विशेषेण मुच्यते' कहा है । क्योंकि

"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥"

●

प्रज्ञा द्विधा स्थिराऽस्थिरा चेति। जन्मान्तरीयपुण्यपुञ्जपरिपाकेनाकाशफलपातन्यायेन तत्त्वमस्यादिवाक्यश्रवणमात्रेण ब्रह्मात्मैक्यगोचरमहं ब्रह्मास्मीतिज्ञानमुत्पद्यते, तत्र गृहकृत्यादिव्यासंगेन पुनर्विस्मर्यते। यद्वा पुनर्योगाभ्यासेनात्यन्तं वशीकृतचित्तस्य जारानुरक्तायाः जारमिव बुद्धिस्तत्त्वमेव निरन्तरं धावति सेयं स्थिरप्रज्ञा। एतदभिप्रायेणोक्तं वसिष्ठेन—

"परव्यसनिनी नारी व्यग्रापि गृहकर्मणि। तदेवाऽऽस्वादत्यन्तः परसङ्गरसायनं ॥
एवं तत्त्वे परे शुद्धे विश्रान्तिमागतः। तदेवास्वादयत्यन्तः बहिर्व्यवहरन्नपि ॥ इति।

अयं स्थिरप्रज्ञ एव जीवन्मुक्त इत्यर्थः। तत्र द्वादशाध्यायवचनमप्युदाहरति—अद्वेष्टेति।

●

तत्त्वज्ञान होने के बाद, 'भोग' के द्वारा 'प्रारब्धकर्म' का क्षय होने पर जब वर्तमान शरीर का पात हो जाता है (मृत्यु होती है) तदनन्तर पुनः अन्य शरीर सम्बन्ध (अन्य शरीर प्राप्ति) नहीं होता। अत एव वह 'विमुक्त' कहलाता है।

आप्रायणादिति । मरणपर्यन्त उपासना करनी चाहिए क्योंकि 'स यावत्क्रतुरयमस्माल्लोकात्प्रैति'—इस श्रुति से उपास्य के प्रत्यय की अनुवृत्ति दृष्टिगोचर हो रही है । अतः मरणपर्यन्त 'अहङ्ग्रहोपासना' करनी चाहिए । एवं च इन सूत्रों से स्पष्ट हो रहा है कि अमुख्य अधिकारियों के लिए 'अभ्यास' की आवृत्ति करना कहा गया है । अतः अमुख्य अधिकारी को तत्वज्ञान हो चुकने पर भी चित्त की विश्रान्ति निमित्त 'वासनाक्षय' और 'मनोनाश' का अभ्यास अवश्य करते रहना चाहिए । 'मुख्य अधिकारी' के लिये 'तत्वज्ञान' होने के पश्चात् 'वासनाक्षय' और 'मनोनाश' के अभ्यास की अपेक्षा नहीं है, क्योंकि उसका 'चित्त' विश्रान्त हो चुका है ।

उक्त दो सूत्रों की भाष्यकार आचार्य शंकरपाद ने भी इसीप्रकार व्याख्या की है । अतएव 'आत्मेत्येव उपासीत',—इस श्रुति के अभिप्राय से कोई विरोध नहीं हो रहा है । इसी अभिप्राय से भाष्यकार ने भी वहां पर नियमविधि को स्वीकार किया है । इसी प्रकार विद्यारण्य स्वामी ने भी वार्तिकसार में इसी अर्थ को बतायाहै—यदि कहो कि जिसने तत्व समझ लिया है वह ध्यान का अधिकारी नहीं, तो हमारा कहना है कि वासना के प्रभाव से वह भी यदि गैर-समझ की तरह क्लेश का अनुभव करे तो ध्यानविधि का विषय अवश्य हो सकता है । पंचदशी में (४.५१) में भी बोध के बाद क्लेश रहने को हेय बताया है ।

इसी अभिप्राय को वसिष्ठ ने भी बताया है—हे राघव ! पौरुषपूर्वक विवेक कर भोग की इच्छाओं से दूर रहते हुए इस तत्व का पूर्ण सहारा लेना चाहिये । अतः अमुख्याधिकारी के लिये जो बताया गया है, वह उचित ही है ॥ ३ ॥

शंका—वासना का क्षय करने में मनुष्य की प्रवृत्ति तभी हो सकेगी, जब उसे वासना के स्वरूप का ज्ञान हो । वासना का स्वरूप ही जब तक उसे ज्ञात न हो तब तक वासना के क्षय करने में उसकी प्रवृत्ति होना सम्भव नहीं है ।

समा०—'वासना' का साधारण (सामान्य) लक्षण, 'वासना' का विभाग, 'वासना' का फल (प्रयोजन), तथा उस वासना का 'विशेष लक्षण'—इन सबको भगवान् वसिष्ठ ने बताया है—

जन्ममृत्युकरी प्रोक्ता मलिना वासना बुधैः। अज्ञानसुघनाकारघनाहङ्कारशालिनी ॥
पुनर्जन्माऽङ्कुरं त्यक्त्वा स्थिता सम्भ्रष्टबीजवत्। देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते" ॥ इति।

तत्र ताश्च मलिनवासना जन्महेतवोऽनेकप्रकारादर्शिताः—

"लोकवासनया जन्तोर्देहवासनयाऽपि च। शास्त्रवासनया ज्ञानं यथावन्नैव जायते" ॥ इति।
"दम्भो दर्पोऽभिमानश्च[1] क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्" ॥ इति च।

•

"इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥
असौ मया हतः शत्रुः हनिष्ये चापरानपि। ईश्वरोऽहमहं योगी[2] सिद्धोऽहं बलवान् सुखी ॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञान विमोहिताः।"

इति। शुद्धा जन्मविनाशिनीत्युक्तमर्थं स्पष्टयति—**जन्मांकुरं** जन्ममूलं **त्यक्त्वा** परित्यज्य विनाश्येति यावत्। **भर्जितबीजं** नष्टबीजं प्रारब्धभोगाश्रयदेहार्थं देहस्थित्यर्थं ज्ञातं ज्ञेयमखण्डैकरमानन्दात्मवस्तु यथा तथोक्ताया वासना ध्रियते सा शुद्धेति योजना।

पुनर्जन्मकरीति पदं व्याचष्टे—**तत्रेति**। तयोर्मध्य इत्यर्थः। ननु मलिनवासना कतिविधा उत्पाद्यतामित्याशङ्क्य मलिनवासना अनन्ता। संक्षेपतस्त्रिविधा व्युत्पादिता स्मृतावित्याह—**ताश्चेति**। यथा सर्वे न निन्दन्ति यथा स्तुवन्ति तथाहमाचरिष्यामि इत्यभिनिवेशो लोकवासना सा सम्पादयितुमशक्या जन्मकोटिशतैरतः सा मलिनवासना। कथं लोकवासना सम्पादयितुमशक्येति चेत्, यत एव लोके श्रूयते—

"निरवधिगुणग्रामे रामे निरागसि वागसि स्फुरणमुषितालोका लोका वदन्ति तदन्तिके।
वरतनुर्हृति बालिद्रोहं मनागपसमर्पणमपरिमितगुणे स्पष्टादुष्टे मुधा किमुदासतः ॥"

•

प्रथमतः 'वासना' का साधारण (सामान्य) लक्षण कर रहे हैं—जिस दृढ़ भावना से पूर्वापर के विचार के बिना ही पदार्थों का ग्रहण होता है, जैसे—हमारी भाषा, सभी भाषाओं की अपेक्षा समीचीन है, तथा हमारा देश, अन्य समस्त देशों की अपेक्षा उत्तम है, तथा हमारा कुल, अन्य सभी कुलों की अपेक्षा श्रेष्ठ है, तथा हमारे पुत्र आदि अन्य सभी की अपेक्षा उत्तम हैं—इत्यादि अभिनिवेश जिस भावना से उत्पन्न होते हैं उस 'भावना' को विद्वानों ने 'वाचना' शब्द से कहा है।

अब उस भावना (वासना) के विभाग को तथा 'फल' को बताते हैं—

वह 'वासना' दो प्रकार की होती है। (१) शुद्धवासना, और दूसरी (२) मलिनवासना। उनमें 'मलिन वासना' तो मनुष्य को जन्मप्राप्ति कराने में कारण (हेतु) होती है, अर्थात् मलिनवासना से 'जन्म', प्राप्त होता है। और शुद्धवासना, 'जन्म' की निवृत्ति कराने में कारण (हेतु) होती है, अर्थात् शुद्धवासना से 'मोक्ष' होता है।

अब 'मलिनवासना' का 'स्वरूपलक्षण' बताते हैं—

ब्रह्म के स्वरूप को आवृत करनेवाले 'अज्ञान' से घनीभूत हुए 'अहंकार' के सहित जो 'वासना' है, उसे विद्वानों ने 'मलिनवासना' शब्द से कहा है। यह 'मलिनवासना' ही मनुष्य को पुनः पुनः जन्म की प्राप्ति कराती है।

भ्रान्तिज्ञान की परम्परा ही 'अहंकार' का घनीभूत आकार है। अहंकार के घनीभूत आकार को (अहंकार के घनेपन को = अहंकार की घनता को) श्रीमद्भगवद्गीता के सोलहवें अध्याय में (श्लोक १३–१५) आसुरी सम्पत्ति का निरूपण करते हुए भगवान् ने बताया है।

तेरहवें श्लोक का पूर्वार्ध—'इदमद्य' इत्यादि है। अर्थात् मैंने आज यह प्राप्त कर लिया है, अब मैं इस मनोरथ को प्राप्त करूँगा। मेरे पास इस समय इतना धन है और वह, भविष्य में इससे भी प्रचुर हो जायगा।

---

१. अतिमानश्चेति भाष्यकारपाठः।

२. भोगीति गीतापाठः।

योषित्पुत्रादिविषयाऽभिलाषाश्च मलिनवासना द्रष्टव्याः। विवेकदोषदर्शनसत्सङ्गसन्निधित्यागप्रतिकूलवासनोत्पादनेन उक्तानां मलिनवासनानामन्तःकरणगतानामनुत्पादो वासनाक्षयाऽभ्यासः। तथैव वसिष्ठादिभिर्दर्शितम्—

"दृश्याऽसम्भवबोधेन रागद्वेषादितानवे। रतिर्घनोदिता या तु बोधाभ्यासं विदुः परम्" ॥ इति।

"असङ्गव्यवहारित्वाद्भवभावनवर्जनात् । शरीरनाशदर्शित्वाद्वासना न प्रवर्तते" ॥ इति च।

"नैष्कर्म्येण न तस्यार्थो न तस्याऽर्थोऽस्ति कर्मभिः। न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥

आत्माऽसङ्गस्ततोऽन्यत् स्यादिन्द्रजालमिदं जगत्। इत्यचञ्चलनिर्णीते कुतो मनसि वासना" ॥ इति।

●

निर्दुष्टमपि परमात्मानं राममनन्तकल्याणगुणनिलयं प्रणतिमात्रेण सर्वपुरुषार्थदं श्रीरामं केचन पुरुषधौरेयाः स्तुवन्ति, केचन पुरुषाः सदा निन्दन्ति किमु वक्तव्यमस्मदादिषु। तस्माल्लोकवासनायाः सम्पादयितुमशक्यत्वात् स्वहितमेव कर्तव्यम्, तदाह—

"विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः।
सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः ॥" इति।

तथा भर्तृहरिरपि—

"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः" ॥[1] इति।

तस्माल्लोकवासनायाः सम्पादयितुमशक्यतया तत्राभिनिविष्टचित्तस्य ज्ञानप्रतिबन्धकतया मलिनत्वम्। एतदभिप्रेत्योक्तम्—

●

मैं बहुत बड़ा धनी हूँ, और अंगोंसहित वेदों का परिज्ञाता हूँ। मेरे सदृश दूसरा कौन है? मैं याग करूँगा, दान दूँगा और आमोद-प्रमोद करूँगा—इस प्रकार अज्ञानवश मोह को प्राप्त हुए, अनेक प्रकार के चित्तविकारों से भ्रान्त हुए, मोहजाल से आवृत हुए, विषयों के भोगों में अत्यन्त आसक्त रहने वाले आसुर स्वभाव के मनुष्य अपवित्र नरक में गिरते हैं।

अब 'शुद्धवासना' का 'स्वरूपलक्षण' बताते हैं—**जो 'वासना' जन्म के मूल को नष्ट करके दग्धबीज के समान देह की स्थिति के निमित्त स्थित रहती है, तथा जिस वासना से अखण्ड-एकरस-आनन्दात्मक वस्तु का ज्ञान होता है, उस 'वासना' को 'शुद्ध वासना' कहते हैं।**

अब पूर्वोक्त 'मलिन वासना' के विभाग को बताते हैं। **'जन्म' दिखाने वाली वह 'मलिनवासना' यद्यपि अनन्त होती है, तथापि स्मृतियों में संक्षेपतः उसके तीन प्रकार बताये हैं। पूर्वोक्त मलिन वासना, (१) लोक वासना, (२) शास्त्र-वासना, (३) देह वासना के भेद से तीन प्रकार की होती है। इन तीन वासनाओं में से कोई भी वासना, जिस व्यक्ति में रहती है, उसे वासनारूप प्रतिबन्ध के कारण 'आत्मा' का यथार्थज्ञान नहीं होता।**

लोकवासना को बताते हैं—हम ऐसा आचरण (वर्ताव-व्यवहार) करें, जिससे लोग हमारी निन्दा न करें,—इस 'अभिनिवेश' को 'लोकवासना' कहते हैं। इस लोकवासना को सैकड़ों-करोड़ों जन्मों में भी पूर्णतया सम्पन्न कर पाना सम्भव नहीं है। क्योंकि सम्पूर्ण दोषों से रहित, तथा समस्त शुभगुणों से सम्पन्न, तथा जिनका नामस्मरण तथा प्रणाम, समस्त पुरुषार्थों की प्राप्ति करा देता है, जो राम-कृष्ण आदि ईश्वर कहे जाते हैं, उनकी भी स्तुति (प्रशंसा) सब लोग नहीं करते। कुछ विवेकी श्रेष्ठ लोग तो उनकी स्तुति करते हैं, और कुछ अधम प्रकृति के नीच लोग, उनकी निन्दा भी करते हैं। जब कि राम-कृष्ण जैसे ईश्वर की भी सब लोग स्तुति नहीं करते, तो हम जैसे जीवों की सभी लोग, स्तुति कैसे करेंगे? अर्थात् नहीं करेंगे? अर्थात् नहीं करेंगे। अतः 'लोकवासना' का सम्पादन कर पाना कभी भी सम्भव नहीं है, अर्थात् अशक्य है। इसलिए अधिकारी मनुष्य को चाहिये कि वह लोकवासना का परित्याग करके अपना 'कल्याण' सम्पन्न करे।

इसी अभिप्राय को अन्य ग्रन्थकारों ने भी व्यक्त किया है। इसका कोई लौकिक उपाय, लोक में या शास्त्र में नहीं है, जिसके आचरण से सभी लोग स्तुति करने लग जांय। अतः मुमुक्षु पुरुष को चाहिए कि वह 'लोकवासना' का परित्याग कर

१. स्तुवन्त्विति पदमिति च पाठो दृश्यते।

"दुःखं जन्म जरा दुःखं मृत्युर्दुःखं पुनः पुनः। संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः" ॥ इति इतिहासे।

"निःसङ्गता मुक्तिपदं यतीनां सङ्गादशेषाः प्रभवन्ति दोषाः।
आरूढयोगोपि निपात्यतेऽधः सङ्गेन योगी किमुताऽल्पसिद्धिः" ॥ इति विष्णुपुराणे।

तथा भागवतेऽपि—

"सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेत् बहिरिन्द्रियाणाम्।
एकश्चरेद्रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः" ॥ इति।

●

"न लोकचित्तग्रहणे रतस्य न भोजनाच्छादनतत्परस्य।
न शब्दशास्त्राभिरतस्य मोक्षो न वाऽतिरम्यावसथप्रियस्य" ॥ इति।

शास्त्रवासना त्रिविधा—पाठव्यसनमर्थव्यसनमनुष्ठानव्यसनञ्चेति। त्रयाणामपि दुःसम्पादत्वान्मलिनत्वम्। तथाहि—पाठस्य दुःसम्पादत्वं तैत्तरीयश्रुतौ भारद्वाजोपाख्यानेनावगम्यते। "भारद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास। तं ह जीर्णं स्थविरं शयानं इन्द्र उपव्रज्योवाच। भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमेतेन कुर्याः इति। ब्रह्मचर्यमेवैतेन चरेयमिति होवाच। तं ह त्रीन् गिरिरूपानविज्ञातानिव दर्शयाञ्चकार। तेषां हैकैकस्मान्मुष्टिमाददे। स होवाच भरद्वाजेत्यामन्त्र्य। वेदा वा एते। अनन्ता वै वेदाः। एतद्वा गतैः त्रिभिरायुर्भिरन्ववोक्षेथाः। अथ त इतरदनूक्तमेव। एहीमं विद्धी"ति॥ पञ्चसप्ततिवार्षिकं स्वाध्यायमधीयानं शयानं भरद्वाजं दृष्ट्वा चतुर्थमायुर्दास्यामीत्युक्तवान्। तच्छ्रुत्वा भरद्वाजोऽध्ययने मतिं चकार। पश्चात्तद्दोषदर्शनेन ततो निवार्य तस्मै ब्रह्मविद्यामुपदिदेश इत्युपाख्यानश्रुतेरर्थः॥ अतएव—

"अनन्तशास्त्रं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः।
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमिश्रम्" ॥
"अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः। यस्तु ब्रह्म न जानाति दर्वी पाकरसं यथा॥
बहुशास्त्रकथाकन्थारोमन्थेन वृथैव किम्। अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरान्तरम्॥" इति।

●

सभी प्रयत्न, 'आत्मकल्याण' के लिए करे। लोगों की निन्दा-स्तुति की ओर ध्यान न दें। क्योंकि निन्दक या स्तावक लोग, निन्दा, स्तुति करके कोई हानि या लाभ नहीं कर सकते 'न काऽपि हानिर्न च कोऽपि लाभः।'

भर्तृहरि ने भी इसी तथ्य को व्यक्त किया है—नीतिकुशल विद्वान् निन्दा करें कि वा स्तुति करें, तथा लक्ष्मी प्राप्त हो अथवा चली जाय, तथा आज ही मृत्यु हो जाय अथवा चिरकाल के बाद हो—इन सब बातों का विचार नहीं करते। वे धैर्यशाली विवेकी पुरुष तो शास्त्रविहित मार्ग से एक पग भी विचलित नहीं होते। अर्थात् लोककृत निन्दास्तुति आदि की उपेक्षा करके अपना आत्मकल्याण करने में ही अहर्निश प्रयत्न करते रहते हैं।

लोकवासना में अभिनिविष्ट रहनेवाले मनुष्य को 'आत्मज्ञान' नहीं हो पाता—यह बात अन्य शास्त्रों में भी कही गई है। जो मनुष्य, लोगों का चित्तरंजन करने में ही अहर्निश सब प्रकार के प्रयत्न करता रहता है, तथा जो व्यक्ति, भोजन-आच्छादन के जुटाने में ही रात-दिन अपने को लगाए रखता है, तथा जो मनुष्य, व्याकरण आदि अनात्मशास्त्र के अध्ययन में ही अभिनिवेश रखता है, तथा जो व्यक्ति, सुन्दर-अतिसुन्दर मनोरम गृह-भवनों में ही सुख का अनुभव करने का अभिनिवेश रखता है, उस मनुष्य को 'मोक्ष' की प्राप्ति नहीं होती। अतः लोकवासना का पूर्णतया सम्पादन करना शक्य न होने से (अशक्य रहने से), उसमें अभिनिविष्ट होकर रहने वाला चित्त तो 'ज्ञान' का प्रतिबन्धक हो जाता है। यही 'लोकवासना' की मलिनता है। इसलिये मुमुक्षुपुरुष को चाहिये कि वह 'लोकवासना' का सभी प्रकार से (सर्वथा) परित्याग करे।

अब 'शास्त्रवासना' को बताते हैं—शास्त्र के अभिप्राय (रहस्य-हृदय-तात्पर्य) को न जानकर, केवल वाद-विवादार्थ अथवा लोकप्रसिद्धयर्थ, शास्त्राध्ययन की वासना को 'शास्त्रवासना' कहते हैं।

वह शास्त्रवासना भी (१) पाठवासना, (२) अर्थवासना, (३) अनुष्ठानवासना के भेद से तीन प्रकार की होती है। सम्पूर्ण आयु तक वेद-शास्त्रों का पाठ पढ़ते रहना,—उनके तात्पर्य (हृदय-रहस्य) को न जानना—इसी को 'पाठवासना' कहते हैं। यह पाठवासना महर्षि भरद्वाज को थी। वे अपनी आयु के तीन भाग तक अर्थात् आयु के पञ्चसप्तति (७५) वर्ष तक वेद के पाठ का अध्ययन ही करते रहे। पढ़ते-पढ़ते वृद्ध हो गये, शरीर अत्यन्त जीर्ण-शीर्ण हो गया। इस प्रकार हुए भरद्वाजमहर्षि

"स्त्रीणां तत्संङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् । क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः" ॥ इति च !

"महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये" ॥ इति च ।

तत्सङ्गे पातित्यमाह—

"योषिद्धिरण्याऽऽभरणाऽम्बरादिद्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्धया पतङ्गवन्नश्यति नष्टदृष्टिः" ॥ इति ।

●

तस्मादर्थव्यसनमपि दुःसंपाद्यमेव । अनुष्ठानव्यसनं विष्णुपुराणे निदाघस्योपलभ्यते—ऋतुना पुनः पुनर्बाध्यमानोऽपि निदाघोऽनुष्ठानव्यसनेन तत्त्वं न बुबुधे । तृतीये पर्यायेऽतिक्लेशेन सर्वपरित्यागेन तत्त्वं विज्ञातवान् । अतोऽनुष्टानव्यसनमपि तत्त्वज्ञानप्रतिबन्धकमेव । तस्मात्त्रिविधवासनाया ज्ञानप्रतिबन्धकत्वाम्मलिनत्वं ।

देहवासना द्विविधा—आत्मवासना तत्सम्बन्धिवासना चेति । मनुष्योऽहमित्यात्मवासना । इतरा द्विविधा—शास्त्रीया लौकिकी चेति । प्रथमा द्विविधा—गुणद्वेषापनयनप्रयुक्ता ध्यानप्रयुक्ता चेति । गङ्गास्नान-शालग्रामोदकाभिषेकादिनाऽद्या, शौचाचमनादिना द्वितीया । लौकिकी वासना द्वितीया—तैलपानमरीचभक्षणादिना प्रथमा, अभ्यङ्गस्नानादिना द्वितीया, ज्ञानप्रतिबन्धकत्वात् जन्महेतुत्वाच्च समस्तदेहवासनानां मलिनत्वमिति ।

अन्यदपि ज्ञानप्रतिबन्धकीभूतं मलिनवासनाजातं भगवता दर्शितम्—दम्भेति । स्वानुभवसिद्धमलिनवासनाजातमन्यदप्यस्तीत्याह—योषिदिति ।

●

को देखकर एक बार देवराज इन्द्र, उनके समीप आये और बोले—हे भरद्वाज ! यदि मैं, तुम्हें आयु का चतुर्थ भाग दे दूँ, तो तुम उस आयु को पाकर क्या सम्पादन करोगे ? देवराज इन्द्र के प्रश्न को सुनकर महर्षि भरद्वाज ने कहा कि प्राप्त हुए आयु के चतुर्थ भाग में भी मैं वेदों के पाठ का ही अध्ययन करूँगा ।

यह सुनकर देवराज इन्द्र को उनपर दया आई, तब भरद्वाजमहर्षि की उस पाठवासना को निवृत्त करने के लिये इन्द्र ने उन्हें, महान् पर्वतों के आकारों में वेदों का दर्शन कराया ।

इन्द्र ने वेदरूप पर्वतों से एक मुष्टि लेकर भरद्वाज महर्षि से कहा कि हे भरद्वाज ! अब तक तुमने मुष्टिमात्र वेद का अध्ययन किया है, अभी तो ये पर्वताकार वेद, तुम्हारे अध्ययनार्थ शेष बचे हैं ।

इन्द्र के इस वचन को सुनकर भरद्वाज महर्षि की 'पाठवासना' निवृत्त हो गई । तदनन्तर देवराज इन्द्र ने भरद्वाज को ब्रह्मविद्या का उपदेश किया । यह कथा तैत्तिरीय श्रुति में भरद्वाजोपाख्यान के नाम से प्रसिद्ध है ।

तथा वेद के और शास्त्र के तात्पर्य को बिना जाने ही समग्र आयु तक उनके अर्थ का अध्ययन करते रहना ही 'अर्थवासना' शब्द से कही जाती है । वह अर्थवासना भी 'पाठवासना' के समान ही दुःसम्पाद्य रहने से 'मलिनवासना' ही है । अतएव विद्वानों ने कहा है—'शास्त्र' अनन्त हैं तथा शास्त्रों में प्रतिपादित पदार्थ भी अनन्त हैं । उन पदार्थों को स्वल्प समय में जानना संभव नहीं है । मनुष्य की आयु अत्यन्त अल्प है । उस अल्प आयु में भी रोग (आधि-व्याधि) रूप अनेक विघ्न उपस्थित होते हैं । अतः विघ्नों से घिरी हुई अल्प आयु में समस्त वेदों का तथा शास्त्रों का अर्थ जानना शक्य ही नहीं है । अतः जैसे हंस-पक्षी, 'जलमिश्रित क्षीर' से क्षीरमात्र को ही ग्रहण कर लेता है, उसी प्रकार अधिकारी मुमुक्षु को भी चाहिये कि समस्त शास्त्रों का सारभूत जो 'ब्रह्मात्म' रूप अर्थ है, उसी को ग्रहण कर ले ।

किञ्च—जो व्यक्ति चारों वेदों के अर्थ का अध्ययन तथा अनेक धर्मशास्त्रों के अर्थ का अध्ययन करता है, किन्तु 'अहम्ब्रह्मास्मि'—इस प्रकार से 'ब्रह्म' को यदि नहीं जानता है, तो वह व्यक्ति, उस 'दर्वी' (करछी) के ही समान है, जो विविध व्यञ्जनों में फिरती रहती है, तथापि उन व्यञ्जनों के 'रस' को नहीं जानती, यही 'अर्थवासना' का स्वरूप है । अनेक शास्त्रों को कथारूप कन्या की जुगाली (रोमन्थ) करते रहने से क्या लाभ ? तत्त्वज्ञ को चाहिये कि वह अपनी अन्तर ज्योति का अन्वेषण करे । अन्यत्र भी जो कहा गया है—वह भी दुःसम्पाद्य है ।

प्रतिकूलवासना मैत्र्यादिवासनाः। ताश्च दर्शिताः "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्याऽपुण्यविषयाणां भावनातश्चित्तप्रसादन"मिति।

●

उक्तानामनेकजातानां मलिनवासनानां कुतो निवृत्तिरित्याशङ्क्याह—**विवेकेति**। तत्र सम्मतिमाह—**तथैवेति**। दृश्यमानं सर्वमात्मव्यतिरिक्ततया वस्तुतो नास्तीति बोधो **दृश्यासम्भवबोधः,** तेन स्वात्मनि रागादिप्रतिबन्धासम्भवादात्मव्यतिरिक्तविषयस्य परमार्थतोऽभावाद्रागादीनां तनुत्वं सम्पद्यते। ततश्च **रागद्वेषादितानवे** स्वात्मानन्दानुभवे या रतिरुपैति रतेराभिमुख्येनात्मन्यन्तःकरणस्यात्मानन्दैकाकारतेति यावत्। **बोधाभ्यासं** वासनाक्षयाभ्यासं। **बुधाः** पण्डिताः ब्रह्मनिष्ठा इत्यर्थः। मलिनवासनानामनन्तत्वात्प्रकारान्तरेण तन्निवृत्त्युपायप्रतिपादकं श्लोकं पठति—**असङ्गेति**। असङ्गोऽहमिति व्यवहारोऽस्यास्तीत्यसङ्ग—व्यवहारी तस्य भावः तत्त्वं तस्मादित्येतत्। व्यवहारो द्विविधः[1]—अभिज्ञाव्यवहारो अभिलापनव्यवहारश्चेति। तत्रासङ्गोऽहमिति निरन्तरप्रत्ययावृत्तिं कुर्वतस्तदितरवासना न प्रवर्तते; आत्मानुबन्धानवासनायाः प्रबलत्वात्। तदुक्तम्—"अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति" इति। वक्ष्यमाणप्रकारेण दोषदर्शनेन भवस्य संसारस्य भावनस्य स्मरणानुकूलसंस्कारात्मकवासनायाः **विवर्जना**त्परित्यागात्तिरोभावादित्यर्थः ततो वासना न प्रवर्तते इति। तदाऽहुः—"दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तते"। तथाचोक्तम्—

●

'अनुष्ठानवासना' का स्वरूप इस प्रकार है—श्रुति-स्मृतिरूप शास्त्रों से विहित 'कर्मों' के अनुष्ठान करने में ही सम्पूर्ण आयु को व्यतीत करना ही 'अनुष्ठानवासना' शब्द से कहा जाता है। यह 'अनुष्ठानवासना' एक समय 'निदाघ' नामक मुनि को हुई थी। 'ऋभु' नामक ऋषि ने उसे दो बार 'उपदेश' किया, तथापि 'निदाघ' मुनि के मन में 'अनुष्ठानवासना' विद्यमान' रहने के कारण उसे 'ब्रह्मतत्त्व' का ज्ञान नहीं हो पाया। जब तीसरी बार 'ऋभु' ने उसे उपदेश किया, तब अतिक्लेश से समग्र अनुष्ठान का उसने परित्याग किया, और उसे 'आत्मतत्त्व' का साक्षात्कार हो पाया। अतः अनुष्ठानवासना भी 'तत्त्वज्ञान' की प्रतिबन्धक है। यह कथा विष्णुपुराण में बताई गयी है। यह तीनों प्रकार की 'शास्त्रवासना', 'आत्मज्ञान' के होने में प्रतिबन्धक है। अतः 'शास्त्रवासना' को भी 'मलिनवासना' के नाम से कहा गया है।

अब 'देहवासना' को बताते हैं—भौतिक स्थूल शरीर में जो 'अभिनिवेश' है, उसे 'देहवासना' कहते हैं।

वह 'देहवासना भी दो प्रकार की होती है—(१) देहविषयक होती है और (२) देह सम्बन्धी गुणविषयक होती है। अर्थात् एक 'आत्मवासना और दूसरी 'तत्सम्बन्धी वासना' उनमें से 'मनुष्योऽहं, ब्राह्मणोऽहम्'—इस प्रकार की जो वासना है, उसे 'देहविषयक वासना' (आत्मवासना) कहते हैं।

दूसरी जो 'देहसम्बन्धी गुणविषयक' वासना (तत्सम्बन्धीवासना) है, उसके भी दो प्रकार होते हैं—(१) शास्त्रीयावासना, और दूसरी (२) लौकिकी वासना। उनमें भी पहिली जो 'शास्त्रीयावासना' है, उसके भी दो प्रकार हैं—(१) गुणाधानप्रयुक्ता, और (२) दोषापनयनप्रयुक्ता। उनमें से शास्त्रविहित गंगास्नान, शालग्रामोदक, अभिषेक आदि के करने से 'देह' में सद्गुणों के भरने की जो 'वासना' है, उसे 'गुणाधानप्रयुक्त' कहा जाता है। और 'शौच-आचमन' आदि के करने से 'देहस्थित-दोषों' के अपनयन करने की जो 'वासना' है, उसे 'दोषापनयन (दोषनिवृत्ति) प्रयुक्ता' कहा जाता है।

इसी प्रकार 'लौकिकीवासना' भी दो प्रकार की होती है—(१) तैलपान, मरीचिभक्षण आदि करके 'देह' में सौन्दर्यादि गुणों के धारण करने की वासना, और (२) मलनिवर्तक औषध भक्षण, तथा जलपान आदि करके 'देह' से 'मल' का अपसारण करने की वासना।

यह 'देहवासना', ज्ञान की प्रतिबन्धक रहने से 'जन्मान्तर' की प्राप्ति कराने में 'कारण' होती है। अतः इसे भी 'मलिनवासना' कहते हैं। एवं च (१) लोक वासना, (२) शास्त्रवासना, (३) देहवासना—ये तीनों वासनाएँ 'मलिनवासनाएँ ही कहलाती हैं। उक्त त्रिविध वासनाओं के अतिरिक्त अन्य भी, जो ज्ञान की प्रतिबन्धक 'मलिनवासनाएँ' हैं, उन्हें गीता के सोलहवें अध्याय में भगवान् ने बताया है—दम्भेति। **हे पार्थ! आसुरी सम्पत्ति के अनुसार उत्पन्न हुए पुरुष के दम्भ, दर्प, अभिमान, क्रोध, कठोरता और अज्ञान—ये सब गुण होते हैं। अर्थात् दम्भ, दर्प आदि आसुरी सम्पत्तियाँ हैं।**

---

१. उपादानार्थक्रिययोः प्रकृतेऽनुपयोगाद्विवरणोक्चातुर्विध्येऽरुचिरिति ज्ञेयम्।

अस्यार्थः—सुखिप्राणिष्वेते मदीया इति मैत्रीं; दुःखिप्राणिषु यथा मम दुःखं मा भूदेवमन्येषामपि दुःखं मा भूदिति करुणां; पुण्यकारिषु पुरुषेषु मुदितां; पापिषूपेक्षां भावयतो रागद्वेषाऽसूयामदमात्सर्यादिनिवृत्त्या चित्तप्रसादो भवतीति ।

●

"मस्तकस्थायिनं मृत्युं यदि पश्येदयं जनः। आहारोऽपि न रोचेत किमुतान्या विभूतयः ॥" इति ।

श्रीमद्भागवते भगवताप्युक्तम्—

"कोऽन्वर्थः सुखयत्येनं कामो वा मृत्युरन्तिके । आघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥" इति ॥

अथवा शरीरनाशदर्शित्वाद्भवभावनवर्जनं ततोऽसङ्गव्यवहारित्वं ततो वासनानिवृत्तिरित्युत्तरोत्तरहेतुत्वं द्रष्टव्यम् । दोषप्रतिपादकं वचनं पठति—**दुःखमिति** । एवमात्मव्यतिरिक्तं सर्वं दुःखात्मकमनुसन्दधतः सर्वानात्मवासनानिवृत्तिर्भवतीति तात्पर्यम् ।

लम्पटसङ्गराहित्यस्य मोक्षसाधनत्वप्रतिपादकं श्लोकं पठति—**निःसङ्गतेति** । **सङ्गराहित्यमित्यर्थः** । **मुक्तिपदं मोक्षमार्गः** । तदुक्तं मनुना—

●

इसी प्रकार उत्तमप्रकृतिलोकानुभवसिद्ध अन्य कितनी ही मलिनवासनाएँ हैं, उनको बता रहें हैं—**स्त्री-पुत्रादि-विषयों की अभिलाषा भी मलिन वासना ही है । ये सभी मलिनवासनाएँ 'ज्ञान' की प्रतिबन्धक रहने से इन्हें दूर करना मुमुक्षु-पुरुषों के लिये अपरिहार्य है ।**

शंका—उन मलिनवासनाओं की निवृत्ति किस उपाय से होती है ?

समा०—ये मलिन वासनाएँ पूर्वोक्ति रीति से अनेक प्रकार की हैं । अतः वसिष्ठ भगवान् ने उन वासनाओं की निवृत्ति के उपाय भी अनेक प्रकार के बताये हैं ।

(१) नित्य—अनित्य वस्तु का विवेक, (२) विषयों में दोषदर्शन, (३) महात्मा पुरुषों का सत्संग, (४) विषयीजनों के संसर्ग का परित्याग, तथा (५) मैत्री—करुणा आदि विरोधी वासना की उत्पत्ति, इत्यादि उपायों से मलिन वासनाओं की निवृत्ति होती है । इन विवेकादि उपायों से अपने अन्तःकरण में मलिन वासनाओं की उत्पत्ति न होने देना ही 'वासनाक्षय' का अभ्यास कहा जाता है । यही तथ्य, वसिष्ठ भगवान् के शब्दों में इस प्रकार है—

यह दृश्यमान समग्र प्रपञ्च, अधिष्ठानरूप आत्मा से भिन्न नहीं है, अर्थात् वास्तविक नहीं है—इस प्रकार से दृश्यप्रपञ्च के असम्भव का जो ज्ञान हो रहा है, उससे प्रपञ्चरूप विषय का अभाव प्रतीत होता है, उस कारण मुमुक्षु के मन में राग-द्वेषादि-रूप वासना की निवृत्ति हो जाती है । तब यह मुमुक्षु अपने ही आनन्दस्वरूप का अनुभव करने लगता है । उसी में उसको दृढ़ प्रेम हो जाता है । इसी को विद्वानों ने 'वासनाक्षय' का अभ्यास'—यह नाम दिया है ।

मलिन वासनाओं के निवृत्त्यर्थ अन्य उपाय भी बताये गये हैं—

'मैं असंग हूँ'—इस प्रकार की वृत्तियों के प्रवाहरूप व्यवहार को निरन्तर करते रहने से 'मन' में अन्य वासना का उदय ही नहीं होता, तथा 'प्रपञ्च' के स्मरण का त्याग करने से भी 'अन्य वासना' का उदय नहीं होता । तथा निरन्तर अपने देहपात (मृत्यु) का विचार करते रहने से भी अन्य रागादिरूप वासना उदित नहीं हो पाती ।

अथवा—'शरीरनाशदर्शित्व', 'भव-भावन-वर्जन' में हेतु है और 'भव-भावन-वर्जन', असङ्गव्यवहारित्व में हेतु है, और 'असंगव्यवहारित्व', वासनानिवृत्ति में हेतु है—इस रीति से उत्तरोत्तर 'हेतुत्व' समझना चाहिए ।

समाधि और जप से जिसका मन अशुद्ध वासनाओं से शून्य नहीं हुआ है, उसे न कर्म से कोई मतलब है और न कर्मत्यागरूप संन्यास से ही । जिसके मन में यह अप्रकम्प्य निश्चय है कि आत्मा सब सम्बन्धों से रहित है और आत्मा से भिन्न यह जगत् इन्द्रजाल-सा मिथ्या है, उसके मन में वासना क्यों होगी ?

इसी अभिप्राय से ग्रन्थकार, दोषप्रतिपादक वचन को बता रहे हैं—

'जन्म' भी दुःखरूप है, तथा 'जरा' भी दुःखरूप है, तथा पुनः-पुनः मरण (मृत्यु) भी दुःखरूप है । कहाँ तक कहें, यह सम्पूर्ण संसारमण्डल ही दुःखरूप है । जिस संसारमण्डल में ये समस्त अज्ञानी जीव, पुनः-पुनः 'जन्म-मरणादि' को प्राप्त होते रहते हैं । इस प्रकार 'आत्मा' के अतिरिक्त यह सम्पूर्ण 'जगत्' दुःखरूप है—यह निरन्तर चिन्तन करते रहने पर **मनुष्य के मन को 'राग-द्वेषादि'** मलिनवासनाएँ निवृत्त होती हैं ।

तथा दैवसम्पदभ्यासेनाऽऽसुरसम्पन्नश्यति। दैवी सम्पद्भगवता दर्शिता—"अभयं सत्त्वसंशुद्धि"रित्यारभ्य "भवन्ति सम्पदं दैवीमभिजातस्य भारते"त्यन्तेन। "अमानित्व"मित्यादिनोक्ताऽमानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यन्ति॥

तथा च मैत्र्यादिवासनां सङ्कल्पपूर्वकमभ्यस्याऽनन्तरमजिह्वत्वादिधर्मानभ्यसेत्।

•

"अध्यात्मरतिरासीनो निरपेक्षो निराशिषः! आत्मनैव सहायेन सुखार्थी विचरेदिह॥

"कपालं वृक्षमूलानि कुचेलमसहायता। समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्॥" इति।

अन्यत्रापि—

"तस्माच्चरेत वै योगी सतां धर्ममदूषयन्। जना यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिमि"ति॥

भारतेऽपि—

अहेरिव गणाद्भीतः सम्मानान्नरकादिव। कुणपादिव च स्त्रीभ्यस्तं देवाः ब्राह्मणं विदुः॥" इति।

संगे सति किं न भवतीत्याह—**संगादिति। दोषाः** राग-द्वेष-मोहाः; **मोहो** भ्रान्तिः। **किं** कुर्वन्तीत्यत आह—**आरूढेति।** संगोत्पन्नदोषैरारूढयोगो योग्यधः नरके पात्यते किमु वक्तव्यमल्पसिद्धिरारुरुक्षुः पात्यत इत्यत्र। तस्मान्निःसङ्गत्वं मुमुक्षूणामावश्यकमिति भावः। इदानीं दम्पतिसङ्गत्यागप्रतिपादकं सौभरिवचनमुदाहरति—**संगमिति।** मिथुनवृत्तीनां दम्पतीनामेकादशेन्द्रियाणि बहिर्न विसृजेत् तद्विसर्जनेन नरके पात्यते। प्राह मनुः—

•

तथा "निःसंगता" आदि वचनों के द्वारा विष्णुपुराण में भी कहा गया है कि 'विषयलंपट पुरुषों का संसर्ग-परित्याग करने से भी मलिनवासना की निवृत्ति होती है। उस निवृत्ति के द्वारा 'संगपरित्याग' भी मुमुक्षु के मोक्ष का साधन होता है। **विषयासक्त (लम्पट) पुरुषों के संगपरित्यागरूप निःसंगता (असंगता) ही यतियों (संन्यासियों) को मुक्ति प्राप्ति का मार्ग है। क्योंकि विषयासक्त पुरुषों के 'संग' से मनुष्य में राग-द्वेष-मोहादिक दोष प्राप्त होते हैं। उन मलिन वासनारूप दोषों से 'योगारूढ़ पुरुष' का भी अधःपतन हो जाता है, तो योगारूढ होने की इच्छा रखनेवाला पुरुष, क्यों नहीं नीचे गिर सकता है?** अतः तत्त्ववेत्ता पुरुष, सब प्रकार से विषयलम्पट पुरुष से संसर्गरहित होकर रहे। तथा चोक्तम्—

यह तत्त्वज्ञानी पुरुष, श्रेष्ठ सज्जन पुरुषों के धर्म की निन्दा न करता हुआ (उस धर्म में दोष प्रदर्शन न करता हुआ) इस प्रकार से लोकव्यवहार में रहे, जिससे विषयासक्त लोग इसका अपमान करे, और स्वयं ही उस तत्त्वज्ञानी का संग करना छोड़ दें।

श्रीमन्महाभारत में इसी तथ्य को बताया है—

जैसे देहाभिमानी पुरुष, 'सर्प' से भयभीत रहता है, वैसे ही जो तत्वज्ञानी पुरुष, 'लोकसमूह' से भयभीत होकर रहता है, तथा जैसे लोग, 'नरक' से डरते हैं, वैसे ही जो विद्वान् पुरुष 'सम्मान प्राप्ति' से भयभीत रहता है, एवं लोग, जिसप्रकार मृत शरीर से भय खाते हैं, वैसे ही जो पुरुष, स्त्रीवर्ग से भयभीत रहता है, उस विद्वान् पुरुष को देवता लोग 'ब्राह्मण' कहते हैं। अर्थात् 'जीवन्मुक्त' कहते हैं। एवं च मुमुक्षु को निःसंग रहना आवश्यक है।

अब दम्पतिसङ्गत्यागप्रतिपादक सौभरिवचन को भागवतकार बता रहे हैं—

मुमुक्षु लोगों को चाहिए कि वे, विषयासक्त स्त्री-पुरुषों के संसर्ग का सर्वप्रकार से परित्याग करे। तथा चक्षु-श्रोत्रादि एकादश इन्द्रियों को बाह्य रूपादिविषयों की ओर न जाने दे।

क्योंकि इन्द्रियों को विषयों में प्रवृत्त (प्रेरित) करने से भगवान् मनु ने नरक प्राप्ति बताई है।

जो शास्त्रोपदिष्ट कर्म नहीं करता, और जो शास्त्रनिषिद्ध कर्म करता है, और जो विषयों में अत्यन्त आसक्त रहता है, उस मनुष्य का पतन हो जाता है।

प्रश्न—अतः मुमुक्षु को सर्वसंगपरित्याग करके अपनी इन्द्रियों पर निग्रह रखना चाहिए। इन्द्रियों को निगृहीत करके क्या करें?

उत्तर— वह मुमुक्षु व्यक्ति एकान्त प्रदेश में एकाकी रहकर अपरिच्छिन्न ईश्वर में अपने चित्त को लगावे। अर्थात् निरन्तर 'ब्रह्म' का चिन्तन (ध्यान) करे।

अजिह्वत्वादयो दर्शिताः—

"अजिह्वः षण्ढकः पङ्गुरन्धो बधिर एव च। मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः ॥" इति।
इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते। हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ॥

•

"अकुर्वन्विहितं कर्म निन्दितं च समाचरन्। प्रसृजन्निन्द्रियार्थेषु नरः पतनमृच्छति ॥" इति।

ततः सङ्गं परित्यज्येन्द्रियनिग्रहं कुर्वन् किं कुर्यादित्यत आह—**एक इति**। एकाकिना स्थित्वा निरन्तरब्रह्मध्यानं कर्तव्यमित्यर्थः। **ननु—**मनः चञ्चलत्वात्परमात्मनि न तिष्ठति, किं कर्तव्यमित्याशङ्क्याह—**तद्रतिष्विति**। तस्मिन्परमात्मनि रतिः येषां ते तद्रतयः तेषु साधुषु सङ्गः कर्तव्य इति शेषः। कदापि लम्पटसङ्गो न कर्तव्य इत्याह—**स्त्रीणामिति**।

"कदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि। स्पृशन् करीव बध्येत करिण्या अङ्गसङ्गतः ॥"

•

प्रश्न—अर्जुन ने भगवान् श्रीकृष्ण से कहा है कि 'मन' तो बहुत ही चञ्चल है, क्षोभकारक है, बलवान् और दृढ़ है। तदनुसार यह मन (चित्त) अपने चञ्चल स्वभाव के कारण उस 'परब्रह्म' में यदि स्थिर न हो सके तो क्या करना चाहिए ?

उत्तर—परब्रह्म में प्रीति रखनेवाले महात्माओं का सत्संग करे।

कदाचिदपि 'लम्पटसंग' नहीं करना चाहिए—**मुमुक्षुजनों को चाहिये कि वे, 'स्त्रियों' के तथा स्त्रैण (स्त्रियों में आसक्त) पुरुषों के संग को दूर से ही त्याग कर एकान्त देश में स्थित होकर मुक्ष परमात्मा का सर्वविध प्रयत्न से 'अहं ब्रह्मास्मि'—इस आकार में ध्यान करता रहे।**

उस ध्यान का 'फल' स्मृति में कहा गया है—जिसका नाम 'वासुदेव' है, वही अनादि-अनन्त (उत्पत्ति-विनाशरहित) 'परब्रह्म', 'मैं' ही हूँ—इस प्रकार की स्थिरबुद्धि जिस पुरुष की हो, उस पुरुष को 'मुक्त' ही समझना चाहिये। इसमें किञ्चिन्मात्र भी संशय नहीं है।

ब्रह्मध्यान के फल को यमराज ने भी अपने सेवकों से कहा है—

यह सम्पूर्ण जगत् तथा मैं 'वासुदेवरूप' ही है। वह वासुदेव 'परमपुरुष' हैं, तथा 'परमेश्वर' है, तथा 'एक' और 'अद्वितीय' है। इस प्रकार की स्थिर बुद्धि, हृदय में स्थित 'परमात्मा' के प्रति जिनकी होती है, उन पुरुषों को हे भृत्यों! (सेवकों!) तुम लोग दूर से ही त्याग देना, और आगे चल देना, वहाँ मत ठहरना ॥ अर्थात् परब्रह्म का ध्यान करनेवाले पुरुषों को मृत्यु की प्राप्ति पुनः नहीं होती। इससे यह स्पष्ट होता है कि जो पुरुष, विषयासक्त रहनेवाले स्त्री-पुरुषों के (लम्पटों के) संसर्ग का परित्याग करके ब्रह्मचिन्तन करते रहते हैं, उन पुरुषों की समस्त मलिन वासनाएँ निवृत्त हुआ करती हैं। एवं च ब्रह्मानुसन्धान करने से 'सर्ववासनानिवृत्ति' रूप फल प्राप्त होता है, और मोक्षप्राप्ति होती है।

अब 'सत्संग' भी वासनाक्षय द्वारा मोक्ष का साधन होता है—और स्त्रैण पुरुषों का संग, नरक प्राप्ति का साधन होता है—विद्वान् लोग कहते हैं—

जिनका चित्त, ब्रह्मचिन्तन में निरन्तर समान रूप से लगा रहता है, उन पुरुषों को 'समचित्त' कहा जाता है। अथवा अखण्डएकरस जो 'ब्रह्म' है, उसे 'समब्रह्म' कहते हैं; उस 'समब्रह्म' में जिनका चित्त रममाण रहता है अथवा जिनका चित्त, अपने शत्रु और मित्रों के प्रति समानभाव रखता है उसको 'समचित्त' कहते हैं।

श्रीमद्भगवद्गीता में (६।९) 'समबुद्धि' का लक्षण बताया है—योगारूढ ब्रह्मवित् यति को सुहृत्, मित्र, शत्रु, उदासीन, मध्यस्थ, द्वेष्य, और बन्धुओं में तथा साधुओं और पापियों में सर्वत्र समबुद्धि अर्थात् समता को प्राप्त हुई बुद्धि स्थिर रहती है।

तथा जो पुरुष, अत्यन्त शान्तस्वभाव के होते हैं, तथा क्रोधरहित होते हैं, तथा सदयहृदय के होते हैं, अर्थात् अनुपकारी या अपकारी पर भी जो उपकार करते हैं, तथा जो साधु स्वभाव के होते हैं, अर्थात् 'शम-दमादि' गुणों से सम्पन्न रहते हैं, उन पुरुषों को 'महान् पुरुष' कहते हैं। ऐसे महान् पुरुषों के साथ श्रद्धा-भक्तिपूर्वक जो 'संग' किया जाता है, वह भी 'मलिन-वासनाओं' की निवृत्ति कराता हुआ 'मोक्ष' का साधन होता है।

किञ्च—'स्त्री' और स्त्रीसंगी, अर्थात् विषयासक्त 'स्त्री' और 'स्त्रैण' पुरुषों का संग, 'नरक' प्राप्ति का साधन होता है।

अद्य जातां यथा नारीं तथा षोडशवार्षिकीम् । शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्ढकः ॥
भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च । योजनान्न परं याति सर्वथा पङ्गुरेव सः ॥
तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम् । चक्षुर्युगां भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते ॥

●

इति स्त्रीसङ्गस्य बन्धहेतुत्वप्रतिपादनेन तत्सङ्गिसङ्गस्यापि तथात्वेन च तदुभयं त्यक्त्वा मनोरमे एकान्तदेशे स्थित्वा सर्वेषामात्मानं वासुदेवं सर्वसाक्षिणमहं ब्रह्मास्मीति ध्यायेदित्यर्थः । तथा च स्मृतिः तत्फलबोधिनी—

"अहमस्मि परं ब्रह्म वासुदेवाख्यमव्ययम् । इति यस्य स्थिरा बुद्धिः स मुक्तो नात्र संशयः ॥" इति ।

विष्णुपुराणेऽपि यमोऽपि भृत्यान् प्रत्याह—

"सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः ।
इति मतिरचलां भवत्यनन्ते हृदयगते व्रज तान्विहाय दूरात् ॥" इति ।

●

'स्त्री' और स्त्रीसंगीपुरुषों का संग, 'नरकप्राप्ति' का साधन है, शास्त्र कहता है—

'स्त्री', 'सुवर्ण', 'आभूषण', 'वस्त्र', आदि, से रचित पदार्थों के प्रति लोभ में फँसा हुआ अविवेकी पुरुष, उन पदार्थों का जब उपभोग करने लगता है, तब वह 'पतंगे' की तरह नष्ट हो जाता है। क्योंकि वह पुरुष, 'विवेकदृष्टि' से रहित है।

मैत्री-करुणा आदि विरोधी वासनाओं से भी उन 'मलिनवासनाओं' की निवृत्ति होती है। उन्हीं को बताने के लिये पतञ्जलि का सूत्र (१-३३ योगशास्त्र) उसका अर्थ (यो० सू० पा० १।३३) (१) मित्रता, (२) करुणा, (३) मुदिता, (४) उपेक्षा—ये चार प्रकार की 'शुभवासनाएँ' कही जाती हैं। 'सुखी, दुःखी, पुण्यात्मा, तथा पापात्मापुरुषविषयक क्रमशः मित्रता, दया, हर्ष तथा उपेक्षा की भावना रखने से 'चित्त' में प्रसन्नता होती है।

'चित्त' में चार प्रकार के 'कालुष्य' होते हैं (१) ईर्ष्या कालुष्य, (२) परापकारचिकीर्षाकालुष्य, (३) असूयाकालुष्य, (४) अमर्षकालुष्य, इन चारों को 'चित्तमल' कहा जाता है। क्योंकि ये 'चित्त' को 'विक्षिप्त' करके 'मलिन' करते रहते हैं। अतः इन चारों के रहते 'चित्त' का प्रसन्न रहना बहुत ही कठिन है। अतएव उपर्युक्त 'मैत्री आदि भावना के द्वारा, इन 'चित्तमलों' की निवृत्ति करना मुमुक्षुयोगी का प्रथम कर्तव्य है।

सुखी मनुष्यों के विषय में 'ये सब हमारे ही हैं'—इच प्रकार की भावना को 'मैत्रीभावना' कहते हैं। दुःखी प्राणियों के विषय में यह सोचना चाहिये कि 'जैसे हमें दुःख प्राप्त न हो, वैसे ही इन प्राणियों को भी दुःख की प्राप्ति न हो'—इस प्रकार की भावना को 'करुणाभावना' कहा जाता है।

किसी पुण्यात्मा पुरुष के सद्गुणों में दोषारोपण करना 'असूयाकालुष्य' कहा जाता है। क्योंकि पुण्यात्मा पुरुष की यह निन्दा भी 'राजस-तामस' होने से 'चित्त' को विक्षिप्त करके मलिन करती है। अतः उन **पुण्यात्माओं के प्रति 'मुदिताभावना' करनी चाहिये, अर्थात् धर्माचरण करनेवाले व्यक्तियों को देखकर चित्त में आनन्द का अनुभव करना चाहिये। इस प्रकार की 'मुदिताभावना' करने से अर्थात् उन धार्मिक पुण्यात्माओं को देखकर आनन्दित होने से 'चित्त' का 'असूयाकालुष्य' नष्ट हो जाता है।**

किसी 'पापात्मा व्यक्ति' के 'कठोर वचन' सुनने से अपने को अपमानित समझकर उसका बदला लेने की चेष्टा करना 'अमर्षकालुष्य' कहा जाता है। क्योंकि वह भी राजस-तामस होने से चित्त को विक्षिप्त करके मलिन करता है। **ऐसे पापी व्यक्तियों के प्रति 'उपेक्षा (तटस्थता) भावना' करने से 'अमर्षकालुष्य' की निवृत्ति हो जाती है।**

इस प्रकार की 'मैत्री आदि चार भावनाओं' से मनुष्य को 'राग-द्वेष-असूया-मद-मात्सर्य' आदि समस्त 'मलिन-वासनाएँ' निवृत्त हो जाती हैं। इन चारों भावनाओं के करने से 'शुक्ल धर्म' की उत्पत्ति होती है। 'पापसंबंध' से रहित केवल 'पुण्यमात्र' को शुक्लधर्म कहते हैं। जैसे—स्वाध्याय (वेद) के अध्ययन रूप 'नित्य कर्म' के अनुष्ठान से 'पापसम्बन्धरहित' केवल **'पुण्यरूप शुक्लधर्म' की उत्पत्ति होती है। एवंच ये 'चारों भावनाएँ', मनुष्य के 'चित्त' को 'शुद्ध' (निर्मल) कर देती हैं।**

हिताऽहितं मनोरामं वचः शोकाऽऽवहं च यत् । श्रुत्वाऽपि यो न शृणुते बधिरः स प्रकीर्त्तितः ॥
"सांनिध्ये विषयाणां च समर्थोऽविकलेन्द्रियः । सुप्तवद्वर्त्तते नित्यं स भिक्षुर्मुग्ध उच्यते ॥" इति ।

तदनन्तरं चिन्मात्रवासनामभ्यसेत् ।

●

इति । तथाच दम्पतिलम्पटसङ्गत्यागपूर्वकं ब्रह्मानुसन्धानेन सर्ववासनानिवृत्तिः फलं भवति । सत्सङ्गस्य वासनाक्षयद्वारा मोक्षसाधनत्वप्रतिपादकं वचनमुदाहरति—**महदिति** । द्वारं साधनं । स्त्रीसङ्गिसङ्गो न कर्तव्यः तस्य नरकसाधनत्वादित्याह—**तमोद्वारमिति** । नरकप्राप्तिसाधनमित्यर्थः । ते के महान्त इत्याकाङ्क्षायामाह—**महान्त इति** । समे ब्रह्मणि चित्तं येषां ते तथोक्ताः । "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरमि"ति स्मृतेश्च । अथवा शत्रुमित्रयोः समं चित्तं येषां ते तथा ।

"सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु । साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥"

इति भगवद्वचनात् । अनुपकृतोपकारिणः **सुहृदः** । शमदमसम्पन्नाः **साधवः** ।

तत्सङ्गे स्त्रीसङ्गिसङ्गे **मूढोऽ**विवेको **प्रलोभितः** उत्पादितलोभ आत्मा मनो यस्य स तथोक्तः **प्रतिकूलेति** । मैत्र्यादिवासना व्युत्पादयितुं पतञ्जलिसूत्रमुदाहरति—**ताश्चेति** । सूत्रं व्याचष्टे—**अस्यार्थ इति** । **रागेति** । भावनयेति शेषः ।

●

इसी प्रकार श्रीमद्भगवद्गीता के सोलहवें अध्याय में भगवान् ने स्वयं, 'दैवीसम्पद्रूप विरोधी वासना के अभ्यास से 'दर्प-दम्भ' आदि 'आसुरीसम्पद्रूप मलिनवासनाओं' की निवृत्ति का होना बताया है—

दैवी सम्पत्ति को बता रहे हैं—

अभयमिति ।

अभयम्—भय का अभाव अर्थात् आध्यात्मिकादि उपद्रवों के प्राप्त होने पर भी मन में किसी प्रकार का भय न होना ।

सत्त्वसंशुद्धिः—अन्तःकरण की शुद्धता, अर्थात् राग-द्वेष-लोभ मोह, असूया, मत्सर, अहंकार आदि दोषों से रहित अन्तःकरण (चित्त) का होना ।

ज्ञानयोगव्यवस्थितिः—ज्ञानयोग में विशेषरूप से तत्परता अर्थात् श्रवण-मनन आदि 'ज्ञानयोग' में (सर्वदा केवल उसी में) तत्पर रहना ।

दानम्—याचकों को श्रद्धापूर्वक यथाशक्ति अन्न आदि का दान करना ।

दमः—इन्द्रियों का दमन अर्थात् बाह्येन्द्रियों को दुष्ट वृत्तियों (बुरे कामों) से रोकना, अथवा 'चित्त' को दण्ड देना ।

यज्ञः च—अग्निहोत्र, दर्शपौर्णमास, सोमयाग आदि श्रौत याग, और 'च' कार से स्थालीपाकादि स्मार्त यागों का अनुष्ठान करना ।

स्वाध्यायः—वेदाध्ययन तथा तदंगभूत शास्त्रों का अध्ययन करना, तथा ब्रह्मयज्ञ, पञ्चमहायज्ञ, आदि का अनुष्ठान करना ।

तपः—देव, द्विज, गुरु और विद्वान् का पूजन आदि का (कायिक-वाचिक-मानसिक तीनों प्रकार से) आचरण करना ।

आर्जवम्—मन, वाणी, और काय के कर्मों में सर्वत्र सर्वदा एकरूपता का रहना ॥ १ ॥

अहिंसा—शास्त्रोक्त हिंसा को छोड़कर प्राणिमात्र की हिंसा न करना ।

सत्य—यथार्थ भाषण करना ।

अक्रोध—अपकार करने पर भी क्रोध न करना ।

त्याग—नित्यक्रियमाण श्रौत-स्मार्तादि कर्मों के फल का त्याग करना, अर्थात् उन कर्मों को ईश्वरार्पण करना ।

शान्ति—चित्त की चञ्चलता का अभाव, अर्थात् अन्तःकरण की सर्वत्र उपरति । त्रिगुणात्मक प्रकृति के सात्त्विक परिणाम को 'चित्त' कहते हैं ।

अपैशुन—परोक्ष में दूसरे के मर्म को न खोलना, अर्थात् परोक्ष में किसी की निन्दा न करना ।

भूतेषु दया—आर्त, अन्धे, लंगड़े आदि दीन प्राणियों पर करुणा करना ।

नामरूपात्मकस्य जगतश्चैतन्ये कल्पितत्वेन स्वतःसत्ताशून्यतया चैतन्यसत्तास्फुरणपूर्वकमेव स्फुरणं भवति। ते च नामरूपे मिथ्यात्वनिश्चयेनोपेक्ष्य चिन्मात्रोऽहमिति भावयेत्।

•

प्रतिकूलवासनान्तराभ्यासेनापि मलिनवासना नश्यतीत्याह—**तथेति**। केयं दैवी सम्पदित्याकाङ्क्षायामाह—**दैवीति**।

"अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोभत्वमार्जवं ह्रीरचापलम्॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत॥"

इत्यनेन दैवीसम्पद्दर्शितेत्यर्थः। वासनानामनन्तत्वात्प्रकारान्तरेण प्रतिकूलवासनाभ्यासेन मलिनवासनानां निवृत्तिमाह—**अमानित्वेति**।

"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्। आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥

•

अलोलुप्त्व—विषयों की सन्निधि में भी इन्द्रियों का विकाररहित होना।

मार्दव—चित्त में कठोरता (काठिन्य) का न होना, अर्थात् शीतलता रहना।

ह्री—लज्जा अर्थात् अकार्य के करने में चित्त का संकोच।

अचापल—निमित्त के विना मन और इन्द्रियों की व्यापारशून्यता।

तेज—तेजस्त्व अर्थात् बुद्धि की सूक्ष्मता अथवा अधिक प्रकाश।

क्षमा—क्षान्ति अर्थात् क्षमा—उपस्थित हुए उपद्रव को विकाररहित होकर सहन करना।

धृति—धैर्य, अर्थात् विक्षेप होनेपर भी देह, इन्द्रिय, मन और बुद्धि को निश्चल रखने की (चञ्चल न होने देने की) शक्ति।

शौच—आन्तर और बाह्य शुद्धि। मृत्तिका और जल से शरीर के मल को दूर करना बाह्य शौच है। और सत् तथा असत् के विवेकज्ञान से चित्त के दुर्वासनारूप मल को दूर करना आन्तर शौच है।

अद्रोह—अपकार करनेवाले को मारने की इच्छा न करना। अपकारी को मारने की इच्छा करना 'द्रोह' कहा जाता है, और वैसी इच्छा न करना 'अद्रोह' कहलाता है।

नातिमानिता—अपने में पूज्यता का अभिनिवेश न करना। अपने को अतिपूज्य समझना 'अतिमान' कहा जाता है। वैसा अभिनिवेश चित्त में न करना 'नातिमानिता' कहलाती है। अर्थात् अपने में पूज्यता के अभिमान का अभाव रहना 'नातिमानिता' है। तात्पर्य यह है कि चित्त में अपनी प्रतिष्ठा की अपेक्षा न रखना। 'अभय' से लेकर 'नातिमानिता' तक ये छब्बीस सात्त्विकगुण हैं। इन दैवी सम्पत्तियों में 'सत्त्वगुण' की निर्मलता के कारण प्रकाशकत्व और अनामयत्व रहता है। अर्थात् जो दीप्त होता है (निर्मल होने से प्रकाश करता है) उसे 'देव' (सत्त्वगुण) कहते हैं, उससे सम्बन्धित जो सम्पत्ति, उसे 'दैवीसम्पत्' कहते हैं। दैवी सम्पत् (समृद्धि, उत्कर्ष) में अर्थात् उस दैवीसम्पत्ति का अनुसरण कर पूर्वजन्मार्जित पुण्य की अधिकता से (सत्त्व की अधिकता के अनुसार) जन्मे हुए मनुष्य के ये छब्बीस सात्त्विकगुण (धर्म) हुआ करते हैं। दैवी सम्पद् के अनुसार उत्पन्न हुए पुरुष में अभय आदि, मोक्ष के हेतुभूत सात्त्विकगुण उत्पन्न हुआ करते हैं। 'आसुरी सम्पत्ति की 'विरुद्ध सम्पत्ति' 'दैवीसम्पत्ति', कहलाती है।

इस दैवीसम्पत्तिरूप विरोधी वासना के अभ्यास से दम्भ, दर्प आदि आसुरीसम्पत्तिरूप मलिनवासना की निवृत्ति हो जाती है।

गीता के तेरहवें अध्याय में भगवान् स्वयं बता रहे हैं—

मान (अपने को श्रेष्ठ समझना), दम्भ (वेष-भूषा, भाषण आदि से अपना महत्त्व प्रकट करना), और हिंसा (मानसिक, वाचिक, कायिक कर्मों से दूसरे को पीड़ा पहुँचाना), इन तीनों बातों से मुमुक्षु को दूर रहना चाहिये। और क्षान्ति (आध्यात्मिकादि उपद्रवों को सहन करना अर्थात् क्षमा रखना), ऋजुता (स्वधर्म में मन, वचन, और शरीर की एकरूपता रखना), तथा आचार्योपासन (ज्ञानोपदेशक गुरु की श्रद्धा, भक्ति से सेवा करना), शौच (बाह्य और आभ्यन्तर

सेयं चिन्मात्रवासना द्विप्रकारा—कर्तृकर्मकरणाऽनुसन्धानपूर्विका, केवला चेति। तत्र सर्वं जगच्चिन्मात्रमहं मनसा भावयामीति क्रियमाणा प्रथमा। सा सम्प्रज्ञातसमाधिकोटावन्तर्भवति। कर्तृकर्मकरणाऽनुसन्धानरहिता चिन्मात्रोऽहमिति भावना केवला। सर्वस्य चिन्मात्रत्वं शुक्रेण बलिं प्रत्युपदिष्टं—

"चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत्। चित्त्वं चिदहमेवेति लोकश्चिदिति संग्रहः॥

•

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु। नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि॥

"अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।"

इत्यनेनोक्तामानित्वादिज्ञानसाधनाभ्यासेन तद्विपरीतभ्रान्तिसाधनमानादयो नश्यन्तीत्यर्थः। ननु मलिनवासनानामनन्तत्वात् तासाममूर्तत्वेन सम्मार्ज्जनीसमूहीकृतधूलिराशिवत्त्यक्तुमशक्यत्वात् कथं वासनाक्षयः स्यादित्याकाङ्क्षायामाह—**तथाचेति**।

प्रैषमन्त्रेण संकल्पपूर्वकमुपवासजागरणाभ्यासेन **मैत्र्यादिवासना** दैवीसम्पत्। अमानित्वादिधर्मेष्वाभाष्यमाणेषु सर्वा मलिनवासनाः क्षीयन्ते सूर्योदये तम इव। तेषु सम्यग्जितेष्वजिह्वत्वादीन् धर्मान् वक्ष्यमाणानभ्यसेदित्यर्थः। के तेऽजिह्वत्वादय

•

शुद्धता), आत्मविनिग्रह (मन को वेदान्तश्रवण आदि में ही स्थिर करना, और विषयस्मरण आदि के प्रति अन्तःकरण का निरोध करना) करना चाहिये॥ ७॥

इन्द्रियेति—भोग्य वस्तुओं में आसक्ति का सर्वथा त्यागकरना, अनहंकार (जाति आदि के श्रेष्ठत्व का अहंकार न करना), गर्भवास, जन्म-मृत्यु, वृद्धावस्था, विविध प्रकार की व्याधियों के दुःख और दोषों को जानने का प्रयत्न करते रहना चाहिये॥ ८॥

असक्तिरिति—पुत्र-कलत्र-गृह-धन आदि में अनुराग एवं अभिष्वंग (ममता एवं इष्टत्व की बुद्धि) नहीं करनी चाहिये। तथा इष्ट एवं अनिष्ट वस्तु के प्राप्त होने पर बाह्य और आन्तर विकारों से सर्वदा रहित होना चाहिये। अर्थात् 'समचित्त' होना चाहिये॥ ९॥

मयीति—मुमुक्षु को विजातीय प्रत्यय से रहित होकर समाधि के द्वारा मुझ परमात्मा का अवलम्बन करके—'मैं ब्रह्म ही हूँ, और ब्रह्म मैं ही हूँ'—यह अनुसन्धान सर्वदा करते रहना चाहिये। एवं 'निदिध्यासन' के लिये जनसम्पर्क रहित देश में निवास और बहिर्मुख मनुष्यों के समूह में अरुचि करनी चाहिये॥ १०॥

अध्यात्मेति—वेदान्तशास्त्र को समझने के लिये सर्वदा तत्पर रहना चाहिये। तथा तत्त्वज्ञान के मोक्षरूप फल की प्राप्ति के लिये शास्त्रीय प्रक्रिया का सहारा (आश्रय) लेना चाहिये। महर्षियों ने 'अमानित्वम्' से लेकर 'तत्त्वज्ञानार्थदर्शनम्' तक 'ज्ञान प्राप्ति' के बीस साधनों को बताया है॥ ११॥

उक्त पाँच श्लोकों के द्वारा बताये गये 'अमानित्वादि' ज्ञानसाधनों का अभ्यास करते रहने से विपरीतज्ञान (भ्रान्ति-ज्ञान) के साधनभूत 'मानदम्भ' आदि की निवृत्ति हो जाती है।

शंका—'मलिनवासनाएँ' तो अनन्त हैं, और वे, 'अमूर्त' हैं। अतः झाड़ू (सम्मार्जनी) से इकट्ठी की हुई धूलिराशि के समान उन मलिनवासनाओं का त्याग करना शक्य (सम्भव) नहीं है। तब 'वासनाक्षय' कैसे हो सकेगा?

समा०—'प्रैषमन्त्र से सङ्कल्पपूर्वक उपवास जागरण'—न्याय से जब विद्वत्संन्यासी संकल्पपूर्वक पूर्वोक्त 'मैत्री-करुणा' आदि शुभवासनाओं का तथा 'अमानित्वादि' धर्मों का सम्पादन, उनके 'अभ्यास' के द्वारा कर लेता है, तब जैसे 'सूर्य' के उदित होने पर 'तम' की निवृत्ति हो जाती है, उसी प्रकार 'विद्वत्संन्यासी' की पूर्वोक्त समस्त मलिनवसनाएँ; निवृत्त हो जाती हैं।

तदनन्तर विद्वत्संन्यासी को 'अजिह्वत्वादि' 'षट्धर्मों' का अभ्यास करना चाहिये।

उन 'अजिह्वत्वादि धर्मों' को स्मृतियों में बताया गया है—(१) अजिह्व, (२) षण्डक, (३) पंगु, (४) अन्ध, (५) बधिर, (६) मुग्ध—इन षट् (६) धर्मों का सेवन करने से वह 'विद्वत्संन्यासी' जीवन्मुक्त हो जाता है। अतः मुमुक्षु को 'षट्धर्मों का सम्पादन अवश्य करना चाहिये।

द्वितीयाऽसंप्रज्ञातसमाधिकोटावन्तर्भवति ।

तस्यां चिन्मात्रवासनायां दृढाऽभ्यस्तायां पूर्वोक्तामलिनवासना सर्वा क्षीयते । अयं[1] वासनाक्षयाऽभ्यासः ॥ ४ ॥

●

इत्याकांक्षायां तत्प्रतिपादिकां स्मृतिं पठति—**अजिह्व इत्यादिना** । अजिह्वत्वादिधर्मेषु जितेषु किं कर्तव्यमित्याकांक्षायामाह—**तदनन्तरमिति** । केयं चिन्मात्रवासनेत्याकांक्षायामाह—**नामरूपात्मकस्येति** ।

चिन्मात्रवासनां विभजते—**ज्ञेयमिति** । प्रथमां चिन्मात्रवासनामभिनीय दर्शयति । **सर्वमिति** । तह्यभ्यस्यमानायाः चिन्मात्रवासनाया योगान्तर्भावः स्यादिति चेदिष्टापत्तेः प्रथमायाः चिन्मात्रवासनायाः कस्मिन्योगेऽन्तर्भाव इत्यत आह—**सैति** । द्वितीयामभिनीय दर्शयति—**कर्त्रिति** । ननु सर्वं चिन्मात्रं भावयामीति प्रथमा वासनोदाहृता, तत्र सर्वस्य चिन्मात्रत्वं कुतोऽवगम्यते ? इत्याशङ्क्य बलिशुक्रसंवादादवगम्यत इत्याह—**सर्वस्येति** ।

"किमिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत् । कस्य कोऽहं क एवेमे लोका इति वदाशु मे ॥"

●

उन 'अजिह्वत्वादि' षट्धर्मों के लक्षण शास्त्र में इस प्रकार बताये गये हैं—

(१) अजिह्व का लक्षण—

जो मुमुक्षु, अन्न आदि भक्ष्य, लेह्य, चोष्य पदार्थों का भक्षण करता हुआ भी 'यह पदार्थ, स्वादु' है, यह 'अस्वादु' है—नहीं कहता तथा हितकारक, सत्य और स्वल्प (मित) भाषण करता है, उसे 'अजिह्व' कहा गया है ।

(२) 'षण्डक' का लक्षण—

जैसे आज उत्पन्न (पैदा) हुई बालिका (स्त्री = नारी) को देखकर तथा शत (सौ) वर्ष की वृद्धा स्त्री को देखकर कोई किसी प्रकार का 'कामविकार' उत्पन्न नहीं होता, वैसे ही षोडशवर्ष की युवती स्त्री को देखकर भी जिस मुमुक्षु को कामविकार (कामवासना) उत्पन्न नहीं होता, उसे 'षण्डक' (नपुंसक) कहा गया है ।

(३) 'पङ्गु' का लक्षण—

जो शरीरनिर्वाहार्थ 'भिक्षा' के लिये ही जाता है, तथा मल-मूत्र विसर्जन करने के लिये ही जाता है, इसके अतिरिक्त अन्य किसी प्रयोजन के लिये नहीं चलता-फिरता । तथा जो एक योजन (४ कोस) से अधिक मार्ग तय नहीं करता अर्थात् नहीं चलता, उस मुमुक्षु को 'पङ्गु' कहा गया है ।

(४) 'अन्ध' का लक्षण—

किसी एक स्थान पर स्थित हुए या मार्ग चलते हुए भी जिस मुमुक्षु संन्यासी के चक्षुरिन्द्रिय (नेत्र), चतुर्युग भूमि से अधिक दूर तक नहीं देखते उसको 'अंध' कहा गया है । (चारहस्तपरिमाण को 'युग' कहते हैं । अतः चतुर्युगभूमि का परिमाण 'षोडश हस्त' होता है) ।

(५) बधिर का लक्षण—

हर्षप्रद अनुकूल वचन तथा शोकप्रद प्रतिकूल वचन सुनकर भी जो अनसुने के समान रहता है, अर्थात् जिसे हर्ष अथवा शोक नहीं होता है, उस मुमुक्षु को 'बधिर' कहा गया है ॥

(६) मुग्ध का लक्षण—

जिस मुमुक्षु संन्यासी के समीप, सांसारिक विषयों (पदार्थ = वस्तुओं) की प्राप्ति होने पर भी जो संन्यासी मुमुक्षु, अपनी समस्त इन्द्रियों से सम्पन्न एवं समर्थ रहता हुआ भी उन प्राप्त हुए विषयों की ओर प्रवृत्त नहीं होता, किन्तु निद्रित (सुप्त) पुरुष की तरह उन विषयों से उपरत रहता है, उसे 'मुग्ध' कहा गया है ।

इस प्रकार 'अजिह्वत्वादि' षट् धर्मों का अभ्यास करने के पश्चात् 'चिन्मात्र' वासना का अभ्यास करना चाहिये ।

---

१. सोऽयमिति टीकानुसारी पाठः ।

यत्तु सुवर्णादिवत् सावयवं कामादिवृत्तिरूपेण परिणममानमन्तःकरणं मननात्मकत्वान्मनः, तच्च सत्त्वरजस्तमो-

●

इति पृष्टवन्तं बलिं प्रति सर्वस्य चिन्मात्रत्वं शुक्रेणोपदिष्टमिति योजना। द्वितोयायाः कुत्रान्तर्भाव इत्याकांक्षायामाह—**द्वितीयेति**। एवं चिन्मत्रवासनायां जातायां किं भवतीत्याशङ्क्याह—**तस्यामिति**। वासनाक्षयसाधननिरूपणमुपसंहरति—**सोऽयमिति** ॥ ४ ॥

ननु जीवन्मुक्तिसाधनत्वेन मनोनाशाभ्यासः प्रतिज्ञातः, स नोपपद्यते। मनसो नित्यत्वेन तन्नाशायोगात्। न च तत्र प्रमाणाभावः; धर्मिग्राहकमानेनैव तत्सिद्धेः। तथाहि—सुखाद्युपलब्धयः करणसाध्याः जन्यसाक्षात्कारत्वात् रूपादिसाक्षात्कारवदिति। सुखादिसाक्षात्कारं प्रति चक्षुरादीनां करणत्वबाधात् तत्करणत्वेन सिध्यन्मनो नित्यमेव सिध्यति, तत्कारणानिरूपणात्। तथाहि—आत्मनो विभुत्वेन निरवयवतया तदारम्भकत्वायोगः। अत एवाकाशादोनां तदारम्भकत्वमपास्तम्। न च—पृथिव्यादोनां तथात्वमस्तीति—वाच्यम्; निःस्पर्शद्रव्यत्वेन तत्कार्यत्वायोगात्। अन्यस्य कारणान्तरस्यानिरूपणात्। न च—मायैव तत्कारणम-

●

यह 'नाम-रूपात्मक सम्पूर्ण जगत्' 'चैतन्य' में ही कल्पित है। उस कारण वह (जगत्) 'स्वतः सत्तास्फुरण' से रहित है। क्योंकि 'अधिष्ठानभूत चैतन्य' की सत्ता का स्फुरण होने पर ही 'जगत्' की सत्ता का स्फुरण होता है—यह सोचकर सम्पूर्ण जगत् के 'नाम' और 'रूप' दोनों अंशों में 'मिथ्यात्व' का निश्चय करना चाहिये। इस प्रकार मिथ्यात्व का निश्चय होने पर 'जगत्' के प्रति पूर्णतया 'उपेक्षा का भाव हो जाएगा। तब सर्वत्र परिपूर्ण 'अस्ति, भाति, प्रिय' प्रतीत होने वाला जो 'अधिष्ठाम चैतन्य' है, 'वही "मैं" हूँ'—इस प्रकार की भावना निरन्तर करते रहनी चाहिये। इसी 'भावना' को 'चिन्मात्र-वासना' कहते हैं।

यह 'चिन्मात्रवासना' भी दो प्रकार की होती है—(१) 'कर्ता-कर्म-करण' इस त्रिपुटी का स्मरण करते हुए 'चिन्मात्र-वासना', और (२) उक्त त्रिपुटी का स्मरण न रखते हुए 'केवल चिन्मात्रवासना का होना।

'सम्पूर्ण जगत् को मैं अपने 'मन' के द्वारा 'चिन्मात्र' स्वरूप समझता हूँ'—इस तरह की जाने वाली 'भावना' तो 'त्रिपुटीस्मरणपूर्वक चिन्मात्रवासना' है।

प्रश्न—इस प्रकार अभ्यास की जाने वाली चिन्मात्रवासना का तो 'योग' में ही अन्तर्भाव हो सकता है।

उत्तर—'योग' में उसका अन्तर्भाव यदि होता है, तो वह, हमें अभीष्ट ही है, अर्थात् हमारे लिये 'इष्टापत्ति' ही है। इस 'चिन्मात्रवासना' का 'सम्प्रज्ञात समाधि' में अन्तर्भाव हो सकता है। इस प्रथमकोटि की 'चिन्मात्रवासना' को ही योगसाधना सम्पन्न योगी लोग 'सम्प्रज्ञात समाधि' कहा करते हैं। और दूसरो 'कर्ता-कर्म-करण'—इस 'त्रिपुटी' का विस्मरण होकर 'मैं चिन्मात्र हूँ'—इस प्रकार की जो 'भावना' होती है, उसे 'केवल 'चिन्मात्रवासना' कहते हैं। इस 'केवल चिन्मात्र भावना (वासना) का 'असम्प्रज्ञात समाधि' में अन्तर्भाव हो सकता है। इस द्वितीय कोटि की 'केवल चिन्मात्र वासना' को ही योग-साधना सम्पन्न योगी लोग 'असम्प्रज्ञात समाधि' कहा करते हैं।

प्रश्न—'सर्वं चिन्मात्रं भावयामि'—इस प्रथम वासना में 'सर्वस्य चिन्मात्रत्वं'—'सम्पूर्ण विश्व' को चिन्मात्रता, किससे प्रतीत हुई? अर्थात् 'सब' को 'चिन्मात्र' समझने में कौन सा 'प्रमाण' है?

उत्तर—सब को चिन्मात्र समझने में प्रमाण 'बलि-शुक्र संवाद' ही है।

दैत्यगुरु शुक्राचार्य, अपने शिष्य 'राजा बलि' को बता रहे हैं—हे राजन्! इस सम्पूर्ण जगत् में उसका अधिष्ठान होकर 'चैतन्य' ही सर्वत्र व्याप्त है। उस कारण यह 'समस्त जगत्', 'चैतन्यमात्र' ही है, 'तू' भी चैतन्यरूप ही है, और 'मैं' भी 'चैतन्यरूप' ही हूँ तथा ये 'सब लोग' भी 'चैतन्यरूप' हैं। इस प्रकार को 'चिन्मात्रवासना' का दृढ़तर अभ्यास होने पर पूर्वोक्त 'मलिन वासनाओं' की निवृत्ति, अनायास हो जाती है। इसे ही 'वासनाक्षय का अभ्यास' कहते हैं ॥ ४ ॥

शंका—जीवन्मुक्ति के साधन के रूप में 'मनोनाश' के अभ्यास करने की प्रतिज्ञा की गई थी, किन्तु वह संभव नहीं हो सकती। क्योंकि 'मन' तो नित्य है। उसके नित्य होने से उसका नाश होना कभी भी संभव नहीं है।

यदि कहें कि उसके नित्य होने में कोई प्रमाण नहीं है, तो यह कहना उचित नहीं है। क्योंकि धर्मिग्राहक प्रमाण से ही उसकी नित्यता सिद्ध हो जाती है। तथाहि—सुखादि ज्ञान किसी करण से होता है क्योंकि सादि ज्ञान है जैसे रूपादि ज्ञान—इस [1]अनुमान प्रमाण से 'मन' की नित्यता, सिद्ध की जाती है। सुखादि साक्षात्कार के प्रति 'चक्षुरादि इन्द्रियों' की 'करणता' तो

१. 'सुखाद्युपलब्धयः करणसाध्याः जन्यसाक्षात्कारत्वात् रूपादिसाक्षात्कारवत्'—इत्यनुमानप्रयोगः।

गुणात्मकम्; तदाश्रयत्वेन सत्त्वरजस्तमोविकाराणां सुखदुःखमोहादीनामुपलम्भात्। रजस्तमोवृत्तिभिरुपचीयमानमन्तःकरणं

●

स्त्विति—वाच्यम्; तस्या दुर्वचत्वात्। नच—"मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वर"मित्यादि श्रुत्या तत्सिद्धिरिति—वाच्यम्; तस्यार्थान्तरपरत्वात्, अन्यथा तवापि तात्त्विकप्रमाणसिद्धतया मिथ्यात्वाभावप्रसङ्गात्। किञ्चैवमनित्यत्वे मनसोऽनन्तप्रागभावध्वंसाः कल्प्याः, अनन्तमनांसि चैकैकस्य कल्पनीयानि, ततश्च कल्पनागौरवम्। तस्माल्लाघवादेकैकस्यैकैकमेव नित्यं निरवयवं मनोऽभ्युपगन्तव्यम्; तस्य विभुत्वे आत्मसंयोगानङ्गीकारेणासमवायिकारणस्यात्ममनःसंयोगस्याभावेन ज्ञानाद्यनुत्पत्तिप्रसङ्गात्। तस्मादेव मनो नित्यं चेति तन्नाशासम्भवात् तन्नाशे जीवन्मुक्तिः सिद्ध्यतीत्यसङ्गतमिति—चेत् ?

अत्र ब्रूमः—"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"। "तन्मनोऽकुरुत" इत्यादिश्रुतिभ्यः परमात्मनः सकाशान्मनस उत्पत्त्यवगमेनानित्यमेव मनः; भावकार्यस्यानित्यत्वावश्यम्भावात्। न च—परमात्मनोऽद्वितीयत्वेन निरवयवतया कथं तदारम्भकत्वमिति—वाच्यम्; आरम्भवादानङ्गीकारेण तस्य तद्विवर्तत्वे बाधकाभावात्। न च—मायाया अप्रामाणिकत्वेनान्यस्योपाध्यन्तरस्यानिरूपणान्निरुपाधिकस्य परस्य कथं तद्विवर्ताधिष्ठानत्वमितिवाच्यम्; मायायां प्रमाणस्योक्तत्वात्।

न च—तस्याः प्रमाणसिद्धत्वे मिथ्यात्वाभावप्रसङ्ग इति—वाच्यम्; नहि प्रमाणैः तस्या वास्तवत्वं बोध्यते, "एकमेवाऽद्वितीयं" "नेह नानास्ति किञ्चन" इत्यादिश्रुतिविरोधप्रसङ्गात्, अपि त्वसत्त्वशङ्काव्यावृत्तिमात्रं क्रियते। नचैतावता मिथ्यात्वाभावप्रसङ्गः; सद्विलक्षणत्वस्यैव मिथ्यात्वलक्षणत्वात्। ततश्च मायोपहितात्परादाकाशाद्युत्पत्तौ महाभूतोपहिताद्ब्रह्मणोऽन्तःकरणोत्पत्तेः सम्भवात् मनोऽनित्यत्वमेव। किञ्च नित्यत्वे मनसो "येनाश्रुतं श्रुतं भवती"त्याद्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा बाध्येत, अतोऽपि कार्यमनित्यं मनः।

●

बाधित है, क्योंकि उनसे सुखादिकों का साक्षात्कार नहीं हुआ करता। तथापि सुखादिकों का साक्षात्कार तो सभी को होता है। करण (साधनरूप इन्द्रिय) के बिना 'साक्षात्कार' का होना कदापि संभव नहीं है। अतः सुखादिसाक्षात्कार का भी कोई 'करण' तो अवश्य ही होगा। बाह्येन्द्रियां तो सुखादिसाक्षात्कार के प्रति 'करण' (साधन) हो नहीं सकतीं। अतः उस साक्षात्कार के प्रति 'करण' मन को ही मानना होगा। इस रीति से 'मन' की नित्यता सिद्ध होती है। 'मन' का 'उत्पादक कारण' कोई नहीं है। तथाहि—'मन' का उत्पादक कारण 'आत्मा' हो नहीं सकता, क्योंकि वह 'विभु' होने से 'निरवयव' है। निरवयव होने से 'मन' का वह आरम्भक (उत्पादक) हो नहीं सकता। अतएव 'आकाशादिक' भी उसके आरम्भक (उत्पादक) नहीं कहे जा सकते। पृथिवी आदिकों को भी उसका आरम्भक (उत्पादक) नहीं कह सकते, क्योंकि 'मन' स्पर्श रहित द्रव्य है, उस कारण वह 'पृथिवी आदि' का कार्य नहीं हो सकता। इनके अतिरिक्त अन्य कोई कारण, 'मन' का आरम्भक है,—ऐसा किसी ने भी नहीं कहा है।

